युष्मद् अत्—'अत्' आदेश,

युष्म् अत्—शेषे लोपः,

युष्मत्—रूप।

(2) अस्मत्

अस्मद् भ्यस्—पूर्ववत्।

(3208) एकवचनस्य च *32* (396)

पञ्चम्या एकवचनस्य युष्मदस्मद्भ्यामुत्तरस्य 'अत्' इत्ययमादेशो भवति। त्वद् गच्छन्ति। मद् गच्छन्ति।

अर्थ—युष्मद् तथा अस्मद् अङ्गों से उत्तर पञ्चमी एकवचन (ङसि) के स्थान पर 'अत्' आदेश होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदा० (1) त्वत्
युष्मद् ङसि → युष्मद् अत्—सर्वादेश,
त्व अद् अत्—त्वमावेकवचने,
त्वद् अत्—अतो गुणे,
त्व् अत्—शेषे लोपः।

(2) मत्
अस्मद् ङसि → अस्मद् अत्—
म अद् अत् → मद् अत् — म् अत्।

(3209) साम आकम् *33* (400)

'साम' इति षष्ठीबहुवचनमागतसुट्कं गृह्यते। तस्य युष्मदस्मद्भ्यामुत्तरस्य 'आकम्' इत्ययमादेशो भवति। युस्माकम्। अस्माकम्। अथ किमर्थमागतसुट्को गृह्यते, न ह्यादेशविधानकाले सुड् विद्यते? तस्यैव तु भाविनः सुटो निवृत्त्यर्थम्। आदेशे कृते हि शेषे लोपे युष्मदस्मदोरकारान्तत्वात्सुट् प्राप्नोति, स स्थान्यन्तर्भूतत्वान्निवर्तते। दीर्घोच्चारणं सवर्णदीर्घार्थम्। अकमि तु सति ह्रस्वकरणे तद्विधानसामर्थ्यादेव सवर्णदीर्घत्वं न प्राप्नोति। तत्सामर्थ्यमेत्वं प्रति भविष्यतीति अकारकरणमेत्वनिवृत्त्यर्थमिति 'अतो गुणे' (6.1.97) पररूपत्वं स्यात्।

अर्थ—'सामः' के द्वारा सुट् आगमसहित षष्ठी बहुवचन का ग्रहण होता है। युष्मद् व अस्मद् अङ्ग से उत्तर 'साम्' के स्थान पर 'आकम्' आदेश होता है।

उदा० (1) युष्माकम्
युष्मद् आम् → युष्मद् आकम्—
युष्म आकम्—'शेषे लोपः' से अन्त्यलोप,
युष्माकम्—अकः सवर्णे दीर्घः।

युष्मद् आकम्—इस दशा में 'शेषे लोपः' से टिलोप,
युष्म् आकम्—रूप बना।

(2) अस्माकम्
अस्मद् आम् → अस्मद् आकम्—
अस्म आकम्—पूर्ववत्।

अथ०—यहाँ 'सामः' पद में सुट् आगमसहित 'आम्' का किसलिए ग्रहण किया गया है। 'आमि सर्वनाम्नः सुट्' के द्वारा अदन्त सर्वनामसञ्ज्ञक अङ्ग से उत्तर 'आम्' को 'सुट्' आगम होता है। युष्मद् व अस्मद् अङ्ग अदन्त नहीं है। अतः इनसे परे 'आम्' को 'सुट्' सम्भव नहीं। तब शङ्का होती है कि सूत्र में 'सामः' पद व्यर्थ है, इसके स्थान पर 'आमः' होना चाहिए था।

वस्तुतः यहाँ 'साम्' निर्देश के द्वारा भावी 'सुट्' को सूचित करता है। 'आकम्' आदेश करने के पश्चात् 'शेषे लोपः' (अन्त्यलोप पक्ष में) के द्वारा दकार का लोप होकर अकारान्त अङ्ग (युष्म/अस्म) बचता है। तब इनसे परे 'आम्' को सुट् आगम प्राप्त होता है। उसकी निवृत्ति के लिए 'साम्' ऐसा निर्देश किया गया है।

तात्पर्य यह है कि प्रकृत सूत्र के द्वारा 'आम्' के स्थान पर 'आकम्' आदेश किया गया है तथा अन्त्य लोपपक्ष में 'आम्' को प्राप्त सुट् आगम का निषेध होता है।

दीर्घो०—(शङ्का) 'आकम्' के स्थान पर 'अकम्' पाठ में लाघव होता है।

(समा०) 'आकम्' इस प्रकार दीर्घोच्चारण सवर्ण के लिए है। भाव यह है कि 'शेषे लोपः' के दो पक्ष हैं—अन्त्यलोपपक्ष तथा टिलोपपक्ष। टिलोपपक्ष में 'आकम्' करना अनिवार्य हो जाता है। अन्त्यलोपपक्ष में 'अतो गुणे' (युष्म अकम्) से प्राप्त पररूप की निवृत्ति तथा सवर्णदीर्घ के लिए 'आकम्' करना उचित है।

(शङ्का) 'आकम्' के स्थान पर 'अकम्' करना चाहिए। आपने कहा कि सवर्णदीर्घ के लिए करना चाहिए। सो विधान-सामर्थ्य से भी सवर्णदीर्घ नहीं होता है। यह उचित नहीं है। कारण कि उसका सामर्थ्य एत्व के प्रति होगा। अतः यह एत्व की निवृत्ति के लिए है। 'अकम्' की दशा में पररूप प्राप्त अवश्य होगा।

(3210) आत औ णलः *34* (2371)

आकारान्तादङ्गादुत्तरस्य णल औकारादेशो भवति। पपौ। तस्थौ। जग्लौ। मम्लौ। अत्रौत्वमेकादेशः, स्थानिवद्भावः, द्विर्वचनम्-इत्यनेन क्रमेण कार्याणि क्रियन्ते (म०भा०)। एकादेशादनवकाशत्वादौत्वं द्विर्वचनादपि परत्वादेकादेश इति।

अर्थ—आकारान्त अङ्ग से उत्तर 'णल्' के स्थान पर 'औ' आदेश होता है।

उदा० (1) पपौ

पा णल् > औ—लिट्, तिप्, परस्मैपदा०, 'वृद्धिरेचि' (6.1.85) से वृद्धि तथा द्वित्व (6.1.8) दोनों की प्राप्ति, परत्वात् वृद्धि की प्राप्ति, द्विर्वचनेऽचि, द्वित्व,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प पा औ—ह्रस्वः, वृद्धि।

(2) तस्थौ
स्था औ—पूर्ववत्,
थ स्था औ—शर्पूर्वाः खयः, ह्रस्वः,
त स्था औ—अभ्यासे चर्च।

(3) जग्लौ
ग्लै → ग्ला औ—पूर्ववत्,
ग ग्ला औ—ह्रस्वः, हलादिः शेषः,
जग्लौ—कुहोश्चुः, वृद्धिरेचि।

(4) मम्लौ
म्ला णल् → म्ला औ—शेष पूर्ववत्।

अत्रौत्व०—यहाँ औत्व, एकादेश, स्थानिवद्भाव तथा द्विर्वचन—इस प्रकार कार्य करने चाहिये। पा णल्—इस दशा में द्वित्व, सवर्णदीर्घ एकादेश तथा 'औ' आदेश—इन तीनों की युगपत् प्राप्ति है। काशिकाकार के अनुसार प्रथम 'आत औ णलः' से औकार आदेश, पश्चात् 'वृद्धिरेचि' से एकादेश, तब 'द्विर्वचनेऽचि' से स्थानिवद्भाव तथा अन्त में द्वित्व करना चाहिए।

एकादेश०—एकादेश से पूर्व औत्व होता है। 'पा णल्' इस स्थिति में यदि प्रथम एकादेश करते हैं तो औत्व प्राप्त ही नहीं रहेगा। अतः औत्व के निरवकाश होने से एकादेश से पूर्व औत्व ही किया जाता है।

द्विर्वचना०—द्वित्व की अपेक्षा परवर्त्ती होने से वृद्धि एकादेश द्विर्वचन से पूर्व ही होता है। तब स्थानिवद्भाव तथा द्वित्व करना चाहिए। यथा—

पा णल् → पा औ → पौ → पा पौ → पपौ।

(3211) तुह्योस्तातङाशिष्यन्यतरस्याम् *35* (2197)

तु, हि–इत्येतयोराशिषि विषये तातङादेशो भवत्यन्यतरस्याम्। जीवताद्भवान्। जीवतात्त्वम्। जीवतु भवान्। जीव त्वम्। ङित्करणं गुणवृद्धिप्रतिषेधार्थमिति सर्वादेशस्तातङ् भवति। ङित्त्वाच्चास्य स्थानिवद्भावाद्यत्पित्त्वं प्राप्नोति, तन्निवर्त्तते; ङिच्च पित्र भवति। तेन 'ब्रुव ईट्' (7.3.93) इति ब्रूताद्भवान्–इतीण्न भवति। आशिषीति किम्? ग्रामं गच्छतु भवान्। गच्छ त्वम्।

तातङि ङित्त्वं संक्रमकृत्स्यादन्त्यविधिश्चेत्तच्च तथा न।
हेरधिकारे हेरधिकारो लोपविधौ तु ज्ञापकमाह॥
तातङो ङित्त्वसामर्थ्यान्नायमन्त्यविधिः स्मृतः।
न तद्वदनङादीनां तेन तेऽन्त्यविकारजाः॥

अर्थ—आशीर्वाद अर्थ गम्यमान हो तो 'तु' और 'हि' के स्थान पर विकल्प से 'तातङ्' आदेश होता है।

ङकार व अकार की इत् सञ्ज्ञा होती है। 'ङिच्च' से 'तातङ्' आदेश अन्त्य वर्ण के स्थान पर प्राप्त होता है; परन्तु परत्वात् 'अनेकाल्शित्सर्वस्य' के द्वारा सर्वादेश होता है।

'तु' के द्वारा लोट् प्र०पु० एकवचन तथा 'हि' के द्वारा लोट् म०पु० एकवचन का ही ग्रहण होता है।

(शङ्का) प्र०पु० बहुवचन के 'अन्तु' में 'तु' अंशतः होता है। अतः 'तु' के द्वारा इसका ग्रहण होना चाहिये। 'अर्थवद्ग्रहणे नाऽनर्थकस्य' परिभाषा से यहाँ इस 'तु' का ग्रहण नहीं होता।

'तु' तिप् का आदेशभूत होने से स्थानिवद्भाव से पित् है। 'अनुदात्तौ सुप्पितौ०' से यह अनुदात्त है। इसके स्थान पर होने वाला 'तातङ्' आदेश भी अनुदात्त होता है।

इसी प्रकार आतिदेशिक अपित्त्व के कारण उदात्त 'हि' को उदात्त 'तातङ्' ही होता है।

उदा० (1) जीवतात्
जीव् तिप्—आशिषि लिङ्लोटौ, लोट्, शप्,
जीवतु—एरुः,
जीवतात्—तातङ्।

(2) जीवतु—पक्ष में।

(3) जीवतात्
जीव हि—सिप्, शप्, सेर्ह्यपिच्च,
जीवतात्—तातङ्।

(4) जीव
पक्ष में—अतो हेः।

ङित्कर०—अष्टाध्यायी में प्रत्यय को ङित् करण के दो प्रयोजन होते हैं—

(क) **अन्तादेश**—ङित् होने से 'ङिच्च' से अन्तादेश होता है; यथा—आनङ् ऋतो द्वन्द्वे।

(ख) **गुण-वृद्धि-निषेध**—ङित् होने से इसके परे रहते 'क्ङिति च' से गुण व वृद्धि का निषेध होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यहाँ पर भी 'तातङ्' में ङकार अनुबन्ध जोड़ने में दो प्रयोजन हैं—

(क) **गुण-वृद्धि-निषेध**—तातङ् के ङित् होने से गुण व वृद्धि आदेशों का निषेध होता है; यथा—

(5) युतात्
यु तात्—शप्, शप् का लुक्, तातङ्, 'उतो वृद्धिर्लुकि हलि' से वृद्धि प्राप्त, उसका निषेध।

(6) द्विष्टात्
द्विष् तात्—शप्, शप् का लुक्, 'पुगन्तलघूपधस्य' से प्राप्त गुण का निषेध।

यहाँ ध्यातव्य है कि 'तातङ्' का ङित् करण गुण-वृद्धि-प्रतिषेध के लिये है; अन्तादेश के लिए नहीं है।

(ख) **पित्त्व-निवृत्ति**—'तातङ्' में ङकार अनुबन्ध का दूसरा प्रयोजन है—पित् धर्म की निवृत्ति। स्थानिवद्भाव से 'तातङ्' में पित्त्व प्राप्त है। इसे ङित् करने से पित्त्व की निवृत्ति हो जाती है। कहा गया है—ङिच्च पित्र, पिच्च ङित्र। इसके परिणाम-स्वरूप 'ब्रूतात्' में ईट् नहीं होता है।

(7) ब्रूतात्
ब्रू तातङ्—'ब्रुव ईट्' से प्राप्त 'ईट्' नहीं हुआ।

आशिषी०—आशीर्वाद अर्थ में ही 'तातङ्' होता है।

(8) गच्छतु ग्रामं भवान्
आशीर्वाद अर्थ नहीं है, सामान्य विधि है। 'तातङ्' नहीं हुआ।

(9) गच्छ त्वं ग्रामम्
पूर्ववत् 'तातङ्' नहीं हुआ।

तातङि०—'तातङ्' में ङकार अनुबन्ध गुण व वृद्धि के प्रतिषेध के लिये किया गया है। (इसका दूसरा प्रयोजन आतिदेशिक पित्त्व धर्म की निवृत्ति है)।

अन्त्य०—'ङिच्च' के द्वारा 'तातङ्' के विषय में अन्त्य विधि मानना अनुचित है। 'तातङ्' में 'ङ्' अन्तादेश के लिए नहीं है।

हेरधिका०—'अतो हेः' इससे 'हेः' का अधिकार सुलभ रहने पर भी 'हुझल्भ्यो हेर्धिः' में 'हेः' का ग्रहण लोपविधि में ज्ञापक है। इससे ज्ञापित होता है कि स्थानिवद्भावेन प्राप्त अथवा आदेशभूत 'हि' का लोप नहीं होता, अपितु 'हि' रूप से ही जो 'हि' है, उसी का लोप होता है।

तातङो०—'तातङ्' को ङित्त्व-सामर्थ्य से भी अन्तादेश नहीं माना जा सकता। तब अनेकाल् होने से यह सर्वादेश ही होता है।

न तद्व०—परन्तु 'अनङ्' आदि के विषय में ऐसा नहीं है। वहाँ तो अन्तादेश ही होता है।

(3212) विदे शतुर्वसुः *36* (3105)

'विद ज्ञाने'-इत्येतस्माद्धातोरुत्तरस्य शतुर्वसुरादेशो भवति। विद्वान्, विद्वांसौ, विद्वांसः। स्थानिवद्भावादुगित्कार्ये सिद्धे वसोरुकारकरणम् 'वसोः सम्प्रसारणम्' (6.4.131) इत्यत्र क्वसोरपि सामान्यग्रहणार्थम्। 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य' (व्या०प०) इत्येतदपि न भवति; तथा सत्युकारकरणमनर्थकं स्यात्। अन्यतरस्यांग्रहणं केचिदनुवर्त्तयन्ति। विदन्, विदन्तौ, विदन्तः।

अर्थ—विद् अङ्ग से उत्तर शतृ प्रत्यय के स्थान पर 'वसु' आदेश होता है। वसु के उकार की इत् सञ्ज्ञा है।

धातुपाठ में अनेक गणों में विद् धातु का पाठ प्राप्त होता है—

(क) विद सत्तायाम् (दि०),
(ख) विद विचारणे (रु०),

ये दोनों धातु आत्मनेपदी हैं। इनसे शतृ प्राप्त नहीं है। अतः इनका ग्रहण यहाँ सम्भव नहीं है।

(ग) विद् लाभे (तुदा०)
यह उभयपदी है। परस्मैपद की दशा में ही 'शतृ' प्राप्त है; परन्तु यहाँ 'श' विकरण का व्यवधान होने से इसका ग्रहण नहीं होता है।

(घ) विद (अदा०)।
यहाँ इसी आदादिक धातु का ग्रहण है।

उदा० (1) विद्वान्
विद् शतृ—लटः शतृशानचा०,
विद् अत्—शप्, शप् का लुक्,
विद् वसु सु—विभक्तिकार्य।

(2) विद्वांसौ
विद्वस् औ—पूर्ववत्, नुम्, उपधादीर्घ।

(3) विद्वांसः
विद्वस् जस्।

(4) विदन्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विद् शतृ—पक्ष में 'वसु' नहीं हुआ,
विदत् सु—विभक्तिकार्य।

(5) विदन्तौ
विद् औ—नुम् आदि।

(6) विदन्तः
विदत् जस्—पूर्ववत्।

स्थानिव०—शतृ के स्थान पर 'वसु' न करके 'वस्' कर दिया जाय तो मात्रालाघव होता है तथा स्थानिवद्भाव से 'वस्' उगित् होकर उससे वे सभी कार्य होते हैं, जो 'वसु' को प्राप्त हैं।

(समा०) 'वसु' में उकार अनुबन्ध का फल यह है कि 'वसोः सम्प्रसारणम्' में क्वसु आदि का सामान्य ग्रहण हो सके। 'एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य ग्रहणम्' (अर्थात् एक अनुबन्ध वाले शब्द के द्वारा दो अनुबन्ध वाले शब्द का ग्रहण नहीं होता है)—यह परिभाषा भी यहाँ लागू नहीं होती। यदि ऐसा होता तो उकार अनुबन्ध का जोड़ना व्यर्थ हो जाता।

अन्यतर०—कुछ विद्वान् इस सूत्र में 'अन्यतरस्याम्' का अनुवर्त्तन स्वीकार करते हैं। अतः पक्ष में विदन् आदि रूप भी बनते हैं।

(3213) समासेऽनञ्पूर्वे क्त्वो ल्यप् *37* (3332)

समासेऽनञ्पूर्वे 'क्त्वा' इत्येतस्य 'ल्यप्' इत्ययमादेशो भवति। प्रकृत्य। प्रहृत्य। पार्श्वतःकृत्य। नानाकृत्य। द्विधाकृत्य। समास इति किम्? कृत्वा। हृत्वा। अनञ्पूर्व इति किम्? अकृत्वा। अहृत्वा। परमकृत्वा। उत्तमकृत्वा। 'अनञ्' इति हि नञोऽन्यदनञ् नञ्सदृशमव्ययं परिगृह्यते। तेन नञ् अनव्ययं चानञ् न भवति। स्नात्वाकालकादिषु मयूरव्यंसकादिषु निपातनाल्ल्यबादेशो न भवति। अथ वा 'समासे' इति निर्धारणे सप्तमी। तेन क्त्वान्तः समास एव परिगृह्यते। स च 'येन विधिस्तदन्तस्य' (व्या०प०) इत्यनेन तदन्तविधिना, न तु 'कृदग्रहणे गतिकारकपूर्वस्यापि' (व्या०प०) इति। तथा च 'अनञ्पूर्वे' इत्युच्यते। गतिकारकपूर्वस्यैव तु ग्रहणे सति नञ्पूर्वस्य प्रसङ्ग एव नास्ति, नञ्न गतिः, न च कारकमिति (म०भा०)। प्रधाय, प्रस्थायेत्यादिषु हिप्रभृतीन् 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधत एव' (व्या०प०)-इति ज्ञापितमेतत्।

अर्थ—नञ् नहीं है पूर्वपद में जिसके, ऐसे समास में 'क्त्वा' प्रत्यय के स्थान पर 'ल्यप्' आदेश होता है।

लकार व पकार की इत्सञ्ज्ञा होती है। लित् स्वरार्थ है तथा पित्करण तुक् आगम के लिये हैं। क्त्वा के स्थान पर होने वाला 'ल्यप्' स्थानिवद्भाव से कित् व आर्धधातुक हुआ।

उदा० (1) प्रकृत्य
प्र कृ क्त्वा—समानकर्तृकयोः पूर्वकाले, एकाच उपदेशेऽनुदात्तात् से इट् का निषेध,
प्र कृ क्त्वा—सार्वधातुकार्धधातु० से प्राप्त गुण का 'क्ङिति च' से निषेध, कुगतिप्रादयः से समास,
प्र कृ ल्यप्—अनुबन्धलोप,
प्र कृ त् य सु—ह्रस्वस्य पिति कृति तुक्, प्रातिपदिक सञ्ज्ञा, क्त्वातोसुन्कसुनः,
प्रकृत्य—अव्ययादाप् सुपः।

(2) प्रहृत्य (पूर्ववत्)।

(3) पार्श्वतः कृत्य
पार्श्वतस् कृ क्त्वा—पूर्ववत् समास आदि,
पार्श्वतः कृत्य—ल्यप्, तुक्, सु।

(4) नानाकृत्य (पूर्ववत्)।

(5) द्विधाकृत्य (पूर्ववत्)।

समास०—समास में ही 'क्त्वा' के स्थान पर 'ल्यप्' होता है।

(6) कृत्वा
कृ क्त्वा—समास नहीं है, ल्यप् नहीं हुआ,
कृत्वा सु—प्रातिपदिक सञ्ज्ञा, सु, लुक्।

(7) हृत्वा (पूर्ववत्)।

अनञ्पूर्व०—नञ् नहीं है पूर्वपद में जिसके, ऐसे समास में 'क्त्वा' को 'ल्यप्' होता है।

(8) अकृत्वा
पूर्वपद में नञ् है, ल्यप् नहीं हुआ।

(9) अहृत्वा (पूर्ववत्)।

(10) परमकृत्वा (पूर्ववत्)।

अनञ्०— 'अनञ्' का अर्थ है—जो नञ् के सदृश है; परन्तु नञ् को छोड़कर। तब नञ् तथा अनव्यय अनञ् नहीं होता है। भाव यह है कि समास के पूर्वपद में नञ् से भिन्न कोई अव्यय हो तो क्त्वा को 'ल्यप्' होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्नात्वा०—स्नात्वाकालक आदि में मयूरव्यंसकादि के कारण निपातन से ल्यप् नहीं होता है।

अथवा०—अथवा 'समासे' इस पद में निर्धारण अर्थ में सप्तमी है। तब समासों में जो क्त्वा प्रत्ययान्त समास, उसका ही ग्रहण किया जाता है और 'येन विधिस्तद०' से तदन्तविधि से होता है; 'कृद्ग्रहणे गतिकारकपूर्वस्याऽपि' इससे नहीं। इसीलिये अनञ्पूर्वे० ऐसा कहा जाता है। यदि गतिपूर्वक और कारकपूर्वक का ही ग्रहण होता है, तब नञपूर्वक क्त्वा के स्थान पर ल्यप् प्राप्त ही नहीं है। कारण कि नञ् की न तो गतिसञ्ज्ञा है; न ही कारकसञ्ज्ञा है।

प्रधाय०—प्रधाय व प्रस्थाय आदि स्थलों पर 'हि' आदि अन्तरङ्ग विधियों का बाध बहिरङ्ग ल्यप् से हो जाता है।

(12) प्रधाय

प्र धा क्त्वा—'दधातेर्हिः' से 'हि' प्राप्त होता है, जो अन्तरङ्ग है। ल्यप् बहिरङ्ग विधि है। तदपि ल्यप् आदेश 'हि' का बाध करता है,

प्र धा य सु—विभक्तिकार्य।

(13) प्रस्थाय

प्र स्था क्त्वा—'द्यतिस्यतिमास्थामिति किति' से इत्त्व प्राप्त है, इसे बाध कर 'ल्यप्' होता है।

न्यास में निम्नलिखित अतिरिक्त उदाहरण दिखाये गये हैं—

(14) प्रखन्य

प्र खन् क्त्वा—'जनसनखनाम्०' से आत्त्व प्राप्त था।

(15) प्रणम्य

प्र नम् क्त्वा—'अनुनासिकस्य क्विझलोः' से दीर्घादेश प्राप्त था।

(16) आपृच्छ्य

आ प्रच्छ् क्त्वा—'च्छ्वोः शूडनुनासिके च' से शत्व प्राप्त था।

(17) प्रतिदीव्य

प्रति दिव् क्त्वा—पूर्वसूत्र से 'ऊठ्' प्राप्त था।

(18) प्रपठ्य

प्र पठ् क्त्वा—वलादिक इट् प्राप्त था।

(3214) क्त्वापि छन्दसि *38* (3560)

समासेऽनञ्पूर्वे 'क्त्वा' इत्येतस्य 'क्त्वा' इत्ययमादेशो भवति, अपिशब्दाल्ल्यबपि भवति छन्दसि विषये। 'कृष्णां वासो यजमानं परिधापयित्वा' (काठ०सं० 6.8) 'प्रत्यञ्चमर्कं प्रत्यर्पयित्वा' (अथ० 2.12.55)। ल्यबपि भवति—'उद्धृत्य जुहोति' (काठ०सं० 6.8)। 'वा छन्दसि' इति नोक्तम्, सर्वोपाधिव्यभिचारार्थम्। तेनासमासे ल्यब्भवति—अर्च्य तान् देवान् गतः। छन्दोऽधिकारः 'आज्जसेरसुक्' (7.1.50) इति यावत्।

अर्थ—नञ् नहीं है पूर्वपद में जिसके, ऐसे समास में क्त्वा के स्थान पर क्त्वा होता है तथा ल्यप् भी (पर्यायेण) होता है, वेद के विषय में। 'अपि' पद के द्वारा विधि का व्यभिचार उपस्थित होता है।

उदा० (1) परिधापयित्वा (काठ० सं० 6.8)

परि धा णिच् क्त्वा—पुक् हुआ, 'क्त्वा' के स्थान पर 'ल्यप्' प्राप्त था; परन्तु नहीं हुआ।

(2) प्रत्यर्पयित्वा (शौ०सं० 12.2.55, 2.12.55.?)

पूर्ववत्—'ल्यप्' नहीं हुआ। 'अर्तिह्री०' से पुक् तथा 'पुगन्तलघूप०' से गुण।

(3) उद्धृत्य

उद् हृ क्त्वा—'ल्यप्' हुआ है,

उद्धृत्य—झयो होऽन्यतरस्याम्।

वा छन्दसि०—प्रकृत सूत्र के स्थान पर 'वा च्छन्दसि' पाठ में लाघव होता है; परन्तु 'अपि' पद का प्रयोग 'बहुलम्' पद के समानार्थ में ही होता है। अतः आचार्य ने सभी विधियों के व्यभिचारार्थ 'अपि' पद का प्रयोग किया है। तब असमास की दशा में भी 'ल्यप्' होता है।

(4) अर्च्य

अर्च् क्त्वा—'ल्यप्' प्राप्त नहीं था।

छन्दो०—'छन्दसि' पद का अधिकार 'आज्जसेरसुक्' (7.1.50) सूत्रपर्यन्त है।

(3215) सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः *39* (3561)

छन्दसि विषये सुपां स्थाने-सु, लुक्, पूर्वसवर्ण, आ, आत्, शे, या, डा, ड्या, याच्, आल्-इत्येते आदेशा भवन्ति। सु-'अनृक्षरा ऋजवः सन्तु पन्थाः (ऋ० 10.84.23) पन्थान इति प्राप्ते। *सुपां सुपो भवन्तीति वक्तव्यम्* (ऋ० 10.85.23)। धुरि दक्षिणायाः (ऋ०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

1.164.19)। दक्षिणायामिति प्राप्ते। *तिङां तिङो भवन्तीति वक्तव्यम्* (म०भा० 7.1.39)। चषालं ये अश्वयूपाय तक्षति। (ऋ० 1.161.6)। तक्षन्तीति प्राप्ते। लुक्–'आर्दे चर्मन्' (तै०सं० 1.5.9.3)। लोहिते चर्मन्। चर्मणीति प्राप्ते। हविर्द्धनि यत्सुन्वन्ति तत्सामिधेनीरन्वाह। यस्मिन्सुन्वन्ति तस्मिन्सामिधेनीरिति प्राप्ते। पूर्वसवर्णः–'धीती' (ऋ० 1.164.8)। मती। 'सुष्टुती' (ऋ० 2.32.4)। धीत्या, मत्या, सुष्टुत्या इति प्राप्ते। आ–'उभा (द्वा) यन्तारा (तै०सं० 4.6.9.3)। उभौ यन्तारौ इति प्राप्ते। आत्–न ताद् ब्राह्मणाद् (ब्राह्मणान्) निन्दामि। तान् ब्राह्मणानिति प्राप्ते। शे–'न युष्मे वाजबन्धवः' (ऋ० 8.68.19)। 'अस्मे इन्द्राबृहस्पती' (ऋ० 4.49.4)। यूयं वयमिति प्राप्ते। यूयादेशः, वयादेशश्च छन्दसत्वान्न भवति। या–'उरुया' (मै०3.7.8)। धृष्णुया। उरुणा, धृष्णुनेति प्राप्ते। डा–'नाभा पृथिव्याम्' (अथ० 7.61.1)। नाभौ पृथिव्यामिति प्राप्ते। ड्या–'अनुष्टयौ च्यावयतात्' (तै० 4.13.4.25)। अनुष्टुभेति प्राप्ते। याच्–'साधुया' (ऋ० 10.66.12) साध्विति सोर्लुकि प्राप्ते। आल्–'वसन्ता यजेत' (मै०2.3.4)। वसन्त इति प्राप्ते। *इयाडियाजीकाराणामुपसंख्यानम्* (म०भा०)। इया–'उर्विया (परिख्यन्) परिधानम् (ऋ० 1.97.2)। दार्विया। उरुणा, दारुणेति प्राप्ते। डियाच्–सुक्षेत्रिया। सुगात्रिया। सुक्षेत्रिणा, सुगात्रिणेति प्राप्ते। ईकारः–'दृतिं न शुष्कं सरसी शयानाम्' (ऋ० 7.10.3.2)। सरसि शयानमिति प्राप्ते। *आङ्याजयारामुपसंख्यानम्*। आङ्–प्रबाहवा (ऋ० 2.28.2)। प्रबाहुनेति प्राप्ते। अयाच्–'स्वप्नया संचसेजनम्' (अथ० 5.7.8)। स्वप्नेनेति प्राप्ते। आयर्–सिन्धुमिव नवया (ऋ० 1.97.8)। नावेति प्राप्ते।

अर्थ—वेद में सुप् प्रत्ययों के स्थान पर सु, लुक्, पूर्वसवर्ण, आ, आत्, शे, या, डा, ड्या, याच् तथा आल् होते हैं।

उदा० (क) सुपां सु—

(1) पन्थाः (ऋ० 10.84.23)

पथिन् जस्—'जस्' के स्थान पर 'सु' हुआ।

पथिन् सु → पन्थाः।

सुपां—सुप् के स्थान पर अन्य सुप् हो जाता है, वेद में। न्यासकार ने पूर्वसूत्र से 'अपि' पद का अनुवर्त्तन किया है।[1] तब अनुक्त समुच्चय का ग्रहण होता है। 'अपि' पद सर्वोपाधि व्यभिचारार्थक होता है। अतः सुपों के स्थान पर अन्य सुप् हो जाया करता है।

(2) दक्षिणायाः (ऋ० 1.164.19)

दक्षिणा ङि—'ङस्' हो गया है।

तिङां०—वेद में तिङ् के स्थान पर भिन्न तिङ् हो जाता है।

(3) तक्षति (ऋ० 1.161.6)

तक्ष् झि—'तिप्' हो गया है।

(ख) सुपां लुक्—

(4) चर्मन् (तै०सं० 7.5.9.3)

चर्मन् ङि—'ङि' का लुक् हुआ।

(5) यत्

यद् ङि—प्रत्यय का लुक् हुआ।

(ग) पूर्वसवर्णः—

(6) धीती (ऋ०1.164.8)

धीती टा—पूर्वसवर्ण हुआ।

(7) मती

पूर्ववत् पूर्वसवर्ण।

(8) सुष्टुती (ऋ०2.32.4)

पूर्ववत्—टा।

(घ) सुपाम् आ—

(9) यन्तारा (तै०सं० 4.6.9.3)

यन्तृ औ—'औ' के स्थान पर 'आ' हुआ है।

यन्तार् आ—उपधादीर्घ।

(ङ) सुपाम् आत्—

(10) ताद् ब्राह्मणात्

यहाँ सुप् के स्थान पर 'आत्' आदेश हुआ है। काशिकाकार के अनुसार यहाँ शस् विभक्ति को 'आत्' हुआ है।[1] न्यासकार[2] तथा भट्टोजिदीक्षित[3] के अनुसार यहाँ 'अम्' को 'आत्' हुआ है।

(च) सुपां शे—

(11) युष्मे (ऋ० 8.68.19)

'जस्' के स्थान पर 'शे' आदेश हुआ है।

1. न्यास० 7.1.39—पूर्वसूत्रादपिशब्दोऽनुवर्त्तते।

1. काशि० 7.1.39—तान् ब्राह्मणान् इति प्राप्ते।
2. न्यास० 7.1.39—ब्राह्मणशब्दाच्च द्वितीयैकवचनं स्यात्।
3. वै०सि०कौ० सूत्र।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(12) अस्मे (ऋ० 4.49.4)
पूर्ववत् 'शे'।

(छ) सुपां या—
(13) उरुया (मै०सं० 3.7.8)
'टा' के स्थान पर 'या' हुआ है।

(14) धृष्णुया (मा०सं० 27.38) (पूर्ववत्)।

(ज) सुपां डा—
(15) नाभा (शौ०सं० 7.61.1)
'ङि' के स्थान पर 'डा' हुआ है।

(झ) सुपां ड्या—
(16) अनुष्ट्या (मै०सं० 4.13.4)
अनुष्टुभ् टा—'टा' के स्थान पर 'ड्या'—
अनुष्ट् या—टि का लोप।

(ञ) सुपां याच्—
(17) साधुया (ऋ० 1.46.11)
साधु सु—'स्वमोर्नपुंसकात्' से लुक् प्राप्त,
साधु याच्—'सु' को 'याच्' हुआ।

(ट) सुपाम् आल्—
(18) वसन्ता (मै०सं० 2.3.4)
'ङि' के स्थान पर 'आल्' हुआ

इयाडि—वेद में सुपों के स्थान पर इया, डियाच् तथा ईकार, आदेश होते हैं।

(19) उर्विया (ऋ० 1.97.2)
'टा' के स्थान पर 'इया' हुआ।

(20) दार्विया (पूर्ववत्)।
(21) सुक्षेत्रिया
सुक्षेत्रिन् टा—'टा' के स्थान पर 'डियाच्',
सुक्षेत्र् इया—टिलोप।

(22) सुगात्रिया
सुगात्रिन् डियाच्—पूर्ववत्।

(23) सरसी (ऋ० 7.103.2)
सरस् ङि—'ङि' के स्थान पर 'ई'।

आड्या०—वेद में सुप् प्रत्ययों के स्थान पर आङ्, अयाच् तथा अयार् आदेश होते हैं।

(24) प्रबाहवा (ऋ० 2.28.2)
'टा' के स्थान पर 'आङ्'।

(25) स्वप्नया (अथ० 5.7.8)
'टा' को 'अयाच्'।

(26) नावया (ऋ० 1.97.8)
'टा' के स्थान पर 'अयार्'।

(3216) अमो मश् *40* (3562)

'अम्' इति मिबादेशो गृह्यते। तस्य छन्दसि विषये मशादेशो भवति। 'वधीं वृत्रम्' (ऋ० 1.165.8)। क्रमीं वृक्षस्य शाखाम्। लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि (6.4.75) इत्यडागमाभावः। शित्करणं सर्वादेशार्थम्। मकारस्यापि हि मकारवचनमनुस्वारनिवृत्त्यर्थं स्यात्।

अर्थ—'अम्' के द्वारा 'मिप्' के आदेशभूत 'अम्' का ग्रहण होता है। वेद के विषय में 'अम्' को 'मश्' आदेश होता है। यह सर्वादेश होता है।

उदा० (1) वधीम् (ऋ० 1.165.8)
हन् स् अम्—मिप्, तस्थस्थमिपां०, सिच्,
हन् स् मश्—मिप्, अनुबन्धलोप,

वध् इट् स् ईट् म्—लुङि च, आर्धधातुकस्येड्०, अस्ति-सिचो०, इट ईटि,

वध् इ ई म्—बहुलं छन्दस्यमाङ्योगेऽपि, अट् अभाव।

(2) क्रमीम् (पूर्ववत्)।

शित्कर०—'मश्' को शित् सर्वादेशार्थ किया गया है। 'मश्' में अकार उच्चारणार्थ है।[1] मकार के स्थान पर मकार का विधान अनुस्वार की निवृत्ति के लिए है।

(3217) लोपस्त आत्मनेपदेषु *41* (3563)

आत्मनेपदेषु यस्तकारस्तस्य छन्दसि विषये लोपो भवति। 'देवा अदुह्र' (मै० 4.2.1)। गन्धर्वाप्सरसो अदुह्र। अदुहतेति प्राप्ते। 'दुह्रामश्विभ्यां पयो अघ्न्येयम्' (ऋ० 1.64.27)। दुग्धामिति प्राप्ते। 'दक्षिणतः शये'। शेत इति प्राप्ते। अपीत्यधिकारान्न भवति–तत्र आत्मानमनृतं कुरुते। आत्मनेपदेष्विति किम्? 'वत्सं दुहन्ति कलशं चतुर्बिलम्' (तै०ब्रा० 3.7.4.16)।

अर्थ—आत्मनेपद में वर्त्तमान तकार का लोप होता है, वेद के विषय में।

उदा० (1) अदुह्र (मै०सं० 4.2.1)

1. न्यास० 7.1.40—अकार उच्चारणार्थः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दुह् अत्—लङ्, शप्, लुक्, आत्मनेपदेष्वनतः,
दुह् र् अ त—बहुलं छन्दसि, तकारलोप,
अ दुहर् अ अ—अतो गुणे।

(2) अदुहत
लोक में तकारलोप नहीं होता है।

(3) दुह्राम् (ऋ० 1.64.27)
दुह् झ—लोट्, शप्, शप् का लुक्, आत्मनेपदेष्वनतः,
दुह् अते—टि को एत्व, आमेतः,
दुह् अताम्—रुट् आगम, तकारलोप,
दुहर् अ आम्—अकः सवर्णे दीर्घः।

(4) दुग्धाम्
दुह् त—लोट्, शप्, शप् का लुक्,
दुहते—एत्व,
दुह् ताम्—आमेतः,
दुघ् ताम्—दादेर्धातोर्घः,
दुघ् धाम्—झषस्तथोर्धोऽधः,
दुग्धाम्—झलां जश् झशि। लोक में।

(5) शये
शी त—लट्,
शी शप् ते—शप्, टि को एत्व,
शे ते—शप् का लुक्, शीङः सार्वधातुके गुणः,
शे ए—तकारलोप, अयादेश।

(6) शेते
शी त—शप्, शप् का लुक्,
शेते—गुण, एत्व।

अपी०—'क्त्वाऽपि च्छन्दसि' से 'अपि' पद का अनुवर्त्तन है। अतः तकारलोप नहीं होता है।

(7) कुरुते
यहाँ तकारलोप नहीं हुआ।

आत्मने०—आत्मनेपद में वर्त्तमान तकार का लोप होता है।

(8) दुहन्ति
दुह् झि—शप्, शप् का लुक्,
दुह् अन्ति—आत्मनेपद नहीं है, अतः तकारलोप नहीं हुआ।

(3218) ध्वमो ध्वात् *42* (3564)

छन्दसि विषये ध्वमो ध्वादित्ययमादेशो भवति। 'अन्त-रे्वोष्मा॑णं॒ वारयध्वात्' (मै० 3.4.13)। वारयध्वमिति प्राप्ते।

अर्थ—'ध्वम्' के स्थान पर 'ध्वात्' आदेश होता है, वेद के विषय में।

उदा० (1) वारयध्वात्
वृ णिच्—हेतुमति णिच्,
वारि—वृद्धि, धातुसञ्ज्ञा,
वारि अ ध्वम्—लोट्, शप्,
वारयध्वात्—गुण, आय्, ध्वात्।

(2) वारयध्वम्
लोक में।

(3219) यजध्वैनमिति च *43* (3565)

'यजध्वम्' इत्येतस्य एनमित्येतस्मिन्परतो मकारलोपो निपात्यते वकारस्य च यकारश्छन्दसि विषये। 'यजं॑ध्वैनं प्रियमेधा॒ः' (ऋ० 8.2.37)। यजध्वमेनमिति प्राप्ते।

अर्थ—वेद के विषय में 'यजध्वैनम्' शब्द निपातनसिद्ध है।

उदा० (1) यजध्वैनम् (ऋ० 8.2.37)
यजध्वम् एनम्—मकारलोप निपातन से,
यजध्व एनम्—वृद्धिरेचि।

काशिकाकार 'यजध्वैनम्' के स्थान पर 'यजध्यैनम्' पाठ मानते हैं।[1] हरदत्त दोनों रूप स्वीकार करते हैं।[2] भट्टोजिदीक्षित इसे काशिकाकार का प्रमाद मानते हैं।[3]

(3220) तस्य तात् *44* (3566)

तशब्दस्य लोण्मध्यमपुरुषबहुवचनस्य स्थाने 'तात्' इत्ययमादेशो भवति। 'गात्रं॑गात्रम॒स्या नूनं॑ कृणुतात्' (तै० 4.3.4.25)। कृणुतेति प्राप्ते। 'ऊवध्य॒गोहं॑ पार्थिवं खनतात्' (तै० 4.13.4.25)। खनतेति प्राप्ते। 'अ॒स्नार॒क्षः सं॑सृं॒ज॒तात्' (तै० 4.13.4.25)। संसृजतेति प्राप्ते। सूर्यं॒ चं॑क्षु॒र्गम॑य॒तात्' (तै० 4.13.4.24)। गमयतेति प्राप्ते।

---

1. काशि० 7.1.43....वकारस्य च यकारश्छन्दसि विषये।
2. पदम० 7.1.43 बह्वृचास्तु वकारमेवाधीयते, तत्र मलोपमात्रं निपात्यते।
3. वै०सि०कौ० सूत्र 3565 वकारस्य यकारो निपात्यत इति वृत्तिकारोक्तिः प्रामादिकी।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—वेद के विषय में लोट् मध्यम पुरुष बहुवचन के 'त' के स्थान पर 'तात्' आदेश होता है।

उदा० (1) कृणुतात् (तै०सं० 4.3.4.25)
कृ नु त—'तात्' हुआ, णत्व।

(2) कृणुत
लोक में।

(3) खनतात् (पूर्ववत्)।

(4) खनत
लोक में 'तात्' नहीं हुआ।

(5) संसृजतात्
सम् सृज् शप् त—'तात्' आदेश, अनुस्वार।

(6) संसृजत
लोक में।

(7) गमयतात्
गम् णिच् शप् त—पूर्ववत्।

(8) गमयत
लोक में 'तात्' नहीं हुआ।

(3221) तप्तनप्तनथनाश्च *45* (3567)

'तस्य' इति वर्त्तते। छन्दसि विषये तस्य स्थाने तप्, तनप्, तन, थन-इत्येते आदेशा भवन्ति। तप्-'शृणोत ग्रावाणः'। शृणुतेति प्राप्ते। 'सुनोतं' (ऋ० 7.32.8)। सुनुतेति प्राप्ते। तनप्-'संवर्त्रा दधातन' (ऋ० 10.101.5)। धत्तेति प्राप्ते। तन-'जुजुष्टन' (ऋ० 4.3.6.7)। जुषतेति प्राप्ते। छान्दसत्वात् श्लुः। थन-'यदिष्ठनं' (ऋ० 10.63.6)। यदिच्छतेति प्राप्ते। पित्करणमङित्त्वार्थम्।

अर्थ—'तकार के स्थान में'—इसका अनुवर्त्तन है। वेद के विषय में (लोट् मध्यम पुरुष बहुवचन) तकार के स्थान पर तप्, तनप्, तन तथा थन आदेश होते हैं।

उदा० (1) शृणोत
श्रु त—श्रुवः शृ च,
शृ श्नु त—'तप्' हुआ,
शृणोत—गुण, णत्व।
लोक में 'शृणुत' होता है।

(2) सुनोत (ऋ० 7.32.8)
षु → सु श्नु त—पूर्ववत्।
सुनोत—तप्, गुण,
लोक में 'सुनुत' होता है।

(3) दधातन (ऋ० 8.101.5)
दधात—'तनप्' हुआ। ङित्त्व के अभाव से श्नाऽभ्यस्तयो० की अप्राप्ति।
लोक में 'धत्त' होता है।

(4) धत्त
धा त → धा धा त—श्लु, द्वित्व,
द धा त—ह्रस्वः, अभ्यासे चर्च,
ध धा त—'दधस्तथोश्च' से अभ्यास के दकार के स्थान पर धकार,
ध ध् त—आकारलोप, झलां जश् झशि,
ध द् त—खरि च
धत्त—रूप बना।

(5) जुजुष्टन
जुष् त—श, 'बहुलं छन्दसि' से श्लु, द्वित्व,
जु जुष् तनप्—तनप् आदेश,
जुजुष्टन—ष्टुना ष्टुः।

(6) जुषत
लोक में 'तुदादिभ्यः शः'।

(7) यदिष्ठन
इष् त—शप्, 'बहुलं छन्दसि' से लुक्
इष् थन—ष्टुत्व।

(8) इच्छत
लोक में—इषुगमियमां छः, छे तुक्।

चकार पद के द्वारा 'तस्य' पद का अनुकर्षण होता है। 'अपि' पद का अधिकार होने से 'त' (लोट् म०पु० बहुवचन) से अन्यत्र भी 'तप्' आदि आदेश प्राप्त होते हैं।

(9) अब्रवीतन (ऋ० 1.161.3)
लङ् म०पु० बहुवचन का रूप है।

(10) अभूतन (शौ०सं० 4.37.5) (पूर्ववत्)।

(3222) इदन्तो मसि *46* (3568)

छन्दसि विषये मसित्ययं शब्द इकारान्तो भवति। मसः सकारान्तस्य इकारागमो भवति, स च तस्यान्तो भवति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तद्ग्रहणेन गृह्यत इत्यर्थः। 'पुनस्त्वोद्दीपयामसि' (अथ० 12.2.5)। दीपयाम इति प्राप्ते। 'शलभं भञ्जयामसि' (पै० 2.20.4)। भञ्जयाम् इति प्राप्ते। 'त्वयि रात्रिं वासयामसि' (शौ० 19.47.9)। वासयाम इति प्राप्ते।

अर्थ—वेद के विषय में 'मस्' ह्रस्व इकार अवयव वाला होता है। सकारान्त मस् को इकार आगम होता है और वह उसका अन्त्य अवयव होता है।

उदा० (1) दीपयामसि (अथ० 12.2.5)
दीप् णिच् मस्—इकार हुआ,
दीपयामसि—शप् आदि।

(2) दीपयामः
लोक में।

(3) भञ्जयामसि (पै०सं० 2.20.4)
पूर्ववत् 'मसि'।

(4) भञ्जयामः
लोक में।

(5) वासयामसि (पूर्ववत्)।

(6) वासयामः
लोक में।

(7) वोचेम[1]
वच् मस्—आ० लिङ्०,
वच् अङ् यासुट् मस्—लिङ्याशिषि,
वच् अ इय् मस्—अतो येयः
व उम् चे य्स् मस्—वच उम्, 'छन्दस्युभयथा' से सार्वधातुक सञ्ज्ञा, लिङः सलोपोऽनन्त्यस्य,
वोचेय् मस्—नित्यं ङितः, आद् गुणः,
वोचेम—लोपो व्योर्वलि, 'मस्' के सकार का लोप हो जाने पर भी 'एकदेशविकृतमनन्यवत्' परिभाषा से यह 'मस्' ही है, अतः इकार आगम प्राप्त हुआ। परन्तु यहाँ नहीं होता है। 'छन्दसि दृष्टानुविधिर्भवति' अथवा 'अपि' पद के अधिकार से इकार नहीं होता है।

(3223) क्त्वो यक् *47* (3569)

'क्त्वा' इत्येतस्य यगागमो भवति छन्दसि विषये। 'दुत्त्वाय (ऋ० 10.85.13) सविता धियः'। दत्त्वेति प्राप्ते। 'क्त्वापि छन्दसि' (7.1.38) इत्यस्यानन्तरमिदं कस्मान्नोच्यते? 'समासे' इति तत्रानुवर्त्तते।

अर्थ—वेद के विषय में 'क्त्वा' को 'यक्' आगम होता है।

ककार की इत्सञ्ज्ञा होती है। 'आद्यन्तौ टकितौ' से 'क्त्वा' का अन्त्य अवयव बनता है।

उदा० (1) दत्त्वाय (ऋ० 10.85.13)
दा क्त्वा—दो दद्घोः,
दद् त्वा—खरि च,
दत्त्वाय—यक् आगम, सु, लुक्।

क्त्वाऽपि०—प्रकृत सूत्र का पाठ 'क्त्वाऽपि छन्दसि' के पश्चात् किया जाना चाहिये।

(समा०) 'क्त्वाऽपि छन्दसि' सूत्र में 'समासे' पद का अनुवर्त्तन है। अतः प्रकृत सूत्र में 'समासे' पद का अधिकार प्राप्त होने लगेगा।

(3224) इष्ट्वीनमिति च *48* (3570)

'इष्ट्वीनम्'-इत्ययं शब्दो निपात्यते छन्दसि विषये। यजेः क्त्वाप्रत्ययान्तस्य ईनमादेशोऽन्त्यस्य निपात्यते। 'ईष्ट्वीनं देवान्' (आश्व०श्रौ०सू०पू० 204)। इष्ट्वा देवानिति प्राप्ते। पीत्वीनमित्यपीष्यते। चकारस्यानुक्त-समुच्चयार्थत्वात्सिद्धम्।

अर्थ—वेद के विषय में क्त्वाप्रत्ययान्त 'इष्ट्वीनम्' पद निपातन-सिद्ध है।

उदा० (1) इष्ट्वीनम् (आश्व०सू०पृ० 204)
यज् क्त्वा → इष्ट्वा—सम्प्रसारण (वचिस्वपियजा०),
इष्ट्व् ईनम्—'ईनम्' अन्तादेश।

पीत्वी०—चकार पद अनुक्त समुच्चय के अनुकर्षण के लिये है। यथा—
(2) पीत्वीनम्
पीत्वा ईनम् → पीत्वीनम्।

(3225) स्नात्व्यादयश्च *49* (3571)

'स्नात्वी'-इत्येवमादयः शब्दा निपात्यन्ते छन्दसि विषये। स्नात्वी मलेदिव (मै०सं० 3.11.10)। स्नात्वेति प्राप्ते। 'पीत्वी सोमस्य वावृधे' (ऋ० 3.40.7)। पीत्वेति प्राप्ते। प्रकारार्थोऽयमादिशब्दः।

1. यह उदाहरण काशिका में प्रदर्शित नहीं है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—वेद के विषय में स्नात्वी आदि शब्द निपातनसिद्ध हैं।

उदा० (1) स्नात्वी (मै०सं० 3.11.10)
स्ना क्त्वा → स्नात्वी।

(2) पीत्वी (ऋ० 3.40.6) (पूर्ववत्)।

प्रकारा०—प्रकृत सूत्र में 'आदि' शब्द प्रकारवाची है। अतः निम्नलिखित अन्य शब्द भी वेद में प्राप्त होते हैं—

(3) कृत्वी (ऋ० 10.15.12)।
(4) हित्वी (यजु० 33.93)

(3226) आज्जसेरसुक् *50* (3572)

अवर्णान्तादङ्गादुत्तरस्य जसेरसुगागमो भवति छन्दसि विषये। 'ब्राह्मणास्: पितर: सोम्यास: (ऋ० 6.75.10)। ब्राह्मणा: सोम्या इति प्राप्ते। 'ये पूर्वासो य उपरास:' (ऋ० 10.15.2)-इत्यत्र परत्वादसुकि पुनः प्रसङ्गविज्ञानाच्छीभाव: प्राप्त:, 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' (व्या०प०) इति न भवति।

अर्थ—वेद के विषय में अवर्णान्त अङ्ग से उत्तर 'जस्' विभक्तियों को 'असुक्' आगम होता है।

इसके ककार व उकार की इत्सञ्ज्ञा होती है। कित् होने से यह 'जस्' का अन्त्य अवयव बनता है।

उदा० (1) ब्राह्मणास: (ऋ० 7.10.3.7)
ब्राह्मण जस्—असुक् आगम,
ब्राह्मण अस् अस्—अनुबन्धलोप,
ब्राह्मणास:—अक: सवर्णे दीर्घ:।

(2) ब्राह्मणा:
लोक में 'असुक्' नहीं होता है।

'पूर्वास:' इस स्थल पर 'जस्' के स्थान पर 'शी' आदेश तथा प्रकृत सूत्र से 'असुक्' आगम—इनकी युगपत् प्राप्ति होती है। परकार्य होने से प्रथम 'असुक्' आगम करने पर पुनः शीभाव की प्राप्ति हुई, परन्तु 'सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव' से शीभाव नहीं हुआ।

(3227) अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि *51* (2662)

'छन्दसि' इत्यत:प्रभृति निवृत्तम्। अश्व, क्षीर, वृष, लवण-इत्येतेषामङ्गानामात्मप्रीतिविषये क्यचि परतोऽसुगागमो भवति। अश्वस्यति वडवा। क्षीरस्यति माणवक:। वृषस्यति गौ:। लवणस्यत्युष्ट्र:। आत्मप्रीताविति किम्? अश्वीयति। क्षीरीयति। वृषीयति। लवणीयति। *अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम्* (म०भा०)। *क्षीरलवणयोर्लालसायामिति वक्तव्यम्* (म.भा.)। तृष्णातिरेक: = लालसा। अन्यत्रात्मप्रीतावपि न भवति। अपर आह-*सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्य:* (म० भा०)। दध्यस्यति, मध्वस्यति इत्येवमाद्यर्थम्। अपर आह-*सुग्वक्तव्य:* (म०भा०)। दधिस्यति, मधुस्यति-इत्येवमाद्यर्थम्।

अर्थ—क्यच् प्रत्यय परे रहते अश्व, क्षीर, वृष तथा लवण—इन अङ्गों को 'असुक्' आगम होता है, 'आत्मप्रीति' अर्थ गम्यमान हो तो।

उदा० (1) अश्वस्यति वडवा।
आत्मनोऽश्वम् इच्छति—सुप आत्मन: क्यच्,
अश्व क्यच्—अनुबन्धलोप,
अश्व असुक् य—असुक् आगम,
अश्वस्य शप् तिप्—धातुसञ्ज्ञा, शप् आदि।

(2) क्षीरस्यति माणवक: (पूर्ववत्)।
(3) वृषस्यति गौ: (पूर्ववत्)
(4) लवणस्यत्युष्ट्र: (पूर्ववत्)।

आत्मप्री०—**आत्मप्रीति** अर्थ गम्यमान हो तो 'असुक्' आगम होता है।

(5) अश्वीयति
अश्वम् इवाऽऽचरति—'उपमानादाचारे' 'आत्मप्रीति' अर्थ न होने से 'असुक्' नहीं हुआ, 'क्यचि च',
अश्व क्यच्—शेष पूर्ववत्।

(6) वृषीयति
वृषम् इवाऽऽचरति—पूर्ववत् क्यच्, असुक् की अप्राप्ति, 'क्यचि च' आदि।

(7) क्षीरीयति
'अश्वीयति' की तरह।

(8) लवणीयति
'अश्वीयति' की तरह।

अश्व०—'मैथुनेच्छा' गम्यमान हो तो अश्व और वृष अङ्गों को 'असुक्' आगम होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षीर०—'लालसा' गम्यमान हो तो क्षीर तथा लवण अङ्गों को 'असुक्' आगम होता है।

अपर०—कुछ विद्वानों के अनुसार 'लालसा' अर्थ गम्यमान हो तो सभी प्रातिपदिकों को 'असुक्' आगम होता है।

(9) दध्यस्यति
दधि क्यच्—क्यच् हुआ,
दधि असुक् य—यणादेश, धातुसञ्ज्ञा,
दध्यस्यति—तिप, शप्, अतो गुणे।

(10) मध्वस्यति
मधु असुक् क्यच्—शेष पूर्ववत्।

अपर०—अन्य विद्वान् 'लालसा' अर्थ गम्यमान हो तो 'असुक्' के स्थान पर 'सुक्' आगम स्वीकार करते हैं। उकार व ककार की इत्सञ्ज्ञा होती है।

(11) दधिस्यति
दधि क्यच्—'क्यच्' हुआ,
दधि स् य—सुक्, धातुसञ्ज्ञा,
दधिस्यति—तिप्, शप्, पररूप।

(12) मधुस्यति
मधु सुक् क्यच्—शेष पूर्ववत्।

(3228) आमि सर्वनाम्नः सुट् *52* (217)

'आत्' इति वर्त्तते। अवर्णात्सर्वनाम्न उत्तरस्यामः सुडागमो भवति। सर्वेषाम्। विश्वेषाम्। येषाम्। तेषाम्। सर्वासाम्। यासाम्। तासाम्। आदित्येव-भवताम्। 'आमि' इति षष्ठीबहुवचनं गृह्यते, न 'ङेराम्नद्याम्नीभ्यः, (8.3.16) इति, तस्य हि परत्वादाङ्याट्स्याटो भवन्ति। यश्च 'किमेत्तिङव्ययघादामुः' (5.4.11), 'आम् च लिटि' (3.1.35); न तौ सर्वनाम्नः स्तः। सानुबन्धकाविति वा, तौ न गृह्येते। 'आमि' इति सप्तमीनिर्देशं उत्तरार्थः। इह तु 'सर्वनाम्नः' इति पञ्चमीनिर्देशात् 'तस्मादित्युत्तरस्य' (1.1.67) इति षष्ठीप्रक्लृप्तिर्भविष्यति।

अर्थ—'आत्' का अनुवर्त्तन है। अवर्णान्त सर्वनामसञ्ज्ञक अङ्ग से उत्तर 'आम्' प्रत्यय को 'सुट्' आगम होता है।

'सुट्' के उकार व टकार की इत्सञ्ज्ञा होती है। टित् होने से यह 'आम्' का आदि अवयव बनता है।

उदा० (1) सर्वेषाम्
सर्व आम्—षष्ठी बहुवचन,
सर्व सुट् आम्—अनुबन्धलोप,
सर्वे स् आम्—बहुवचने झल्येत्,
सर्वेषाम्—आदेशप्रत्यययोः।

(2) विश्वेषाम्
विश्व आम्—पूर्ववत्।

(3) येषाम्
यद् आम्—त्यदादीनामः,
य अ आम्—अतो गुणे,
य सुट् आम्—शेष पूर्ववत्।

(4) तेषाम्
तद् आम् → त अ आम् → त आम्—
त सुट् आम्—पूर्ववत्।

(5) सर्वासाम्
सर्व टाप्—स्त्रियाम्, अजाद्यतष्टाप्,
सर्वा आम्—सुट्,
सर्वा स् आम्—अनुबन्धलोप।

(6) यासाम्
यद् → य अ → य टाप् → या—शेष पूर्ववत्।

(7) तासाम्
तद् → त अ → त टाप् → ता,
ता सुट् आम्—शेष पूर्ववत्।

आमि०—अष्टाध्यायी में 'आम्' चार स्थानों पर प्राप्त होता है—

(क) सुप् प्रत्यय—षष्ठी बहुवचन,

(ख) सुप् आदेश—'ङेराम्नद्याम्नीभ्यः' के द्वारा 'ङि' के स्थान पर प्राप्त 'आम्' आदेश,

(ग) 'किमेत्तिङाव्ययघादाम्व' से होने वाला 'आम्',

(घ) 'कास्प्रत्ययादाम्' से लिट् परे रहते होने वाला 'आम्'।

अन्तिम दो 'आम्' प्रत्ययों का यहाँ प्रयोजन नहीं हैं। ये दोनों 'आम्' सर्वनाम से प्राप्त नहीं हैं। 'आमि' इस पद के द्वारा षष्ठी बहुवचन का ही ग्रहण होता है, न कि 'ङेराम्नद्याम्नीभ्यः' के द्वारा प्राप्त 'आम्' आदेश का।

कारण कि, 'आम्' आदेश को परवर्त्ती होने से आट्, याट् व स्याट् हो जाते हैं।

आमि०—'आमि' इस पद में सप्तमी विभक्ति है। 'सर्वनाम्नः'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पद में पञ्चमी विभक्ति है। सप्तमी की अपेक्षा पञ्चमी बलवान् होती है। अतः यह 'सुट्' आगम सर्वनाम सञ्ज्ञक अङ्ग से उत्तर जो अव्यवहित 'आम्' विभक्ति, उसे होता है।

(3229) त्रेस्त्रयः *53* (264)

'त्रि' इत्येतस्य आमि परे 'त्रय' इत्ययमादेशो भवति। त्रयाणाम्। *त्रीणामित्यपि छन्दसीष्यते*-त्रीणामपि समुद्राणामिति।

अर्थ—'आम्' परे रहते 'त्रि' अङ्ग के स्थान पर 'त्रय' आदेश होता है।

अनेकाल् होने से 'त्रय' सर्वादेश है। 'त्रेः' पद एकवचनान्त है। एकवचन का निर्देश अनुकरणवशात् है। भाव यह है कि 'त्रि' शब्द यहाँ 'तीन' इस संख्या का वाचक नहीं है, अपितु 'त्रि' एक अनुकरणात्मक शब्दस्वरूप है।

उदा० (1) त्रयाणाम्
त्रि आम् → त्रय आम्—
त्रय नुट् आम्—ह्रस्वनद्यापो नुट्,
त्रयानाम्—नामि, अट्कुप्वाङ्नुम्०।

त्रीणामि०—वेद में 'त्रीणाम्' भी प्राप्त होता है। वेद में सभी विधियाँ विकल्प से प्रवृत्त होती हैं। अतः 'त्रय' आदेश नहीं हुआ।

(3230) ह्रस्वनद्यापो नुट् *54* (208)

ह्रस्वान्तान्नद्यन्तादाबन्ताच्चोत्तरस्यामो नुडागमो भवति। ह्रस्वान्तात्तावत्-वृक्षाणाम्। प्लक्षाणाम्। अग्नीनाम्। वायूनाम्। कर्तॄणाम्। नद्यन्तात्-कुमारीणाम्। किशोरीणाम्। गौरीणाम्। शार्ङ्गरवीणाम्। लक्ष्मीणाम्। ब्रह्मबन्धूनाम्। वीरबन्धूनाम्। मालानाम्। बहुराजानाम्। कारीषगन्ध्यानाम्।

अर्थ—ह्रस्ववर्णान्त, नदीसञ्ज्ञक, तदन्त तथा आप् प्रत्ययान्त अङ्गों से उत्तर 'आम्' प्रत्यय को 'नुट्' आगम होता है।

इसके उकार व टकार की इत्सञ्ज्ञा होती है। 'नुट्' टित् होने से 'आम्' का आदि अवयव बनता है।

जिसके अन्त में ह्रस्व अच् वर्ण हो, उसे ह्रस्वान्त कहा जाता है। 'यूस्त्याख्यौ नदी' के द्वारा नदीसञ्ज्ञा होती है। 'आप्' के द्वारा टाप्, चाप् व डाप्—इन तीनों स्त्रीप्रत्ययों का ग्रहण होता है। जिस शब्द के अन्त में टाप् आदि प्रत्यय हों, वह आबन्त कहलाता है।

उदा० (क) ह्रस्वान्तात्—

(1) वृक्षाणाम्
वृक्ष आम्—ष० बहुवचन,
वृक्ष नुट् आम्—नुट्, अनुबन्धलोप,
वृक्षानाम्—नामि, अट्कुप्वाङ्नुम्०।

(2) प्लक्षाणाम्
प्लक्ष आम्—शेष पूर्ववत्।

(3) अग्नीनाम्
अग्नि आम्—ष० बहुवचन,
अग्नि नुट् आम्—नुट्,
अग्नीन् आम्—'नामि' से दीर्घ।

(4) वायूनाम्
वायु न् आम्—पूर्ववत्।

(5) कर्तॄणाम्
कर्तृ नुट्—आम्—पूर्ववत्,
कर्तॄणाम्—नामि, ऋवर्णान्नस्य णत्वं वाच्यम्।

(6) हर्तॄणाम् (पूर्ववत्)।

(ख) नद्यन्तात्—

(7) कुमारीणाम्
कुमारी आम्—नदी सञ्ज्ञा, ष० बहुवचन,
कुमारी नुट् आम्—शेष पूर्ववत्।

(8) किशोरीणाम् (पूर्ववत्)।
(9) गौरीणाम् (पूर्ववत्)।
(10) शार्ङ्गरवीणाम् (पूर्ववत्)।
(11) लक्ष्मीणाम् (पूर्ववत्)।

(12) ब्रह्मबन्धूनाम्
नदी सञ्ज्ञा, शेष पूर्ववत्।

(13) वीरबन्धूनाम् (पूर्ववत्)।

(ग) आबन्तात्—

(14) मालानाम्
माला आम्—टाप् प्रत्ययान्त 'माला' शब्द,
माला न् आम्—शेष पूर्ववत्।

(15) बहुराजानाम्
बहुराजा आम्—'डाबुभाभ्यामन्यतरस्याम्' से 'डाप्' होकर 'बहुराजा' बनता है, शेष पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(16) कारीषगन्ध्यानाम्

कारीषगन्धेरपत्यम्—इस अर्थ में 'अण्' होता है, पश्चात् 'अणिञोरनार्ष०' से 'ष्यङ्' आदेश, तब 'यङश्चाप्' से 'चाप्' हुआ।

कारीषगन्ध्या आम्—'आम्' हुआ, शेष पूर्ववत्।

(3231) षट्चतुर्भ्यश्च *55* (338)

षट्संज्ञकेभ्यश्चतुःशब्दाच्चोत्तरस्यामो नुडागमो भवति। षण्णाम्। पञ्चानाम्। सप्तानाम्। नवानाम्। दशानाम्। चतुर्णाम्। रेफान्तायाः संख्यायाः षट्संज्ञा न विहिता; 'षड्भ्यो लुक्' (7.1.22) इति लुग्मा भूत्। बहुवचन-निर्देशादत्र संख्याप्रधानस्य ग्रहणं भवति–परमषण्णाम्। परमपञ्चानाम्। परमसप्तानाम्। परमचतुर्णाम्। उपसर्जनी-भूतायास्तु संख्याया न भवति–प्रियषषाम्, प्रियपञ्चाम्, प्रियचतुरामिति।

अर्थ—षट्सञ्ज्ञक अङ्ग तथा चतुर अङ्ग से उत्तर 'आम्' प्रत्यय को 'नुट्' आगम होता है।

'ष्णान्ताः षट्' से षट्सञ्ज्ञा होती है।

उदा० (1) षण्णाम्

षष् आम्—षट् सञ्ज्ञा,

षष् न् आम्—नुट् आगम,

षड् नाम्—यरोऽनुनासिकेऽनु०,

षण्णाम्—ष्टुना ष्टुः।

(2) पञ्चानाम्

पञ्चन् आम्—षट् सञ्ज्ञा, नुट्,

पञ्चन् न् आम्—अनुबन्धलोप,

पञ्चान् नाम्—'नोपधायाः' से दीर्घ, 'स्वादिष्वसर्व०'

पञ्चानाम्—नलोपः प्रातिपदिका०।

(3) सप्तानाम्

सप्तन् न् आम्—पूर्ववत्,

सप्तान् नाम् → सप्तानाम्।

(4) अष्टानाम्

पूर्ववत्। 'अष्टन आ विभक्तौ' से आकार।

(5) नवानाम् (पूर्ववत्)।

(6) दशानाम्

दशन् आम्—पूर्ववत्।

(7) चतुर्णाम्

चतुर् न् आम्—पूर्ववत्,

चतुर्णाम्—रषाभ्यां नो णः समा०।

पक्ष में 'अचो रहाभ्यां द्वे' से णकार को द्वित्व।

रेफान्ता०—रेफान्त की षट् सञ्ज्ञा नहीं होती है। तब 'चतुर् जस्/शस्' इस स्थिति में 'षड्भ्यो लुक्' की प्रवृत्ति नहीं होती है। अतः सूत्र में 'चतुर्' शब्द का पृथक् पाठ किया गया है।

बहुवचन का निर्देश होने से संख्याप्रधान का ही ग्रहण होता है।

(8) परमषण्णाम्

यहाँ नुट् हुआ है।

(9) परमपञ्चानाम्

पूर्ववत् नुट्।

(10) परमसप्तानाम् (पूर्ववत्)।

(11) परमचतुर्णाम् (पूर्ववत्)।

गौण होने की दशा में उस संख्या का ग्रहण नहीं होता है।

(12) प्रियपञ्चाम्

प्रिय पञ्च् न् आम्

प्रिय पञ्च् ञ् आम्—स्तोः श्चुना श्चुः।

(13) प्रियचतुराम्

'चतुर्' शब्द के गौण होने से 'आम्' को नुट् नहीं हुआ। तब रूप बनता है।

(3232) श्रीग्रामण्योश्छन्दसि *56* (3573)

श्री, ग्रामणी–इत्येतयोश्छन्दसि विषये आमो नुडागमो भवति। श्रीणामुदारो धरुणो रयीणाम् (ऋ० 10.45.5) 'अप्यत्र सूतग्रामणीनाम्' (का० 28.3)। श्रीशब्दस्य 'वामि' (1.4.5) इति विकल्पेन नदीसंज्ञा, तत्र नित्यार्थं वचनम्। सूतग्रामणीनामिति–यदा सूताश्च ग्रामण्यश्च सूतग्रामण्यो भवन्ति, तदर्थमिदं वचनम्। यदा तु सूतश्च ग्रामणीश्च सूतग्रामणि, सूतग्रामणि च सूतग्रामणि च सूतग्रामणि चेति सूतग्रामणीनामिति, तदा 'ह्रस्वात्' (7.1.54) इत्येव सिद्धम्।

अर्थ—वेद के विषय में श्री तथा ग्रामणी अङ्गों से उत्तर 'आम्' विभक्ति को 'नुट्' आगम होता है।

उदा० (1) श्रीणाम् (ऋ० 10.45.5)

श्री आम्—'नुट्' हुआ,

श्री न् आम्—णत्व।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(2) सूतग्रामणीनाम् (का०सं० 28.3) (पूर्ववत्)।

श्रीशब्द०—'वाऽऽमि' से श्री शब्द की विकल्प से नदी-सञ्ज्ञा होती है, उसमें नित्य 'नुट्' करने के लिए 'श्री' शब्द का यहाँ पाठ है।

जब सूताश्च ग्रामण्यश्च—सूतग्रामण्यः इस प्रकार विग्रह किया जाता है तो इसके लिए सूत्र में 'ग्रामणी' शब्द का पाठ किया गया है।

जब 'सूतग्रामणि च सूतग्रामणि च सूतग्रामणि च' इस प्रकार विग्रह किया जाता है तो 'आम्' को 'नुट्' आगम 'ह्रस्वनद्यापो नुट्' से सिद्ध है अर्थात् इस दशा में प्रकृत सूत्र की आवश्यकता नहीं होती है।

(3233) गोः पादान्ते *57* (3574)

'गो' इत्येतस्मादृक्पादान्ते वर्त्तमानादुत्तरस्यामो नुडागमो भवति। विद्मा हि त्वा सत्पतिं शूरगोनाम् (ऋ० 10.47.2)। पादान्त इति किम्? 'गवां गोत्रमुदसृजो यदङ्गिरः' (ऋ० 2.23.18)। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (व्या०प०) इति पादान्तेऽपि क्वचिन्न भवति। 'हन्तारं शत्रूणां कृधि विराजं गोपतिं गवाम्' (ऋ० 10.166.1)।

अर्थ—ऋक्पाद के अन्त में वर्त्तमान 'गो' शब्द से उत्तर जो 'आम्' विभक्ति, उसे 'नुट्' आगम होता है।

यहाँ 'छन्दसि' पद का अधिकार है। अतः 'पाद' शब्द के द्वारा ऋक् पाद का ग्रहण होता है तथा श्लोक का पाद यहाँ गृहीत नहीं है।

उदा० (1) गोनाम् (ऋ० 10.47.1)
गो आम्—ऋचा के पाद के अन्त में है, अतः 'नुट्' आगम हुआ,
गो न् आम्—नुट्।

(2) गवाम् (ऋ० 2.23.18)
ऋचा के पाद के मध्य में 'नुट्' नहीं हुआ।

पादान्त०—पादान्त में ही 'आम्' को 'नुट्' होता है। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' परिभाषा के द्वारा पाद के अन्त में भी कभी-कभी नुट् नहीं होता है। द्र०—
हन्तारं शत्रूणां···गवाम्।

(3234) इदितो नुम् धातोः *58* (2262)

इदितो धातुर्नुमागमो भवति। कुडि–कुण्डिता, कुण्डितुम्, कुण्डितव्यम्, कुण्डा। हुडि–हुण्डिता, हुण्डितुम्, हुण्डितव्यम्, हुण्डा। इदित इति किम्? पचति। पठति। अयं धातूपदेशावस्थायामेव नुमागमो भवति (भ०भा०)–कुण्डा, हुण्डेति; 'गुरोश्च हलः' (3.3.103) इत्यकार-प्रत्ययो यथा स्यात्। तथा हि–'धिन्विकृण्योर च' (3.1.80) इति प्रत्ययविधावेव नुमनुषक्तयोर्ग्रहणम्। धातुग्रहणं चेह क्रियते–धातूपदेशकाल एव नुमागमो यथा स्यादित्येवमर्थम्। तासिसिचोरिदित्कार्यं नास्ति–इत्युच्चारणार्थो निरनुनासिक इकारः पठ्यते। अमंस्तेत्येवमादौ हि 'हनः सिच्' (1.2.24) इति कित्त्वविधानसामर्थ्यान्नकारलोपो न भवति। मन्ता–इत्यत्रापि 'असिद्धवदत्राभात्' (6.4.22) इति टिलोपस्यासिद्धत्वान्नलोपो न भवति। इह कस्मान्न भवति–भेत्ता, छेत्तेति? 'इरितां समुदायस्येत्संज्ञा' (4.2.57) इतीदित्त्वं नास्ति। अवयवशोऽपीत्संज्ञायां सत्याम् 'गोः पादान्ते' (7.1.57) इत्यतोऽन्तग्रहणमनुवर्त्तयितव्यम्। तेनान्तेदितो धातवो गृह्यन्ते।

अर्थ—इदित् जो धातु, उसे 'नुम्' आगम होता है।

'नुम्' के उकार तथा मकार की इत्सञ्ज्ञा होती है। जिस धातु का इत् (= ह्रस्व इकार) की इत्सञ्ज्ञा होती है, उसे इदित् धातु कहते हैं।

उदा० (1) कुण्डिता
कुडि → कुन् ड्—इकार की इत्सञ्ज्ञा, नुम्, मिदचोऽ०, नश्चाऽपदान्त०, अनुस्वारस्य०,
कुण्ड् तृ—आर्धधातुक सञ्ज्ञा, आर्धधातुकस्येड्० से इट्,
कुण्डितृ सु—विभक्तिकार्य।

(2) कुण्डितुम्
कुण्ड् तुम्—पूर्ववत् 'नुम्' आदि,
कुण्ड् इट् तुम्—इट्, सु, सुलुक्।

(3) कुण्डितव्यम्
कुण्ड् इ तव्यत्—पूर्ववत्।

(4) कुण्डा
कुण्ड्—पूर्ववत् 'नुम्',
कुण्ड् अङ् टाप् सु—विभक्तिकार्य।

(5) हुण्डिता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हुडि → हु न् ड—इत्सञ्ज्ञा, इदितो नुम् धातोः,
हुण्ड् इट् तृच्—अनुस्वार, परसवर्ण, इट्,
हुण्डिता—सु।

(6) हुण्डितुम्
हुण्ड् तुम्—पूर्ववत् नुम् आदि,
हुण्ड् इट् तुम्—इट्, सु।

(7) हुण्डितव्यम्
हुण्ड्—पूर्ववत्,
हुण्ड् इ तव्यत्—सु।

(8) हुण्डा
हुण्ड्—पूर्ववत्,
हुण्ड् अ टाप् सु—पूर्ववत्।

इदित०—इदित् धातु को 'नुम्' आगम होता है।

(9) पचति
पच → पच्—अकार की इत्सञ्ज्ञा है,
पच् शप् तिप्—इदित् न होने से 'नुम्' नहीं हुआ, तिप् हुआ, शप् हुआ।

अयं०—'नुम्' आगम उपदेश अवस्था में ही होता है। यदि उपदेश अवस्था में 'नुम्' नहीं करेंगे तो गुरुसंज्ञा के अभाव में 'गुरोश्च हलः' की प्राप्ति नहीं हो सकेगी। यथा 'धिन्विकृण्व्योर च' में प्रत्ययविधि में नुम् आगम वाले ही दोनों धातुओं का ग्रहण है।

धातुग्रह०—प्रकृत सूत्र में 'धातोः' पद के ग्रहण का प्रयोजन यह है कि धातु के उपदेशकाल में ही 'नुम्' होता है। तासि और सिच् प्रत्ययों के की इकार की इत्सञ्ज्ञा नहीं है। वहाँ यह उच्चारणार्थ है। अतः उनसे इदिल्लक्षण कार्य नहीं होता है।

'अमंस्त'[1] इत्यादि में 'हनः सिच्' से कित्त्वविधान के सामर्थ्यवशात् नकारलोप नहीं होता है। 'मन्ता'[1] इस स्थल पर भी 'असिद्धवदत्राभात्' से टिलोप के असिद्ध हो जाने से नकार-लोप नहीं होता है।

इह कस्मा०—भेत्ता तथा छेत्ता में इदिल्लक्षण कार्य क्यों नहीं होता है ? 'इर इत्सञ्ज्ञा वाच्या' से 'इर्' इस समग्र समुदाय की इत् सञ्ज्ञा होती है; केवल इकार की नहीं। अतः 'भेत्ता' आदि में इदिल्लक्षण कार्य नहीं होता है।

अवयवो०—यदि एक-एक अवयव[2] की इत्सञ्ज्ञा मान ली जाय तो 'गोः पादान्ते' सूत्र से 'अन्ते' का अनुवर्त्तन करने से कोई दोष प्रसक्त नहीं होता है। अन्ते पद का अनुवर्त्तन करने पर सूत्रार्थ इस प्रकार होता है—

अन्त में इत्सञ्ज्ञक ह्रस्व इकार है जिस धातु के, उस धातु को 'नुम्' आगम होता है।

इस प्रकार सूत्रार्थ करने पर कोई दोष नहीं रहता है।

(3235) शे मुचादीनाम् *59* (2542)

शे प्रत्यये परतो मुचादीनां नुमागमो भवति। मुच्ल्र-मुञ्चति। लुप्ल्र-लुम्पति। विद्ल्र-विन्दति। लिपि-लिम्पति। सिच्-सिञ्चति। कृती-कृन्तति। खिद-खिन्दति। पिश-पिंशति। शे इति किम् ? मोक्ता, मोक्तुम्, मोक्तव्यम्। मुचादीनामिति किम् ? तुदति, नुदति। *शे तृम्फादीनामुपसंख्यानं कर्त्तव्यम्* (म०भा०)। के पुन-स्तृम्फादयः ? 'तृफ तृम्फ तृप्तौ' (धा०पा० 1308-9)। 'दृफ दृम्फ उत्क्लेशे' (धा०पा० 1314-15), 'गुफ गुम्फ ग्रन्थे' (धा०पा० 1318-19); 'उभ उम्भ पूरणे' (धा०पा० 1320-21), 'शुभ शुम्भ शोभार्थे' (धा० पा० 1322-23)-इत्यत्र ये सानुषङ्गास्तृम्फादयः, तेषाम् 'अनिदितां हल उपधायाः क्ङिति' (6.4.24) इत्यनु-नासिकलोपे कृते नुम्विधीयते, स च विधानसामर्थ्यान्न लुप्यते-तृम्फति, दृम्फति, गुम्फति, उम्भति, शुम्भति। ये तु निरनुषङ्गाः, तेषां तृफति, दृफति, गुफति, उभति, शुभतीत्येवं भवति।

1. मन् त—लुङ् प्र०पु० एकव०, मन् सिच् त—च्लि, च्लेः सिच्; अमंस्त—चकार की इत्सञ्ज्ञा तथा इकार की निवृत्ति, अट् आगम। सिच् का इकार उच्चारणार्थ है, यदि इकार की इत् सञ्ज्ञा होती तो सिच् इदित् होता। चूँकि 'अमंस्त' में अनुनासिक लोप नहीं होता है; अतः सिच् इदित् नहीं है। यदि सिच् इदित् होता तो 'हनः सिच्' से हन् से उत्तर सिच् को कित् करना व्यर्थ हो जाता है। कारण कि सिच् के इदित् पक्ष में अनुनासिक लोप स्वतःसिद्ध है। अतः 'हनः सिच्' से कित्त्व-विधान व्यर्थ होकर ज्ञापित करता है कि सिच् को इदिल्लक्षण कार्य नहीं होते हैं।

1. मन् तास् डा—लुट्; मन् त् आ—टिलोप। टिलोप के असिद्ध होने से नकारलोप नहीं हुआ। यदि तासि को इदित मानते हैं तो यहाँ अनुनासिक लोप होकर अनिष्ट रूप की प्राप्ति होती है। इससे सिद्ध होता है कि 'तासि' में इकार उच्चारणार्थ है तथा उस इकार की इत्सञ्ज्ञा नहीं होती है।

2. 'उपदेशेऽजनुनासिक इत्' से इकार की तथा 'हलन्त्यम्' से रेफ की इत्सञ्ज्ञा करके 'इर्' इस शब्द की इत्सञ्ज्ञा की जा सकती है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—'श' प्रत्यय परे रहते मुच् आदि धातुओं को 'नुम्' का आगम होता है।

मुच् आदि आठ धातुओं का पाठ तुदादिगण के अन्त में है। 'तुदादिभ्यः शः' से सार्वधातुक लकारों (लट्, लोट्, लङ्, विधिलिङ्) में 'श' विकरण होता है। शतृ व शानच् की 'तिङ् शित् सार्वधातुकम्' से सार्वधातुक सञ्ज्ञा होती है। अतः शतृ व शानच् में भी 'श' होता है।

उदा० (1) मुञ्चति
मुच् तिप्—लट्, प्र०पु०एकवचन,
मुच् श तिप्—शप् को बाध कर 'श',
मु न् च् अ ति—अनुबन्धलोप, नुम्,
मुञ्चति—'नश्चाऽपदान्तस्य झलि' से अनुस्वार तथा 'अनुस्वारस्य ययि परसवर्णः' से परसवर्ण। यहाँ ध्यातव्य है कि 'सार्वधातुकमपित्' से 'श' ङिद्वत् होकर इसके परे रहते 'अनिदितां हल उपधा०' से अनुनासिकलोप प्राप्त होता है; परन्तु वचनसामर्थ्य से नहीं होता है।

(2) लुम्पति
लुप् श ति—तिप्, श,
लु न् प् अ ति—नुम्, अनुस्वार, परसवर्ण।

(3) विन्दति
वि न् द् श ति—पूर्ववत् 'श' विकरण, नुम् आगम, अनुस्वार तथा परसवर्ण।

(4) लिम्पति
लि न् प् श ति—पूर्ववत् 'श' विकरण, नुम् आगम, अनुस्वार, परसवर्ण।

(5) सिञ्चति
सि न् च् अ ति—पूर्ववत् 'श' विकरण, नुम् आगम, अनुस्वार तथा परसवर्ण।

(6) कृन्तति
कृ न् त् अ ति—पूर्ववत् सभी कार्य।

(7) खिन्दति
खि न् द् अ ति—पूर्ववत्।

(8) पिंशति
पि न् श् अ ति—अनुस्वार को परसवर्ण नहीं होता है। शेष कार्य पूर्ववत्।

श इति०—श प्रत्यय परे रहते 'नुम्' होता है।

(9) मोक्ता
मुच् तृ—'श' परे नहीं है, 'नुम्' नहीं हुआ,
मोच् तृ → मोक्तृ—'पुगन्तलघूपधस्य च' से लघूपधगुण तथा कुत्व होकर,
मोक्ता—सु।

(10) मोक्तुम्
मुच् तुमुन्—पूर्ववत् नुम् नहीं हुआ,
मोक् तुम् सु—लघूपधगुण, कुत्व।

(11) मोक्तव्यम्
मुच् तव्यत्—नुम् नहीं हुआ,
मोक् तव्य सु—पूर्ववत्।

मुचादी०—मुच् आदि आठ धातुओं को ही 'नुम्' आगम होता है।

(12) तुदति
तुद् श तिप्—'श' हुआ, 'नुम्' नहीं हुआ।

(13) नुदति
पूर्ववत् 'नुम्' नहीं हुआ।

शे तृम्फा०—'श' प्रत्यय परे रहते तृम्फ् आदि धातुओं से नुम् आगम होता है। तृम्फ आदि धातु निम्नलिखित हैं—

तृफ तृम्फ तृप्तौ, दृफ दृम्फ उत्क्लेशे, गुफ गुम्फ ग्रन्थे, उभ उम्भ पूरणे, शुभ शुम्भ शोभार्थे। ये सानुषङ्ग धातु ही तृम्फादि कहे जाते हैं। यहाँ 'आदि' शब्द प्रकारवाची है। 'अनिदितां हल०' से इन धातुओं के अनुनासिक का लोप करने के पश्चात् नुम् का विधान किया जाता है। उस नुम् का विधानसामर्थ्य से लोप नहीं होता है।

(14) तृम्फति
तृम्फ् श तिप्—शप् को बाध कर 'श', इसे ङिद्वत् हुआ, तब अनुनासिकलोप हुआ,
तृ न् फ् अ ति—नुम्,
तृम्फति—अनुस्वार, परसवर्ण।

(15) दृम्फति
दृम्फ् श तिप्—पूर्ववत्।

(16) गुम्फति
सभी पूर्ववत्।

(17) उम्भति
सभी पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(18) शुम्भति
सभी पूर्ववत्।

ये तु०—जो निरनुषङ्ग धातु हैं, उनको नुम् नहीं होता है। यथा—

(19) तृफति, (20) दृफति, (21) गुफति, (22) उभति, (23) शुभति।

(3236) मस्जिनशोर्झलि *60* (2517)

मस्जि, नशि–इत्येतयोरङ्गयोर्झलादौ प्रत्यये नुमागमो भवति। मङ्क्ता, मङ्क्तुम्, मङ्क्तव्यम्। नंष्टा, नंष्टुम्, नंष्टव्यम्। झलीति किम्? मज्जनम्। नशनम्। 'मस्जेरन्त्यात्पूर्वं नुममिच्छन्त्यनुषङ्गादिलोपार्थम्' (म० भा० 8.2.21)। मग्नः। मग्नवान्।

अर्थ—मस्ज् और नश् धातुओं को नुम् आगम होता है, झलादि प्रत्यय परे रहते।

उदा० (1) मङ्क्ता
मस्ज् तृ—'मिदचोऽन्त्यात्परः' से नुम् अन्त्य अच् से पर प्राप्त हुआ, 'मस्जेरन्त्यात् पूर्वं नुममिच्छन्त्य०' (1.1.46 वा०) से अन्त्य अल् से पूर्व नुम् हुआ,
मस् न् ज् तृ → मन्ज्तृ—स्कोः संयोगाद्यो० से सकारलोप,
म न् ग् तृ—'चोः कुः' से कुत्व,
म न् क् तृ—खरि च,
मङ् क्तृ—नश्चाऽपदा०, अनुस्वारस्य ययि०,
मङ्क्ता—सु।

(2) मङ्क्तुम्
मस्ज् तुमुन्—सभी कार्य पूर्ववत्।

(3) मङ्क्तव्यम्
मस्ज् तव्यत्—सभी कार्य पूर्ववत्।

(4) नंष्टा
नश् तृ—प्रत्यय हुआ, 'रधादिभ्यश्च' से पाक्षिक इट्,
न न् श् तृ—इट् अभाव पक्ष, नुम्,
न न् ष् तृ—व्रश्चभ्रस्ज०,
नंष्टा—ष्टुना ष्टुः, नश्चाऽपदान्त०, सु।

(5) नंष्टुम्
नश् तुमुन्—सभी कार्य पूर्ववत्।

(6) नंष्टव्यम्
नश् तव्यत्—पूर्ववत्।

अन्य उदाहरण (जो काशिका में प्रदर्शित नहीं हैं)।

(7) ममङ्क्थ
मस् न् ज् थल्—लिट्, सिप्, परस्मैपदानां णलतुसुस्०, पूर्ववत् नुम्,
म मस् न् ज् थ—भारद्वाज नियम से पाक्षिक इट्, इट् अभाव पक्ष, द्वित्व, हलादिः शेषः,
म म न् क् थ—पूर्ववत् सलोप, कुत्व, चर्त्व,
ममङ् क्थ—नश्चाऽपदान्तस्य०, अनुस्वारस्य ययि०।

(8) ममज्जिथ
ममस् ज् इ थ—इट् पक्ष में,
म म श् ज् इ थ—प्रथम श्चुत्व,
म म ज् ज् इ थ—पश्चात् जश्त्व।

(9) अमाङ्क्षीत्
म स् न् ज् त्—लुङ्, इतश्च, पूर्ववत् नुम्,
मा स् न् ज् स् त्—सिच्, हलन्तलक्षणा वृद्धि,
मा न् ज् स् ई त्—अस्तिसिचोऽपृक्ते०, स्कोः संयोगा०,
मान् ग् स् ई त्—'चोः कुः' से कुत्व,
अ माङ् क् सीत्—'खरि च' से चर्त्व, अनुस्वार, परसवर्ण, आदेशप्रत्यययोः, अङ्ग को अट् आगम।

(10) ननंष्ठ
न न् श् थ—लिट्, सिप्, थल्, नुम्, इट् अभाव पक्ष,
न न न् श् थ—द्वित्व, हलादिः शेषः,
न न न् ष् थ—व्रश्चभ्रस्ज०,
न न न् ष् ठ—ष्टुना ष्टुः,
ननंष्ठ—नश्चाऽपदान्तस्य०।

(11) नेशिथ
नश् इ थ—इट् पक्ष में नुम् नहीं हुआ, 'थलि च सेटि' के द्वारा एत्व तथा अभ्यासलोप।

झलीति०—**झलादि प्रत्यय** परे रहते 'नुम्' होता है।

(12) मज्जनम्
मस्ज् अन—'धातोः' के अधिकार में ल्युट् हुआ, अनुबन्धलोप करने पर 'युवोरनाकौ' से यु को 'अन्',
म श् ज् अन—'स्तोः श्चुना श्चुः' (8.4.40) से श्चुत्व (शकार) तथा 'झलां जश् झशि' (8.4.53) से जश्त्व (जकार)—दोनों की प्राप्ति, जश्त्व श्चुत्व के प्राप्ति 'असिद्धवदत्राभात्' से असिद्ध है, अतः प्रथम श्चुत्व हुआ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मज्ज् अन सु—तब जश्त्व,[1] सु।

(13) नशनम्
नश् अन—पूर्ववत्,
नशन सु—विभक्तिकार्य।

मस्जेर०—नकारलोप के लिए मस्ज् धातु के अन्त्य वर्ण से पूर्व 'नुम्' आगम होता है। 'मिदचोऽन्त्यात्परः' से नुम् अन्त्य अच् से पर प्राप्त था। यदि इस परिभाषा के बल पर 'नुम्' को 'मस्ज्' के अन्त्य अच् से पर कर दिया जाय तो सकार के संयोगादि न होने से 'स्कोः संयोगा०' की प्राप्ति नहीं होती है। तब उपधा में नकार न रहने से अनुनासिक लोप भी नहीं होता है।

(14) मग्नः
मस्ज् क्त—'धातोः' के अधिकार में 'निष्ठा' तथा 'क्तक्तवतू निष्ठा' से 'क्त' हुआ, 'लशक्वतद्धिते' से ककार की इत्सञ्ज्ञा,
मस् न् ज् न—नुम् पूर्ववत्, 'ओदितश्च' से नकार आदेश,
म ज् न—अनुनासिकलोप, सकारलोप,
म ग् न सु—'चोः कुः' से कुत्व।

(15) मग्नवान्
मस्ज् क्तवतु—पूर्ववत् प्रत्यय आया, उकार तथा ककार की इत्सञ्ज्ञा,
म स् न् ज् तवत्—शेष कार्य पूर्ववत्,
मग्नवत् सु—विभक्तिकार्य।

(3237) रधिजभोरचि *61* (2302)

रधि, जभि-इत्येतयोरजादौ प्रत्यये नुमागमो भवति। रन्धयति। रन्धकः। साधुरन्धी। रन्धंरन्धम्। रन्धो वर्त्तते। जम्भयति। जम्भकः। साधुजम्भी। जम्भं जम्भम्। जम्भो वर्त्तते। परापि सती वृद्धिर्नुमा बाध्यते; नित्यत्वात्। अचीति किम्? रद्धा। जभ्यम्।

अर्थ—रध् तथा जभ् का नुम् आगम होता है, अजादि प्रत्यय परे रहते।

उदा० (1) रन्धयति
रध् णिच्—नुम्, मिदचोऽन्त्यात्परः,
र न् ध् इ शप् तिप्—अनुस्वार, परसवर्ण, धातुसञ्ज्ञा, लट्, तिप्, शप्, गुण तथा अयादेश।

घुषेर्धातोरविशब्दनेऽर्थे निष्ठायामिडागमो न भवति। घुष्टा रज्जुः। घुष्टौ पादौ। अविशब्दन इति किम्? अवघुषितं वाक्यमाह। विशब्दनम्=प्रतिज्ञानम्। 'घुषिर शब्दार्थे' (धा०पा० 653) इति भूवादिषु पठ्यते, 'घुषिर विशब्दने (धा०पा० 1727) इति चुरादिषु; तयोरिह सामान्येन ग्रहणम्। विशब्दनप्रतिषेधश्च ज्ञापकः-'चुरादि-णिज्विशब्दनार्थस्यानित्यः' इति। तेनायमपि प्रयोग उपपन्नो भवति-'महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः' (म० भा०) इति। स्वाभिप्रायं शब्देनाविष्कृतवन्त इत्यर्थः।

अर्थ—अविशब्दन अर्थ में घुष् धातु से उत्तर निष्ठासंज्ञक प्रत्यय को इट् का निषेध होता है।

उदा० (1) घुष्टा रज्जुः
घुष् क्त—इट्-निषेध, टाप्, सु।
इसी प्रकार—घुष्टौ पादौ।

विशब्द०—घुषिर शब्दार्थे का भूवादि में पाठ है तथा घुषिर विशब्दने का चुरादि में पाठ है। उन दोनों का यहाँ ग्रहण है। विशब्दन का निषेध होने से ज्ञापित होता है कि चुरादि णिच् विशब्दनार्थ का अनित्य है। इससे यह प्रयोग भी उपपन्न होता है।

महीपालवचः श्रुत्वा जुघुषुः पुष्पमाणवाः।

अपने अभिप्राय को शब्द के द्वारा आविष्कृत किया—यह अर्थ है।

(3303) अर्देः संनिविभ्यः *24* (3064)

सम्, नि, वि-इत्येतेभ्य उत्तरस्यार्देर्निष्ठायामिडागमो न भवति। समर्णः। न्यर्णः। व्यर्णः। अर्देरिति किम्? समेधितः। संनिविभ्य इति किम्? अर्दितः।

अर्थ—सम्, नि तथा वि उपसर्गपूर्वक अर्द् धातु से उत्तर निष्ठा प्रत्यय को इट् का निषेध होता है।

उदा० (1) समर्णः
सम् अर्द् क्त—रदाभ्यां निष्ठातो०,
सम् अर्न् न—षाभ्यां नो णः०,
समर्ण् न—ष्टुना ष्टुः,
समर्ण सु—हलो यमां यमि लोपः।

(2) न्यर्णः
नि अर्द् क्त—सभी कार्य पूर्ववत्।

(3) व्यर्णः
वि अर्द् क्त—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्देः०—अर्द् धातु से उत्तर निष्ठा को इट् का निषेध होता है।

(4) सम्मेधितः
सम् एध् इ क्त—इट् हुआ,
सम् एधित—सु हुआ।

सन्निवि०—सम्, नि तथा विपूर्वक अर्द् धातु से उत्तर निष्ठा को इट् का निषेध होता है।

(5) अर्दितः
अर्द् क्त—इट् हो गया है।

(3304) अभेश्चाविदूर्ये *25* (3065)

अभिशब्दादुत्तरस्यार्देराविदूर्येऽर्थे निष्ठायामिडागमो न भवति। अभ्यर्णा सेना। अभ्यर्णा शरत्। आविदूर्य इति किम्? अभ्यर्दितो वृषलः। शीतेन पीडित इत्यर्थः। विदूरम्=विप्रकृष्टम्, ततोऽन्यदविदूरम्, तस्य भाव आविदूर्यम्। एतस्मादेव निपातनात् 'न नञ्पूर्वात्तत्पुरुषात्' (5.1.121) इत्युत्तरस्य भावप्रत्ययस्य प्रतिषेधो न भवति।

अर्थ—सन्निकट अर्थ में वर्त्तमान अभिपूर्वक अर्द् धातु से पर निष्ठासंज्ञक प्रत्यय को इट् आगम नहीं होता है।

उदा० (1) अभ्यर्णा सेना
अभि अर्द् क्त—इट् नहीं हुआ,
अभ्यर्ण टाप् सु—इको यणचि।

(2) अभ्यर्णा शरत् (पूर्ववत्)।

आविदूर्य०—**सन्निकट** अर्थ में ही अर्द् से उत्तर निष्ठा को इट् नहीं होता है।

(3) अभ्यर्दितो वृषलः
अभि अर्द् इ क्त—इट् हुआ।

विदूर०—विदूर=दूर। उससे भिन्न को 'अविदूर' कहते हैं। अविदूर का भाव 'आविदूर्य' कहलाता है। इस निपातन से ही 'न नञ्पूर्वात्तत्पुरुषात्' से उत्तर भावप्रत्यय का निषेध नहीं होता है।

(3305) णेरध्ययने वृत्तम् *26* (3066)

ण्यन्तस्य वृत्तेर्निष्ठायामध्ययनार्थे वृत्तमितीडभावो णिलुक्च निपात्यते। वृत्तो गुणो देवदत्तेन। वृत्तं पारायणं देवदत्तेन। अध्ययन इति किम्? वर्त्तितमन्यत्। वृतिरयमकर्मकः, स ण्यर्थे वर्त्तमानः सकर्मको भवति। 'तेन निर्वृत्तम्' इति हि प्रकृतेरेव कर्मणि क्तप्रत्ययो दृश्यते। तद्वदिहापि ण्यर्थवृत्तेरेव च वृतेः वृत्तो गुणो देवदत्तेनेति भविष्यतीति निपातनमनर्थकम्? तत्क्रियते-यदापि णिचैव ण्यर्थोऽभिधीयते तदा वर्त्तितमित्यध्ययने मा भूदिति केचित्। अपरे तु-वर्त्तितो गुणो देवदत्तेन इत्यपीच्छन्ति।

अर्थ—अध्ययन अर्थ में ण्यन्त वृत् धातु से निष्ठा में 'वृत्त' शब्द निपातनसिद्ध है।

उदा० (1) वृत्तो गुणो देवदत्तेन
वृत् णिच् क्त—निपातन से इट् का निषेध, णिलोप,
वृत्त सु—विभक्तिकार्य।
इसी प्रकार—वृत्तं पारायणं देवदत्तेन।

अध्ययन०—**अध्ययन** अर्थ में ही 'वृत्त' शब्द निपातनसिद्ध है।

(2) वर्त्तितम्
वृत् इट् क्त—गुण, सु।

वृत्ति०—वृत् धातु अकर्मक है। णिच् प्रत्ययान्त वृत् धातु सकर्मक है। तब 'तेन निर्वृत्तम्' से प्रकृति से ही कर्म में क्त प्रत्यय दिखाई पड़ता है। इसी प्रकार ण्यर्थ में वर्त्तमान 'वृत्' को होता है। यथा—वृत्तो गुणो देवदत्तेन। अतः निपातन की क्या आवश्यकता है? जब णिच् द्वारा ही णिजर्थ कहा जाता है, तब 'वर्त्तितम्' यह प्रयोग अध्ययन अर्थ में न हो—इसके लिए है।

(3306) वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः *27* (3068)

'णेः' इत्यनुवर्त्तते। दम्, शम्, पुरी, दस्, स्पश्, छद्, ज्ञप-इत्येतेषां ण्यन्तानां धातूनां वा अनिट्त्वं निपात्यते। दान्तः, दमितः। शान्तः, शमितः। पूर्णः, पूरितः। दस्तः, दासितः। स्पष्टः, स्पाशितः। छन्नः, छादितः। ज्ञप्तः, ज्ञपितः। इट्प्रतिषेधो णिलुक्च निपात्यते। ज्ञपेस्तु 'भरज्ञपिसनाम्' (7.2.49) इति विकल्पविधानाद् 'यस्य विभाषा' (7.2.15) इति नित्ये प्रतिषेधे प्राप्ते विकल्पार्थं निपातनम्।

अर्थ—'णेः' का अनुवर्त्तन है। दान्त, शान्त, पूर्ण, दस्त, स्पष्ट, छन्न तथा ज्ञप्त—ये निपातनसिद्ध हैं।

उदा० (1) दान्तः
दम् णिच् क्त—इट् का निषेध, अत उपधायाः, णि का लुक्, मितां ह्रस्वः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दाम् त सु—अनुनासिकस्य क्वि०, अनुस्वार, अनुस्वारस्य०,

(2) दमितः
पक्ष में इट् हुआ, 'जनिजृष्क्नसु०' से मित् संज्ञा,
दाम् णिच् इट् त—मितां ह्रस्वः, सु।

(3) शान्तः
शम् णिच् क्त—'दान्तः' की तरह।

(4) शमितः
'दमितः' की तरह।

(5) पूर्णः
पूर् णि क्त—निपातन से णिच् का लुक्,
पूर्ण सु—रदाभ्यां निष्ठातो०, षाभ्यां नो णः०।

(6) पूरितः
इट् हुआ।

(7) दस्तः
दस् णिच् क्त—निपातन से णि का लोप।

(8) दासितः
अत उपधायाः से वृद्धि, इट्।

(9) स्पष्टः
स्पश् णिच् क्त—निपातन से णिलोप,
स्पष् त—व्रश्चभ्रस्ज०,
स्पष्ट सु—ष्टुना ष्टुः।

(10) स्पाशितः
'दासितः' की तरह।

(11) छन्नः
छद् णिच् क्त—निपातन से णिलुक्,
छद् त सु—रदाभ्यां निष्ठा०।

(12) छादितः
'दासितः' की तरह।

(13) ज्ञप्तः
ज्ञप् णिच् क्त—णि का लुक्।

(14) ज्ञपितः
ज्ञप् णिच् क्त—अत उपधायाः से वृद्धि,
ज्ञाप् इ त—'मारणतोषणनिशामनेषु ज्ञा मिच्च' से घटादि, घटादयो मितः, मितां ह्रस्वः,
ज्ञपित—सु।

इट्०—यहाँ इट् का निषेध तथा णि का लुक् निपातन से होते हैं। न्यासकार के अनुसार चकार के द्वारा कहीं-कहीं उपधा को ह्रस्वादेश निपातन से होता है।[1] ज्ञप् धातु से 'भरज्ञपिसनाम्' से पाक्षिक इट् प्राप्त, 'यस्य विभाषा' से नित्य निषेध हुआ, तब विकल्प के लिए विधान किया गया है।

(3307) रुष्यमत्वरसंघुषास्वनाम् *28* (3069)

'वा' इति वर्तते। रुषि, अम, त्वर, सङ्घुष, आस्वन–इत्येतेषां निष्ठायां वा इडागमो न भवति। रुष्ट, रुषितः। 'तीषसहलुभरुषरिषः' (4.2.102) इति विकल्पविधानाद् 'यस्य विभाषा' (7.2.15) इति प्रतिषेधे प्राप्ते विकल्पार्थं वचनम्। अम्–अभ्यान्तः, अभ्यमितः। त्वर–तूर्णः, त्वरितः। 'आदितश्च' (7.2.16) इति प्रतिषेधे प्राप्ते वचनम्। सङ्घुष–सङ्घुष्टौ पादौ, सङ्घुषितौ पादौ। सङ्घुष्टं वाक्यमाह, सङ्घुषितं वाक्यमाह। सङ्घुष्टौ दम्यौ, सङ्घुषितौ दम्यौ। सम्पूर्वस्य घुषेरविशब्दनेऽपि परत्वादयमेव विकल्पो भवति। आस्वन्–आस्वान्तो देवदत्तः, आस्वनितो देवदत्तः। आस्वान्तं मनः, आस्वनितं मनः। आङ्पूर्वस्य स्वनेर्मनोभिधानेऽपि परत्वादयं विकल्पः 'क्षुब्धस्वान्त' (7.2.18) इति निपातनं बाधते।

अर्थ—'वा' का अनुवर्त्तन है। रुष्, अम्, त्वर्, सम् पूर्वक घुष् तथा आपूर्वक स्वन्—इन अङ्गों से उत्तर निष्ठासंज्ञक प्रत्यय को विकल्प से इट् आगम नहीं होता है।

उदा० (1) रुष्टः
रुष् क्त—ष्टुना ष्टुः।

(2) रुषितः
पक्ष में इट्।

तीषसहलुभ०—'तीषसहलुभ०' से पाक्षिक इट् का 'यस्य विभाषा' से नित्य निषेध प्राप्त होने पर विकल्प के लिए यह विधान है।

(3) अभ्यान्तः
अभि अम् क्त—'अनुनासिकस्य०' से दीर्घ,
अभ्यां त—इको यणचि, अनुस्वार, परसवर्ण।

(4) अभ्यमितः
पक्ष में इट् हुआ है।

1. न्यास 7.2.27 चकारात् क्वचिदुपधाह्रस्वत्वमपि निपात्यते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(5) तूर्णः
त्वर् क्त—'ज्वरत्वरस्रव्यविम०' से ऊठ्
त् ऊठ् र् त—'रदाभ्यां निष्ठा,
तूर् न—रषाभ्यां नो णः समा०।

(6) त्वरितः
पक्ष में इट् होकर।

आदित०—'आदितश्च' से निषेध प्राप्त होने पर विकल्प कहा गया है।

(7) सङ्घुष्टः
सम् घुष् क्त—ष्टुना ष्टुः, अनुस्वार, परसवर्ण।

(8) सङ्घुषितम्
सम् घुष् त—पक्ष में इट्।

सम्पूर्व०—सम् पूर्वक घुष् से अविशब्दन अर्थ में भी पर होने से यह विकल्प होता है।

(9) आस्वान्तः
आ स्वन् क्त—इट् निषेध, दीर्घ।

(10) आस्वनितः
पक्ष में इट् हुआ।

आङ्पूर्व०—आङ्पूर्वक स्वन् से 'मनस्' अर्थ में भी पर होने से यह विकल्प होता है। यह विकल्प 'क्षुब्धस्वान्त०' का बाध करता है।

(3308) हृषेर्लोमसु *29* (3070)

लोमसु वर्त्तमानस्य हृषेर्निष्ठायां वा इडागमो न भवति। हृष्टानि लोमानि, हृषितानि लोमानि। हृष्टं लोमभिः, हृषितं लोमभिः। हृष्टाः केशाः, हृषिताः केशाः। हृष्टं कैशैः, हृषितं केशैः। 'हृषु अलीके' (धा०पा० 709) इत्युदित्त्वान्निष्ठायामनिट्, 'हृष तुष्टौ' (धा०पा० 1230) इत्ययं सेट्; तयोरुभयोरिह ग्रहणमित्युभयत्रविभाषेयम्। लोमानि मूर्धजानि, अङ्गजानि च सामान्येन गृह्यन्ते; यथा–'लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यम्' इति। तद्विषये च हर्षे वर्त्तमानो लोमसु वर्त्तत इत्युच्यते। लोमस्विति किम्? हृष्टो देवदत्त इत्यलीकार्थस्य, हृषितो देवदत्त इति तुष्ट्यर्थस्य। *विस्मितप्रतिघातयोश्चेति वक्तव्यम्*। हृष्टो देवदत्तः, हृषितो देवदत्तः। विस्मित इत्यर्थः। हृष्टा दन्ताः, हृषिता दन्ताः। प्रतिहता इत्यर्थः।

अर्थ—लोम अर्थ में वर्त्तमान हृष् धातु से पर निष्ठा प्रत्यय को विकल्प से इट् नहीं होता है।

उदा० (1) हृष्टानि लोमानि
हृष् क्त—ष्टुत्व, जस्।

(2) हृषितानि लोमानि
इट् हुआ है। शेष पूर्ववत्। 'गत्यर्थाकर्मक०' से 'क्त' हुआ है।

(3) हृष्टं लोमभिः
इट्-निषेध।

(4) हृषितं लोमभिः
इट् हुआ है। 'नपुंसके भावे क्तः' से भाव में प्रत्यय है। यहाँ 'लोम' तथा 'केश' दोनों का ग्रहण है। यथा—

हृष्टाः केशाः, हृषिताः केशाः, हृष्टं केशैः, हृषितं केशैः।

हृषु०—हृषु अलीके यहाँ 'उदितो वा' से निष्ठा में विकल्प से इट् प्राप्त था। हृष तुष्टौ—यह धातु सेट् है। इन दोनों से पाक्षिक इट् का विधान है। अतः यह प्राप्ताप्राप्त विभाषा है।

लोम के द्वारा शिर पर होने वाले केश आदि तथा अङ्गों पर होने वाले रोम आदि—दोनों का ग्रहण होता है। यथा—लोमनखं स्पृष्ट्वा शौचं कर्त्तव्यम्।

लोमस्वि०—लोम अर्थ में वर्त्तमान हृष् धातु से उत्तर निष्ठा को विकल्प से इट् नहीं होता है।

हृष्टो देवदत्त, हृषितो देवदत्तः—यहाँ 'लोम' अर्थ न होने से विकल्प नहीं हुआ।

विस्मित०—विस्मित तथा प्रतिघात अर्थों में निष्ठा को पाक्षिक इट् होता है।

(3) हृष्टो देवदत्तः (= देवदत्त विस्मित है)।
(4) हृषितो देवदत्तः (= देवदत्त विस्मित है)।

इसी प्रकार हृष्टाः दन्ताः, हृषिताः दन्ताः (प्रतिघात अर्थ)।

(3309) अपचितश्च *30* (3071)

'अपचितः' इति क्वा निपात्यते। अपपूर्वस्य चायतेर्निष्ठायामनिट्त्वं चिभावश्च निपात्यते। अपचितोऽनेन गुरुः। अपचायितोऽनेन गुरुः। *क्तिनि नित्यमिति वक्तव्यम्* (म०भा०)। क्तिनि नित्यं चिभावो निपात्यते। अपचितिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—'अपचित' शब्द विकल्प से निपातनसिद्ध है। अप-पूर्वक चाय् धातु से पर निष्ठा प्रत्यय को इट् का निषेध तथा धातु के स्थान पर 'चि' आदेश निपातन से होते हैं।

उदा० (1) अपचितः
(2) अपचायितः—पक्ष में।

क्तिनि०—क्तिन् प्रत्यय में नित्य 'चि' आदेश होता है।

(3) अपचितिः
अप चाय् क्तिन्—अपचिति सु।

(3310) हु ह्वरेश्छन्दसि *31* (3579)

ह्वरतेर्धातोर्निष्ठायां छन्दसि 'हु' इत्ययमादेशो भवति। हुतस्य चाहुतस्य च। अहुतंमसि हविर्धानम् (वा०सं० 1.7)। छन्दसीति किम्? ह्वृतम्।

अर्थ—वेद के विषय में निष्ठासंज्ञक प्रत्यय के परे रहते 'ह्वृ' के स्थान पर 'हु' आदेश होता है।

उदा०—(1) अहुतमसि (यजु० 1.9)
अनुदात्तोपदेश होने से 'एकाच उपदेशेऽनु०' से इट् का निषेध।

छन्दसी०—वेद में ही यह आदेश होता है।

(2) ह्वृतम्
लोक में 'हु' नहीं हुआ।

(3311) अपरिह्वृताश्च *32* (3580)

'अपरिह्वृताः' निपात्यते छन्दसि विषये। 'हु' इत्येतस्यादेशस्याभावो निपात्यते। 'अपरिह्वृताः सनुयाम वाजम्' (ऋ० 1.100.19)।

अर्थ—वेद के विषय में 'अपरिह्वृताः' शब्द निपातनसिद्ध है।

उदा० (1) अपरिह्वृताः (ऋ० 1.100.19)
अपरिह्वृ क्त—'हु ह्वरेश्छन्दसि' से प्राप्त 'हु' भाव का निपातन से अभाव,
अपरिह्वृत जस्—विभक्तिकार्य।

(3312) सोमे ह्वरितः *33* (3581)

'ह्वरितः' इति ह्वरतेर्निष्ठायामिडागमो गुणश्च निपात्यते छन्दसि विषये, सोमश्चेद्भवति। मा नः सोमो ह्वरितः। विह्वरितस्त्वम्।

अर्थ—वेद के विषय में 'ह्वरित' शब्द निपातनसिद्ध है, सोम अर्थ में।

उदा० (1) ह्वरितः
ह्वृ क्त—इट् आगम निपातन से,
ह्वर् इ त—गुण निपातन से, 'हु ह्वरेश्छन्दसि' से प्राप्त 'हु'-भाव का निपातन से अभाव।

(3313) ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ता विशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिक्षमितिवमित्यमितीतिच *34* (3582)

ग्रसित, स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुतृ, तरूतृ, वरुतृ, वरूतृ, वरूत्रीः, उज्ज्वलिति, क्षरिति, वमिति, अमिति–इत्येतानि छन्दसि निपात्यन्ते। तत्र ग्रसितस्कभितस्तभितोत्तभितेति–ग्रसु, स्कन्भु, स्तन्भु इत्येतेषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इडागमो निपात्यते। 'ग्रसितं वां पुतत्सोमस्य (मै० सं० 3.4.7)। ग्रस्तमिति भाषायाम्। स्कभित–'विष्कंभिते अजरे' (ऋ० 6.70.1)। विष्कब्ध इति भाषायाम्। स्तभित–'येन स्वः स्तभितम्' (ऋ० 10.121.5) स्तब्धमिति भाषायाम्। उत्तभित–'सत्येनोत्तभिता भूमिः (ऋ० 10.85.1)। उत्तब्धेति भाषायाम्। उत्तभितेति उत्पूर्वस्य निपातनसामर्थ्यादन्योपसर्गपूर्वः स्तभितशब्दो न भवति। चत्त विकस्तेति–चतेः, कसेश्च विपूर्वस्य निष्ठायामिडभावो निपात्यते। चत्ता वर्षेण विद्युत्। चतितेति भाषायाम्। विकस्त–'उत्तानाया हृदयं यद् विकस्तम्' (मै० 2.7.4)। विकसितमिति भाषायाम्। निपातनं बहुत्वापेक्षम् 'विकस्ताः' इति बहुवचनं कृतम्। अपरेषु तु निपातनेषु प्रत्येकं विभक्तिनिर्देशः। विशस्तृ, शंस्तृ, शास्त्रिति–शसेर्विपूर्वस्य, शंसेः, शासेश्च तृचि इडभावो निपात्यते। विशस्तृ–'एकस्वष्टुरश्वस्याविशस्ता'। विशसितेति भाषायाम्। शंस्तृ–'उत शंस्ता सुविप्रः'। शंसितेति भाषायाम्। शास्तृ–'प्रशास्ता'। प्रशासितमिति भाषायाम्। तरुतृतरूतृवरुतृवरूतृवरूत्रीरिति–तरतेः वृङ्वृञोश्च तृचि उट्, ऊट्–इत्येतावगमौ निपात्येते। तरुतारं रथानाम् (ऋ० 10.178.1) तरूतारम्। तरितारम्, तरीतारमिति भाषायाम्। वरुतारं रथानाम्, वरूतारं रथनाम्। वरितारम्, वरीतारमिति भाषायाम्। 'वरूत्रीष्ट्वा देवीर्विश्वदेव्यवती' (मै० 2.7.6)। जसि पूर्वसवर्णोच्चारणं प्रयोगदर्शनार्थम्। अतत्रं चैतत्। इदमपि हि भवति–अहोरात्राणि वै वरूत्रय इति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

छान्दसिकमत्र ह्रस्वत्वम्। प्रपञ्चार्थमेव च ङीबन्तस्य निपातनम्। वरूतृशब्दो हि निपातितः, तत एव ङीपि सति सिद्धो वरूत्रीशब्दः। उज्जलिति, क्षरिति, क्षमिति, वमिति, अमितीति च–ज्वलतेरुत्पूर्वस्य, क्षर, क्षम, वम, अम–इत्येतेषां च तिपि शप इकारादेशो निपात्यते, शपो लुग्वा, इडागमः। अग्निरुज्ज्वलिति। उज्ज्वलतीति भाषायाम्। क्षरिति–स्तोकं क्षरिति। क्षरतीति भाषायाम्। क्षमिति स्तोमं क्षमिति। क्षमतीति भाषायाम्। वमिति–यः सोमं वमिति। वमतीति भाषायाम्। अमिति–अभ्यमिति वरुणः। अभ्यमतीति भाषायाम्। इतिकरणं प्रदर्शनार्थम्, तेन क्वचिदीकारो भवति–'रविमभ्यमीति वरणः' (वा० 22.5) इत्यपि हि वेदे पठ्यते।

अर्थ—वेद में ग्रसित, स्कभित, स्तभित, उत्तभित, चत्त, विकस्त, विशस्तृ, शंस्तृ, शास्तृ, तरुतृ, तरूतृ, वरुतृ, वरूतृ, वरूत्री, उज्ज्वलिति, क्षरिति, वमिति तथा अमिति शब्द निपातन-सिद्ध हैं।

उदा० (1) ग्रसितः (मै०सं० 3.7.4)

ग्र सु क्त—'उदितो वा' से पाक्षिक इट् प्राप्त, 'यस्य विभाषा' से नित्य निषेध, निपातन से इट्, लोक में—ग्रस्तः।

(2) स्कभितः (ऋ० 6.70.1)

स्कम्भु क्त—पूर्ववत्। 'अनिदितां हल०' से अनुनासिकलोप। लोक में—स्कब्धः।

(3) स्तभितः (ऋ० 10.121.5)

स्तन्भु क्त—पूर्ववत्। लोक में—स्तब्धः।

(4) उत्तभितः (ऋ० 10.85.1)

उद् स्तन्भ् क्त—सभी पूर्ववत्, खरि च। लोक में—उत्तब्धः।

(5) चत्तः

चते क्त—इट् अभाव निपातन से। लोक में—चतिता।

(6) विकस्तः (मै०सं० 2.7.4)

वि कस् क्त—पूर्ववत्। लोक में—विकसितम्।

(7) विशस्ता (ऋ० 1.162.19)

वि शस् तृच्—इट् निषेध निपातन से। लोक में—विशसिता।

(8) शंस्ता (ऋ० 1.162.5)

शंस् तृच्—निपातन से इट् निषेध। लोक में—शंसिता।

(9) प्रशास्ता (ऋ० 2.5.4)

प्र शास् तृच्—इट् निषेध। लोक में—प्रशासितम्।

(10) तरुतारम्

तृ तृच्—निपातन से 'उट्',
तर् उट् तृ सु—गुण। लोक में—तरितारम्।

(11) तरूतारम्

तृ तृच्—ऊट् आगम। लोक में—तरीतारम्।

(12) वरुतारम्

वृङ् तृ—पूर्ववत् 'उट्'। लोक में—वरितारम्।

(13) वरूतारम्

ऊट् आगम्। लोक में—वरीतारम्।

(14) वरूत्रीः (मा०सं० 11.61)

वरूतृ—पूर्ववत्,
वरूतृ ङीप् जस्—ऋन्नेभ्यो ङीप्।

जसि०—जस् विभक्ति में पूर्वसवर्णदीर्घ हुआ। यह प्रयोग के दर्शनार्थ है। यह उचित नहीं है। निम्नलिखित भी होता है—

अहोरात्राणि वै वरूत्रयः। यहाँ ह्रस्वादेश छान्दस है। ङीप् प्रत्ययान्त 'वरूत्री' शब्द का निपातन प्रपञ्चार्थ है। सूत्रोक्त 'वरूतृ' शब्द से ङीप् करके भी यह शब्द सिद्ध था।

(15) उज्ज्वलिति

उद् ज्वल् शप् तिप्—निपातन से इकार,
उद् ज्वलिति—स्तोः श्चुना श्चुः।

इत्येते०—यहाँ निपातन से अकार के स्थान पर इकार होता है अथवा शप् का लुक् होकर इट् आगम होता है। लोक में—उज्ज्वलति।

(16) क्षरिति

क्षर् शप् तिप्—पूर्ववत्,
क्षरि ति—इकार। लोक में—क्षरति।

(17) क्षमिति

पूर्ववत् इकार। लोक में—क्षमति।

(18) वमिति

वम् शप् तिप्—पूर्ववत्। लोक में—वमति।

(19) अमिति

अम् शप् तिप्—पूर्ववत्। लोक में—अमति।

इतिक०—इतिकरण प्रदर्शनार्थ है। अतः कहीं ईकार भी होता है। यथा—

(20) अभ्यमीति (मा०सं० 22.5)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभि अम् ई तिप्—ईकार हुआ।

(3314) आर्धधातुकस्येड्वलादेः *35* (2184)

'छन्दसि' इति निवृत्तम्। आर्धधातुकस्य वलादेरिडागमो भवति। लविता, लवितुम्, लवितव्यम्। पविता, पवितुम्, पवितव्यम्। आर्धधातुकस्येति किम्? आस्ते। शेते। वस्ते। 'रुदादिभ्यः सार्वधातुके' इत्येतस्मिन्नियमार्थे विज्ञायमाने प्रतिपत्तिगौरवं भवतीति आर्धधातुकग्रहणं क्रियते। वलादेरिति किम्? लव्यम्, पव्यम्। लवनीयम्, पवनीयम्। इडिति वर्त्तमाने पुनरिड्ग्रहणं प्रतिषेधनिवृत्त्यर्थम्।

अर्थ—'छन्दसि' का अनुवर्त्तन नहीं है। अङ्गसंज्ञक शब्द से उत्तर वलादिक आर्धधातुक को इट् आगम होता है।

उदा० (1) लविता
लू तृ—आर्धधातुकं शेषः, इट्,
लो इ तृ—'सार्वधातुकार्धधातुकयोः' से गुण, सु।

(2) लवितुम्
लू तुमुन्—पूर्ववत्।

(3) लवितव्यम्
लू तव्यत्—पूर्ववत्।

(4) पविता
पू तृच्—पूर्ववत्।

(5) पवितुम्
पू तुमुन्—पूर्ववत्।

(6) पवितव्यम्
पू तव्यत्—पूर्ववत्।

आर्धधा०—आर्धधातुक को इट् होता है।

(7) आस्ते
आस् त—शप्, शप् का लुक्, तिङ् शित् सार्वधातुकम्, आर्धधातुक न होने से इट् नहीं हुआ,
आस्ते—टित आत्मनेपदानां टेरे।

(8) शेते
शी त—पूर्ववत्। शीङः सार्वधातुके गुणः।

(9) वस्ते
वस् त—पूर्ववत्।

रुदादि०—'रुदादिभ्यः सार्वधातुके' के नियमार्थ ज्ञात हो जाने पर प्रतिपत्ति का गौरव होता है। अतः 'आर्धधातुके' का ग्रहण है।

वलादे०—वलादि प्रत्यय को इट् आगम होता है।

(10) लव्यम्
लू यत्—'अचो यत्' से यत् हुआ, आर्धधातुक संज्ञा है। परन्तु वलादि न होने से इट् नहीं हुआ,
लो य सु—वान्तो यि प्रत्यये।

(11) पव्यम्
पू यत्—इट् नहीं हुआ।

(12) लवनीयम्
लू अनीयर्—गुण, अवादेश।

(13) पवनीयम्
पू अनीयर्—पूर्ववत्।

इडिति०—प्रकृत सूत्र में 'इट्' का अनुवर्त्तन होने पर भी पुनः 'इट्' का ग्रहण निषेध की निवृत्ति के लिए है।

(3315) स्नुक्रमोरनात्मनेपदनिमित्ते *36* (2323)

नियमार्थमिदम्। स्नुक्रमोरार्धधातुकस्य वलादेरिडागमो भवति, न चेत्स्नुक्रमौ आत्मनेपदस्य निमित्तं भवतः। क्व च तावात्मनेपदस्य निमित्तम्? यत्रात्मनेपदं तदाश्रयं भवति-भावकर्मकर्तृकर्मकर्मव्यतिहाराः। क्रमेर्वृत्त्यादयश्च। तेनायं सत्यात्मनेपदे प्रतिषेधो भवति, नासतीति। प्रतिषेधफलं चेदं सूत्रम्। स्नुक्रमोरुदात्तत्वादिट् सिद्ध एव। प्रस्नविता, प्रस्नवितुम्, प्रस्नवितव्यम्। प्रक्रमिता, प्रक्रमितुम्, प्रक्रमितव्यम्। अनात्मनेपदनिमित्ते इति किम्? प्रस्नोषीष्ट, प्रक्रंसीष्ट। प्रस्नोष्यते, प्रक्रंस्यते। प्रसुस्नूषिष्यते, प्रचिक्रंसिष्यते। सर्वत्रैवात्र स्नौतिः, क्रमिश्चात्मनेपदस्य निमित्तम्। सनन्तादपि हि 'पूर्ववत्सनः' (1.3.62) इत्यात्मनेपदं विधीयते। निमित्तग्रहणं किम्? सीयुडादेस्तत्परपरस्य च प्रतिषेधार्थम्। इह तु प्रस्नवितेवाचरतीति प्रस्नवित्रीयत इति क्यङन्तमात्मनेपदस्य निमित्तम्, न स्नौतिः। *क्रमेस्तु कर्तर्यात्मनेपदविषयादसत्यात्मनेपदे कृति प्रतिषेधो वक्तव्यः* (म० भा०)। प्रक्रन्ता। उपक्रन्ता। कर्त्तरीति किम्? प्रक्रमितव्यम्। उपक्रमितव्यम्। आत्मनेपदविषयादिति किम्? निष्क्रमिता। स्नौतेः सनि किति च प्रत्यये 'श्र्युकः किति' (7.2.12) 'सनि ग्रहगुहोश्च' (7.2.13) इत्येव प्रतिषेधो भवति-प्रसुस्नूषति। प्रस्नुतः। प्रस्नुतवान्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—यह नियम के लिए है। स्नु तथा क्रम् अङ्गों से उत्तर आर्धधातुक वलादि प्रत्यय को इट् का आगम होता है, यदि स्नु तथा क्रम् आत्मनेपद के निमित्त न हों।

ये आत्मनेपद के निमित्त कहाँ होते हैं ? जहाँ तदाश्रित आत्मनेपद होता है। यथा—

भावकर्म में, कर्तृकर्म में, कर्मव्यतिहार में इत्यादि। ऐसा होने पर यह निषेध होता है। ऐसा न होने पर इट् नहीं होता है।

प्रतिषेध०—यह सूत्र निषेध का फल है। स्नु तथा क्रम् धातुओं के उदित् होने से 'उदितो वा' से इट् सिद्ध ही है।

उदा० (1) प्रस्नविता
प्र स्नु तृ—आर्धधातुकं शेषः, इट्,
प्र स्नो इ तृ—सार्वधातुकार्धधातु०, अवादेश, सु।

(2) प्रस्नवितुम्
प्र स्नु तुमुन्—पूर्ववत्।

(3) प्रस्नवितव्यम्
प्र स्नु तव्यत्—पूर्ववत्।

(4) प्रक्रमिता
प्र क्रम् इट् तृच्—इट् हुआ।

(5) प्रक्रमितुम्
प्र क्रम् इट् तुमुन्—सु।

(6) प्रक्रमितव्यम्
प्र क्रम् तव्यत्—इट्, सु।

अनात्मने०—आत्मनेपद का निमित्त न हो तो इट् होता है।

(7) प्रस्नोषीष्ट
स्नु सीयुट् सुट् त—आशिषि लिङ्, 'भावकर्मणोः' से कर्त्ता में आत्मनेपद, 'सुट् तिथोः' से 'सुट्',
स्नु सीय् स् त—अनुबन्धलोप,
स्नु षी ष् त्—यकारलोप, आदेशप्रत्यययोः,
प्र स्नु षी ष् ट—ष्टुना ष्टुः।

(8) प्रक्रंसीष्ट
प्र क्रम् त—आशीर्लिङ्, 'प्रोपाभ्यां समार्थाभ्याम्' से कर्त्ता में आत्मनेपद प्रत्यय,
प्रक्रम् सीय् स् त—पूर्ववत्,
प्रक्रंसीष्ट—'नश्चाऽपदान्तस्य झलि' से अनुस्वार, शेष पूर्ववत्।

(9) प्रस्नोष्यते
प्र स्नु त—'ल्ट् शेषे च' से ल्ट् प्रत्यय,
प्र स्नु स्य त—स्यतासी ल्लुटोः, आर्धधातुक गुण,
प्रस्नो स्य त—आदेशप्रत्यययोः, एत्व।

(10) प्रक्रंस्यते
प्र क्रम् स्य त—पूर्ववत् आत्मनेपद, स्य आदि।

(11) प्रसुस्नूषिष्यते
स्नु सन्—'अज्झनगमां सनि' से दीर्घ, 'सन्यङोः' से द्वित्व,
सु स्नू स—हलादिः शेषः, ह्रस्वः, आदेशप्रत्यययोः, धातुसंज्ञा,
सुस्नूष त—'पूर्ववत् सनः' से आत्मनेपद, ल्ट्, स्य,
प्रसुस्नूष् इस्य ते—'अतो लोपः' से अकारलोप, आदेश-प्रत्यययोः।

(12) प्रचिक्रंसिष्यते
क्रम् सन्—द्वित्व, हलादिः शेषः,
क क्रम् स—कुहोश्चुः, सन्यतः, 'नश्चाऽपदान्तस्य झलि' से अनुस्वार,
चिक्रंस त—धातु संज्ञा, पूर्ववत् ल्ट्,
प्र चिक्रंस् इ स्य त—शेष पूर्ववत्।

सर्वत्र—यहाँ सर्वत्र स्नु तथा क्रम धातुओं से आत्मनेपद का निमित्त है। सन् प्रत्ययान्त से भी 'पूर्ववत् सनः' से आत्मनेपद होता है।

निमित्त०—आत्मनेपद का निमित्त होने पर ही आर्धधातुक को इट् नहीं होता है। यह सीयुट् आदि का तथा उससे पर से उत्तर के निषेध के लिए है। अतः 'प्रस्नवित्रीयते' में क्यङ् प्रत्ययान्त आत्मनेपद का निमित्त है; स्नु का नहीं।

(13) प्रस्नवित्रीयते
प्र स्नु तृच्—इट्, गुण आदि होकर,
प्रस्नवितेवाऽऽचरति[1]—'कर्तुः क्यङ् सलोपश्च' से क्यङ्,
प्र स्नवित् रीङ् य—लशक्वतद्धिते, हलन्त्यम्, 'रीङ् ऋतः' से रीङ्,
प्रस्नवित्रीय शप् त—अतो गुणे।

क्रमे०—क्रम् धातु, कर्त्ता अर्थ में आत्मनेपद विषय वाली से आत्मनेपद न रहने पर, कृत् प्रत्यय परे प्रतिषेध होता है।

(14) प्रक्रन्ता
प्र क्रम् तृच्—इट् निषेध, अनुस्वार,

1. कुछ विद्वान् यहाँ प्रस्नवितारमिवाऽऽचरति—इस प्रकार विग्रह करते हैं। वे यहाँ भ्रान्त हैं। कारण 'कर्तुः क्यङ् सलोपश्च' से कर्त्ता से क्यङ् हुआ करता है; कर्म सुबन्त से नहीं। द्र०—न्यास 7.2.36

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रक्रंतृ सु—परसवर्ण।

(15) उपक्रन्ता
उप क्रम् तृ—पूर्ववत्।

कर्त्तरी०—कर्त्ता अर्थ में ही निषेध होता है।

(16) प्रक्रमितव्यम्
प्र क्रम् तव्यत्—इट् हुआ।

(17) उपक्रमितव्यम्
पूर्ववत् इट् हुआ।

स्नौते०—स्नु धातु से उत्तर सन् प्रत्यय को 'सनि ग्रहगुहोश्च' से इट् का निषेध होता है तथा कित् प्रत्यय को 'श्र्युकः किति' से निषेध होता है।

(18) प्रसुस्नूषति
स्नु सन्—'अज्झनगमां सनि' से दीर्घ,
स्नू स्नू स—'सन्यङोः' से द्वित्व, पूर्वोऽभ्यासः,
सु स्नूष—हलादिः शेषः, ह्रस्वः, आदेशप्रत्यययोः,
प्र सुस्नूष शप् ति—पूर्ववत् सनः, शप्।

(19) प्रस्नुतः
प्र स्नु क्त—कित् प्रत्यय को इट् नहीं हुआ।

(20) प्रस्नुतवान्
प्र स्नु क्तवतु—पूर्ववत्।

(3316) ग्रहोऽलिटि दीर्घः *37* (2562)

ग्रह उत्तरस्य इटः अलिटि दीर्घो भवति। ग्रहीता, ग्रहीतुम्, ग्रहीतव्यम्। अलिटीति किम्? जगृहिव। जगृहिम। प्रकृतस्येटो दीर्घत्वम्, इदं चिण्वदिटो न भवति-ग्राहिता, ग्राहिष्यते।

अर्थ—ग्रह् धातु के अङ्ग से उत्तर इट् को दीर्घ आदेश होता है, परन्तु लिट् परे रहते नहीं होता।

'इट्' को विभक्तिविपरिणाम से षष्ठ्यन्त में परिणत कर लिया जाता है। 'इट्' के स्थान पर होने वाला दीर्घादेश आन्तरतम्य से दीर्घ ईकार होता है।

उदा० (1) ग्रहीता
ग्रह् तृच्—ण्वुल्तृचौ, आर्धधातुकस्येड् वलादेः,
ग्रह् इ तृ—अनुबन्धलोप,
ग्रहीतृ सु—दीर्घ।

(2) ग्रहीतुम्
ग्रह् तुमुन्—पूर्ववत् इट्, दीर्घ।

(3) ग्रहीतव्यम्
ग्रह् तव्यत्—इट् आदि।

अलिटी०—लिट् परे रहते दीर्घ नहीं होता है।

(4) जगृहिव
ग्रह् व—लिट्, परस्मैपदानां णलतुसुस्०, ग्रहिज्या० से सम्प्रसारण,
गृह् इ व—इट् आदेश, हलादिः शेषः,
ज गृह् इ व—उरत्, हलादिः शेषः, कुहोश्चुः, दीर्घ नहीं हुआ।

(5) जगृहिम
ग्रह् म—पूर्ववत्।

प्रकृत०—'आर्धधातुकस्येड् वलादेः' से विहित इट् को ही दीर्घ आदेश होता है तथा चिण्वत् इट् से होने वाले इट् को नहीं होता है।

(6) ग्राहिता
ग्रह् तास् डा—लुट्, चिण्वत्,
ग्राह् इट् त् आ—अत उपधायाः,
ग्राहिता—रूप बना।

(7) ग्राहिष्यते
ग्रह् स्य त—चिण्वद्भाव तथा इट्,
ग्राह् इ स्य त—दीर्घ नहीं हुआ, षत्व, एत्व। 'एकाचः' का अनुवर्त्तन होने से एकाच् जो 'ग्रह्' धातु, उससे उत्तर इट् को दीर्घ आदेश होता है।

(8) जाग्रहिता
ग्रह् यङ्—सन्यङोः, यङ् का लुक्,
जाग्रह्—धातुसंज्ञा, इट्,
जाग्रहिता—इट् को दीर्घ नहीं हुआ।

(3317) वृतो वा *38* (2391)

'वृ' इति वृङ्वृञोः सामान्येन ग्रहणम्। तस्मादुत्तरस्य, ऋकारान्तेभ्यश्चेटो वा दीर्घो भवति। वरिता, वरीता। प्रावरिता, प्रावरीता। ऋकारान्तेभ्यः-तरिता, तरीता। आस्तरिता, आस्तरीता। वृत इति किम्? करिष्यति। हरिष्यति। अलिटीत्येव-ववरिथ। तेरिथ।

अर्थ—'वृ' के द्वारा 'वृङ्' तथा 'वृञ्' दोनों का सामान्य रूप से ग्रहण होता है। वृ अङ्ग तथा ऋदन्त धातु के अङ्ग से उत्तर

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विहित इट् को विकल्प से दीर्घ आदेश होता है; परन्तु लिट् परे रहते नहीं होता।

उदा० (1) वरीता
वृ तृच्—इट्, आर्धधातुक गुण,
वर् इ तृ सु—दीर्घ,

(2) वरिता
पक्ष में दीर्घ नहीं हुआ।

(3) प्रावरीता
पूर्ववत् दीर्घ।

(4) प्रावरिता
दीर्घ का अभाव।

(5) तरीता
तृ तृच्—इट्, गुण,
तर् इ तृ—दीर्घ, सु।

(6) तरिता
पक्ष में दीर्घ नहीं हुआ।

(7) आस्तरीता
आ स्तृ तृ—पूर्ववत् इट्, दीर्घ आदि।

(8) आस्तरिता
दीर्घ नहीं हुआ।

वृत०—वृ तथा ऋदन्त अङ्ग से उत्तर इट् को दीर्घ होता है।

(9) करिष्यति
कृ तिप्—लृट् शेषे च, तिप्, स्यतासी लृलुटोः,
कृ इट् स्य ति—ऋद्धनो स्ये, आर्धधातुक गुण,
कर् इ ष्य ति—आदेशप्रत्यययोः।

(10) हरिष्यति
हृ ति—पूर्ववत्।

अलिटी०—लिट् परे रहते इट् को दीर्घ नहीं होता है।

(11) ववरिथ
वृ थल्—लिट्, सिप्, परस्मैपदानां णलतुसुस्०,
वृ इ थ—द्वित्व, उरत्, हलादिः शेषः,
व वृ इ थ—गुण, इट् को दीर्घ नहीं हुआ।

(12) तेरिथ
तृ इ थल्—पूर्ववत्,
तर् तर् इ थ—अत एकहल्मध्ये०,
तेरिथ—एत्व, अभ्यासलोप, इट् को दीर्घ नहीं हुआ।

(3318) न लिङि *39* (2529)

वृत उत्तरस्य इटो लिङि दीर्घो न भवति। विवरिषीष्ट। प्रावरिषीष्ट। आस्तरिषीष्ट। विस्तरिषीष्ट।

अर्थ— वृ धातु के अङ्ग से तथा ऋदन्त धातु के अङ्ग से उत्तर विहित इट् को दीर्घदेश नहीं होता है, लिङ् प्रत्यय परे रहते।

उदा० (1) विवरिषीष्ट
वृ त—लिङ्, 'त',
वृ सीयुट् सुट् त—'सुट् तिथोः' आदि लगकर, अनुबन्धलोप,
वृ इ सीय् स् त—'लिङ्सिचोरात्मने०' से इट्, गुण,
वि वर् इषीष्ट—षत्व, ष्टुत्व, इट् को दीर्घ का निषेध।

(2) विस्तरिषीष्ट
स्तृ त—पूर्ववत् सभी कार्य। कर्म में आत्मनेपद।

(3319) सिचि च परस्मैपदेषु *40* (2392)

परस्मैपदपरे सिचि वृत उत्तरस्य इटो दीर्घो न भवति। प्रावारिष्टाम्, प्रावारिषुः। अतारिष्टाम्, अतारिषुः। आस्तारिष्टाम्, आस्तारिषुः। परस्मैपदेष्विति किम्? प्रावरिष्ट, प्रावरीष्ट।

अर्थ—वृ धातु के अङ्ग से तथा ऋदन्त धातु के अङ्ग से उत्तर इट् को दीर्घ नहीं होता है, परस्मैपदपरक सिच् के परे रहते।

(1) प्रावारिष्टाम्
वृ ताम्—लुङ्, तस्, तस्थस्थमिपां तां०,
वृ इट् स् ताम्—सिच्, इट्,
वार् इ स् ताम्—सिचि वृद्धिः परस्मैपदेषु, उरण् रपरः,
प्र अवारिष्टाम्—इट् को दीर्घ का निषेध, अट्।

(2) प्रावारिषुः
वृ इट् सिच् उस्—झि, सिच्, इट्, 'सिजभ्यस्तविदि०' से जुस्', चुटू' से जकार की इत्संज्ञा,
प्र अ वार् इषुः—पूर्ववत् दीर्घ का निषेध।

(3) अतारिष्टाम्
तृ स् ताम्—लुङ्, तस्, ताम्, सिच्,
तार् इ स् ताम्—इट्, वृद्धि, दीर्घ का निषेध,
अ तारि ष् टाम्—षत्व, अट्।

(4) अतारिषुः
जुस् विभक्ति में पूर्ववत् दीर्घदेश का निषेध।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(5) आस्तारिष्टाम्
स्तृ तस्—'अतारिष्टाम्' की तरह।

(6) आस्तारिषुः
स्तृ झि—'अतारिषुः' की तरह।

(7) व्यशारिष्टाम्
शॄ तस्—'अतारिष्टाम्' की तरह।

(8) व्यशारिषुः
शॄ झि—'अतारिषुः' की तरह।

परस्मै०—परस्मैपद प्रत्यय है परे जिसके, ऐसे सिच् के परे रहते इट् को दीर्घ नहीं होता है।

(9) प्रावरिष्ट
वृ त—लुङ्, आत्मनेपद,
वृ इ स् त—सिच्, इट्, गुण,
वर् इ स् त—'वृङ्' धातु आत्मनेपदी है, इट् से पर सिच् है, परन्तु सिच् से पर परस्मैपद प्रत्यय है, अतः दीर्घ नहीं हुआ,
प्र अ वरि ष् ट—षत्व, ष्टुत्व, अट्।

(10) प्रावरीष्ट
पक्ष में—'वृतो वा' से दीर्घ हुआ।

(3320) इट् सनि वा *41* (2625)

वृतः सनो वा इडागमो भवति। वुवूर्षति। विवरिषते, विवरीषते। प्रावुवूर्षति, प्राविवरिषति, प्राविवरीषति। ऋकारान्तेभ्यः–तितीर्षति, तितरिषति, तितरीषति। आतिस्तीर्षति, आतिस्तरिषति, आतिस्तरीषति। 'सनि ग्रहगुहोश्च' (7.2.12) इति इट्प्रतिषेधे प्राप्ते पक्षे इडागमो विधीयते। इटश्च 'वृतो वा' (7.2.38) इति पक्षे दीर्घः। चिकीर्षति, जिहीर्षति–इत्यत्रोपदेशाधिकारात्, लाक्षणिकत्वाच्च इडागमो न भवति।

अर्थ— वृ धातु के अङ्ग व ऋदन्त धातु के अङ्ग से उत्तर सन् प्रत्यय को विकल्प से इट् आगम होता है।

उदा० (1) वुवूर्षति
वृ सन्—'सनि ग्रहगुहोश्च' से इट् का निषेध, प्रकृत सूत्र से इट्, इट्-अभाव पक्ष,
वृ सन्—'इको झल्' से सन् कित् हुआ, 'अज्झनगमां०' से दीर्घ,
वुर् स—'उदोष्ठ्यपूर्वस्य' से उकार आदेश,
वु वु र् स—द्वित्व, हलादि शेष,
वु वू र् ष—'हलि च' से दीर्घ, षत्व, धातुसंज्ञा,
वु वू र् ष शप् तिप्—शप्, पररूप।

(2) विवरिषते
वृ स—इट् पक्ष में,
वृ इ स—सन्यङोः, पूर्वोऽभ्यासः,
वृ वृ इ स—उरत्, हलादिः शेषः,
वि वर् इ स—गुण, सन्यतः, षत्व, धातुसंज्ञा,
विवरिषते—त, शप्, अतो गुणे।

(3) विवरीषते
'वृतो वा' से पाक्षिक दीर्घ।

(4) प्रावुवूर्षति
प्र आ वुवूर्षति—पूर्ववत् इट् का अभाव।

(5) प्राविवरिषति
प्र आ विवरिषति—इट् पक्ष, दीर्घ अभाव पक्ष।

(6) प्राविवरीषति
इट् पक्ष, दीर्घ पक्ष।

(7) तितीर्षति
तॄ सन्—'ऋत इद्धातोः' से इकार, इट् अभाव,
तिर् स—दीर्घ, द्वित्व, हलादि शेष,
ति तीर् स—ह्रस्वः, षत्व, धातुसंज्ञा,
तितीर्ष शप् तिप्—अतो गुणे।

(8) तितरिषति
इट् पक्ष, दीर्घ अभाव—'विवरिषति' की तरह।

(9) तितरीषति
इट् पक्ष, दीर्घ पक्ष—'विवरीषति' की तरह।

(10) आतिस्तीर्षति
स्तृ सन्—ऋत इद्धातोः, इट् का अभाव,
स्तिर् स—दीर्घ, द्वित्व,
ति स्तीर् ष—शर्पूर्वाः खयः, षत्व, धातुसंज्ञा,
आ तिस्तीर्ष शप् तिप्—अतो गुणे।

(11) आतिस्तरिषति
इट् पक्ष, द्वित्व, 'सन्यतः' से इकार, गुण, शेष पूर्ववत्।

(12) आतिस्तरीषति
सभी कार्य पूर्ववत्, केवल इट् को दीर्घ अधिक होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सनि०—'सनि ग्रहगुहोश्च' से इट् का निषेध, पाक्षिक इट् हुआ है। इट् पक्ष में 'वृतो वा' से पाक्षिक दीर्घ होता है।

चिकीर्ष०—यहाँ उपदेश का अधिकार होने से निम्नलिखित में लाक्षणिक ऋदन्त होने से इट् का आगम नहीं होता है—

(13) चिकीर्षति

कृ सन्—'अज्झनगमां सनि' से अङ्ग को दीर्घ,

कृ स—ऋदन्त 'कृ' है, परन्तु वह लाक्षणिक दीर्घ ऋकारान्त है, औपदेशिक नहीं। अतः प्रकृत सूत्र की प्रवृत्ति नहीं होती है,

किर् स—ऋत इद्धातोः,

कीर् स—हलि च, सन्यङोः,

चिकीर्ष—हलादिः शेषः, ह्रस्वः, कुहोश्चुः, धातुसंज्ञा,

चिकीर्ष शप् तिप्—अतो गुणे।

(14) जिहीर्षति

हृ सन् → हृ स → हिर् स—पूर्ववत् दीर्घ, इकार, दीर्घ,

हीर् स → जि हीर् स—द्वित्व, हलादिः शेषः, ह्रस्वः, कुहोश्चुः, अभ्यासे चर्च, षत्व, धातुसंज्ञा, शप् आदि।

(3321) लिङ्सिचोरात्मनेपदेषु *42* (2528)

वृतो लिङि सिचि च आत्मनेपदपरे वा इडागमो भवति। वृषीष्ट, वरिषीष्ट। प्रावृषीष्ट, प्रावरिषीष्ट। आस्तरिषीष्ट, आस्तीर्षीष्ट। सिचि खल्वपि-अवृत, अवरिष्ट, अवरीष्ट। प्रावृत, प्रावरिष्ट, प्रावरीष्ट। आस्तीर्ष्ट, आस्तरिष्ट, आस्तरीष्ट। आत्मनेपदेष्विति किम्? प्रावारिष्टाम्, प्रावारिषुः। लिङः प्रत्युदाहरणं न दर्शितम्: असम्भवात्, यासुटोऽवलादित्वादिति।

अर्थ—वृ तथा ऋदन्त धातु—इन अङ्गों से उत्तर आत्मनेपद लिङ् तथा आत्मनेपदपरक सिच् प्रत्ययों को विकल्प से इट् आगम होता है।

उदा० (क) लिङि—

(1) वृषीष्ट

वृ त—आशीर्लिङ्।

वृ सीयुट् सुट् त—इट् का अभाव,

वृ सीय् स् त—अनुबन्धलोप,

वृषी ष् त—यकारलोप, षत्व,

वृषीष् ट—ष्टुत्व।

(2) वरिषीष्ट

वृ इ सीय् स् त—इट् पक्ष,

वरि षी ष् ट—गुण, शेष पूर्ववत्। वृतो वा। न लिङि।

(3) प्रावृषीष्ट

प्र आ वृषीष्ट—पूर्ववत्।

(4) प्रावरिषीष्ट

प्र आ वरिषीष्ट—पूर्ववत्।

(5) आस्तरिषीष्ट

स्तृ सीय् स् त—पूर्ववत्, इट् भाव, गुण,

स्तर् इ सी स् त—यकारलोप,

स्तरि षी ष् त—षत्व, वृतो वा, न लिङि,

आ स्तरि षी ष् ट—ष्टुत्व।

(6) आस्तीर्षीष्ट

स्तिर् सीय् स् त—पूर्ववत्, इट् अभाव, ऋत इद्धातोः, 'उश्च' से किद्वत्, क्ङिति च' से गुणनिषेध,

स्तीर् सी स् त—दीर्घ, यकारलोप,

आस्तीर् षी ष् ट—पूर्ववत्।

(ख) सिचि—

(7) अवृत

वृ त—लुङ्, त, सिच्,

वृ स् त—इट् अभाव पक्ष।

वृ त—'ह्रस्वादङात्' से सिच् का लुक्,

अ वृ त—अट्।

(8) अवरिष्ट

वृ स् त—पूर्ववत्, पक्ष में इट्,

वर् इ स् त—गुण,

अ वरि ष् त—षत्व, अट्।

(9) अवरीष्ट

वृ इ स् त—इस स्थिति में गुण,

वरि स् त—'वृतो वा' से पाक्षिक दीर्घ,

अ वरी ष् ट—षत्व, ष्टुत्व, अट्।

(10) प्रावृत

प्र अवृत—इट् अभाव, सिच् लुक्।

(11) प्रावरिष्ट

प्र आ अवरिष्ट—इट् पक्ष, दीर्घ अभाव।

(12) प्रावरीष्ट

इट् पक्ष, दीर्घ पक्ष।

(13) आस्तीर्ष्ट

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्तृ स् त—इट् अभाव पक्ष, ऋत इद्धातोः,
स्तिर् स् त—उश्च, गुणनिषेध,
आ अ स्तीर् ष् ट—हलि च, षत्व, ष्टुत्व, अट्।

(14) आस्तरिष्ट
स्तृ स् त—लुङ्, पूर्ववत् सिच् आदि।
स्तर् इ स् त—इट् पक्ष, गुण।
स्तरि ष् त—षत्व।
आ अ स्तरिष्ट—ष्टुत्व, अट्।

(15) आस्तरीष्ट
स्तरि ष् त—इस दशा में 'वृतो वा' से दीर्घ,
आ अ स्तरी ष्ट—शेष पूर्ववत्।

आत्मने०—आत्मनेपद में ही पाक्षिक इट् होता है।

(16) प्रावारिष्टाम्
वृ स् ताम्—लुङ्, तस्, ताम् आदेश, सिच्,
वार् इ स् ताम्—नित्य इट्, अज्लक्षणा वृद्धि,
वारि ष् ताम्—षत्व,
प्र अवारिष्टाम्—ष्टुत्व, अट्।

(17) प्रावारिषुः
वृ स् झि—'सिजभ्यस्तविदि०' से 'जुस्', चुटू,
अ वार् इ स् उस्—पूर्ववत् इट्, वृद्धि,
प्र अवारिष् उस्—षत्व, अट्।

लिङ०—लिङ् का प्रत्युदाहरण दिखाया नहीं गया है। यासुट् प्रत्यय के वलादि न होने से इट् सम्भव नहीं है।

(3322) ऋतश्च संयोगादेः *43* (2526)

ऋदन्ताद्धातोः संयोगादेरुत्तरयोर्लिङ्सिचोरात्मनेपदेषु वा इडागमो भवति। ध्वृषीष्ट, ध्वरिषीष्ट। स्मृषीष्ट, स्मरिषीष्ट। अध्वृषाताम्, अध्वरिषाताम्। अस्मृषाताम्, अस्मरिषाताम्। ऋत इति किम्? च्योषीष्ट, प्लोषीष्ट। अच्योष्ट, अप्लोष्ट। संयोगादेरिति किम्? कृषीष्ट, हृषीष्ट। अकृत, अहृत। 'आत्मनेपदेषु' इत्येव–अध्वार्षीत्, अस्मार्षीत्। संस्कृषीष्ट, समस्कृत–इत्यत्रोपदेशाधिकारात्, अभाक्तत्वाच्च सुट इडागमो न भवति।

अर्थ—संयोग है आदि में जिसके, ऐसे ऋदन्त धातु के अङ्ग से उत्तर आर्धधातुक लिङ् तथा आत्मनेपदपरक सिच् प्रत्ययों को इट् का आगम विकल्प से होता है।

उदा० (1) ध्वृषीष्ट

ध्वृ त—लिङ्, 'ध्वृ' ऋदन्त धातु अङ्ग है, इससे पूर्व संयोग भी है,
ध्वृ सीयुट् सुट् त—इट् अभाव पक्ष, अनुबन्धलोप,
ध्वृ षी ष् ट—षत्व आदि।

(2) ध्वरिषीष्ट
ध्वृ सीय् स् त—इस दशा में इट्, गुण तथा शेष पूर्ववत्।

(3) स्मृषीष्ट
स्मृ त—'ध्वृषीष्ट' की तरह।

(4) स्मरिषीष्ट
इट् पक्ष—'ध्वरिषीष्ट' की तरह।

(5) अध्वृषाताम्
ध्वृ स् आताम्—लुङ्, इट् अभाव,
ध्वृष् आताम्—षत्व,
अ ध्वृषाताम्—अट्।

(6) अध्वरिषाताम्
ध्वर् इट् ष् आताम्—इट्, गुण, षत्व,
अ ध्वरिष् आताम्—अट्।

(7) अस्मृषाताम्
स्मृ स् आताम्—सिच्, इट् अभाव,
अ स्मृष् आताम्—पूर्ववत्।

(8) अस्मरिषाताम्
'अध्वरिषाताम्' की तरह।

ऋत०—ऋदन्त धातु से उत्तर लिङ् व सिच् को इट् होता है।

(9) च्योषीष्ट
च्यु सीय् स् त—'च्य्' की संयोगसंज्ञा है, परन्तु यह ऋकार से पूर्व नहीं है, अतः इससे उत्तर लिङ् को इट् नहीं हुआ, गुण हुआ।

(10) प्लोषीष्ट
'च्योषीष्ट' की तरह।

(11) अच्योष्ट
च्यु स् त—लुङ्, पूर्ववत् ऋदन्त अङ्ग न होने से इट् प्राप्त नहीं हुआ।

(12) अप्लोष्ट
'अच्योष्ट' की तरह।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संयोगा०—संयोग है आदि में जिसके, ऐसे ऋदन्त धातु से उत्तर लिङ् व सिच् को इट् होता है।

(13) कृषीष्ट

कृ सीय् सुट् त—लिङ्, 'कृ' ऋदन्त है; परन्तु इससे पूर्व संयोग नहीं है, इट् प्राप्त नहीं हुआ,

कृ षी ष् त—यकारलोप, षत्व,

कृषीष् ट—ष्टुत्व।

(14) हृषीष्ट

'कृषीष्ट' की तरह।

(15) अकृत

कृ स् त—'कृ' ऋदन्त है; परन्तु इससे पूर्व संयोग नहीं है। अतः 'कृ' से उत्तर सिच् को इट् नहीं हुआ,

अ कृ त—ह्रस्वादङ्गात्, अट्।

(16) अहृत

'अकृत' की तरह।

आत्मने०—आत्मनेपद में ही इट् होता है।

(17) अध्वार्षीत्

ध्वृ स् ई त्—लुङ्, परस्मैपद, तिप्, 'इतश्च' से इकारलोप, सिच्, अस्तिसिचोऽपृ०,

ध्वार् स् ई त्—'ध्वृ' ऋदन्त अङ्ग है, ऋकार से पूर्व संयोग (ध्व्) भी है; परन्तु आत्मनेपद का सिच् न होने से इसे इट् नहीं हुआ, वृद्धि, उरण् रपरः,

अध्वार् ष् ई त्—आदेशप्रत्यययोः, अट्।

(18) अस्मार्षीत्

पूर्ववत् इट् नहीं हुआ।

संस्कृषी०—संस्कृषीष्ट तथा समस्कृत—इन स्थलों पर 'उपदेशे' पद का अधिकार होने से, अभाक्त होने से सुट् तथा इडागम नहीं होते हैं।

(19) संस्कृषीष्ट

सम् कृ सीयुट् सुट् त—लिङ्, सीयुट् आदि,

संस् कृ सीय् स् त—'सम्पुंकाना०' से मकार के स्थान पर सकार तथा पूर्व के स्थान पर अनुनासिक,

संस्कृषीष्ट—मूर्धन्य आदेश, ष्टुत्व।

(20) समस्कृत

सम् कृ त—सुट्, अट् आदि।

(3323) स्वरतिसूतिसूयतिधूञूदितो वा *44* (2279)

स्वरति, सूति, सूयति, धूञ्–इत्येतेभ्यः ऊदिद्ध्यश्चोत्तरस्य बलादेरार्धधातुकस्य वा इडागमो भवति। स्वर्त्ता, स्वरिता। सूति–प्रसोता, प्रसविता। सूयति–सोता, सविता। धूञ्–धोता, धविता। ऊदिद्ध्यः खल्वपि–'गाहू', विगाढा, विगाहिता। गुपू–गोप्ता, गोपिता। 'वा' इति वर्त्तमाने पुनर्वाग्रहणं लिङ्सिचोर्निवृत्त्यर्थम् (म०भा०)। सूतिसूयत्योर्विकरणनिर्देशः 'षू प्रेरणे' (धा०पा० 1409) इत्यस्य निवृत्त्यर्थः। 'धूञ्' इति सानुबन्धकस्य निर्देशः–'धू विधूनने' (धा०पा० 1399) इत्यस्य निवृत्त्यर्थः। सविता, धुवितेत्येव नित्यमेतयोर्भवति। स्वरतेरेतस्माद्विकल्पाद् 'ऋद्धनोः स्ये' (7.2.70) इत्येतद्भवति विप्रतिषेधेन–स्वरिष्यति। किति तु प्रत्यये 'श्र्युकः किति' (7.2.11) इति नित्यः प्रतिषेधो भवति पूर्वविप्रतिषेधेन–स्वृत्वा, सूत्वा, धूत्वा।

अर्थ—स्वृ, षू, षू (दैवादिक), धू—इन धातुओं से उत्तर तथा ऊदित् (= दीर्घ ऊकार जिनका इत् है) धातु से उत्तर वलादि आर्धधातुक प्रत्यय को इट् आगम विकल्प से होता है।

उदा० (1) स्वरिता

स्वृ तृच्—पाक्षिक इट्,

स्वर् इ तृ सु—गुण।

(2) स्वर्त्ता

स्वृ तृ—इट् का अभाव, गुण,

स्वर् तृ—अचो रहाभ्यां द्वे, सु।

(3) प्रसविता

षू → सू तृ—धात्वादेः षः सः,

प्र सू इ तृ—गुण, अव् आदेश, सु।

(4) प्रसोता

इट् अभाव पक्ष।

(5) सविता

षूङ् → सू इ तृ—पूर्ववत्।

(6) सोता

इट् अभाव।

(7) धविता

धू इ तृ—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(8) धोता
इट् अभाव, गुण।

(9) विगाहिता
वि गाह् इट् तृ—इट् हुआ।

(10) विगाढा
वि गाह् तृ—इट् नहीं हुआ,
वि गाद् तृ—हो ढः,
वि गाद् धृ—झषस्तथोर्धो०,
वि गाद् ढृ—ष्टुना ष्टुः, ढो ढे लोपः, सु।

(11) गोपिता
गुप् इट् तृ सु।

(12) गोप्ता
इट् नहीं हुआ, गुण।

वा०—'वा' का अनुवर्त्तन होने पर भी पुनः 'वा' का ग्रहण लिङ् व सिच् की निवृत्ति के लिए है। 'सूति' में विकरण लुक् तथा 'सूयति' में श्यन् विकरण का निर्देश 'षू प्रेरणे' की निवृत्ति के लिए है।

धूञ्०—'धूञ्' यह अनुबन्धसहित निर्देश है। इससे 'धू विधूनने' की निवृत्ति हो जाती है। अतः सविता तथा धुविता में नित्य इट् होता है। स्वृ धातु से विकल्प कहा गया है। तब इससे पर 'स्य' को 'ऋद्धनोः स्ये' से इट् होता है।

(13) स्वरिषयति

किति०—कित् प्रत्यय परे रहते 'श्र्युकः किति' से पूर्व-विप्रतिषेध से नित्य निषेध होता है।

(14) स्वृत्वा, (15) सूत्वा, (16) धूत्वा।

(3324) रधादिभ्यश्च *45* (2515)

'रध हिंसासंसिद्धयोः' (धा०पा० 1194) इत्येवमादिभ्योऽष्टाभ्य उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति। रद्धा, रधिता। नंष्टा, नशिता। त्रप्ता, तर्प्ता, तर्पिता। द्रप्ता, द्रर्प्ता, दर्पिता। द्रोग्धा, द्रोढा, द्रोहिता। मोग्धा, मोढा, मोहिता। स्नोग्धा, स्नोढा, स्नोहिता। स्नेग्धा, स्नेढा, स्नेहिता। क्रादिनियमाल्लिटि रधादिभ्यः परत्वाद्विकल्पं केचिदिच्छन्ति। अपरे पुनराहुः–पूर्वविधेरिण्निषेधविधानसामर्थ्याद् बलीयस्त्वं प्रतिषेधनियमस्येति नित्यमिटा भवितव्यम्–ररन्धिव, ररन्धिमेति भवति।

अर्थ—रधादि धातुओं से उत्तर वलादि आर्धधातुक को इट् आगम विकल्प से होता है।

रधादि दिवादिगण का एक उपगण है। इसमें निम्नलिखित आठ धातुओं का पाठ है—

उदा० (1) रधिता
रध् इट् तृ सु।

(2) रद्धा
रध् तृ—इट् अभाव, झषस्तथो०,
रध् धृ—झलां जश् झशि,
रद् धृ सु—सु।

(3) नाशिता
णश् → नश् तृच्—णो नः,
नश् इट् तृ सु।

(4) नष्टा
नश् तृ—इट् निषेध,
न नुम् श् तृ—मस्जिनशोर्झलि, अनुबन्धलोप,
न न् ष् तृ—व्रश्चभ्रस्ज०,
नंष् तृ—नश्चाऽपदान्त०, ष्टुना ष्टुः, सु।

(5) तर्पिता
तृ प् इट् तृ—इट् पक्ष, गुण, सु।

(6) त्रप्ता
तृप् तृ—इट् अभाव,
तृ अम् प् तृ—अनुदात्तस्य चर्दु०,
त्रप् तृ सु—इको यणचि।

(7) तर्प्ता
तृप् तृच्—इट् अभाव, अम् अभाव,
तर्प् तृ सु—गुण।

(8) दर्पिता
दृप् इट् तृ—इट् पक्ष।

(9) द्रप्ता
दृ अम् प् तृ—'त्रप्ता' की तरह।

(10) दर्प्ता
दृप् तृ—इट् अभाव, अम् अभाव।

(11) द्रोहिता
द्रुह् इट् त्—इट् पक्ष।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(12) द्रोग्धा
द्रुह् तृ—इट् अभाव पक्ष,
द्रुघ् तृ—वा द्रुहमुह०,
द्रुघ् धृ—झषस्तथो०,
द्रुग् धृ सु—झलां जश् झशि।

(13) द्रोढा
द्रुह् तृ—इट् अभाव, घत्व अभाव,
द्रुद् तृ—हो ढः,
द्रुद् धृ—झषस्तथो०,
द्रुद् ढृ सु—ष्टुना ष्टु, गुण।

(14) मोहिता
मुह् इट् तृ—इट् पक्ष।

(15) मोग्धा
मुह् तृ—इट् अभाव,
मोह् तृ—पुगन्तलघूपधस्य च,
मोघ् तृ—वा द्रुहमुह०,
मोघ् धृ—झषस्तथो०,
मोग् धृ सु—झलां जश् झशि।

(16) मोढा
मुह् तृ—इट् अभाव, घत्व अभाव,
मोह् धृ—लघूपधगुण, झषस्तथो०,
मोद् धृ—हो ढः,
मोद् ढृ—ष्टुना ष्टुः, ढो ढे लोपः, सु।

(17) स्नोहिता
ष्णुह् → स्नुह्—धात्वादेः षः सः, नकार,
स्नुह् इट् तृ—इट् पक्ष, गुण।

(18) स्नोग्धा
स्नुह् तृ—पूर्ववत्, इट् अभाव,
स्नोघ् तृ—लघूपधगुण, वा द्रुहमुहष्णुह०,
स्नोघ् धृ—झषस्तथोर्धो०,
स्नोग् धृ सु—झलां जश् झशि।

(19) स्नोढा
स्नुह् तृच्—पूर्ववत्, इट् अभाव, घत्व अभाव,
स्नोह् धृ—गुण, झषस्तथो०,
स्नोद् धृ—हो ढः,
स्नोद् ढृ—ष्टुना ष्टुः, ढो ढे लोपः, सु।

(20) स्नेहिता
ष्णिह् → स्निह्—धात्वादेः षः सः, नकार,
स्निह् इट् तृ—'स्नोहिता' की तरह।

(21) स्नेग्धा
स्निह् तृच्—पूर्ववत्, 'स्नोग्धा' की तरह।

(22) स्नेढा
स्निह् तृ—'स्नोढा' की तरह।

क्रादि०—क्रादि नियम से लिट् में रधादि धातुओं से पर होने के कारण कुछ विद्वान् विकल्प चाहते हैं। दूसरे कहते हैं—पूर्व विधि का इट् निषेध के विधानसामर्थ्य से निषेध नियम के बलवान् होने से नित्य इट् होना चाहिए।

(23) ररन्धिव
रध् व—लिट्, वस्, परस्मैपदानां णल्०,
रन्ध् इव—'रधिजभोरचि' से नुम्, इट्,
र रन्ध् इव—द्वित्व, हलादिः शेषः।

(24) ररन्धिम
रध् म—पूर्ववत्।

(3325) निरः कुषः *46* (2560)

'निर्' इत्येवम्पूर्वात् कुष उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति। निष्कोष्टा, निष्कोषिता। निष्कोष्टुम्, निष्कोषितुम्। निष्कोष्टव्यम्, निष्कोषितव्यम्। निर इति किम्? कोषिता, कोषितुम्, कोषितव्यम्। 'निसः' इति वक्तव्ये 'निरः' इति निर्देशेन रेफान्तमुपसर्गान्तरमस्तीति ज्ञाप्यते। (तेन) तस्य हि निलयनमिति 'उपसर्गस्यायतौ' (8.2.19) इति लत्वं भवति। निसो हि रुत्वस्यासिद्धत्वाल्लत्वं न स्यात्।

अर्थ—निर् है पूर्व में जिसके, ऐसे कुष् धातु के अङ्ग से उत्तर वलादि आर्धधातुक को इट् विकल्प से होता है।

उदा० (1) निष्कोषिता
निर् कुष् तृच्—इट् हुआ,
निष् कोष् तृ—विसर्जनीय, 'इदुदुपधस्य' से षत्व, गुण,
निष् कोष् टा—सु।

(2) निष्कोष्टा
इट् अभाव पक्ष में।

(3) निष्कोषितुम्
निर् कुष् तुमुन्—इट्, पूर्ववत्, सु।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(4) निष्कोष्टुम्
इट् अभाव पक्ष।

(5) निष्कोषितव्यम्
निर् कुष् तव्यत् सु—पूर्ववत् इट्, गुण।

(6) निष्कोष्टव्यम्
इट् अभाव पक्ष।

निर०—निर् है पूर्व में जिसके, ऐसे कुष् से उत्तर वलादि आर्धधातुक को इट् होता है।

(7) कोषिता
कुष् तृ—नित्य इट्, गुण, सु।

(8) कोषितुम्
कुष् तुमुन्—पूर्ववत् इट्।

(9) कोषितव्यम्
नित्य इट्, सु।

निस०—'निस्' कहना चाहिए। इसके स्थान पर 'निर्' के निर्देश से ज्ञापित होता है कि रेफान्त उपसर्ग पृथक् है। उसका उपसर्गस्यायतौ से 'निलयन' आदि में लत्व होता है। कारण कि 'निस्' के सकार पर आदेशभूत रुत्व के असिद्ध होने से लत्व नहीं होता है।

(10) निलयनम्
निर् अय् ल्युट् सु।

(3326) इण्निष्ठायाम् *47* (3045)

निरः कुषो निष्ठायामिडागमो भवति। निष्कुषितः। निष्कुषितवान्। इड्ग्रहणं नित्यार्थम्। आरम्भो हि 'यस्य विभाषा' (7.2.15) इत्यस्य बाधकः, अन्यथा हि विकल्पार्थ एव स्याद्। अत्रैव नित्यमिडागमः, उत्तरत्र विकल्प एवेति।

अर्थ—'निर्' है पूव में जिसके, ऐसे कुष् धातु के अङ्ग से उत्तर निष्ठासंज्ञक प्रत्यय को इट् आगम होता है।

उदा० (1) निष्कुषितः
निर् कुष् क्त—इट्, सु।

(2) निष्कुषितवान्
क्तवतु—इट् हुआ पूर्ववत्।

इड्०—प्रकृत सूत्र में 'इट्' का अनुवर्त्तन सुलभ होने पर भी पुनः 'इट्' का ग्रहण विकल्प की निवृत्ति के लिए है।[1] विधान 'यस्य विभाषा' का बाधक है। अन्यथा विकल्प के लिए ही होता है। यहाँ नित्य इट् आगम होता है। उत्तर शास्त्र में विकल्प ही होता है।

(3327) तीषसहलुभरुषरिषः *48* (2340)

तकारादावार्धधातुके इषु, सह, लुभ, रुष, रिष–इत्येतेभ्यो वा इडागमो भवति। इषु–एष्टा, एषिता। 'इषु इच्छायाम्' (धा०पा० 1392)–इत्यस्यायं विकल्प इष्यते। यस्तु 'इष गतौ' (धा०पा० 1188) इति दैवादिकः, तस्य–प्रेषिता, प्रेषितुम्, प्रेषितव्यमिति नित्यं भवति। योऽपि 'इष आभीक्ष्ण्ये' (धा०पा० 1526) इति क्र्यादौ पठ्यते, तस्याप्येवमेव। तदर्थमेव 'तीषसह' (7.2.48) इति सूत्रे केचिदुदितमिषं पठन्ति। सह–सोढा, सहिता। लुभ–लोब्धा, लोभिता। रुष–रोष्टा, रोषिता। रिष–रेष्टा, रेषिता। तीति किम्? एषिष्यति।

अर्थ—इष्, सह, लुभ्, रुष् तथा रिष्—इन अङ्गों से उत्तर तकारादि आर्धधातुक को इट् आगम विकल्प से होता है।

'ति' पद को विभक्तिविपरिणाम से 'तः' इस प्रकार षष्ठ्यन्त बना कर तदादि विधि कर ली जाती है।

उदा० (1) एषिता
इष् इट् तृच्—लघूपधगुण, सु।

(2) एष्टा
इष् तृच्—गुण, ष्टुना ष्टुः, इट् का निषेध।

इषु०—धातुपाठ में इष् धातु का तीन स्थलों पर पाठ प्राप्त होता है—

(क) इषु इच्छायाम् (तुदा०पर०),
(ख) इष आभीक्ष्ण्ये (क्र्या०पर०),
(ग) इष गतौ (दि०पर०)।

'इषु इच्छायाम्' इस धातु से ही विकल्प होता है। 'इष गतौ' से नित्य इट् होता है। यथा—

(3) प्रेषिता
प्र इष् तृ—इट्, गुण, एङि पररूपम्, सु।

(4) प्रेषितव्यम्
प्र इष् तव्यत्—पूर्ववत्।

(5) प्रेषितुम्

1. न्यास 7.2.47

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्र इष् तुमुन्—पूर्ववत्।

योऽपि०—जो 'इष आभीक्ष्ण्ये' यह क्र्यादिगण में पठित है, उसे भी इसी प्रकार होता है। इसलिए 'तीषसह०' इस सूत्र में कुछ विद्वान् 'इषु' इस प्रकार उदित् पाठ स्वीकार करते हैं।

हरदत्त के अनुसार इष तथा सह विकरणान्त पठित हैं। 'इष' शविकरणान्त तथा सह शप् विकरणान्त है।[1] दैवादिक तथा क्रैयादिक धातुओं में औपदेशिक आकार अनुबन्ध है, विकरण नहीं। अतः 'सहचरिताऽसहचरितयोः सहचरितस्यैव ग्रहणम्' परिभाषा से अकार विकरण वाले 'सह' धातु के सहयोगवशात् अकार विकरण वाले 'इष्' तौदादिक धातु का ग्रहण होता है।

परन्तु महाभाष्य में एक वार्त्तिक[2] के द्वारा दैवादिक इष् धातु का प्रतिषेध किया गया है। हरदत्त की व्याख्या के अनुसार दैवादिक इष् में सूत्र की प्राप्ति ही नहीं है। तब वार्त्तिककार की वार्त्तिक व्यर्थ होकर ज्ञापित करती है कि प्रकृत सूत्र तीनों धातुओं में प्रवृत्त होता है। वार्त्तिक के द्वारा निषेध होने से शेष 'इष्' धातुओं (तौदादिक व क्रैयादिक) में सूत्र प्रवृत्त होता है। अतः 'इष्' के द्वारा केवल तौदादिक व क्रैयादिक इष् का ही ग्रहण होता है।

(6) सहिता
सह् इट् तृच् सु।

(7) सोढा
सह् तृच्—इट् का निषेध,
सोह् तृ—सहिवहोरोद०,
सोढ् धृ—हो ढः, झषस्तथो०, ष्टुना ष्टुः।

(8) लोभिता
लुभ् इट् तृ—लघूपधगुण,
लोभ् इ तृ सु—विभक्तिकार्य।

(9) लोब्धा
लुभ् तृ—इट् का निषेध, लघूपधगुण,
लोभ् धृ—झषस्तथो०,
लोब् धृ सु—झलां जश् झशि, सु।

(10) रोषिता
रुष् इ तृ—इट्,
रोष् इ तृ सु—लघूपधगुण।

(11) रोष्टा
रुष् तृ—इट् निषेध, गुण,
रोष् ट्टृ सु—ष्टुना ष्टुः।

(12) रेषिता
रिष् इ तृ—गुण।

(13) रेष्टा
रिष् तृ—इट् निषेध,
रेष् तृ—गुण, सु।

तीति०—तकारादि आर्धधातुक को इट् होता है।

(14) एषिष्यति
इष् स्य ति—'लृट् शेषे च', स्यतासी लृलुटोः, आर्धधातुक 'स्य' है, परन्तु तकारादि नहीं है,
इष् इ स्य ति—नित्य इट् हुआ, गुण, षत्व।

(3328) सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् *49* (2618)

इवन्तानाम् धातूनाम्, ऋधु, भ्रस्ज, दम्भु, श्रि, स्वृ, यू, ऊर्णु, भर, ज्ञपि, सन्–इत्येतेषां च सनि वा इडागमो भवति। इवन्तानाम्–दिदेविषति, दुद्यूषति। सिसेविषति, सुस्यूषति। ऋध्–अर्दिधिषति, ईर्त्सति। भ्रस्ज–बिभ्रज्जिषति, बिभ्रक्षति, बिभर्ज्जिषति, बिभर्क्षति। दम्भु–दिदम्भिषति, धिप्सति, धीप्सति। श्रि–उच्छिश्रयिषति, उच्छिश्रीषति। स्वृ–सिस्वरिषति, सुस्वूर्षति। यु–यियविषति, युयूषति। ऊर्णु–प्रोर्णुनविषति, प्रोर्णुनुविषति, प्रोर्णुनूषति। 'भर' इति भृञित्येतस्य भौवादिकस्य ग्रहणम्; शपा निर्देशात्। बिभरिषति, बुभूर्षति। ज्ञपि–जिज्ञपयिषति, ज्ञीप्सति। सन्–सिसनिषति, सिषासति। केचिदत्र 'भरज्ञपिसनितनिपतिदरिद्राणाम्' इति पठन्ति। तितनिषति, तितंसति, तितांसति। पिपतिषति, पित्सति। दिदरिद्रिषति, दिदरिद्रासति। सनीति किम्? देविता। भ्रष्टा।

अर्थ—'इव्' है अन्त में जिसके, ऐसे अङ्ग व ऋध्, भ्रस्ज्, दम्भ्, ति, स्वृ, यु, ऊर्णु, भृ, ज्ञपि तथा सन्—इन अङ्गों से उत्तर सन् प्रत्यय को इट् आगम विकल्प से होता है।

'सनि' पद को विभक्तिविपरिणाम के द्वारा 'सनः' इस प्रकार षष्ठ्यन्त बना लिया जाता है।

उदा० (क) इवन्तात्—

(1) दिदेविषति

1. पदम० 7.2.48
2. महा० 7.2.48

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिव् इट् सन्—इट् हुआ, गुण, द्वित्व, ह्रस्वः,
दिदेविष—षत्व, धातुसंज्ञा,
दिदेविष शप् तिप्—शप; अतो गुणे।

(2) दुद्यूषति
दिव् स—इट् निषेध, 'हलन्ताच्च' से कित्त्व,
दि ऊठ् स—च्छ्वोः शूडनु०, इको यणचि,
दु द्यू ष—द्वित्व, हलादिः शेषः, ह्रस्वः, षत्व, धातुसंज्ञा,
दुद्यूष शप् तिप्—अतो गुणे।

(3) सिसेविषति
षिव् → सिव् सन्—धात्वादेः षः सः, इट् पक्ष,
सेविस—गुण, द्वित्व, हलादिः शेषः, ह्रस्वः, षत्व,
सिसेविष शप् ति—धातुसंज्ञा, अतो गुणे।

(4) सुस्यूषति
सिव् सन्—पूर्ववत्, इट् अभाव पक्ष,
स्यूठ् स—पूर्ववत् ऊठ्, यण्, द्वित्व, हलादि शेष,
सुस्यूष—ह्रस्वः, धातुसंज्ञा, तिप् आदि।

(ख) अन्येभ्यः—

(5) अर्दिधिषति
ऋध् इट् सन्—इट् पक्ष,
अर्धिष—लघूपधगुण, उरण् रपरः, षत्व, सन्यङों,
अर् धिष् धिष् अ—अजादेर्द्वितीयस्य, नन्द्राः संयो०,
अर् दिधिष् अ—हलादिः शेषः, अभ्यासे चर्च, धातुसंज्ञा,
अर्दि धिष शप् तिप्—अतो गुणे।

(6) ईर्त्सति
ऋध् सन्—इट् अभाव, सन्यङोः,
ऋ धस ध् स—अजादेर्द्वितीयस्य,
ऋ दध् स—हलादिः शेषः, अभ्यासे चर्च,
ऋ दिध् स—'सन्यतः' से इत्व,
ई र् दि ध् स—आप् ज्ञप्यृधामीत्, उरण् रपरः,
ईर् ध् स—अत्र लोपोऽभ्यासस्य,
ईर् त् स—खरि च, धातुसंज्ञा,
ईर् त्स शप् तिप्—अतो गुणे।

(7) बिभर्ज्जिषति
यहाँ इट् का विकल्प तथा रम् का विकल्प होने से चार रूप बनते हैं (इट् पक्ष, रम् पक्ष)।
भ्रस्ज् इट् सन्—इट् पक्ष, सन्यङोः,
ब भ्रस्ज् इ स—हलादिः शेषः, अभ्यासे चर्च,
बिभ्रस्ज् इ स—सनयतः,
बि भ रम् ज् इ स—भ्रस्जोरोपधयो रम० से रेफ व उपधा दोनों के स्थान पर[1],
बिभर्ज्ज् इ स—अचो रहाभ्यां द्वे,
बिभर्ज्ज् इष शप् तिप्—षत्व, धातुसंज्ञा, अतो गुणे।
भ्रस्ज् इ स—इस दशा में रम् करके भी रूप बनता है। यथा—
भ र् ज् इ स → ब भर्ज् इ स → बभर्ज्ज् इष शप् तिप्।

(8) बिभ्रज्जिषति
(इट् पक्ष रम् अभाव)
भ्रस्ज् इ सन्—इट् पक्ष, रम् अभाव, द्वित्व,
बि भ्रस्ज्—सन्यतः,
बि भ्रश् ज्—स्तोः श्चुना श्चुः,
बिभ्रज्ज् इ ष—झलां जश् झशि, षत्व, धातुसंज्ञा,
बिभ्रज्जिष शप् तिप्—अतो गुणे।

(9) बिभर्क्षति
(इट् अभाव, रम् पक्ष)
भ्रस्ज् सन्—इट् निषेध,
भर्ज् स—भ्रस्जोरोपधयो रम्०, द्वित्व,
बि भर्ज् स—सन्यतः,
बिभर्क् ष—चोः कुः, इण्कोः, धातुसंज्ञा,
बिभर्क्ष शप् तिप्—अतो गुणे।

(10) बिभ्रक्षति
भ्रस्ज् स—इट् अभाव, रम् अभाव,
बिभ्रस्ज् स—द्वित्व, अभ्यासकार्य,
बिभ्रज् स—स्कोः संयोगा०,
बिभ्रष् स—व्रश्चभ्रस्ज०,
बिभ्रक् स—षढोः कः सि, षत्व,
बिभ्रक्ष शप् तिप्—अतो गुणे।

(11) दिदम्भिषिति
दम्भ् इ सन्—इट् पक्ष, सन्यङोः,
दि दम्भिष—द्वित्व, अभ्यासकार्य, धातुसंज्ञा,
दि दम्भिष शप् तिप्—अतो गुणे।

(12) धिप्सति
दम्भ् सन्—इट् अभाव,

1. न्यास 7.2.49···रोपधयोरिति षष्ठीनिर्देशाद्रेफस्योपधायाश्च सकारस्य निवर्त्तकः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

दिम्भ् स—दम्भ इच्च, हलन्ताच्च से सन् कित्,
दिभ् स—अनिदितां हल उप०,
दिप् स—खरि च,
धिप् स—एकाचो बशो०, द्वित्व,
दि धिप् स—हलादिः शेषः, अभ्यासे चर्च,
धिप्स शप् तिप्—अतो गुणे।

(13) धीप्सति
ईत् पक्ष में रूप बनता है।

(14) उच्छिश्रयिषति
श्रि इट् सन्—इट् हुआ,
शि श्रि इ स—सन्यङोः, हलादिः शेषः,
शि श्रयिस—सार्वधातुकार्धधातु०, अयादेश, षत्व, धातुसंज्ञा,
उद् शिश्रयिषति—अतो गुणे, शश्छोऽटि।

(15) उच्छिश्रीषति
इट् अभाव पक्ष में
श्रि सन्—'इको झल्' से कित्, गुण का निषेध, अज्झनगमां० से दीर्घ,
श्री स—सन्यङोः, ह्रस्वः,
शि श्रीष—षत्व, धातुसंज्ञा,
उच्छिश्रीषति—शेष पूर्ववत्।

(16) सिस्वरिषति
स्वृ इट् सन्—इट् हुआ,
सृ स्वरिस—सन्यङोः, हलादिः शेषः, गुण,
सि स्वरिष—उरत्, उरण् रपरः, हलादिः शेषः, सन्यतः, षत्व,
सिस्वरिष शप् तिप्—धातुसंज्ञा, लकार।

(17) सुस्वूर्षति
स्वृ सन्—इट् अभाव पक्ष,
स्वॄ स—अज्झनगमां०,
स्वुर् स—उदोष्ठ्यपूर्वस्य०,
स्वुर्ष—आदेशप्रत्यययोः,
स्वुर्ष् स्वुर्ष् अ—'सन्यङोः' से द्वित्व,
सु स्वुर्ष् अ—हलादिः शेषः,
सुस्वूर्ष शप् तिप्—'हलि च' से दीर्घ, धातुसंज्ञा, लकार।

(18) यियविषति
यु इट् सन्—इट्, सन्यङोः,
यु यो इ स—गुण,
यि यव् इ स—'ओः पुयण् ज्यपरे', अव् आदेश,
यि यविष् शप् तिप्—षत्व, धातुसंज्ञा, लकार।

(19) युयूषति
यु सन्—इट् अभाव,
यूस—अज्झनगमां०, द्वित्व, ह्रस्वः, षत्व,
युयूष—धातुसंज्ञा, लकार।

(20) प्रोर्णुनविषति
ऊर्णु सन्—इट्, सन्यङोः, अजादेर्द्वितीयस्य, न न्द्राः संयो०,
ऊर् नु नु इ स—सार्वधातुकार्धधातुक०, अव् आदेश,
ऊर्णु नविष—षत्व, णत्व, धातुसंज्ञा,
प्र ऊर्णु नविष शप् तिप्—अतो गुणे।

(21) प्रोर्णुनुविषति
ऊर्णु सन्—'विभाषोर्णोः' से सन् विकल्प से ङिद्वत्, इट्,
ऊर् नु नु व् इ स—'अचि श्नुधातु०' से उवङ्, पूर्ववत् णत्व, षत्व तथा लकार।

(22) प्रोर्णुनूषति
ऊर् नु नू स—इट् अभाव, अज्झनगमां० से दीर्घ, पूर्ववत् दीर्घ, द्वित्व, ह्रस्वः,
प्र ऊर् नु नू ष—षत्व, णत्व, लकार।

भर०—'भर' के द्वारा भौवादिक 'भृञ्' का ग्रहण होता है। 'भर' में शप् का निर्देश किया गया है। अतः—

(23) बिभरिषति
भृ इट् सन्—इट्, सन्यङोः, उरत्, उरण् रपरः, हलादिः शेषः,
भ भृ इ स—अभ्यासे चर्च, सन्यतः, गुण, षत्व, धातुसंज्ञा,
बिभरिष—लकार।

(24) बुभूर्षति
भृ सन्—इट् अभाव, अज्झनगमां० से दीर्घ,
भूर् स—उदोष्ठ्यपूर्वस्य, हलि च से दीर्घ, सन्यङोः,
भूर् भूर् स—हलादिः शेषः, ह्रस्वः, अभ्यासे चर्च, षत्व,
बुभूर्ष—धातुसंज्ञा, लकार।

(25) जिज्ञपयिषति
ज्ञा णिच्—अर्त्तिह्री० से पुक्,
ज्ञपि सन्—इट्, द्वित्व, हलादिः शेषः,
जिज्ञपयिष—गुण, अय् आदेश, सन्यतः, धातुसंज्ञा,
जिज्ञपयिष शप् तिप्—अतो गुणे।

(26) ज्ञीप्सति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जि ज्ञप् स—इट् अभाव—इस दशा में,
ज्ञीप् स—अत्र लोपोऽभ्यासस्य, आप् ज्ञप्यृ०,
ज्ञीप् स शप् तिप्—धातुसंज्ञा, कर्त्तरि शप्, अतो गुणे से पररूप हुआ।

(27) सिसनिषति
सन् इट् सन्—इट्,
स सनि स—द्वित्व, हलादिः शेषः,
सि सनिष—सन्यतः, षत्व, धातुसंज्ञा, लकार।

(28) सिषासति
सन् सन्—इट् अभाव,
स आ स—जनसनखनां० से आकार, अकः सवर्णे दीर्घः,
स सा स—सन्यङोः, ह्रस्वः,
सिषास—सन्यतः, षत्व, धातुसंज्ञा, लकार।

केचिद०—कुछ विद्वान् 'भरज्ञपिसनितनिपतिदरिद्राणाम्' इस प्रकार सूत्र का स्वरूप मानते हैं। जो सूत्र का इस प्रकार स्वरूप स्वीकार नहीं करते, उनके अनुसार 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' वार्त्तिक का पाठ होना चाहिए।

(ख) विध्यर्थ—अव्युत्पत्ति पक्ष में पदान्त में यकार के न रहने से 'न य्वाभ्यां पदान्ताभ्यां० की प्रवृत्ति नहीं होती है। इस दशा में प्रकृत सूत्र का पाठ विधि के लिए है।

(3403) न कर्मव्यतिहारे *6* (3217)

कर्मव्यतिहारे यदुक्तं तत्र भवति। प्रतिषेधागमयोरयं प्रतिषेधः। व्यावक्रोशी, व्यावलेखी, व्यावर्त्ती, व्यावहासी वर्त्तते। 'कर्मव्यतिहारे णच् स्त्रियाम्' (3.3.43) इति णच् प्रत्ययः, तदन्तात् 'णचः स्त्रियामञ्' (5.4.14)।

अर्थ—कर्मव्यतिहार अर्थ में, जो कहा गया है, वह नहीं होता है। पूर्व शास्त्र में वृद्धि का निषेध तथा ऐच् आगम का विधान है। अतः यहाँ निषेध और आगम—दोनों का प्रतिषेध कहा गया है।

कर्मव्यतिहार = क्रिया की अदला-बदली।

क्रिया की अदला बदली अर्थ गम्यमान हो तो आदिवृद्धि होती है तथा ऐच् आगम नहीं होता है।

उदा० (1) व्यावक्रोशी

वि अव क्रुश् णच्—भाव, कर्मव्यतिहारे णच् स्त्रियाम्, चुटू, हलन्त्यम्,

व्यवक्रोश् अ—इको यणचि, पुगन्तलघूपधस्य च,

व्यवक्रोश अञ्—णचः स्त्रियाम्, हलन्त्यम्,

व्यावक्रोश—'तद्धितेष्वचामादेः' से आदिवृद्धि प्राप्त, अङ्ग में पदान्त में यकार है, यकार से उत्तर अचों में आदि अच् आकार है, 'अञ्' ञित् प्रत्यय भी परे है, 'न य्वाभ्यां पदान्ताभ्यां०' से वृद्धि का निषेध तथा 'ऐ' आगम की प्राप्ति हुई,

व्यावक्रोशी सु—कर्मव्यतिहार अर्थ गम्यमान है, अतः वृद्धि-निषेध व ऐच् आगम का प्रतिषेध होकर आदिवृद्धि हुई, 'टिड्ढाऽण्०' से 'ङीप्', सु।

(2) व्यावलेखी

वि अव लिख्—पूर्ववत्।

(3) व्यावर्त्ती

वि अव वृत्—पूर्ववत्।

(4) व्यावहासी

वि अव हस्—पूर्ववत्, 'अत उपधायाः' से उपधा को वृद्धि होती है।

(3404) स्वागतादीनां च *7* (1549)

'स्वागत'–इत्येवमादीनां यदुक्तं तत्र भवति। स्वागत-

1. न्यञ्चतीति न्यक्। ऋत्विगादि से 'क्विन्' हुआ। 'नि अञ्च्' क्विन्— इस दशा में अनुनासिक लोप, सर्वापहार लोप तथा 'क्विन् प्रत्ययस्य कुः' से कुत्व होता है। न्यक्। न्यक् रुह् अच्—यहाँ पचादिलक्षण 'अच्', 'न्यङ्क्वादीनाञ्च' से धकार होता है। न्यक् रुध् अ। 'झलां जशोऽन्ते' से गकार तथा लघूपध गुण। न्यग् रोध् अ सु।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मित्याह स्वागतिकः। स्वध्वरेण चरति स्वाध्वरिकः। स्वङ्गस्यापत्यं स्वाङ्गिः। व्यङ्गस्यापत्यं व्याङ्गिः। व्यडस्यापत्यं व्याडिः। व्यवहारेण चरति व्यावहारिकः। व्यवहारशब्दोऽयं लौकिके वृत्ते वर्त्तते, न तु कर्मव्यतिहारे। स्वपतौ साधुः स्वापतेयः। द्वारादिषु स्वशब्दपाठादत्र प्राप्तिः। स्वागत। स्वध्वर। स्वङ्ग। व्यङ्ग। व्यवहार। स्वपति–स्वागतादिः।

अर्थ— जो पीछे कहा जा चुका है, वह 'स्वागत' आदि शब्दों से नहीं होता है। पूर्वशास्त्र में वृद्धि-निषेध तथा ऐच् आगम कहा गया है। अतः यहाँ इन दोनों का प्रतिषेध होता है।

उदा० (1) स्वागतिकः
शोभनम् आगतम्—स्वागतम्,
स्वागतम् इत्याह—'तदाहेत्यादौ प्रभूतादिभ्य उप०' (वा०) के द्वारा 'ठक्',
स्वागत ठक्—प्राप्त ऐच् आगम आदि का निषेध,
स्वागतिक सु—ठस्येकः।

(2) स्वाध्वरिकः
स्वध्वरेण चरति—'चरति' से 'ठक्',
स्वध्वर इक—पूर्ववत् वृद्धिनिषेध नहीं हुआ,
स्वाधर इक सु—यस्येति च।

(3) स्वाङ्गिः
स्वङ्गस्याऽपत्यम्—'अत इञ्',
स्वाङ्ग इ सु—पूर्ववत् वृद्धि।

(4) व्याङ्गिः
व्यङ्गस्याऽपत्यम्—'स्वाङ्गि' की तरह।

(5) व्याडिः
व्यडस्याऽपत्यम्—पूर्ववत्।

(6) व्यावहारिकः
व्यवहारेण चरति—'चरति' से 'ठक्' हुआ, 'व्यवहार' शब्द लौकिक आचरण अर्थ में वर्त्तमान है; कर्मव्यतिहार अर्थ गम्यमान नहीं है; अतः 'न कर्मव्यतिहारे' से सिद्ध नहीं था, शेष पूर्ववत्।

(7) स्वापतेयः
स्वपतौ साधुः—'पथ्यतिथिवसतिस्वपतेर्ढञ्' से 'ढञ्'
स्वपति ढञ्—हलन्त्यम्, 'आयनेय०' से 'एय्' आदेश,
स्वापत् एय—पूर्ववत् आदिवृद्धि, यस्येति च,
स्वापतेय—सु।

द्वारादि०—'स्वपति' शब्द में वकार पदान्त में नहीं है। वृद्धि-निषेध की प्राप्ति नहीं होती है। तब निषेध क्यों ?

(समा०) 'स्व' शब्द का द्वारादिगण में पाठ होने से वृद्धिनिषेध प्राप्त होता है; अतः प्रतिषेध कहा गया है।

(3405) श्वादेरिञि *8* (1560)

स्वादेरङ्गस्य इञि परतो यदुक्तं तन्न भवति। श्वभस्त्रस्यापत्यं श्वाभस्त्रिः। श्वादंष्ट्रिः। श्वन्शब्दो द्वारादिषु पठ्यते, तत्र च तदादिविधिर्भवतीत्येतदेव वचनं ज्ञापकम्। *इकारादिग्रहणं कर्त्तव्यं श्वागणिकाद्यर्थम्* (म० भा०)। श्वगणेन चरति श्वागणिकः। श्वायूथिकः। *तदन्तस्य चान्यत्रापि तद्धिते प्रतिषेध इष्यते।* श्वाभस्त्रेरिदं श्वाभस्त्रम्।

अर्थ—'इञ्' प्रत्यय परे रहते 'श्व' शब्द है आदि में जिसके, ऐसे अङ्ग के अचों में जो आदि अच्, उसके वृद्धि का निषेध नहीं होता है तथा ऐच् आगम भी नहीं होता है।

उदा० (1) श्वाभस्त्रि
श्वभस्त्रस्याऽपत्यम्—'अत इञ्' से 'इञ्',
श्वभस्त्र इ—वृद्धिनिषेध का निषेध,
श्वाभस्त्रि—सु।

(2) श्वादंष्ट्रिः
श्वदंष्ट्रस्याऽपत्यम्—पूर्ववत्।

श्वन्शब्दो०—द्वारादिगण में 'श्वन्' शब्द का पाठ है। वहाँ तदादिविधि होती है। यह ज्ञापकसिद्ध होता है।

इकारा०—श्वागणिक आदि में इकारादि प्रत्यय होता है।

(3) श्वागणिकः
श्वगणेन चरति—'चरति' से प्रत्यय,
श्वगण ठक्—आदिवृद्धि।

(4) श्वायूथिकः
श्वयूथेन चरति—पूर्ववत्।

तदन्तस्य०—तदन्त का अन्यत्र भी तद्धित प्रत्यय परे रहते निषेध होता है। यथा—

(5) श्वाभस्त्रम्
श्वाभस्त्रेरिदम्—'इञश्च' से 'अण्',
श्वाभस्त्रि अ सु—यस्येति च।

(3406) पदान्तस्यान्यतरस्याम् *9* (1561)

श्वादेरङ्गस्य पदशब्दान्तस्यान्यतरस्यां यदुक्तं तन्न भवति। श्वपदस्येदं श्वापदम्, शौवापदम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—'पद' शब्द है अन्त में जिसके तथा 'श्व' शब्द है अन्त में जिसके, ऐसे अङ्ग को पूर्वोक्त कार्य विकल्प से नहीं होता है। आदिवृद्धि व ऐच् आगम दोनों का विकल्प होता है।

उदा० (1) शौवापदम्
शुन इव पदं यस्य—श्वापदः—'शुनो दन्तदंष्ट्र०' (वा) से दीर्घ,
श्वपदस्येदम्—'तस्येदम्' से 'अण्',
शौवापद अ सु—'औ' आगम।

(2) श्वापदम्
पक्ष में 'औ' आगम नहीं हुआ।

(3407) उत्तरपदस्य *10* (1396)

'उत्तरपदस्य' इत्ययमधिकारः, 'हनस्तोऽचिण्णलोः' (7.3.32) इति प्रागेतस्मात् यदित ऊर्ध्वमनुक्रमिष्यामः, 'उत्तरपदस्य' इत्येवं तद्वेदितव्यम्। वक्ष्यति–'अवयवादृतोः' (7.3.11)। पूर्ववार्षिकम्। अपरवार्षिकम्। पूर्वहैमनम्। अपरहैमनम्'। यत्र पञ्चमीनिर्देशो नास्ति–'जे प्रोष्ठपदानाम्' (7.3.10) इत्येवमादौ, तदर्थमुत्तरपदाधिकारः। पञ्चमीनिर्देशेष्वपि विस्पष्टार्थम्, वृद्धेश्च व्यपदेशार्थम्। 'उत्तरपदवृद्धौ सर्वं च' (6.2.105) इत्युत्तरपदाधिकारे या वृद्धिरित्येवं विज्ञायते।

अर्थ—'उत्तरपदस्य' यह अधिकार है। 'हनस्तोऽचिण्णलोः' (7.3.32) से पूर्व-पूर्व जो कहा जायेगा, वह 'उत्तरपद' के स्थान पर होता है—ऐसा जानना चाहिए।
आगे कहा जायेगा—अवयवाद् ऋतोः। उदाहरण आगे देखें।

यत्र०—जहाँ 'जे प्रोष्ठपदानाम्' इत्यादि लक्षणों में पञ्चमी विभक्ति का निर्देश नहीं है, उसके लिए यह 'उत्तरपदस्य' ऐसा अधिकार है।

पञ्चमी०—जहाँ पञ्चमी का निर्देश है, वहाँ भी स्पष्टता के लिए तथा वृद्धि आदेश के लिए है। 'उत्तरपदवृद्धौ सर्वं च' इस प्रकार उत्तरपद के अधिकार में जो वृद्धि, उसका ज्ञान होता है।

(3408) अवयवादृतोः *11* (1397)

अवयववाचिन उत्तरस्य ऋतुवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। पूर्ववार्षिकम्। पूर्वहैमनम्। अपरवार्षिकम्। अपरहैमनम्। पूर्वं वर्षाणाम्, अपरं वर्षाणामित्येकदेशिसमासः। 'तत्र भवः' (4.3.53) इत्येतस्मिन्नर्थे वर्षाभ्यष्ठक्' (4.3.18) 'हेमन्ताच्च' (4.3.21), 'सर्वत्राण् च तलोपश्च' (4.3.22), इत्यणप्रत्ययः, तत्र 'ऋतोर्वृद्धिमद्विधौ अवयवात्' (म० भा०) इति तदन्तविधिः। अवयवादिति किम्? पूर्वासु वर्षासु भवं पौर्ववर्षिकम्। 'कालाट्ठञ्' (4.3.11) इति ठञ्। अवयवपूर्वस्यैव तदन्तविधिः, नान्यस्य।

अर्थ—अवयववाची, पूर्वपद से उत्तर, ऋतुवाची, उत्तरपद के अचों में जो आदि अच्, उसे वृद्धि आदेश होता है; ञित्, णित्, कित् तद्धित प्रत्यय के परे रहते।

उदा० (1) पूर्ववार्षिकम्
पूर्वं वर्षाणाम्—पूर्वापराधरोत्तर० से समास,
पूर्ववर्ष ठक्—तत्र भवः, वर्षाभ्यष्ठक्,
पूर्ववार्षिक सु—उत्तरपद को आदिवृद्धि।

(2) पूर्वहैमनम्
पूर्वहेमन् अण्—पूर्ववत् उत्तरपद को आदिवृद्धि।

(3) अपरवार्षिकम्
अपरवर्ष ठक्—पूर्ववत्।

(4) अपरहैमनम्
अपरहेमन् अण्—पूर्ववत्।

पूर्वं०—पूर्वं वर्षाणाम्, अपरं वर्षाणाम्—इस विग्रह की दशा में एकदेशि समास होता है। 'तत्र भवः' इस अर्थ में 'वर्षाभ्यष्ठक्' से 'ठक्' होता है। 'हेमन्ताच्च' से अण् प्रत्यय होता है।

अवयवा०—**अवयववाची** से उत्तर जो ऋतुवाची उत्तरपद, उसे आदिवृद्धि होती है।

(5) पौर्ववर्षिकम्
पूर्वासु वर्षासु भवम्—समास हुआ,
पूर्ववर्षा ठञ्—'पूर्व' शब्द अवयववाची नहीं है, कालवाची है, अतः उत्तरपद को आदिवृद्धि नहीं होती है।

काला०—यहाँ 'कालाट् ठञ्' से 'ठञ्' प्रत्यय हुआ है। अवयव हैं पूर्व में जिसके, ऐसे शब्द से ही तदन्त विधि होती है, अन्य से नहीं।

(3409) सुसर्वार्धाज्जनपदस्य *12* (1398)

सु, सर्व, अर्ध–इत्येतेभ्य उत्तरस्य जनपदवाचिन उत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। सुपाञ्चालकः। सर्वपाञ्चालकः। अर्धपाञ्चालकः। 'जनपदतदवध्योश्च', 'अवृद्धादपि बहुवचनविषयात्'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इति वुञ्। 'सुसर्वार्धदिक्शब्देभ्यो जनपदस्य' इति तदन्तविधिः।

अर्थ—सु, सर्व तथा अर्ध—इन शब्दों से उत्तर जो जनपदवाची उत्तर पद, उसके अचों में आदि अच् को वृद्धि आदेश होता है; ञित्, णित्, कित् तद्धित परे रहते।

उदा० (1) सुपाञ्चालकः
सुपञ्चाल—'कुगतिप्रादयः' से समास,
सुपञ्चाले जातः—अवृद्धादपि०,
सुपाञ्चाल सु—उत्तरपद आदिवृद्धि।

(2) सर्वपाञ्चालकः (पूर्ववत्)।

(3) अर्धपाञ्चालकः
पूर्ववत् उत्तरपद आदिवृद्धि।

जनपद०—जनपदतदवध्योश्च तथा अवृद्धादपि बहुवचन० से 'वुञ्' होता है। 'सुसर्वार्धदिक्शब्दे०' से तदन्त विधि होती है।

(3410) दिशोऽमद्राणाम् *13* (1399)

दिग्वाचिन उत्तरस्य जनपदवाचिनो मद्रवर्जितस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। पूर्वपाञ्चालकः। अपरपाञ्चालकः। दक्षिणपाञ्चालकः। पूर्ववत्तदन्तविधिः प्रत्ययश्च। दिश इति किम्? पूर्वः पञ्चालानां पूर्वपञ्चालः, तत्र भवः पौर्वपञ्चालकः। आपरपञ्चालकः। अमद्राणामिति किम्? पौर्वमद्रः। आपरमद्रः। 'मद्रेभ्योऽञ्' (4.2.108) इत्यञ्प्रत्ययः।

अर्थ—तद्धितसंज्ञक ञित्, णित्, कित् प्रत्यय के परे रहते दिशावाची शब्द से उत्तर जनपदवाची जो उत्तर पद, उसके अचों में जो आदि अच्, उसके स्थान पर वृद्धि आदेश होता है; परन्तु मद्र शब्द को यह वृद्धि नहीं होती है।

उदा० (1) पूर्वपाञ्चालकः
पूर्वेषु पञ्चालेषु भवः—'तद्धितार्थोत्तरपदसमा०' से समास,
पूर्वपञ्चाल वुञ्—उत्तरपद आदिवृद्धि, सु।

(2) अपरपाञ्चालकः
अपरपञ्चाल वुञ्—पूर्ववत्।

(3) दक्षिणपाञ्चालकः (पूर्ववत्)।

पूर्वव०—पूर्ववत् तदन्त विधि तथा प्रत्यय होते हैं।

दिश०—दिशावाची शब्द से उत्तर जनपदवाची शब्द को आदिवृद्धि होती है।

(4) पौर्वपञ्चालकः
पूर्वः पञ्चालानाम्—पूर्वपञ्चालः,

तत्र भवः—इस अर्थ में 'वुञ्' होता है। उत्तरपद को वृद्धि नहीं हुई। पूर्वपद को आदिवृद्धि हुई।

(5) आपरपञ्चालकः
पूर्ववत् पूर्वपद को आदिवृद्धि।

अमद्रा०—मद्र शब्द को आदिवृद्धि नहीं होती है।

(6) पौर्वमद्रः
पूर्वमद्र अञ्—उत्तरपद को आदिवृद्धि नहीं होती है।

(7) आपरमद्रः (पूर्ववत्)।

मद्रे०—'मद्रेभ्योऽञ्' से 'अञ्' प्रत्यय होता है।

(3411) प्राचां ग्रामनगराणाम् *14* (1400)

प्राचां देशे ग्रामनगराणां दिश उत्तरेषामचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। ग्रामाणाम्–पूर्वेषुकामशम्यां भवः पूर्वैषुकामशमः। अपरैषुकामशमः। पूर्वकार्ष्णमृत्तिकः। अपरकार्ष्णमृत्तिकः। नगराणाम्–पूर्वस्मिन्पाटलिपुत्रे भवः पूर्वपाटलिपुत्रकः। अपरपाटलिपुत्रकः। पूर्वकान्यकुब्जः। अपरकान्यकुब्जः। ग्रामत्वादेव नगराणामपि ग्रहणे सिद्धे भेदेन यदुभयोरुपादानं तत्सम्बन्धभेदप्रतिपत्त्यर्थम्। दिक्पूर्वपदो हि समुदायः, पूर्वेषुकामशम्यादिः ग्रामनामधेयम्। पाटलिपुत्रादिः पुनरुत्तरपदमेव नगरमाह। तत्र ग्रामवाचिनामङ्गानामवयवस्य दिक्शब्दादुत्तरस्य च नगरवाचिनामुत्तरपदानामवयवस्य वृद्धिर्भवतीत्येवमभिसम्बन्धः क्रियते। इतरत्र तु दिश उत्तरेषां नगराणामित्येव। पूर्वैषुकामशमः–इत्येवमादिषु कृतायामुत्तरपदवृद्धौ एकादेशो भवतीति ज्ञापितम्। 'नेन्द्रस्य परस्य' (7.3.22) इति प्रतिषेधेन।

अर्थ—दिशावाची शब्द से उत्तर प्राच्य देश में जो ग्राम व नगरवाची शब्द, उनके आदि अच् को वृद्धि आदेश होता है; ञित्, णित्, कित् तद्धित परे रहते।

उदा० (क) ग्रामाणाम्—
(1) पूर्वैषुकामशमः
पूर्वा चाऽसाविषुकामशमी—'दिक्सङ्ख्ये० से समास,
पूर्वेषुकामशमी ञ—तत्र भवः, दिक्पूर्वपदादस०, चुटू,
पूर्वैषुकामशम् अ—'इषुकामशमी' को आदिवृद्धि।
पूर्वेषु कामशम्यां भवः—यह विग्रहान्तर है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(2) अपरैषुकामशमः (पूर्ववत्)।
(3) पूर्वकार्ष्णमृत्तिकः (पूर्ववत्)।
(4) अपरकार्ष्णमृत्तिकः (पूर्ववत्)।

(ख) नगराणाम्—
(5) पूर्वपाटलिपुत्रकः
पूर्वस्मिन् पाटलिपुत्रे भवः—उत्तरपद आदिवृद्धि।

(6) अपरपाटलिपुत्रकः (पूर्ववत्)।
(7) पूर्वकान्यकुब्जः (पूर्ववत्)।
(8) अपरकान्यकुब्जः (पूर्ववत्)।

ग्राम०—ग्राम होने से नगरों का भी ग्रहण हो जाता है। तब भेद के द्वारा जो दोनों का ग्रहण किया गया है, वह उनके सम्बन्ध के भेद के ज्ञान के लिए है। दिशावाची पूर्वपद समुदाय पूर्वेषुकामशमी आदि ग्रामों के नाम हैं। पाटलिपुत्र आदि उत्तरपद में नगरों को कहते हैं।

तत्र०—इनमें ग्रामवाची अङ्गसंज्ञक शब्दों के अवयव और दिशावाची से उत्तरपद के आदि अच् की वृद्धि होती है नगरवाची के उत्तरपद के अवयव आदि अच् की वृद्धि होती है—ऐसा सम्बन्ध किया जाता है। परन्तु अन्यत्र दिक् वाची से उत्तरवर्ती नगरवाचकों की आदिवृद्धि होती है।

पूर्वेषु०—पूर्वेषुकामशमः इत्यादि में उत्तरपदवृद्धि कर देने पर एकादेश होता है।

(3412) संख्यायाः संवत्सरसंख्यस्य च *15* (1752)

संख्याया उत्तरपदस्य संवत्सरशब्दस्य संख्यायाश्चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। द्वौ संवत्सरावधीष्टो भृतो भूतो भावी वा द्विसांवत्सरिकः। संख्यायाः–द्वे षष्टी अधीष्टी भृतो भूतो भावी वा द्विषाष्टिकः। द्विसाप्ततिकः। द्विष्ट्यादिशब्दो वर्षेषु संख्येयेषु वर्त्तमानः कालाधिकारविहितं प्रत्ययमुत्पादयति। 'परिमाणान्तस्य' (7.3.17) इत्येव सिद्धे संवत्सरग्रहणं परिणामग्रहणे कालपरिमाणस्याग्रहणार्थम्। तेन द्वैसमिकः, त्रैसमिकः–इत्युत्तरपदवृद्धिर्न भवति। द्विवर्षा त्रिवर्षा माणविकेति 'अपरिमाणबिस्ताचित' (4.1.22) इति पर्युदासो न भवति।

अर्थ—संख्यावाची शब्द से उत्तर संवत्सर और संख्यावाची अङ्ग के उत्तरपद के अचों में जो आदि अच्, उसे वृद्धि आदेश होता है; ञित्, णित्, कित् तद्धित के परे रहते।

उदा० (1) द्विसांवत्सरिकः
द्वौ संवत्सरावधीष्टो भृतो भूतो भावी वा—तद्धितार्थ में समास,
द्विसंवत्सर ठञ्—प्राग्वतीय अर्थ में,
द्विसांवत्सरिकः—ठस्येकः, सु।

(2) द्विषाष्टिकः
द्वे षष्टी अधीष्टो भृतो भूतो भावी वा—पूर्ववत्।
(3) द्विसाप्ततिकः (पूर्ववत्)।

द्विषष्टि०—द्विषष्टि आदि शब्दों से वर्ष तथा संख्येय अर्थों में वर्त्तमान होने से कालाधिकारविहित प्रत्यय होता है।

परिमा०—'परिमाणान्तस्य' से सिद्ध होने पर 'संवत्सर' का ग्रहण परिमाणग्रहण में कालपरिमाण का ग्रहण न हो—इसके लिए है। तब द्वैसमिकः तथा त्रैसमिकः—इनमें उत्तरपद को आदि वृद्धि नहीं होती है। द्विवर्षा, त्रिवर्षा—यहाँ 'अपरिमाणबिस्ताचित०' से पर्युदास नहीं होता है।

(3413) वर्षस्याभविष्यति *16* (1754)

संख्याया उत्तरस्य वर्षशब्दस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः, स चेत्तद्धितो भविष्यत्यर्थे न भवति। द्वे वर्षे अधीष्टो भृतो भूतो वा द्विवार्षिकः। त्रिवार्षिकः। अभविष्यतीति किम्? यस्य त्रैवर्षिकं धान्यं निहितं भृत्यवृत्तये, अधिकं वापि विद्येत, स सोमं पातुमर्हति। त्रीणि वर्षाणि भावीति त्रैवर्षिकम्। अधीष्टभूतयोः 'अभविष्यति' इति प्रतिषेधो न भवति। गम्यते हि तत्र भविष्यत्ता, न तु तद्धितार्थः। द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यतीति द्विवार्षिको मनुष्यः।

अर्थ—तद्धित ञित्, णित्, कित् के परे रहते संख्या शब्द से उत्तर जो वर्ष शब्द, उसके आदि अच् के स्थान पर वृद्धि आदेश होता है, यदि प्रत्यय भविष्यत् अर्थ में न हो।

उदा० (1) द्विवार्षिकः
द्वे वर्षे अधीष्टो भृतो भूतो वा—समास,
द्वि वर्ष इक—ठस्येकः,
द्विवार्षिक सु—उत्तरपदवृद्धि।

(2) त्रिवार्षिकः (पूर्ववत्)।

अभाविष्य०—भविष्यत् अर्थ में प्रत्यय न हो तो उत्तरपद को आदिवृद्धि होती है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3) त्रैवर्षिकम्
त्रिवर्ष—पूर्वपद को आदिवृद्धि हुई है।
त्रीणि वर्षाणि भावी इति।

अधीष्ट०—अधीष्ट और भूत अर्थों में 'अभविष्यति' इस प्रकार प्रतिषेध नहीं होता है। वहाँ भविष्यकालता गम्य हो रही है; तद्धितार्थ नहीं। यथा—
द्वे वर्षे अधीष्टो भृतो वा कर्म करिष्यति—द्विवार्षिको मनुष्यः।

(3414) परिमाणान्तस्यासंज्ञाशाणयोः *17* (1683)

परिमाणान्तस्याङ्गस्य संख्यायाः परं यदुत्तरपदं तस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः, संज्ञायां विषये शाणे चोत्तरपदे न भवति। द्वौ कुडवौ प्रयोजनमस्य द्विकौडविकः। द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम्। 'विभाषा कार्षापणसहस्राभ्याम्' (5.1.29) इत्यत्र 'सुवर्णशतमानयोरुपसंख्यानम्' (वा०) इति लुको विकल्पः। द्वाभ्यां निष्काभ्यां क्रीतम् 'द्वित्रिपूर्वान्निष्काद्' (5.1.30)–द्विनैष्किकम्। असंज्ञाशाणयोरिति किम्? पाञ्चलोहितिकम्। पाञ्चकलापिकम्। पञ्च लोहित्यः परिमाणमस्य, पञ्च कलापानि परिमाणमस्येति विगृह्य 'तदस्य परिमाणम्' (5.1.57) इति योगविभागात्प्रत्ययः, तद्धितान्तश्चायं समुदायः संज्ञा। द्वाभ्यां शाणाभ्यां क्रीतं द्वैशाणम्। त्रैशाणम्। 'शाणाद्वा' (5.1.35) 'द्वित्रिपूर्वादण्च' (5.1.36) इत्यण्प्रत्ययः। 'असंज्ञाशाणकुलिजानाम्' इति केचित्पठन्ति। द्वे कुलिजे प्रयोजनमस्य द्वैकुलिजिकः।

अर्थ—तद्धित ञित्, णित्, कित् प्रत्यय के परे रहते संख्यावाची शब्द से उत्तर परिमाणवाची शब्द है अन्त में जिसके, ऐसे अङ्ग के उत्तरपद के आदि अच् को वृद्धि आदेश होता है, यदि संज्ञा गम्यमान हो अथवा शाण शब्द उत्तर पद में हो तो यह वृद्धि नहीं होती है।

उदा० (1) द्विकौडविकः
द्वौ कुडवौ प्रयोजनमस्य—समास,
द्वि कुडव ठञ्—प्राग्वतेष्ठञ्,
द्विकौडविक सु—उत्तरपदवृद्धि।

(2) द्विसौवर्णिकम्
द्वाभ्यां सुवर्णाभ्यां क्रीतम्—समास,
द्विसुवर्ण इक—उत्तरपदवृद्धि।

विभाषा०—'विभाषा कार्षापणसहस्राभ्याम्' यहाँ 'सुवर्णशतमानयोरुप०' (वा०) से लुक् का विकल्प होता है।

(3) द्विनैष्किकम्
द्वाभ्यां निष्काभ्यां क्रीतम्—'द्वित्रिपूर्वान्निष्काद्'।

असंज्ञा—संज्ञा गम्यमान हो तथा शाण शब्द उत्तरपद हो तो सूत्रोक्त वृद्धि आदेश नहीं होता है।

(4) पाञ्चलोहितिकम्
उत्तरपद को वृद्धि नहीं हुई। पञ्च लोहित्यः परिमाणम् अस्य।

(5) पाञ्चकलापिकम्
पूर्ववत्। पञ्च कलापानि परिमाणम् अस्य।

पञ्च०—पूर्ववत् विग्रह करके 'तदस्य परिमाणम्' इस प्रकार योग विभाग से प्रत्यय होता है। तद्धितान्त समुदाय संज्ञा है।

(6) द्वैशाणम्
द्वाभ्यां शाणाभ्यां क्रीतम्—'शाणाद्वा'। द्वित्रिपूर्वादण् च।

(7) त्रैशाणम्
पूर्ववत् उत्तरपद आदिवृद्धि का निषेध।

असंज्ञा०—कुछ विद्वान् 'असंज्ञाशाणकुलिजानाम्' ऐसा पाठ मानते हैं।

(8) द्वैकुलिजिकः
द्वे कुलिजे प्रयोजनमस्य।

(3415) जे प्रोष्ठपदानाम् *18* (1409)

'जे' इति जातार्थो निर्दिश्यते। तत्र यस्तद्धितो विहितस्तस्मिन् ञिति, णिति, किति च परतः प्रोष्ठपदानामुत्तरस्याचामादेरचो वृद्धिर्भवति। प्रोष्ठपदा नाम नक्षत्रम्, ताभिर्युक्तः काल (4.2.3) इत्यण्। तस्य 'लुबविशेषे' (4.2.4) इति लुप्। प्रोष्ठपदासु जातः–'ऋतुनक्षत्रेभ्योऽण्' (4.3.16) इत्यण्–प्रोष्ठपादो माणवकः। जे इति किम्? यदा प्रोष्ठपदो मेघो धरणीमभिवर्षति–प्रोष्ठपदासु भवः प्रौष्ठपदः। 'प्रोष्ठपदानाम्' इति बहुवचननिर्देशात् पर्यायोऽपि गृह्यते–भद्रपाद इति।

अर्थ—'जे' इसके द्वारा 'जात अर्थ' ऐसा निर्देश जानना चाहिए। 'जात' अर्थ में विहित जो तद्धितसंज्ञक ञित्, णित्, कित् प्रत्यय, उनके परे रहते प्रोष्ठ पद अङ्ग के उत्तरपद के आदि अच् को वृद्धि होती है।

उदा० (1) प्रोष्ठपादः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रोष्ठपदाभिर्युक्तः कालः—'नक्षत्रेण युक्तः कालः' से 'अण्',
प्रोष्ठपदा अण्—'लुबविशेषे' से लुप्,
प्रोष्ठपदासु जातः—तत्र जातः, ऋतुनक्षत्रेभ्योऽण्,
प्रोष्ठपदा अण्—उत्तरपद आदिवृद्धि।

जे इति०—जात अर्थ में विहित प्रत्यय के परे रहते ही सूत्रोक्त उत्तरपद आदिवृद्धि होती है।

(2) प्रोष्ठपदः
प्रोष्ठपदो मेघो धरणीमभिवर्षति—इस प्रकार।
प्रोष्ठपदासु भवः—उत्तरपद आदिवृद्धि नहीं हुई।

प्रोष्ठप०—'प्रोष्ठपदानाम्' इस प्रकार बहुवचननिर्देश से इसके पर्याय शब्दों का भी ग्रहण होता है।

(3) भद्रपादः
भद्रपदासु जातः—पूर्ववत्।

(3416) हृद्भगसिन्ध्वन्ते पूर्वपदस्य च *19* (1133)

हृद् भग, सिन्धु-इत्येवमन्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। सुहृदयस्येदं सौहार्दम्। सुहृदयस्य भावः सौहार्द्यम्। सुभगस्य भावः सौभाग्यम्। दौर्भाग्यम्। सुभगाया अपत्यं सौभागिनेयः। दौर्भागिनेयः। कल्याण्यादिषु (5.1.126) 'सुभगदुर्भग' इति पठ्यते। 'सुभग मन्त्रे' इत्युद्गात्रादिषु (5.1.129) पठ्यते, तत्रोत्तरपदवृद्धिर्नेष्यते-'महते सौभगाय; छन्दसि सर्वविधीनां विकल्पितत्वात् (पु०प० 35)। सक्तुप्रधानाः सिन्धवः सक्तुसिन्धवः, सक्तुसिन्धुषु भवः साक्तुसैन्धवः। पानसैन्धवः। सिन्धुशब्दः कच्छादिषु (4.2.133) पठ्यते, तेन तदन्तविधिरिष्यते इत्यणप्रत्ययः।

अर्थ—हृद्, भग, सिन्धु—शब्द हैं अन्त में जिसके, ऐसे अङ्गों के पूर्वपद तथा उत्तरपद दोनों के आदि अच् को वृद्धि आदेश होता है, तद्धित ञित्, णित्, कित् प्रत्यय परे रहते।

उदा० (1) सौहार्दम्
सुहृदयस्येदम्—'तस्येदम्' से 'अण्',
सुहृद् अण्—हृदयस्य हृल्ले०,
सौहार्द् अ—पूर्वपद, उत्तरपद आदिवृद्धि, सु।

(2) सौहार्द्यम्
सुहृदयस्य भावः—'गुणवचन०' से 'ष्यञ्',
सुहृद् ष्यञ्—षः प्रत्ययस्य, हलन्त्यम्, 'वा शोकष्यञ् रोगेषु' से 'हृद्' आदेश,
सौहार्द् य सु—उभयवृद्धि।

(3) सौभाग्यम्
सुभगस्य भावः—पूर्ववत् 'ष्यञ्',
सौभाग् य—उभयपदवृद्धि, सु।

(4) दौर्भाग्यम्
दुर्भगस्य भावः—पूर्ववत् ष्यञ्, उभयपदवृद्धि।

(5) सौभागिनेयः
सुभगाया अपत्यम्—तस्याऽपत्यम्, कल्याण्यादी०,
सुभग् इनङ् ढक्—अनुबन्धलोप, 'एय' आदेश,
सौभागिन् एय सु—उभयपदवृद्धि।

(6) दौर्भागिनेयः
दुर्भगाया अपत्यम्—पूर्ववत्।

कल्याण्या०—कल्याण्यादि में 'सुभगदुर्भग०' का पाठ है। 'सुभगमन्त्रे' का उद्गात्रादि में पाठ है। वहाँ उत्तरपदवृद्धि नहीं होती है। यथा—
महते सौभगाय
अथवा छन्दस् में सभी विधियों का विकल्प होता है।

(7) साक्तुसैन्धवः
सक्तुप्रधानाः सिन्धवः—सक्तुसिन्धवः,
सुक्तुसिन्धुषु भवः—अण्, कच्छादिभ्यश्च,
साक्तुसैन्धव सु—उभयपदवृद्धि, ओर्गुणः।

(8) पानसैन्धवः
पूर्ववत् अण्, उभयपदवृद्धि।

सिन्धु०—सिन्धु शब्द कच्छादिगण में पठित है। अतः तदन्त विधि तथा अण् प्रत्यय होता है।

(3417) अनुशतिकादीनां च *20* (1438)

'अनुशतिक'-इत्येवमादीनां चाङ्गानां पूर्वपदस्य चोत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। अनुशतिकस्येदम् आनुशातिकम्। अनुहोडेन चरति आनुहौडिकः। अनुसंवरणे दीयते आनुसांवरणम्। अनुसंवत्सरे दीयते आनुसांवत्सरिकः। अङ्गारवेणुर्नाम कश्चित्, तस्यापत्यम् आङ्गारवैणवः। असिहत्य-तत्र भवं आसिहात्यम्। 'अस्यहत्य' इति केचित् पठन्ति, ततोऽपि विमुक्तादित्वादण् (5.2.61)। अस्य-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हत्यशब्दोऽस्मिन्नध्यायेऽस्ति आस्यहात्यः। 'अस्यहेतिः' इत्येवमपरे पठन्ति, अस्यहेतिः प्रयोजनमस्य आस्यहैतिकः। अत एव वचनादस्य समुदायस्य प्रातिपदिकत्वं विभक्तेश्चालुक्। वध्योग इति-विदादिरयम् (4.1.104), तस्यापत्यं वाध्यौगः। पुष्करसत्, अनुहरत्-एतौ बाह्वादिषु (4.1.96) पठ्येते। पौष्करसादिः, आनुहारतिः। कुरुकत-गर्गादिः (4.1.105), कौरुकात्यः। कुरुपञ्चाल-कुरुपञ्चालेषु भवः कौरुपाञ्चालः। 'जनपदसमुदायो जनपदग्रहणेन न गृह्यते' इति वुञ् न भवति। उदकशुद्धस्यापत्यम् औदकशौद्धिः। इहलोक, परलोक-तत्र भवः ऐहलौकिकः, पारलौकिकः। 'लोकोत्तरपदस्य' (वा०) इति ठञ्। सर्वलोक-तत्र विदितः सार्वलौकिकः। सर्वपुरुषस्येदं सार्वपौरुषम्। सर्वभूमेर्निमित्तं संयोग उत्पातो वा सार्वभौमः। प्रयोग-तत्र भवः प्रायौगिकः। परस्त्री-पारस्त्रैणेयः। 'कुलटाया वा' (4.1.127) इतीनङ्। *राजपुरुषात् ष्यञि* (ग०सू० 176)। राजपौरुष्यम्। ष्यञीति किम्? राजपुरुषस्यापत्यं राजपुरुषायणिः। 'उदीचां वृद्धादगोत्रात्' (4.1.157) इति फिञ्। शतकुम्भसुखशयनादयः-शतकुम्भे भवः शातकौम्भः। सौखशायनिकः। पारदारिकः। सूत्रनडस्यापत्यं सौत्रनाडिः। आकृतिगणश्चायमिष्यते। नेतेदमपि सिद्धं भवति-अभिगममर्हति आभिगामिकः। आधिदेवे भवमाधिदैविकम्। आधिभौतिकम्। चतस्र एव विद्याः चातुर्वैद्यम्। स्वार्थे ष्यञ्। अनुशतिक। अनुहोड। अनुसंवरण। अनुसंवत्सर। अङ्गारवेणु। असिहत्य। वध्योग। पुष्करसत्। अनुहरत्। कुरुकत। कुरुपञ्चाल। उदकशुद्ध। इहलोक। परलोक। सर्वलोक। सर्वपुरुष। सर्वभूमि। प्रयोग। परस्त्री। *राजपुरुषात् ष्यञि* (ग०सू० 176)। सूत्रनड—अनुशतिकादिः।

अर्थ—अनुशतिक आदि अङ्गों के पूर्वपद तथा उत्तरपद—दोनों पदों के आदि अच् के स्थान पर वृद्धि आदेश होता है; तद्धित ञित्, णित्, कित् प्रत्यय के परे रहते।

उदा० (1) आनुशातिकम्
अनुशतिकस्येदम्—'तस्येदम्' से 'अण्',
अनुशतिक अण्—उभयपदवृद्धि, सु।

(2) आनुहौडिकः
अनुहोडेन चरति—'चरति',
अनुहोड ठक्—ठस्येकः, उभयपदवृद्धि,
आनुहौडिक सु—सु।

(3) आनुसांवरणम्
अनुसंवरणे दीयते—'तत्र च दीयते कार्यं०',
अनुसंवरण अ—'अण्',
आनुसांवरण अ—सु।

(4) आनुसांवत्सरिकः
अनुसंवत्सरे दीयते—तत्र च दीयते०, बह्वचोऽन्तो०,
आनुसांवत्सर ठञ्—उभयपदवृद्धि,
आनुसांवत्सरिक सु—सु।

(5) अङ्गारवैणवम्
अङ्गारवेपोरपत्यम्—'तस्याऽपत्यम्',
आङ्गारवैणो अ—अण्, उभयपद वृद्धि, ओर्गुणः, सु।

(6) आसिहात्यम्
असिहात्य अण्—तत्र भवः,
आसिहात्य अ—उभयपदवृद्धि।

अस्यह०—'अस्यहत्य' कुछ विद्वान् इस प्रकार पाठ करते हैं। उससे भी 'विमुक्तादि' में पाठ होने से 'अण्' होता है। यथा—

(7) आस्यहात्यः
अस्यहत्य शब्दोऽस्मिन्नध्यायेऽस्ति—उभयपदवृद्धि।

अस्यहेति—कुछ विद्वान् 'अस्यहेति' इस प्रकार पाठ स्वीकार करते हैं। यथा—

(8) आस्यहैतिकः
अस्यहेतिः प्रयोजनम् अस्य—
आस्यहैति इक—उभयपदवृद्धि, सु।

अतएव०—इस वचन से ही इस समुदाय की प्रातिपदिक संज्ञा तथा विभक्ति का अलुक् होता है।

वध्योग०—'वध्योग' का बिदादि गण में पाठ है।

(9) वाध्यौगः
वध्योगस्याऽपत्यम्—अनृष्याऽनन्तर्ये बिदादिभ्योऽञ्,
वध्योग अञ्—उभयपदवृद्धि, सु।
पुष्करसत् तथा अनुहरत्—इनका बाह्वादिगण में पाठ है।

(10) पौष्करसादिः
पुष्करसतोऽपत्यम्—बाह्वादिभ्यश्च, इञ्,
पौष्करसात् इञ् सु—उभयपदवृद्धि।

(11) आनुहारतिः
अनुहरतोऽपत्यम्—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(12) कौरुकात्यः
कुरुकतस्याऽपत्यम्—गर्गादिभ्यो यञ्,
कौरुकात् य सु—उभयपदवृद्धि।

(13) कौरुपाञ्चालः
कुरुपञ्चाल अण्—तत्र भवः, उभयपदवृद्धि।

जन०—'जनपदतदवध्योश्च' से 'वुञ्' होना चाहिए था। 'जनपदसमुदायो जनपदग्रहणेन न गृह्यते' से 'वुञ्' नहीं होता है।

(14) औदकशौद्धिः
उदकशुद्धस्याऽपत्यम्—
औदकशौद्ध—उभयपदवृद्धि, सु।

(15) ऐहलौकिकः
इहलोके भवः—तत्र भवः, लोकोत्तरपदस्य,
इहलोक ठञ्—उभयपदवृद्धि, ठस्येकः, सु।

(16) पारलौकिकः
परलोक ठञ्—पूर्ववत्।

(17) सार्वलौकिकः
सर्वलोक ठञ्—तत्र विदितः, लोकसर्वलोकाट् ठञ्,
सार्वलौक इक—ठस्येकः, उभयपदवृद्धि, सु।

(18) सार्वपौरुषम्
सर्वपुरुषस्येदम्—'तस्येदम्' से 'अण्',
सार्वपौरुष अ सु—उभयपदवृद्धि।

(19) सार्वभौमः
सर्वभूमेर्निमित्तं संयोग उत्पातो वा—सर्वभूमिपृथिवीभ्याम०,
सर्वभूमि अण्—उभयपदवृद्धि, सु।

(20) प्रायोगिकः
प्रयोगे भवः—तत्र भवः।
प्रायोग इक—आदिवृद्धि, सु।

(21) पारस्त्रैणेयः
परस्त्री ढक्—स्त्रीभ्यो ढक्,
परस्त्रिनङ् एय—'एय' आदेश, 'कुलटाया वा' से 'इनङ्' आदेश,
पारस्त्रैण् एय सु—उभयपदवृद्धि, णत्व।

राजपु०—ष्यञ् परे रहते राजपुरुष शब्द को उभयपदवृद्धि होती है।

(22) राजपौरुष्यम्
राजपुरुष ष्यञ्—ब्राह्मणादि में पाठ होने से 'ष्यञ्' होता है,
राजपौरुष य सु—यस्येति च।

ष्यञीति०—ष्यञ् परे रहते ही राजपुरुष शब्द को उभयपदवृद्धि होती है।

(23) राजपुरुषायणिः
राजपुरुषस्याऽपत्यम्—उदीचां वृद्धादगोत्रात्,
राजपुरुष फिञ्—हलन्त्यम्, आयन आदेश,
राजपुरुष् आयनि सु—पूर्वपद आदिवृद्धि, यस्येति च।

(24) शातकौम्भः
शतकुम्भ अण्—उभयपदवृद्धि,
शातकौम्भ अ सु—विभक्तिकार्य।

(25) सौखशायनिकः
सुखशयन अण्—पूर्ववत्।

(26) पारदारिकः
परदार—पूर्ववत् उभयपदवृद्धि।

(27) सौत्रनाडिः
सूत्रनडस्याऽपत्यम्—अत इञ्, शेष पूर्ववत्।

आकृति०—यह आकृतिगण है। तब निम्नलिखित में भी सिद्ध होता है—

(28) आभिगामिकः
अभिगमम् अर्हति—'ढक्', उभयपदवृद्धि।

(29) आधिदैविकम्
अधिदेवे भवम्—'ठञ्', उभयपदवृद्धि।

(30) आधिभौतिकम्
अधिभूत—पूर्ववत्।

(31) चातुर्वैद्यम्
चतस्र एव विद्याः—'स्वार्थिको वक्तव्यश्चातुर्वर्ण्यादिसिद्ध्यर्थम्' से स्वार्थ में 'ष्यञ्'
चतुर् विद्य् य—उभयपदवृद्धि।

(3418) देवताद्वन्द्वे च *21* (1239)

देवताद्वन्द्वे च पूर्वपदस्योत्तरपदस्य चाचामादेरचः स्थाने वृद्धिर्भवति तद्धिते त्रिति, णिति, किति च परतः। आग्निमारुतीमनड्वाहीमालभेत्' (मै०2.5.7)। आग्नि-मारुतं कर्म। यो देवताद्वन्द्वः सूक्तहविःसम्बन्धी, तत्रायं विधिः। इह च न भवति–स्कन्दविशाखौ देवते अस्य स्कान्दविशाखः। ब्रह्मप्रजापती–ब्राह्मप्रजापत्यम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—देवतावाची द्वन्द्व समास में पूर्वपद व उत्तरपद के आदि अच् को वृद्धि आदेश होता है; तद्धित ञित्, णित्, कित् परे रहते।

उदा० (1) आग्निमारुतीम्
अग्निश्च मरुतश्च → अग्निमरुतौ—चार्थे द्वन्द्वः,
आग्निमारुत अ—तौ देवते अस्याः—इस विग्रह की दशा में 'साऽस्य देवता' से 'अण्', उभयपदवृद्धि,
आग्निमारुती—'इद् वृद्धौ' से 'इत्' 'टिड्ढाऽण्'० से 'ङीप्',
आग्निमारुतीम्—अम्, अमि पूर्वः।
इसी प्रकार—आग्निमारुतं कर्म।

यो देव०—सूक्त-हविसम्बन्धी जो देवताद्वन्द्व है, उसमें ही यह विधि होती है। अतः निम्नलिखित में नहीं होता है—

(2) स्कान्दविशाखः
स्कन्दश्च विशाखश्च—स्कन्दविशाखौ।
स्कन्दविशाखौ देवते अस्य—'तस्येदम्' से 'अण्',
स्कान्दविशाख अ—पूर्वपद को वृद्धि।

(6) ब्राह्मप्रजापत्यम्
ब्रह्मप्रजापती देवते अस्य—'दित्यदित्यादित्यपत्युत्तरप०' से 'ण्य', पूर्ववत् पूर्वपद को आदिवृद्धि।

(3419) नेन्द्रस्य परस्य *22* (1240)

इन्द्रशब्दस्य परस्य यदुक्तं तन्न भवति। सौमेन्द्रः। आग्नेन्द्रः। परस्येति किम्? ऐन्द्राग्नमेकादशकपालं चरुं निर्वपेत्। इन्द्रशब्दे द्वावचौ–तत्र तद्धिते एकस्य 'यस्येति च' (6.4.148) इति लोपः, अपरस्य पूर्वेण सहैकादेश इत्यप्राप्तिरेव वृद्धेः, तदेदं प्रतिषेधवचनं ज्ञापकम्–बहिरङ्गमपि पूर्वोत्तरपदयोः पूर्वं कार्यं भवति, पश्चादेकादेश इति। तेन पूर्वैषुकामशम इत्यादि सिद्धं भवति।

अर्थ—देवतावाची द्वन्द्व समास में उत्तरपद में स्थित 'इन्द्र' शब्द के आदि अच् के स्थान पर वृद्धि आदेश नहीं होता है; ञित्, णित्, कित् तद्धित परे रहते।

उदा० (1) सौमेन्द्रः
सोमश्चेन्द्रश्च—चार्थे द्वन्द्वः,
सोमेन्द्रौ देवते अस्य—'देवताद्वन्द्वे च' से आनङ्, आद् गुणः, साऽस्य देवता,
सौमेन्द्र अ—उत्तरपदवृद्धि का निषेध।

(2) आग्नेन्द्रः
अग्निश्चेन्द्रश्च—अग्ना इन्द्र औ—अग्नेन्द्रौ—पूर्ववत् आनङ्, 'साऽस्य देवता' से 'अण्' हुआ,
अग्नेन्द्र अ सु—पूर्वपद को वृद्धि।

परस्ये०—उत्तरपद में स्थित 'इन्द्र' शब्द को आदिवृद्धि नहीं होती है।

(3) ऐन्द्राग्नम्
इन्द्रश्चाऽग्निश्च → इन्द्राग्नी—पूर्ववत्,
इन्द्राग्नी देवते अस्य—पूर्ववत् 'अण्',
ऐन्द्राग्न अम्—उत्तरपद आदिवृद्धि का निषेध नहीं हुआ।

इन्द्र०—'इन्द्र' शब्द में दो अच् हैं। इससे तद्धित करने पर एक अच् का 'यस्येति च' से लोप होता है। अन्य अच् का पूर्व के साथ एकादेश हो जाता है। तब वृद्धि का प्रसङ्ग ही नहीं उठता। तब इस प्रतिषेध-विधान की क्या आवश्यकता है?

(समा०) प्रकृत सूत्र के ज्ञापित होता है कि बहिरङ्ग होने पर भी प्रथम पूर्वपद व उत्तरपद में कार्य होता है, पश्चात् एकादेश होता है। तब 'पूर्वैषुकामशमः' इत्यादि प्रयोग सिद्ध होते हैं।

(3420) दीर्घाच्च वरुणस्य *23* (1241)

दीर्घादुत्तरस्य यदुक्तं तन्न भवति। ऐन्द्रावरुणम् (2.1.7)। मैत्रावरुणम्। दीर्घादिति किम्? 'अग्निवारुणीमनड्वाहीमालभेत' (कठ० 13.6)। अग्नेः–'ईदग्नेः सोमवरुणयोः' (6.3.37) इत्यस्यानङपवादस्य 'इद्वृद्धौ' (6.3.28) इति प्रतिषेधो विधीयते, तेन दीर्घात्परो न भवति।

अर्थ—तद्धितसंज्ञक ञित्, णित्, कित् परे रहते देवतावाची शब्दों के द्वन्द्व समास में दीर्घान्त शब्द से उत्तर जो 'वरुण' शब्द, ऐसे अङ्ग के उत्तरपद के आदि अच् को वृद्धि आदेश नहीं होता है।

उदा० (1) ऐन्द्रावरुणम्
इन्द्रश्च वरुणश्च → इन्द्रावरुणौ—पूर्ववत् 'आनङ्',
ते देवते अस्य—'अण्' हुआ,
ऐन्द्रावरुण सु—पूर्वपद को वृद्धि।

दीर्घादि०—दीर्घान्त शब्द से उत्तर 'वरुण' के आदि अच् को वृद्धि का निषेध होता है।

(2) अग्निवारुणीम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अग्निवरुण अण्—'ईदग्नेः सोमवरुणयोः' से 'ईत्' प्राप्त हुआ, 'इद् वृद्धौ' से 'इत्' हुआ, चूँकि 'वरुण' शब्द दीर्घ शब्दान्त से पर नहीं है, अतः वृद्धिनिषेध नहीं हुआ,
अग्निवारुण ङीप् अम्—टिड्ढाऽण्०।

(3421) प्राचां नगरान्ते *24* (1431)

प्राचां देशे नगरान्तेऽङ्गे पूर्वपदस्योत्तरपदस्याचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। सुह्मनगरे भवः सौह्मनागरः। पौण्ड्रनागरः। प्राचामिति किम्? मद्रनगरमुदक्षु, तत्र भवः माद्रनगरः।

अर्थ—तद्धितसंज्ञक ञित्, णित्, कित् प्रत्यय परे रहते प्राच्य देश में 'नगर' है अन्त में जिसके, ऐसे अङ्ग के पूर्व पद और उत्तर पद के आदि अच् के स्थान पर वृद्धि आदेश होता है।

उदा० (1) सौह्मनागरः
सुह्मनगरे भवः—'अण्',
सौह्मनागर सु—उभयपदवृद्धि।

(2) पौण्ड्रनागरः
पूर्ववत् 'अण्', उभयपदवृद्धि।

प्राचा०—प्राच्य देश में 'नगर' शब्द अन्त वाले अङ्ग को उभयपदवृद्धि होती है।

(3) माद्रनगरः
मद्रनगरे भवः—'नगर' शब्द अन्त में है, परन्तु यह प्राच्य देश में न होने से उभयपदवृद्धि नहीं हुई।

(3422) जङ्गलधेनुवलजान्तस्य विभाषितमुत्तरम् *25* (1432)

जङ्गल, धेनु, वलज-इत्येवमन्तस्याङ्गस्य पूर्वपदस्याचामादेरचो वृद्धिर्भवति, विभाषितमुत्तरम्=उत्तरपदस्य विभाषा भवति तद्धिते ञिति, णिति, किति च परतः। कुरुजङ्गलेषु भवं कौरुजङ्गलम्, कौरुजाङ्गलम्। वैश्वधेनवम्, वैश्वधैनवम्। सौवर्णवलजः, सौवर्णवालजः।

अर्थ—जङ्गल, धेनु, वलज—ये शब्द हैं अन्त में जिसके, ऐसे अङ्ग के पूर्व पद के आदि अच् को वृद्धि आदेश होता है तथा उत्तर पद के आदि अच् को विकल्प से वृद्धि आदेश होता है; तद्धित ञित्, णित्, कित् प्रत्यय के परे रहते।

उदा० (1) कौरुजङ्गलम्
कुरुजङ्गलेषु भवम्—पूर्वपद को आदिवृद्धि,
कौरुजङ्गल सु—विभक्तिकार्य।

(2) कौरुजाङ्गलम्
पक्ष में उत्तरपद को भी आदिवृद्धि हुई।

(3) वैश्वधेनवम्
विश्वधेनु अण्—पूर्वपद को आदिवृद्धि, उत्तरपदवृद्धि अभाव, 'ओर्गुणः' से गुण,
वैश्वधेनो अ सु—'अव्' आदेश।

(4) वैश्वधैनवम्
उभयपद वृद्धि होती है।

(5) सौवर्णवलजः
पूर्वपद को आदिवृद्धि होती है।

(6) सौवर्णवालजः
पक्ष में उत्तरपद को भी आदिवृद्धि होती है।

(3423) अर्धात्परिमाणस्य पूर्वस्य तु वा *26* (1684)

अर्धशब्दात्परस्य परिमाणवाचिन उत्तरस्याचामादेरचः स्थाने वृद्धिर्भवति, पूर्वस्य तु वा भवति तद्धिते ञिति, णिति, किति च परतः। अर्धद्रोणेन क्रीतमार्धद्रौणिकम्, अर्धद्रौणिकम्। आर्धकौडविकम्, अर्धकौडविकम्। परिमाणस्येति 'किम्'? अर्धक्रोशः प्रयोजनमस्यार्धक्रोशिकम्।

अर्थ—'अर्ध' शब्द से उत्तर परिमाणवाची उत्तर पद के आदि अच् को वृद्धि होती है तथा पूर्व पद को विकल्प से आदिवृद्धि होती है; तद्धित ञित्, णित्, कित् परे रहते।

(1) आर्धद्रौणिकम्
अर्धद्रोणेन क्रीतम्—'अर्धं नपुंसकम्' से समास,
अर्धद्रोण ठञ्—प्राग्वतेष्ठञ्, उभयपदवृद्धि।

(2) अर्धद्रौणिकम्
पक्ष में पूर्वपद को आदिवृद्धि का अभाव।

(3) आर्धकौडविकम्
उभयपद आदिवृद्धि।

(4) अर्धकौडविकम्
पक्ष में पूर्वपद को आदिवृद्धि का अभाव।

परिमाण०—परिमाणवाची उत्तर पद को आदिवृद्धि होती है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(5) आर्धक्रोशिकम्

अर्धक्रोश—उत्तरपद में परिमाणवाची नहीं है, अतः उत्तरपद को वृद्धि आदेश नहीं हुआ।

(3424) नातः परस्य *27* (1685)

अर्थात्परस्य परिमाणाकारस्य वृद्धिर्न भवति, पूर्वस्य तु वा भवति तद्धिते ञिति, णिति च परतः। अर्धप्रस्थिकः, आर्धप्रस्थिकः। अर्धकंसिकः, आर्धकंसिकः। अत इति किम्? आर्धकौडविकः। तपरकरणं किम्? इह मा भूत्–अर्धखार्यां भवा अर्धखारी। किं च स्यात्? अर्धखारी भार्या यस्य अर्धखारीभार्यः–'वृद्धिनिमित्तस्य च तद्धित-स्यारक्तविकारे' (6.3.39) इति पुंवद्भावप्रतिषेधो न स्यात्। यत्र हि तद्धिते वृद्धिः प्रतिषिध्यते, स वृद्धिनिमित्तं न भवतीति पुंवद्भावो न प्रतिषिध्यते, यथा–वैयाकरणी भार्या अस्य वैयाकरणभार्य इति।

अर्थ—'अर्ध' शब्द से उत्तर परिमाणवाची उत्तर पद के ह्रस्व अकार को आदिवृद्धि नहीं होती है, पूर्व पद को आदिवृद्धि विकल्प से होती ही है; तद्धित ञित्, णित्, कित् परे रहते।

उदा० (1) अर्धप्रस्थिकः

अर्धप्रस्थ—'अर्धं नपुसकम्' से समास, उत्तर पद को आदि वृद्धि का निषेध, पूर्व पद को आदिवृद्धि का अभाव।

(2) आर्धप्रस्थिकः

पक्ष में पूर्व पद को आदिवृद्धि हुई, उत्तर पद को पूर्ववत् निषेध।

(3) अर्धकंसिकः

पूर्ववत् उत्तर पद को आदिवृद्धि का निषेध, पूर्व पद को आदि-वृद्धि का अभाव।

(4) आर्धकंसिकः

उत्तर पद को आदिवृद्धि का निषेध यथावत् रहा, पूर्व पद को पाक्षिक आदिवृद्धि हुई।

अत०—ह्रस्व अकार के स्थान पर आदिवृद्धि का निषेध होता है।

(5) आर्धकौडविकः

उत्तर पद में आदि अच् में अकार न होने से वृद्धि का निषेध नहीं हुआ। पूर्व पद को आदिवृद्धि हुई।

तपर०—ह्रस्व अकार को ही आदिवृद्धि का निषेध होता है। अतः निम्नलिखित में निषेध नहीं होता है—

(6) अर्धखारी

अर्धखार्यां भवा—उत्तर पद में 'खारी' शब्द है, इसका आदि अच् आकार है, ह्रस्व अकार के न रहने से वृद्धिनिषेध नहीं हुआ।

(7) अर्धखारीभार्यः

अर्धखारी भार्या यस्य—यहाँ 'वृद्धिनिमित्तस्य च तद्धितस्या०' से पुंवद्भाव का निषेध नहीं होता है। तद्धित परे रहते वृद्धि का निषेध होता है; वह वृद्धि का निमित्त नहीं होता है। इसलिए पुंवद्भाव का निषेध नहीं होता है। यथा—

(8) वैयाकरणभार्यः

वैयाकरणी भार्याऽस्य—पुंवद्भाव हुआ।

(3425) प्रवाहणस्य ढे *28* (1129)

प्रवाहणस्य ढे परत उत्तरपदस्याचामादेरचो वृद्धिर्भवति पूर्वपदस्य वा भवति। प्रवाहणस्यापत्यं प्रावाहणेयः, प्रवाहणेयः। 'शुभ्रादिभ्यश्च' (4.1.123) इति ढक् प्रत्ययः।

अर्थ—'प्रवाहण' अङ्ग के उत्तर पद के आदि अच् को वृद्धि आदेश होता है तथा पूर्व पद को विकल्प से आदिवृद्धि होती है, तद्धितसंज्ञक 'ढ' प्रत्यय परे रहते।

उदा० (1) प्रावाहणेयः

प्रवाहणस्याऽपत्यम्—'प्र वह् णिच् ल्युट्' इस दशा में 'कृत्यल्युटो बहुलम्' से 'ल्युट्' होकर 'प्रवाहण' बनता है, 'णेर्विभाषा' से णत्व हुआ है,

प्रवाहण ढक्—शुभ्रादिभ्यश्च,

प्रावाहणेय सु—'एय' आदेश, सु।

(2) प्रवाहणेयः

पक्ष में पूर्व पद को वृद्धि नहीं हुई।

(3426) तत्प्रत्ययस्य च *29* (1130)

ढक्प्रत्ययान्तस्य प्रवाहणशब्दस्य तद्धितेषु परत उत्तर-पदस्याचामादेरचो वृद्धिर्भवति, पूर्वस्य तु वा। प्रवाह-णेयस्यापत्यं प्रावाहणेयिः, प्रवाहणेयिः। प्रावाहणेयकम्, प्रवाहणेयकम्। ब्राह्मतद्धितनिमित्ता वृद्धिर्ढाश्रयेण विकल्पेन बाधितुमशक्येति सूत्रारम्भः।

अर्थ—ढक् प्रत्ययान्त प्रवाहण अङ्ग के उत्तर पद के आदि अच् को वृद्धि आदेश होता है तथा पूर्व पद के आदि अच् को विकल्प से वृद्धि आदेश होता है; तद्धित ञित्, णित्, कित् परे रहते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदा० (1) प्रावाहणेयिः
प्रवाहणेयस्याऽपत्यम्—'अत इञ्' से 'इञ्' हुआ,
प्रवाहणेय इ—उत्तर पद को आदिवृद्धि, पूर्व पद को आदिवृद्धि हुई।

(2) प्रवाहणेयिः
उत्तर पद को आदिवृद्धि, पक्ष में पूर्व पद को आदिवृद्धि-अभाव।

(3) प्रावाहणेयकम्
प्रवाहणेय वुञ्—'गोत्रचरणाद् वुञ्',
प्रावाहणेय अक सु—युवोरनाकौ।

(4) प्रवाहणेयकम्
पक्ष में पूर्व पद को आदिवृद्धि का अभाव।

बाह्य०—बाह्य तद्धितनिमित्त वृद्धि 'ढ' प्रत्यय के आश्रय से विकल्प से बाध करने में अशक्य है। अतः यह विधान किया गया है।

(3427) नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् *30* (1460)

नञ उत्तरेषां शुचि, ईश्वर, क्षेत्रज्ञ, कुशल, निपुण–इत्येतेषामचामादेरचो वृद्धिर्भवति, पूर्वपदस्य वा भवति तद्धिते ञिति, णिति, किति च परतः। शुचि–आशौचम्, अशौचम्। ईश्वर–आनैश्वर्यम्, अनैश्वर्यम्। क्षेत्रज्ञ–आक्षैत्रज्ञ्यम्, अक्षैत्रज्ञ्यम्। कुशल–आकौशलम्, अकौशलम्। निपुण–आनैपुणम्, अनैपुणम्। अत्र केचिदाहुः–इयं पूर्वपदस्य वृद्धिरप्राप्तैव विभाषा विधीयते। 'न नञ्पूर्वात्तत्पुरुषात्' (5.1.121) इत्युत्तरो भावप्रत्ययः प्रतिषिध्यते, तत्र शुच्यादिभ्य एव प्रत्यये कृते पश्चान्नञ्समासे सति वृद्धिरनङ्गस्यापि वचनाद्भवतीति। तदपरे न मृष्यन्ते–भाववचनादन्योऽपि हि तद्धितो वृद्धिनिमित्तमपत्यादिष्वर्थेषु नञ्समासादेव विद्यते। बहुव्रीहेश्च नञ्समासाद्भाववचनोऽप्यस्ति, तत्राङ्गाधिकारोपमर्दनं न युज्यत इति अक्षेत्रज्ञानीश्वरौ तत्पुरुषावेव ब्राह्मणादिषु (5.1.124) पठ्येते, ततस्ताभ्यां भावे ष्यञ्भवति।

अर्थ—नञ् से उत्तर शुचि, ईश्वर, क्षेत्रज्ञ, कुशल तथा निपुण शब्द के आदि अच् को वृद्धि आदेश होता है तथा पूर्व पद के आदि अच् को विकल्प से वृद्धि आदेश होता है; तद्धित ञित्, णित्, कित् परे रहते।

उदा० (1) आशौचम्
नाऽस्य शुचयो विद्यन्ते—समास,
अशुचि अण्—इगन्ताच्च, नञ् (अ) से उत्तर 'शुचि' शब्द है, उत्तर पद को आदि वृद्धि, पूर्व पद को पाक्षिक आदिवृद्धि,
आशौच् अ सु—यस्येति च।

(2) अशौचम्
उत्तर पद को आदिवृद्धि, पूर्व पद को आदिवृद्धि का अभाव।

(3) आनैश्वर्यम्
अनीश्वर ष्यञ्—उत्तर पद आदिवृद्धि, पूर्व पद को पाक्षिक आदिवृद्धि।

(4) अनैश्वर्यम्
पक्ष में पूर्व पद को आदिवृद्धि नहीं हुई।

(5) आक्षैत्रज्ञ्यम्
'आनैश्वर्यम्' की तरह।

(6) अक्षैत्रज्ञ्यम्
'अनैश्वर्यम्' की तरह।

(7) आकौशलम्
'आशौचम्' की तरह।

(8) अकौशलम्
'अशौचम्' की तरह।

(9) आनैपुणम्
'आशौचम्' की तरह।

(10) अनैपुणम्
'अशौचम्' की तरह।

अत्र०—कुछ विद्वान् कहते हैं—यह पूर्वपद को आदिवृद्धि अप्राप्त है, इसका विकल्प कहा गया है। 'न नञ्पूर्वात्तत्पुरुषात्' से उत्तर भाव प्रत्यय का निषेध किया जाता है। जहाँ शुचि आदि शब्दों से ही प्रत्यय करने पर पश्चात् नञ् समास होने पर वृद्धि आदेश अनङ्ग को भी होता है, वचनसामर्थ्य से।

तदपरे०—अन्य विद्वान् ऐसा नहीं मानते। उनके अनुसार भाववचन से अतिरिक्त तद्धित प्रत्यय वृद्धिनिमित्त अपत्य आदि अर्थों में नञ् समास से उत्तर होता है। बहुव्रीहि नञ् समास से भाववचन भी है। यहाँ अङ्गाधिकार का उपमर्दन उपयुक्त नहीं है।

अक्षेत्र०—अक्षेत्रज्ञ तथा अनीश्वर—इन तत्पुरुषसंज्ञक शब्दों का ब्राह्मणादि गण में पाठ है। अतः उनसे भाव में 'ष्यञ्' होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3428) यथातथयथापुरयोः पर्यायेण *31* (1789)

यथातथ, यथापुर-इत्येतयोर्नञ उत्तरयोः पर्यायेणाचामादेरचो वृद्धिर्भवति तद्धिते ञिति, णिति, किति च परतः। आयथातथ्यम्, अयाथातथ्यम्। आयथापुर्यम्, आयाथापुर्यम्। अयथातथ, अयथापुरेति ब्राह्मणादिषु नञ्समासावेतौ द्रष्टव्यौ। सूत्रे यथातथ-यथापुरशब्दौ तु 'यथाऽसादृश्ये' (2.1.7) इति अव्ययीभावसमासौ, तथा हि नपुंसकाश्रयं ह्रस्वत्वं कृतम्। भाष्ये तु यथा दर्शितम्-'अयथातथा भावः' (म० भा०) इति, तथा 'सुप्सुपा' इति समासो लक्ष्यते।

अर्थ—नञ् से उत्तर यथातथ तथा यथापुर—इन अङ्गों के पूर्व पद व उत्तर पद के आदि अच् के स्थान पर पर्यायेण वृद्धि होती है; तद्धित ञित्, णित्, कित् परे रहते।

पर्यायेण का अर्थ है कि एक पक्ष में पूर्व पद को आदिवृद्धि होती है तथा दूसरे पक्ष में उत्तर पद को आदिवृद्धि होती है।

उदा० (1) आयथातथ्यम्
अयथातथ ष्यञ्—ब्राह्मणादि होने से 'ष्यञ्',
आयथातथ्य सु—पूर्व पद को आदिवृद्धि।

(2) अयाथातथ्यम्
उत्तर पद को आदिवृद्धि।

(3) आयथापुर्यम्
अयथापुर ष्यञ्—पूर्व पद को आदिवृद्धि।

(4) अयाथापुर्यम्
उत्तर पद को आदिवृद्धि।

अयथा०—अयथातथ तथा अयथापुर—ये नञ् समास शब्द ब्राह्मणादि गण में हैं।

सूत्रे०—सूत्र में यथातथ, यथापुर शब्द 'यथाऽसादृश्ये' से अव्ययीभाव समास होकर गृहीत हैं। नपुंसकलक्षण ह्रस्वादेश किया गया है। भाष्य में इस प्रकार दर्शाया गया है—

अयथातथाभावः। 'सुप्सुपा' से समास है।

(3429) हनस्तोऽचिण्णलोः *32* (2574)

'तद्धितेषु' इति निवृत्तम्, तत्सम्बद्धम् 'किति' इत्यपि। 'ञ्णिति' इति वर्तते। हनस्तकारादेशो भवति ञ्णिति प्रत्यये परतः, चिण्णलौ वर्जयित्वा। घातयति। घातकः। साधुघाती। घातङ्घातम्। धातो वर्तते। अचिण्णलोरिति किम्? अघानि। जघान। धातोः कार्यमुच्यमानं धातोः प्रत्यये विज्ञायते। इह न भवति-वार्त्रघ्नम् (म० भा०) इतरदिति।

अर्थ—'तद्धितेषु' का अधिकार नहीं है। उससे सम्बद्ध 'किति' की भी निवृत्ति हो गई है। ञित् व णित् प्रत्यय परे रहते हन् अङ्ग के स्थान पर 'त' आदेश होता है, परन्तु चिण् व णल् के परे रहते नहीं होता है।

तकार में अकार उच्चारणार्थ है। अलोऽन्त्य परिभाषा से तकार 'हन्' अङ्ग के अन्त्य अल् 'नकार' के स्थान पर होता है।

उदा० (1) घातयति
हन् णिच्—चुटू, हलन्त्यम्,
हत् इ—तकार अन्तादेश,
घत् इ—हो हन्ते०,
घाति—अत उपधायाः, सनाद्यन्ता धातवः,
घाति शप् तिप्—कर्त्तरि शप्, लशक्वतद्धिते, हलन्त्यम्, सार्वधातुकार्धधातुकयोः, अय्।

(2) घातकः
हन् ण्वुल्—चुटू, हलन्त्यम्, युवोरनाकौ,
हत् अक—अन्तादेश,
घात् अक सु—पूर्ववत् अत उपधायाः, घकार।

(3) साधुघाती
साधु हन् णिनि—सुप्यजातौ णिनिस्ता०, अनुबन्धलोप,
साधु घात् इन् सु—शेष पूर्ववत्।

(4) घातङ्घातम्
हन् णमुल्—आभीक्ष्ण्ये णमुल् च, चुटू, उपदेशेऽजनु०, हलन्त्यम्,
घात् अम्—पूर्ववत् तकार, घकार, उपधावृद्धि,
घातङ्घातम्—आभीक्ष्ण्ये द्वे भवतः (वा०), अनुस्वार, परसवर्ण।

(5) घातो वर्त्तते
हन् घञ्—भाव अर्थ में, लशक्वतद्धिते, हलन्त्यम्,
घात् अ सु—शेष पूर्ववत्।

अचिण्ण०—चिण् व णल् परे रहते तकार अन्तादेश नहीं होता है।

(6) अघानि
हन् त—कर्म में लुङ्, च्लि, चिण् आदेश,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हन् चिण् त—अनुबन्धलोप, तकार आदेश नहीं हुआ,
घान् इ त—हो हन्ते०, अत उपधायाः,
अघानि—तकार का लोप, चिणो लुक्।

(7) जघान
हन् णल्—लिट्, तिप्, परस्मैपदानां णलतुस०, अनुबन्धलोप,
ह हन् अ—द्वित्व, हलादिः शेषः,
ज हान् अ—कुहोश्चुः, अभ्यासे चर्च, अत उपधायाः, 'णल्' परे होने से तकार अन्तादेश नहीं हुआ,
जघान् अ—अभ्यासाच्च।

धातोः—धातु से कहा जाता हुआ कार्य धातु से प्रत्यय परे रहते होता है। अतः निम्नलिखित में नहीं होता है—

(8) वार्त्रघ्नम्
वृत्रं हतवान्—इस अर्थ में,
वृत्र हन् क्विप्—ब्रह्मभ्रूणवृत्रेषु क्विप्, हलन्त्यम्, लशक्वत० उपदेशेऽजनुनासिक०, वेरपृक्तस्य।
वृत्रहन् अण्—तस्येदम्,
वार्त्रहन् अ—आदिवृद्धि,
वार्त्रघ्न् अ सु—'षपूर्वहन्धृतरा०' से अकारलोप।

(3430) आतो युक्चिण्कृतोः *33* (2761)

आकारान्तस्याङ्गस्य चिणि कृति ञ्णिति युगागमो भवति। अदायि। अधायि। कृति-दायः, दायकः। धायः, धायकः। चिण्कृतोरिति किम्? ददौ, दधौ। चौडिः, बालाकिः-बाह्वादित्वादिञ् (4.1.96)। ज्ञा देवता अस्य ज्ञः।

अर्थ—आकारान्त अङ्ग को 'युक्' आगम होता है, चिण् तथा ञित्, णित् कृत् प्रत्यय परे रहते। 'युक्' के ककार व उकार की इत्संज्ञा होती है। 'युक्' के कित् होने से यह अङ्ग का अन्त्य अवयव बनता है।

उदा० (1) अदायि
दा त—कर्म में लुङ्, च्लि,
दा चिण् त—चिण् आदेश, अनुबन्धलोप,
दा य् इ त—युक्, अनुबन्धलोप, चिणो लुक्,
अदायि—अट्।

(2) अधायि
धा त—पूर्ववत्।

(3) दायः
दा घञ्—भाव में, अनुबन्धलोप,
दा य् अ सु—युक्।

(4) दायकः
दा ण्वुल्—अनुबन्धलोप,
दा य् अक सु—युक्, युवोरनाकौ।

(5) धायः
'दायः' की तरह।

(6) धायकः
'दायकः' की तरह।

चिण्कृ०—चिण् तथा कृत् संज्ञक ञित् णित् परे रहते ही 'युक्' होता है।

(7) ददौ
दा णल्—लिट्, णल्,
दा औ—आत औ णलः, द्वित्व, युक् नहीं हुआ,
ददौ—ह्रस्वः, वृद्धिरेचि।

(8) दधौ
धा—पूर्ववत्,
द धा औ—अभ्यासे चर्च।

(9) चौडिः
चूडा इञ्—बाह्वादि गण में होने से 'इञ्',
चौड् इ सु—आदिवृद्धि, यस्येति च, युक् नहीं हुआ।

(10) बालाकिः
बलाका—पूर्ववत् सभी कार्य।

(11) ज्ञः
ज्ञा देवताऽस्य—'अण्' हुआ, 'युक्' नहीं हुआ।

(3431) नोदात्तोपदेशस्य मान्तस्यानाचमेः *34* (2763)

उदात्तोपदेशस्य मान्तस्याङ्गस्याचमिवर्जितस्य चिणि कृति च ञ्णिति यदुक्तं तत्र भवति। किञ्चोक्तम्? 'अत उपधायाः' (7.2.116) इति वृद्धिः। अशमि, अतमि, अदमि। कृति खल्वपि-शमकः, तमकः, दमकः। शमः, तमः, दमः। उदात्तोपदेशस्येति किम्? यामकः, रामकः। कथमुद्यमोपरमौ? 'अड उद्यमे' (धा०पा० 358), 'यम उपरमे' (धा०पा० 985)-इति निपतनादनुगन्तव्यौ। उपदेशग्रहणं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किम्? शमी, दमी, तमीत्यत्र यथा स्यात्; इह मा भूत्-यामकः, रामक इति। मान्तस्येति किम्? चारकः, पाठकः। अनाचमेरिति किम्? आचामकः। *अनाचमिकमिवमीनामिति वक्तव्यम्*। आचामः। कामः। वामः। आम इति-चौरादिकस्य णिचि वृद्धौ सत्यां भवति। तत्र हि मित्त्वं नास्ति, 'नान्ये मितोऽहेतौ' (ग०सू० 177) इति। 'सूर्यविश्रामा भूमिः'-इत्येवमादिकं प्रयोगमन्याख्यमेव मन्यन्ते। चिण्कृतो-रित्येव-शशाम, ततान।

अर्थ—उपदेश में जो उदात्त तथा मकारान्त धातु, उसको वृद्धि आदेश नहीं होता है चिण् और कृत् संज्ञक ञित् या णित् के परे रहते; परन्तु आङ् पूर्वक चम् धातु को यह निषेध नहीं होता है।

'अत उपधायाः' से आदिवृद्धि होती है।

उदा० (1) अशमि
शम् चिण् त—कर्म में लुङ्, चिण् आदि,
अ शमि—वृद्धि नहीं हुई, चिणो लुक्।

(2) अतमि
तम् चिण् त—पूर्ववत्।

(3) अदमि
दम् चिण् त—पूर्ववत्।

(4) शमकः
शम् ण्वुल्—'अत उपधायाः' से प्राप्त वृद्धि नहीं हुई।

(5) तमकः
तम् ण्वुल्—पूर्ववत्।

(6) दमकः
दम् ण्वुल्—पूर्ववत्।

(7) शमः
शम् घञ्—भाव में, वृद्धि नहीं हुई।

(8) तमः (पूर्ववत्)।
(9) दमः (पूर्ववत्)।

उदात्तो०—उपदेश में जो उदात्त, ऐसी धातु को वृद्धि नहीं होती है।

(10) यामकः
यम् ण्वुल्—अनुबन्धलोप,

याम् अक—'यमु' धातु मकारान्त है, परन्तु उपदेश में उदात्त नहीं है, वृद्धिनिषेध नहीं हुआ, सु।

(11) रामकः (पूर्ववत्)।

कथमु०—उद्यम तथा उपरम शब्दों में वृद्धिनिषेध कैसे होता है? 'अड उद्यमे' तथा 'यम उपरमे' इस प्रकार निपातन से वृद्धिनिषेध जानना चाहिए।

उपदेश०—उपदेश में जो उदात्त, ऐसे धातु को वृद्धि नहीं होती है।

(12) शमी
शम् घिनुण्—लशक्वतद्धिते, उपदेशेऽजनु०, हलन्त्यम्,
शम् इन्—प्रत्ययस्वर करने पर धातु अनुदात्तस्वर होता है, यदि सूत्र में 'उपदेश' शब्द गृहीत न होता तो यहाँ वृद्धि का निषेध नहीं हो पायेगा,
शमिन् सु—विभक्तिकार्य।

(13) दमी (पूर्ववत्)।
(14) तमी (पूर्ववत्)।
(15) यामकः
वृद्धिनिषेध नहीं हुआ।

(16) रामकः (पूर्ववत्)।

मान्त०—मकारान्त जो धातु, उसे वृद्धिनिषेध होता है।

(17) चारकः
चर् ण्वुल्—अनुबन्धलोप, 'चर्' धातु उपदेश में उदात्त है; परन्तु मकारान्त नहीं है,
चार् अक सु—वृद्धिनिषेध नहीं हुआ।

(18) पाठकः (पूर्ववत्)।

अनाचमे०—आङ् पूर्वक् चम् धातु से वृद्धिनिषेध नहीं होता है।

(19) आचामकः
आ चम् ण्वुल्—'चम्' धातु मकारान्त है तथा उपदेश में उदात्त भी है, वृद्धिनिषेध प्राप्त हुआ, पर्युदासकथन से वृद्धि हुई,
आचाम् अक सु—सु।

अनाचमि०—आचम्, कम् तथा वम्—इनको वृद्धिनिषेध नहीं होता है।

(20) आचामः
आ चम् घञ्—वृद्धि हो गई है।

(21) कामः
कम् घञ्—वृद्धि हुई।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(22) वामः
पूर्ववत् वृद्धि।

'आमः' शब्द चौरादिक 'अम्' धातु से णिच् करके व णिज् लक्षण वृद्धि करके निष्पन्न होता है। यहाँ मित्त्व नहीं होता है।

(23) आमः
अम् णिच् अच्—'एरच्' से 'अच्',
आमि अ—णेरनिटि,
आम् अ सु—विभक्तिकार्य।

'विश्राम' आदि शब्द असाधु होते हैं।

चिण्कृ०—चिण् व कृत् संज्ञक ञित् णित् के परे रहते ही वृद्धि- निषेध होता है।

(24) शशाम
शम् णल्—णित् है; परन्तु कृत् संज्ञा नहीं है,
श शाम् अ—वृद्धि, द्वित्व, अभ्यासकार्य।

(25) ततान
पूर्ववत् वृद्धि।

(3432) जनिवध्योश्च *35* (2512)

जनि, वधि-इत्येतयोश्चिणि कृति च ञ्णिति यदुक्तं तन्न भवति। अजनि, जनकः, प्रजनः। अवधि, वधकः, वधः। वधिः प्रकृत्यन्तरं व्यञ्जनान्तोऽस्ति; तस्यायं प्रतिषेधो विधीयते। 'भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते'-इति हि प्रयोगो दृश्यते। वधादेशस्यादन्तत्वादेव वृद्धेरभावः। चिण्कृतोरित्येव-'जुजान गर्भं महिमानमिन्द्रम् (अथ० 3.10.12)।

अर्थ—जन्, वध्—इन अङ्गों को पूर्वोक्त कार्य नहीं होता है, चिण् तथा कृत् संज्ञक ञित् व णित् परे रहते।

पीछे वृद्धि आदेश कहा गया है। अतः यहाँ उसी का निषेध होता है।

उदा० (1) अजनि
जन् चिण् त—कर्म में लुङ्, चिण् आदि,
अजनि—'चिणो लुक्' से लुक्, 'अत उपधायाः' से प्राप्त वृद्धि का निषेध।

(2) जनकः
जन् ण्वुल्—पूर्ववत् वृद्धि-निषेध।

(3) प्रजनः
प्र जन् घञ्—भाव में 'घञ्' हुआ,
प्रजन् अ—प्राप्त वृद्धि का निषेध।

(4) अवधि
वध् चिण् त—'अजनि' की तरह।

(5) वधकः
वध् ण्वुल्—'जनकः' की तरह।

(6) वधः
वध् घञ्—'प्रजनः' की तरह।

वधि०—सूत्र में 'वधि' यह व्यञ्जनान्त अन्य प्रकृति का ग्रहण है। उसी को वृद्धि का निषेध होता है। यथा—वधकः। आदेशभूत 'वध' प्रकृति तो अदन्त है। अतः वृद्धि का स्वतः अभाव होता है।

चिण्कृ०—चिण् तथा कृत् संज्ञक ञित् व णित् प्रत्यय के परे रहते ही वृद्धि का निषेध होता है। यथा—

(7) जजान
वृद्धि हो गई है।

(3433) अर्त्तिह्वीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ *36* (2570)

सर्वं निवृत्तम्, 'अङ्गस्य' इति वर्त्तते। अर्ति, ह्वी, व्ली, री, क्नूयी, क्ष्मायी-इत्येतेषामङ्गानामाकारान्तानां च पुगागमो भवति णौ परतः। अर्ति-अर्पयति। ह्वी-ह्वेपयति। व्ली-व्लेपयति। री-रेपयति। क्नूयी-क्नोपयति। क्ष्मायी-क्ष्मापयति। आकारान्तानाम्-दापयति, धापयति। अर्तीति 'ऋ गतिप्रापणयोः' (धा०पा० 937), 'ऋ गतौ' (धा० पा० 1099)-इति द्वयोरपि धात्वोर्ग्रहणम्। रीत्यपि-'री गतिरेषणयोः' (धा०पा० 1501), 'रीङ् श्रवणे' (धा० पा० 1139) इति। पुकः पूर्वान्तकरणम्-अदीदपदित्यत्रोपधाह्रस्वो यथा स्यादिति।

अर्थ—सभी अधिकृत पदों की निवृत्ति हो गई है। 'अङ्गस्य' का अधिकार है। ऋ, ह्वी, व्ली, री, क्नूयी, क्ष्मायी तथा आकारान्त—इन अङ्गों को 'पुक्' आगम होता है, 'णि' परे रहते।

'पुक्' के ककार की इत्संज्ञा होती है। उकार उच्चारणार्थ है।

उदा० (1) अर्पयति
ऋ णिच्—'पुक्' आगम,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्प् इ—पुगन्तलघूपधस्य च,
अर्पि शप् तिप्—सार्वधातुकार्धधातु०, एचोऽयवायावः।

(2) ह्रेपयति
ह्री णिच्—पूर्ववत् पुक्, लघूपधगुण।

(3) व्लेपयति
व्ली णिच्—पूर्ववत् पुक् आदि।

(4) रेपयति
री प् णिच्—पूर्ववत्।

(5) क्नोपयति
क्नूय् प् णिच्—'लोपो व्योर्वलि' से यकारलोप, शेष पूर्ववत्।

(6) क्ष्मापयति
क्ष्माय् णिच्—पूर्ववत् पुक्, यकारलोप।

(7) दापयति
दा णिच्—पूर्ववत् पुक्, शप् आदि।

(8) धापयति
'दापयति' की तरह।

रीत्यपि०—'ऋ' के द्वारा 'ऋ गतिप्रापणयोः' तथा 'ऋ गतौ'—दोनों का ग्रहण होता है। 'री' के द्वारा 'री गतिरेषणयोः' तथा 'रीङ् श्रवणे'—दोनों का ग्रहण होता है।

पुकः०—पुक् को प्रथम किया जाता है, ताकि निम्नलिखित में उपधा ह्रस्व हो जाय—

(9) अदीदपत्
दापि—धातुसंज्ञा, लुङ्, तिप्, 'इतश्च' से इकारलोप,
दाप् णि चङ् त्—च्लि, 'णिश्रिद्रुस्रुभ्यः कर्त्तरि' से 'चङ्',
दप् अ त्—चुटू, हलन्त्यम्, 'णेरनिटि' से णिलोप, 'णौ चङ्युपधाया ह्रस्वः' से उपधाह्रस्व, यदि 'पुक्' न किया जाता तो उपधा के न रहने से ह्रस्वत्व न हो पाता,
दाप् दप् अत्—'चङि' से द्वित्व, सन्वल्लघुनि चङ्परे, सन्यतः,
अदीदपत्—दीर्घो लघोः, अट्।

(3434) शाच्छासाह्वाव्यावेपां युक् *37* (2585)

गा, छा, सा, ह्वा, व्या, वे, पा–इत्येतेषामङ्गानां युगागमो भवति णौ परतः। शा–निशाययति। छा–अवच्छाययति। सा–अवसाययति। ह्वा–ह्वाययति। व्या–संव्याययति। वे–वाययति। पा–पाययति। पाग्रहणे 'पै ओवै शोषणे' (धा० पा० 921, 922)–इत्यस्यापीह ग्रहणमिच्छन्ति। 'पा रक्षणे' (धा०पा० 1057) इत्यस्य लुग्विकरणत्वान्न भवति। *लुगागमस्तु तस्य वक्तव्यः* (म०भा०)। पालयति। *धूञ्शीङोर्नुग्वक्तव्यः* (म०भा०)। धूनयति। प्रीणयति। एतेऽपि पूर्वान्ता एव क्रियन्ते, तेन न्यशीशयत्, अपीपलत्, अदूधुनत्, अपिप्रिणत्–इत्युपधाह्रस्वत्वं भवति। शाच्छासाह्वाव्यावेपां कृतात्वानां ग्रहणं पुकः प्राप्तिमाख्यातुम्। किमेतस्याख्याने प्रयोजनम्। एतस्मिन् प्रकरणे लक्षणप्रतिपदोक्तपरिभाषा (व्या०पा०) नास्तीत्युपदिश्यते। तेनाध्यापयति, जापयति–इत्येवमादि सिद्धं भवति।

अर्थ—शो, छो, षो, ह्वे, वे तथा पा—इन अङ्गों को 'युक्' आगम होता है, 'णि' परे रहते।

'युक्' के ककार की 'लशक्वतद्धिते' से इत्संज्ञा होती है। उकार मुखसुखार्थ है। 'युक्' कित् आगम होने से अङ्ग का अवयव होता है।

उदा० (1) निशाययति
नि शो णिच्—आदेच उपदेशेऽशिति,
नि शा इ—'अर्त्तिह्रीव्लीरी०' से 'पुक्' प्राप्त, इसका बाध करके 'युक्' हुआ,
नि शाय् इ—अनुबन्धलोप, सनाद्यन्ता धातवः,
निशायि शप् ति्—'सार्वधातुकार्धधातु०' से गुण।

(2) अवच्छाययति
अव छो णिच्—पूर्ववत् आत्व, युक्, लकार आदि,
अव त् छाय् इ अ ति—'छे च' से 'तुक्',
अवच्छाययति—स्तोः श्चुना श्चुः।

(3) अवसाययति
षो → अव सो—धात्वादेः षः सः,
अव सा य् इ शप् ति—शेष कार्य पूर्ववत्।

(4) ह्वाययति
ह्वे णिच्—पूर्ववत्।

(5) संव्याययति
व्ये णिच्—मकार को अनुस्वार होता है, शेष कार्य पूर्ववत्।

(6) वाययति
वे णिच्—पूर्ववत्।

(7) पाययति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पा णिच्—सभी कार्य पूर्ववत्।

पाग्रहणे०—'पा' का ग्रहण करने में 'पै ओवै शोषणे' इसका भी ग्रहण होता है—ऐसा कुछ विद्वान् स्वीकार करते हैं। विकरण का लुक् होने से 'पा' का ग्रहण नहीं होता है।

लुगाग०—'पा' धातु को णिच् परे रहते 'लुक्' आगम होता है।

(8) पालयति
पा णिच्—'लुक्' आगम, अनुबन्धलोप,
पा ल् इ शप् ति—धातुसंज्ञा, सार्वधातुकार्धधा०।

धूञ्भ्री०—णि परे रहते 'धू' तथा 'भ्री' धातुओं को 'नुक्' आगम होता है।

(9) धूनयति
धू नुक् णिच्—अनुबन्धलोप, शेष पूर्ववत्।

(10) भ्रीणयति
भ्री न् णिच्—'नुक्' आगम, शेष पूर्ववत्।

एतेऽपि०—ये सभी आगम (पुक्, युक्, लुक्, नुक्, जुक्) पूर्व ही होते हैं। अतः निम्नलिखित सिद्ध होते हैं—

(11) न्यशीशयत्
शा य् णिच्—युक्, धातुसंज्ञा, लुङ्,
शायि चङ् त्—चङ्, णिलोप, उपधाह्रस्व,
शि शय् अत्—'अदीदपत्' की तरह।

(12) अपीपलत्
पा ल् इ—लुङ्, चङ्, सभी कार्य पूर्ववत्,
पि पल् अ त्—णिलोप, ह्रस्व, द्वित्व, अभ्यासकार्य,
अपी पल् अ त्—सन्यतः, दीर्घो लघोः।

(13) अदूधुनत्
धूनि—धातुसंज्ञा, पूर्ववत् लुङ्, चङ्,
धु धु न् अ त्—णिलोप, ह्रस्व, द्वित्व,
दुधुनत्—अभ्यासे चर्च,
अदूधुनत्—दीर्घो लघोः, अट्।

(14) अपिप्रिणत्
भ्री न् णिच्—नुक्, धातुसंज्ञा, लुङ्, ति, इतश्च,
भ्रीणि चङ् त्—चङ्, णिलोप,
पि प्रिण् अ त्—ह्रस्व, द्वित्व, हलादिः शेषः,
अपि प्रिण् अ त्—अट्।

शाच्छा०—सूत्र में शा, छा—इस प्रकार आकार आदेश करके ग्रहण किया गया है, ताकि पुक् की प्राप्ति का ज्ञान हो सके। पुक् आगम के कथन का प्रयोजन क्या है ? इस प्रकरण में लक्षण प्रतिपदोक्त परिभाषा नहीं होता है—यह उपदेश किया जाता है। यथा—

(15) अध्यापयति
अधि इ णिच्—'हेतुमति च' से 'णिच्',
अधि आ प् इ—'अर्तिह्री०' से 'पुक्' अनुबन्धलोप, यण्, धातुसंज्ञा,
अध्यापि शप् तिप्—सार्वधातुकार्धधातु०, अय् आदेश,

(16) जापयति
जापि तिप्—धातुसंज्ञा, तिप्,
जापि शप् ति—शप्,
जापे शप् ति—सार्वधातुकार्धधातु०,
जाप् अय् अ ति—एचोऽयवायावः।

(3435) वो विधूनने जुक् *38* (2590)

'वा'-इत्येतस्य विधूननेऽर्थे वर्त्तमानस्य जुगागमो भवति णौ परतः। पक्षेणोपवाजयति। विधूनन इति किम्? आवापयति केशान्। किमर्थं सूत्रम्, 'वज गतौ' (धा०पा० 252) ण्यन्तस्य सिद्धत्वात्? वातेः पुग्मा भूदित्येवमर्थम्। 'पै ओवै शोषणे' (धा०पा० 921, 922) इत्यस्यैतद्रूपम्।

अर्थ—'विधूनन' अर्थ में वर्त्तमान 'वा' धातु को 'जुक्' आगम होता है, 'णि' परे रहते।

उदा० (1) उपवाजयति
उप वा णिच्—'जुक्' आगम, अनुबन्धलोप,
उप वा ज् इ—धातुसंज्ञा,
उपवाजि शप् तिप्—लकारकार्य।

विधूनन०—विधूनन अर्थ में वर्त्तमान 'वा' धातु को 'जुक्' आगम होता है।

(2) आवापयति केशान्
यहाँ 'कम्पन' अर्थ नहीं होने से 'जुक्' नहीं हुआ। आकारान्त अङ्ग को 'पुक्' आगम होता है।

किमर्थं०—प्रकृत सूत्र की आवश्यकता नहीं है। 'वज गतौ' धातु से णिच् करके 'उपवाजयति' रूप सिद्ध है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(समा०) 'वा' से 'पुक्' न हो—इसके लिए प्रकृत सूत्र का पाठ है। यह 'पै ओवै शोषणे' इस धातु का रूप है।

(3436) लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने *39* (2591)

ली, ला–इत्येतयोरङ्गयोरन्यतरस्यां नुक्, लुक्–इत्येतावागमौ भवतो णौ परतः स्नेहविपातनेऽर्थे। घृतं विलाययति। विलीनयति घृतम्। विलालयति। विलापयति। ली + ई इतीकारः प्रश्लिष्यते, तत ईकारान्तस्यैव लुग्भवति, न तु कृतात्वस्य 'विभाषा लीयतेः' (6.1.51) इति। स्नेहविपातन इति किम्? जतु विलापयति। जटाभिरालापयते। 'ली' इति लीलीङोर्ग्रहणम्। 'ला' इति लातेः, कृतात्वस्य च लीयतेः।

अर्थ—स्नेह आदि द्रव्य को पिघलाने अर्थ में वर्त्तमान 'ली' तथा 'ला'—इन अङ्गों को यथासंख्य 'नुक्' तथा 'लुक्' आगम विकल्प से होते हैं, 'णि' परे रहते।

उदा० (1) विलीनयति
वि ली णिच्—'नुक्' हुआ, अनुबन्धलोप,
वि ली न् इ—धातुसंज्ञा,
विलीनि शप् तिप्—सार्वधातुक गुण, अय् आदेश।

(2) विलाययति
वि ली इ—पक्ष में 'नुक्' नहीं हुआ,
वि लै इ—अचो ञ्णिति, धातुसंज्ञा,
विलायि शप् तिप्—गुण, आय्।

(3) विलालयति
वि ला णिच्—'लुक्' आगम, अनुबन्धलोप,
विलालि—धातुसंज्ञा, लकारकार्य,
विलाल्य् अ ति—अय्।

(4) विलापयति
वि ला णिच्—पक्ष में 'लुक्' नहीं हुआ, 'पुक्' हुआ,
विलापि—धातुसंज्ञा,
विलापय् अ ति—अय्।

लीई०—ली (= ली ई) यहाँ ईकार प्रश्लिष्टरूपेण निर्दिष्ट है। इसका अभिप्राय यह है कि ईकारान्त 'ली' को ही 'नुक्' आगम होता है। 'विभाषा लीयतेः' के द्वारा 'ली' को विकल्प से आत्व होता है। जिस पक्ष में आत्व होता है, उस पक्ष में 'ली' धातु से 'नुक्' नहीं होता है। वहाँ विकल्प से 'लुक्' आगम ही होता है।

स्नेह०—**स्नेहविपातन** अर्थ में ही 'नुक्' तथा 'लुक्' आगम होते हैं।

(5) विलापयति जतु
यहाँ स्नेहादि का विपातन अर्थ नहीं है। 'पुक्' हुआ है।

(6) आलापयते जटाभिः
पूर्ववत् 'लुक्' आगम नहीं हुआ। 'पुक्' हुआ।

ली इति०—'ली' के द्वारा 'ली' तथा 'लीङ्' दोनों का ग्रहण है। 'ला' के द्वारा 'ला' धातु तथा आत्व किया गया 'ली' धातु—दोनों का ग्रहण है।

(3437) भियो हेतुभये षुक् *40* (2595)

'भी' इत्येतस्य हेतुभयेऽर्थे षुगागमो भवति णौ परतः। मुण्डो भीषयते। जटिलो भीषयते। अत्रापि भी + ई इतीकारप्रश्लेषः कृतात्वस्य षुग्निवृत्त्यर्थः। मुण्डो भापयते–इत्येवं हि तत्र भवति। हेतुभय इति किम्? कुञ्चिकयैनं भाययति। नात्र हेतुः प्रयोजको भयकारणम्, किं तर्हि? कुञ्चिका।

अर्थ—'हेतुभय' अर्थ में 'भी' अङ्ग को 'षुक्' आगम होता है, 'णि' परे रहते। 'षुक्' के ककार की इत्संज्ञा है। उकार उच्चारणार्थ है। स्वतन्त्र कर्त्ता के प्रयोजक को 'हेतु' कहते हैं। उससे होने वाला भय 'हेतुभय' कहलाता है।

उदा० (1) भीषयते मुण्डः
भी णिच्—'षुक्' आगम, अनुबन्धलोप,
भी ष् इ—धातुसंज्ञा,

भीषे शप् तिप्—सार्वधातुकगुण, 'अय्' आदेश, टित आत्मने०।

इसी प्रकार—जटिलो भीषयते।

अत्रापि०—यहाँ पर भी 'भी + ई' इस प्रकार ईकार का प्रश्लेष स्वीकार किया जाता है; ताकि आत्व किये गए 'भी' धातु से 'षुक्' की निवृत्ति हो जाय। यथा—

(2) भापयते मुण्डः
यहाँ आत्व हुआ, षुक् आगम नहीं हुआ, पुक् हुआ।

हेतुभय०—**हेतुभय** अर्थ में ही 'षुक्' होता है।

(3) भाययति
भी णिच्—यहाँ भय का कारण कुंचिका है, अतः 'षुक्' नहीं हुआ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भै इ—'अचो ञ्णिति' से वृद्धि,
भायि शप् ति—धातुसंज्ञा, लकारकार्य।

(3438) स्फायो वः *41* (2597)

'स्फाय्' इत्येतस्याङ्गस्य वकारादेशो भवति णौ परतः। स्फावयति।

अर्थ—'स्फाय्' अङ्ग को वकार आदेश होता है, 'णि' परे रहते।

उदा० (1) स्फावयति
स्फाय् णि—वकार हुआ,
स्फावि—धातुसंज्ञा, शप् आदि,
स्फावे शप् ति—सार्वधातुकार्धधा०, अय्।

(3439) शदेरगतौ तः *42* (2598)

शदेरङ्गस्यागतावर्थे वर्तमानस्य तकारादेशो भवति णौ परतः। पुष्पाणि शातयति। अगताविति किम्? गाः शादयति गोपालकः।

अर्थ—'अगति' अर्थ में वर्त्तमान 'शद्' अङ्ग को तकार आदेश होता है, 'णि' परे रहते। अलोऽन्त्य परिभाषा से यह तकार दकार के स्थान पर होता है।

उदा० (1) शातयति
शद् णिच्—तकार अन्तादेश, अत उपधायाः,
शात् इ—धातुसंज्ञा,
शातय् अ ति—शप्, गुण, अय्।

अगता०—अगति अर्थ में वर्त्तमान 'शद्' अङ्ग को तकार आदेश होता है।

(2) शादयति गोपालकः गाः
यहाँ गति अर्थ है। अतः तकार अन्तादेश नहीं हुआ।

(3440) रुहः पोऽन्यतरस्याम् *43* (2599)

रुहेरङ्गस्यान्यतरस्यां पकारादेशो भवति णौ परतः। व्रीहीन् रोपयति, व्रीहीन् रोहयति।

अर्थ—'रुह्' अङ्ग को पकार आदेश विकल्प से होता है, 'णि' परे रहते। पकार में अकार उच्चारणार्थ है।

उदा० (1) रोपयति
रुह् णिच्—पकार हुआ,
रुपि—पुगन्तलघूपधस्य च, धातुसंज्ञा,
रोपि शप् ति—शप् आदि पूर्ववत्।

(2) रोहयति
पक्ष में पकार अन्तादेश नहीं हुआ।

(3441) प्रत्ययस्थात्कात्पूर्वस्यात इदाप्य-सुपः *44* (463)

प्रत्ययस्थात्ककारात् पूर्वस्याकारस्य इकारादेशो भवति, आपि परतः, स चेदाप्सुपः परो न भवति। जटिलिका। मुण्डिका। कारिका। हारिका। एतिकाश्चरन्ति। प्रत्यय-ग्रहणं किम्? शक्नोतीति शका। स्थग्रहणं विस्पष्टार्थम्, ककारमात्रं प्रत्ययो नास्तीति सामर्थ्यात् प्रत्ययस्थस्य ग्रहणं शक्यते विज्ञातुम्। कादिति किम्? मण्डना। रमणा। पूर्वस्येति किम्? परस्य मा भूत्–पटुका। मृदुका। अत इति किम्? गोका। नौका। तपरकणं किम्? राका, धाका। आपीति किम्? कारकः, धारकः। अथ आपी-त्यनेन किं विशिष्यते? ककारः। यद्येवम्, कारिकेत्यत्रापि न प्राप्नोति, अकारेण व्यवहितत्वात्? एकादेशे कृते नास्ति व्यवधानम्। एकादेशः पूर्वविधौ स्थानिवद्भवतीति व्यव-धानमेव? वचनाद् व्यवधानमीदृशं यत्स्थानिवद्भावकृतमेकेन वर्णेन तदाश्रीयते। रथकट्यादिषु तु श्रुतिकृतमनेकेन वर्णेन व्यवधानमिति इत्त्वं न भवति। असुप इति किम्? बहवः परिव्राजका अस्यां मथुरायां बहुपरिव्राजका मथुरा। सुब-न्तादयं परिव्राजकशब्दात्पर आबिति प्रतिषेधो भवति। प्रसज्यप्रतिषेधश्चायम्, न पर्युदासः। पर्युदासे हि सति समुदायादसुबन्तात्पर आबित्त्वमत्र स्यादेव। अविद्यमानः सुप् यस्मिन् सोऽयमसुबिति–अयमपि नाश्रीयते। तथा हि सति बहुचर्मिकेत्यत्रापि न स्यात्। *मामकनरकयोरुप-संख्यानं कर्त्तव्यमप्रत्ययस्थत्वात्* (म० भा०)। मम इयं मामिका। नारिका। अणि ममकादेशः। 'केवलमामक' (4.1.30) इति नियमात् संज्ञाच्छन्दसोरीकारो नान्यत्र। तेनाणप्रत्ययान्तादपि टाब्भवति–नरान् कायतीति नरिका। 'आतोऽनुपसर्गे कः' इति कः प्रत्ययः। *प्रत्ययनिषेधे त्यक्त्यपोश्चोपसंख्यानम्* (7.3.46)। 'उदीचामातः स्थाने यकपूर्वायाः' इति विकल्पो मा भूदिति, दाक्षिणा-त्यिका। इहत्यिका।

अर्थ—'सुप्' से उत्तर नहीं है जो 'आप्', ऐसे 'आप्' के परे रहते प्रत्यय में स्थित ककार से पूर्व ह्रस्व अकार के स्थान पर इकार आदेश होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'आप्' के द्वारा स्त्रीलिङ्ग प्रत्ययों—टाप्, डाप्, चाप् का ग्रहण होता है।

उदा० (1) जटिलिका

जटिलक टाप्—'अजाद्यतष्टाप्' से 'टाप्' हुआ, चुटू, हलन्त्यम्,

जटिलिक आ—'आप्' से पर 'सुप्' नहीं है, प्रत्यय 'अक' में स्थित ककार से पूर्व ह्रस्व अकार के स्थान पर इकार,

जटिलिका सु—अकः सवर्णे दीर्घः।

(2) मुण्डिका

मुण्डक टाप्—पूर्ववत् इकार,

मुण्डिका सु—सवर्णदीर्घ।

(3) कारिका

कारक टाप्—पूर्ववत् इकार आदेश,

कारिका सु—विभक्तिकार्य।

(4) हारिका

हारक टाप्—'कारिका' की तरह।

(5) एतिकाः (पूर्ववत्)।

प्रत्यय०—प्रत्यय में स्थित ककार से पूर्व अकार को इकार होता है।

(6) शका

शक्नोति—शकः—पचादि 'अच्' होकर रूप बनता है।

शक टाप्—'अजाद्यतष्टाप्' से 'टाप्', ककार है, परन्तु वह प्रत्यय का नहीं है, अपितु धातु का है; अतः इससे पूर्व शकारोत्तरवर्ती अकार के स्थान पर इकार नहीं हुआ,

शका सु—सवर्णदीर्घ।

स्थग्रह०—स्थ का पाठ स्पष्टता के लिए है। ककारमात्र प्रत्यय नहीं होता है। इस सामर्थ्य से 'प्रत्यय में स्थित' इसका ग्रहण होता है।

कादिति०—ककार से पूर्व अकार को ही इकार होता है।

(7) मण्डना

मण्ड् ल्यु—नन्दि आदि में पाठ होने से 'ल्यु',

मण्डन टाप्—'अन' प्रत्यय है, चूँकि प्रत्ययस्थ ककार नहीं है, नकार है; अतः इससे पूर्व ह्रस्व अकार को इकार नहीं होता है।

मण्डना—सु हुआ।

(8) रमणा

रमण टाप्—पूर्ववत्।

पूर्वस्ये०—पूर्वस्थित अकार को ही इकार होता है। इसका भाव यह है कि ककार से उत्तर अकार को इकार नहीं होता है।

(9) पटुका

पटुका—यहाँ इकार नहीं हुआ।

(10) मृदुका

पूर्ववत् अकार नहीं हुआ।

अत०—ह्रस्व अकार के स्थान पर ही इकार होता है।

(11) गोका

गोक टाप्—प्रत्यय का ककार है, इससे पूर्व ह्रस्व अकार नहीं है, अतः इकार नहीं हुआ,

गोका सु—सवर्णदीर्घ।

(12) नौका

'गोका' की तरह।

तपर०—ह्रस्व अकार के स्थान पर ही इकार होता है।

(13) राका

राक टाप्—प्रत्यय का ककार है, ककार से पूर्व अवर्ण है; परन्तु ह्रस्व अवर्ण नहीं, दीर्घ अवर्ण है। अतः इकार नहीं होता है,

राका सु—सवर्णदीर्घ।

(14) धाका

'राका' की तरह।

आपीति०—आप् परे रहते ही ह्रस्व अकार के स्थान पर इकार होता है।

(15) कारकः

कृ ण्वुल्—कारक,

कारक सु—प्रत्यय का ककार है, उससे पर 'आप्' नहीं है; अतः ककार से पूर्व ह्रस्व अकार को इकार नहीं हुआ,

कारकः—विसर्ग।

(16) धारकः

'कारकः' की तरह।

अथ०—'आपि' पद के द्वारा किसकी विशेषता बताई जाती है। यदि ककार विशेषित होता है तो अकार का व्यवधान होने से 'कारिका' रूप सिद्ध नहीं हो सकेगा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकादेश करने पर व्यवधान नहीं होता है। पूर्वविधि में एकादेश स्थानिवत् हो जाता है। अतः व्यवधान होता है। वचनसामर्थ्य से ऐसा व्यवधान जो स्थानिवत् किया गया है, एक वर्ण के द्वारा आश्रित होता है। रथकट्यादियों में श्रुतिकृत एक वर्ण के द्वारा व्यवधान होता है। अतः इत्त्व नहीं होता है।

असुपः०—सुप् से उत्तर नहीं है जो, ऐसे 'आप्' के परे रहते अकार को इकार होता है।

(17) बहुपरिव्राजका मथुरा

बहवः परिव्राजका अस्यां मथुरायाम्—इस विग्रह की दशा में समास होकर,

बहुपरिव्राजक टाप्—इकार नहीं हुआ।

यह प्रसज्य प्रतिषेध है, पर्युदास नहीं। पर्युदास होने पर असुबन्त समुदाय से पर 'आप्' है। अतः यहाँ इकार आदेश हो जायेगा। अविद्यमानः सुप् यस्मिन् सोऽसुप्—इस प्रकार विग्रह भी नहीं माना जा सकता। ऐसा होने पर 'बहुचर्मिका' यहाँ भी इकार नहीं हो सकेगा।

मामक०—मामक तथा नरक—इन शब्दों में भी ह्रस्व अकार को इकार होता है।

(18) मामिका

ममेयम्—'तस्येदम्' से 'अण्', 'तवकममकौ',

मामक टाप्—इकार हुआ, सु।

(19) नरिका

नर कै क—आतोऽनुपसर्गे कः, आदेच उपदेशे०,

नरक टाप् सु—इकार हुआ।

अणि०—'मामिका' यहाँ अण् करने पर 'ममक' होता है। अण् प्रत्यय होने से 'टिड्ढाऽण्०' से ङीप् प्राप्त होता है। 'केवलमामक०' इस सूत्र से ङीप् नहीं होता है। तब अण् प्रत्ययान्त 'मामक' से 'टाप्' ही होता है।

नरान् कायतीति—नरिका। 'क' प्रत्यय हुआ है।

प्रत्यय०—प्रत्यय के निषेध में त्यक् और त्यप् का ही निषेध होता है; ताकि 'उदीचामातः स्थाने यकपूर्वायाः' से विकल्प न हो।

(20) दाक्षिणात्यिका

दक्षिणस्यां दिशि भवा—इस अर्थ में,

दाक्षिणात्यक टाप्—दक्षिणापश्चात्पुरसस्त्यक्, टाप्,

दाक्षिणात्यिका सु—इकार।

(2) इहत्यिका

इह भवा—इस अर्थ में 'अव्ययात्त्यप्' से 'त्यप्',

इहत्यक टाप्—पूर्ववत् इकार।

(3442) न यासयोः *45* (464)

'या', 'सा'-इत्येतयोरिकारादेशो भवति। यका। सका। 'यासा' इति निर्देशोऽतन्त्रम्, यत्तदोरुपलक्षणमेतत्। इहापि प्रतिषेध इष्यते-यकांयकामथीमहे, तकांतकां पचामहे (म० भा०) इति। *यासयोरित्त्वप्रतिषेधे त्यकन उपसंख्यानम्* (म० भा०)। उपत्यका। अधित्यका। *पावकादीनां छन्दस्युपसंख्यानम्* (म० भा०)। 'हिरण्यवर्णाः शुचयः पावकाः' (अथ० 1.33.1)। यासु आलोमकाः। छन्दसीति किम्? पाविका। *आशिषि चोपसंख्यानम्* (म० भा)। जीवताद् = जीवका। नन्दताद् = नन्दका। भवताद् = भवका, *उत्तरपदलोपे चोपसंख्यानम्* (म० भा०) देवदत्तिका, देवका। यज्ञदत्तिका, यज्ञका। *छिपकादीनां चोपसंख्यानम्* (म० भा०)। क्षिपका। श्रुवका। *तारका ज्योतिष्युपसंख्यानम्* (म० भा०)। तारका। ज्योतिषीति किम्? तारिका दासी। *वर्णका तान्तव उपसंख्यानम्* (म० भा०)। वर्णका = प्रावरणभेदः। तान्तव इति किम्? वर्णिका भागुरी लौकायते। *वर्तका शकुनौ प्राचामुपसंख्यानम्* (म० भा०)। वर्तका शकुनिः। प्राचामन्यत्र उदीचां तु-वर्तिका। शकुनाविति किम्? वर्तिका भागुरी लौकायतस्य। *अष्टका पितृदैवत्ये*। अष्टका। पितृदैवत्य इति किम्? अष्टिका खारी। *वा सूतकापुत्रकावृन्दारकाणामुपसंख्यानम्* (म० भा०) सूतिका, सूतका। पुत्रिका, पुत्रका। वृन्दारिका, वृन्दारका।

अर्थ—सुप् से उत्तर नहीं है जो 'आप्', ऐसे 'आप्' के परे रहते प्रत्यय में स्थित ककार से पूर्व 'या' तथा 'सा' के ह्रस्व अकार के स्थान पर इकार आदेश नहीं होता है।

उदा० (1) यका

यद् → य अ—स्त्रीत्व की विवक्षा, त्यदादीनामः,

य टाप्—अतो गुणे, अजाद्यतष्टाप्,

य् अकच् आ—अव्ययसर्वनाम्ना०,

यक आ—इकार नहीं हुआ, सु।

(2) सका

तद् → त अ → त टाप्—पूर्ववत्,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स आ—तदोः सः सा०,
सक आ सु—अकच्, सवर्णदीर्घ।

यासा०—'यासा' यह निर्देश अनुचित है। यह यद् तथा तद् का उपलक्षण है। यहाँ पर भी निषेध होता है। यथा—
यकां यकाम् अधीमहे, सकां सकां पचामहे।

यासयो०—'या' तथा 'सा' के विषय में 'त्यकन्' का भी निषेध होता है।

(3) उपत्यका
उपत्यकन्—उपाधिभ्यां त्यकन्नासः, हलन्त्यम्,
उपत्यक टाप्—इकार आदेश प्राप्त हुआ, निषेध हो गया,
उपत्यका सु—सु।

(4) अधित्यका
पूर्ववत् इकार नहीं हुआ।

पावका०—वेद के विषय में 'पावक' आदि शब्दों में ककार से पूर्व अकार को इकार नहीं होता है।

(5) पावकः (शौ०सं० 1.33.1)
यहाँ इकार नहीं हुआ।

(6) अलोमका
पूर्ववत् इकार नहीं हुआ।

छन्दसी०—वेद के विषय में ही इकार आदेश का निषेध होता है।

(7) पाविका
लोक में इकार हो गया है।

आशिषि०—आशीर्वाद अर्थ में इकार नहीं होता है।

(8) जीवका जीवताद्
यहाँ अकार के स्थान पर इकार नहीं हुआ।

(9) नन्दका नन्दताद्
इकार नहीं हुआ।

(10) भवका भवताद् (पूर्ववत्)।

उत्तर०—उत्तरपद के लोप में इकार आदेश नहीं होता है।

(11) देवदत्तिका
देवदत्तक टाप्—इकार हो गया है।

(12) देवका
देवक टाप्—'अनजादौ च विभाषा०' से उत्तर पद का लोप, इकार आदेश नहीं हुआ,
देवका सु—सवर्णदीर्घ।

(13) यज्ञदत्तिका
इकार हो गया है।

(14) यज्ञका
उत्तरपद लोप होने से इकार नहीं होता है।

क्षिपका०—'क्षिपका' आदि शब्दों के अकार के स्थान पर इकार नहीं होता है।

(15) क्षिपका
क्षिपक टाप्—इकार आदेश प्राप्त है, निषेध हो गया।

(16) ध्रुवका (पूर्ववत्)।

तारका०—'ज्योतिष्' के विषय में 'तारक' शब्द के अकार को इकार नहीं होता है।

(17) तारका
तारक टाप्—इकार प्राप्त था, निषेध हो गया।

ज्योतिषी०—ज्योतिष् अर्थ में ही इकार का निषेध होता है।

(18) तारिका दासी
यहाँ 'ज्योतिष्' अर्थ नहीं है। इकार हो गया।

वर्णका०—तन्तुविकार अर्थ में 'वर्णका' शब्द में इकार आदेश नहीं होता है।

(19) वर्णका
वर्णक टाप्—इकार आदेश प्राप्त था, निषेध हो गया।

तान्तव०—तन्तुविकार अर्थ में इत्त्व का निषेध होता है।

(20) वर्णिका
यहाँ तन्तुविकार अर्थ नहीं है। इकार हो गया है।

वर्त्तका०—प्राग्देशीय विद्वानों के मत में 'पक्षी' अर्थ गम्यमान हो तो 'वर्त्तका' शब्द में इकार आदेश नहीं होता है।

(21) वर्त्तका (= बत्तख)
वर्त्तक टाप्—इत्त्व नहीं हुआ।

(22) वर्त्तिका
उदीच्य विद्वानों के मत में इकार होता है।

शकुना०—पक्षी अर्थ गम्यमान हो तो 'वर्त्तका' में इत्त्व का निषेध होता है।

(23) वर्त्तिका
यहाँ इकार आदेश हो गया है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टका०—पितृदैवत्य नामक वैदिककार्यविशेष में 'अष्टका' शब्द में इकार आदेश नहीं होता है।

(24) अष्टका
यहाँ 'पितृदैवत्य' अर्थ इष्ट है। अतः इकार नहीं हुआ।

पितृदैव०—पितृदैवत्य अर्थ में ही इत्त्व का निषेध होता है।

(25) अष्टिका खारी
इकार होता है।

वा सूतका०—सूतका, पुत्रका तथा वृन्दारका—इन शब्दों के ह्रस्व अकार के स्थान पर इकार आदेश विकल्प से होता है।

(26) सूतिका
सूतक टाप्—इकार हुआ।

(27) सूतका
पक्ष में इत्त्व नहीं हुआ।

(28) पुत्रिका
इकार हुआ।

(29) पुत्रका
पक्ष में इकार नहीं हुआ।

(30) वृन्दारिका
इकार हो गया है।

(31) वृन्दारका
पक्ष में इकार नहीं हुआ।

(3443) उदीचामातः स्थाने यकपूर्वायाः *46* (465)

उदीचामाचार्याणां मतेन यकारपूर्वायाः ककारपूर्वायाश्चातः स्थाने योऽकारस्तस्यातः स्थाने इकारादेशो भवति। 'उदीचाम्'-ग्रहणं विकल्पार्थम्। इभ्यिका, इभ्यका। क्षत्रियिका, क्षत्रियका। ककारपूर्वायाः–चटकिका, चटकका। मूषिकिका, मूषिकका। आत इति किम्? सांकाश्ये भवा सांकाश्यिका। स्थानग्रहणमनुवादेऽपि स्थानसम्बन्धप्रतिपत्त्यर्थम्। 'आत' इत्यनेन ह्रत इति विशिष्यते। यकपूर्वाया इति किम्? अश्वा, अश्विका। 'यकपूर्वायाः' इति स्त्रीलिङ्गनिर्देशः–आतः स्त्रीप्रत्ययस्य प्रतिपत्त्यर्थम्। इह न भवति–शुभं यातीति शुभंयाः, शुभंयिका। भद्रं यातीति भद्रंयाः, भद्रंयिका। *यकपूर्वायाः धात्वन्तप्रतिषेधः* (म० भा०)। धात्वन्तयोर्यकारककारयोरस्य प्रतिषेधस्य प्रतिषेधो वक्तव्यः। सुनयिका। सुशयिका। सुपाकिका। सुशोकिका।

अर्थ—उदीच्य आचार्यों के मत में यकार तथा ककार हैं पूर्व में है जिस आकार के, ऐसे आकार के स्थान पर जो अकार आदेश होता है, प्रत्यय में स्थित ककार से पूर्व ऐसे अकार के स्थान पर इकार आदेश नहीं होता है, 'आप्' परे रहते; यदि वह 'आप्' प्रत्यय 'सुप्' से उत्तर न हो।

'उदीचाम्' का ग्रहण विकल्प के लिए है।

उदा० (1) इभ्यिका
इभ्या क—प्रागिवात् कः,
इभ्यक टाप्—'केऽणः' से ह्रस्व, स्त्रियाम्, अजाद्यत०,
इभ्यिका—अकार से पूर्व यकार है, इत्त्व, सु।

(2) इभ्यका
इकार आदेश नहीं हुआ।

(3) क्षत्रियिका
क्षत्रियक टाप्—पूर्ववत् इकार।

(4) क्षत्रियका
इकार का निषेध।

(5) चटकिका
चटका क—पूर्ववत् ह्रस्व,
चटकक टाप्—स्त्रियाम्, अकार से पूर्व ककार है, अतः अकार को इकार,
चटकिका—सु।

(6) चटकका
इकार नहीं हुआ।

(7) मूषिकिका
इकार हुआ।

(8) मूषिकका
इकार नहीं हुआ।

आत०—आकार के स्थान पर जो ह्रस्व अकार आदेश, ऐसे अकार को इकार होता है।

(9) साङ्काश्यिका
साङ्काश्यक टाप्—'धन्वयोपधाद् वुञ्' से 'वुञ्', 'टाप्' हुआ, यहाँ अकार है, उससे पूर्व यकार है, 'टाप्' प्रत्यय भी परे है, परन्तु वह अकार आकार के स्थान पर नहीं हुआ है। अतः इकार आदेश का निषेध नहीं हुआ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साङ्काश्यिका—सु।

स्थान०—आकार के स्थान पर लक्षणान्तर से विहित अकार का कथन 'अनुवाद' कहलाता है। अनुवाद अर्थ में स्थानग्रहण स्थान के सम्बन्ध के ज्ञान के लिए है। 'आतः' इस पद के द्वारा 'अतः' यह विशेषित होता है।

यकपूर्वा०—**यकार** तथा **ककार** से **पूर्व** आकार के स्थान पर इकार होता है।

(10) अश्विका
अश्वा क—अकार के स्थान पर अकार हुआ,
अश्व क—अकार से पूर्व न तो यकार है तथा न ही ककार है, अतः इकार-निषेध नहीं हुआ,
अश्विका सु—टाप्।

(11) अश्वा
यहाँ 'टाप्' हुआ, इकार नहीं हुआ।

यक०—'यकपूर्वायाः' यहाँ स्त्रीलिङ्ग का निर्देश है। 'आतः' इस प्रकार स्त्रीप्रत्यय के ज्ञान के लिए यह है। इसलिए निम्नलिखित में नहीं होता है—

(12) शुभंयाः
शुभम् या विच्—विजुपेच्छन्दसि, आतो मनिन्क्वनिब्०,
शुभम् या—सर्वापहार लोप,
शुभंया टाप् सु—अनुस्वार।

(13) शुभंयिका
शुभम् या क—'क' प्रत्यय, ह्रस्व,
शुभंयिक टाप्—टाप्, इकार हुआ, यहाँ इत्त्व का विकल्प प्राप्त होता है, स्त्रीलिङ्ग का निर्देश होने से विकल्प की निवृत्ति होती है।

(14) भद्रंयाः
भद्रं याति—'शुभंयाः' की तरह।

(15) भद्रंयिका
'शुभंयिका' की तरह।

यकपूर्वा०—'य' तथा 'क' से पूर्व जो अकार, ऐसे अकार को धात्वन्त के विषय में इकार-निषेध होता है।

(16) सुनयिका
णी → नी:—'णो नः' से नकार,
नी अच्—'एरच्' से 'अच्' हुआ, आर्धधातुक संज्ञा, 'सार्वधातुकार्धधातुकयोः' से गुण, अय्।
शोभनो नयोऽस्याः—समास हुआ,
सुनया क—प्रागिवात्कः, केऽणः,
सुनयक टाप्—इत्त्व-निषेध नहीं हुआ, सु।

(17) सुशयिका
शी अच्—शेष कार्य 'सुनयिका' की तरह।

(18) सुपाकिका
पच् घञ्—'पाक' बना, शेष कार्य पूर्ववत्।

(19) सुशोकिका
शुच् घञ्—पूर्ववत्।

(20) अशोकिका
अविद्यमानः शोकोऽस्याः—बहुव्रीहि,
अशोका कप्—शेषाद् विभाषा,
अशोक क आ—'आपोऽन्यतरस्याम्' से ह्रस्व,

(3444) भस्त्रैषाजाज्ञाद्वास्वा नञ्पूर्वाणामपि *47* (466)

एषामातः स्थाने योऽकारस्तस्य इत्त्वं न भवति उदीचामाचार्याणां मतेन। भस्त्रा–भस्त्रका, भस्त्रिका; अभस्त्रका, अभस्त्रिका। एषा–एषका, एषिका। अजा–अजका, अजिका; अनजका, अनजिका। ज्ञा–ज्ञका, ज्ञिका, अज्ञका, अज्ञिका। द्वा–द्वके, द्विके। स्वा–स्वका, स्विका; अस्वका, अस्विका। एषाद्वे नञ्पूर्वे न प्रयोजयतः, किं कारणम्? तत्र हि सति यदि साकच्काभ्यां नञ्समासः, अथापि कृते नञ्समासे पश्चादकच्–उभयथापि समासाद् या विभक्तिरुत्पद्यते तस्यां सत्यां त्यदाद्यत्वे सति टापा भवितव्यम्, सोऽन्तर्वर्त्तिन्या विभक्त्या सुबन्तात्पर इति इत्त्वस्य प्राप्तिरेव नास्ति। तेन अनेषका, अद्वके–इत्येव नित्यं भवितव्यम्। स्वशब्दस्तु ज्ञातिधनाख्यायां नञ्पूर्वोऽपि प्रयोजयति। 'भस्त्रा'–इत्ययमभाषितपुंस्कः, तस्य 'अभाषितपुंस्काच्च' (7.3.48) इत्येव सिद्धे यदिह ग्रहणं तदुपसर्जनार्थम्–अविद्यमाना भस्त्रा यस्या अभस्त्रा, साल्या अभस्त्रका, अभस्त्रिका। अत्रोपसर्जनह्रस्वत्वे कृते पुनर्बहुव्रीहौ कृते भाषितपुंस्काद् यष्टाबुत्पद्यते तस्य 'केऽणः' (7.4.13) इति यो ह्रस्वः, नासावभाषितपुंस्काद्विहितस्यातः स्थाने भवति। 'नञ्पूर्वाणामपि' इत्यपिशब्दादन्यपूर्वाणां केवलानां च विधिरयमिष्यते। निर्भस्त्रिका, निर्भस्त्रका। बहुभस्त्रिका, बहुभस्त्रका–इत्येवमनयोरपी-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ष्यते। अत्र 'नञ्पूर्वाणाम्' इति वचनमनुवाद एव मन्द-बुद्धिप्रतिपत्त्यर्थः।

अर्थ—उदीच्य आचार्यों के मत में भस्त्रा, एषा, अजा, ज्ञा, द्वा तथा स्वा—ये शब्द नञ् पूर्वक अथवा अनञ् पूर्वक हों व इनके आकार के स्थान पर अकार आदेश हुआ हो तो प्रत्यय में स्थित ककार से पूर्व उस आदेशभूत अकार के स्थान पर इकार आदेश नहीं होता है, 'आप्' प्रत्यय परे रहते; यदि वह 'आप्' किसी सुप् प्रत्यय से परे न हो।

उदा० (1) भस्त्रका
भस्त्रा क—पूर्ववत् 'क', 'केऽणः' से ह्रस्व,
भस्त्रक टाप्—इत्त्व का निषेध, सु।

(2) भस्त्रिका
भस्त्रक टाप्—पक्ष में इत्त्व हुआ।

(3) अभस्त्रका
न भस्त्रा—नञ्पूर्वक 'भस्त्रा' शब्द, कप् ह्रस्व,
अभस्त्रक टाप्—इकार-निषेध।

(4) अभस्त्रिका
पक्ष में इकार।

(5) एषका
एषा क—ह्रस्व,
एषक टाप्—इत्त्व नहीं हुआ।

(6) एषिका
इकार हुआ है।

(7) अजका
अजा क—प्रागिवात्कः, केऽणः,
अजक टाप्—इत्त्व नहीं हुआ।

(8) अजिका
इत्त्व हो गया है।

(9) अनजका
अनजक—बहुव्रीहि समास, कप्, ह्रस्व,
अनजक टाप्—इत्त्व नहीं हुआ।

(10) अनजिका
इत्त्व हो गया।

(11) ज्ञका
ज्ञक टाप्—इत्त्व नहीं हुआ।

(12) ज्ञिका
इत्त्व हुआ है।

(13) अज्ञका
नञ्, बहुव्रीहि, कप् आदि, इत्त्व-निषेध।

(14) अज्ञिका
इत्त्व हुआ है।

(15) द्वके
इत्त्व नहीं हुआ।

(16) द्विके
पक्ष में इकार।

(17) स्वका
स्वा क—ह्रस्व, इत्त्व-निषेध।

(18) स्विका
इत्त्व हुआ है।

(19) अस्वका
नञ्, पूर्ववत् इत्त्व अभाव।

(20) अस्विका
इत्त्व हुआ है।

एषा द्वे०—'एषा' तथा 'द्वा'—इनका नञ् पूर्वक प्रयोग नहीं होता है। क्या कारण है। यदि ऐसा हो तो अकच् पूर्वक इन शब्दों से नञ् समास हो अथवा नञ् समास करने पर पश्चात् अकच् हो—इन दोनों अवस्थाओं में समास से जो विभक्ति उत्पन्न होती है, उसके होने पर त्यदादिलक्षण अकार अन्तादेश होने पर टाप् होना चाहिए। वह अन्तर्वर्त्तिनी विभक्ति अर्थात् सुबन्त से पर होने से 'असुपः' इस प्रकार निषेध होने के कारण इत्त्व की प्राप्ति ही नहीं होती है। तब 'अनेषका' तथा 'अद्वके' आदि प्रयोग नित्य होते हैं।

स्वशब्द०—स्व शब्द तो जाति तथा धन के अर्थ में नञ् पूर्वक भी प्रयुक्त होता है।

भस्त्रा०—'भस्त्रा' यह अभाषितपुंस्क है। उसके 'अभाषित-पुंस्काच्च' से सिद्ध होने पर इसका जो ग्रहण है, वह उपसर्जन के लिए है। यथा—

अविद्यमाना भस्त्रा यस्याः सा—अभस्त्रा।
साल्पा अभस्त्रका, अभस्त्रिका।

अत्रोप०—तब उपसर्जनलक्षण ह्रस्व आदेश करने पर पुनः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहुव्रीहि समास करने पर भाषितपुंस्क से जो 'टाप्' की उत्पत्ति होती है, उसका 'केऽणः' से ह्रस्व होता है। यह अभाषितपुंस्क से विहित आकार के स्थान पर नहीं होता है।

नञ्पूर्वा०—'नञ्पूर्वाणामपि' यहाँ 'अपि' शब्द के ग्रहण से अन्यपूर्वक तथा केवल शब्दों को भी सूत्रोक्त विधि होती है। यथा—

(21) निर्भस्त्रिका
इकार हो गया। निर्गता भस्त्रा यस्याः।

(22) निर्भस्त्रका
पक्ष में इकार-नहीं हुआ।

(23) बहुभस्त्रिका
बह्व्यो भस्त्रा यस्याः सा—बहुव्रीहि, कप्, ह्रस्व,
बहुभस्त्रक टाप्—इकार, सु।

(24) बहुभस्त्रका
पक्ष में इकार नहीं हुआ।

(25) सुभस्त्रिका*
शोभना भस्त्रा यस्याः सा—पूर्ववत् समास, कप् आदि।

(26) सुभस्त्रका*
पक्ष में इत्त्व नहीं हुआ।

अत्र०—यहाँ 'नञ्पूर्वाणाम्' यह वचन अनुवाद में ही मन्दबुद्धि पाठकों के बोध के लिए है।

(3445) अभाषितपुंस्काच्च *48* (467)

अभाषितपुंस्काद्विहितस्यातः स्थाने योऽकारस्तस्योदीचामाचार्याणां मतेन इकारादेशो न भवति। खट्वका, खट्विका। अखट्वका, अखट्विका। परमखट्वका, परमखट्विका। बहुव्रीहौ यदा कपि ह्रस्वः क्रियते तदा भवितव्यमनेन विधिना। अत्राप्यभाषितपुंस्काद्विहितस्यातः स्थाने भवत्यकार इति। यदा तु अविद्यमाना खट्वा अस्याः अखट्वा, अल्पा अखट्वा अखट्विकेति, तदा न भवति। तथा अतिक्रान्ता खट्वामतिखट्वा, अल्पा अतिखट्वा अतिखट्विका।

अर्थ—उदीच्य आचार्यों के मत में नञ् पूर्व में है तथा नञ् पूर्व में नहीं है—दोनों स्थितियों में अभाषितपुंस्क शब्द के आकार के स्थान में अकार आदेश हो तो प्रत्यय में स्थित ककार से पूर्व यथोक्त (आदेशभूत) अकार के स्थान पर इकार आदेश नहीं होता है, 'आप्' परे रहते; यदि वह 'आप्' किसी 'सुप्' से उत्तर न हो।

उदा० (1) खट्वका
खट्वा क—ह्रस्व,
खट्वक आ—टाप्, इत्त्वनिषेध, सु।

(2) खट्विका
पक्ष में इकार होता है।

(3) अखट्वका
न खट्वा—नञ् समास,
अखट्वा क—ह्रस्व, इत्त्व का अभाव।

(4) अखट्विका
पक्ष में इत्त्व होता है।

(5) परमखट्वका
परमा चाऽसौ खट्वा—'सन्महत्०' से समास,
परमखट्वा क—पूर्ववत् ह्रस्व, इत्त्व का निषेध।

(6) परमखट्विका
परमखट्वक टाप्—इत्त्व होता है।

बहुव्रीहौ०—बहुव्रीहि में जब 'कप्' होकर ह्रस्व किया जाता है, तब यह विधि होनी चाहिए। यहाँ भी अभाषितपुंस्क से विहित आकार के स्थान पर अकार होता है।

यदा तु०—जब निम्नलिखित विग्रह होता है, तब नहीं होता है। यथा—
अविद्यमाना खट्वाऽस्याः अखट्वा
अल्पाऽखट्वा—अखट्विका।
अतिक्रान्ता खट्वाम्—अतिखट्वा,
अल्पाऽतिखट्वा—अतिखट्विका।

(3446) आदाचार्याणाम् *49* (468)

अभाषितपुंस्कादातः स्थाने योऽकारस्तस्याचार्याणामाकारादेशो भवति। खट्वाका, अखट्वाका परमखट्वाका।

अर्थ—नञ् पूर्व में है तथा नञ् पूर्व में नहीं है—दोनों स्थितियों में यदि अभाषितपुंस्क शब्द के आकार के स्थान पर अकार आदेश हो तो ककार से पूर्व स्थित उस (आदेशभूत) अकार के स्थान

* एतौ प्रयोगौ काशिकायां न प्रदर्शितौ—ईश्वरः।
द्र०—न्यास 7.3.47 आदिशब्देन सुभस्त्रका, सुभस्त्रिका।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पर आकार आदेश होता है, 'आप्' परे रहते; यदि वह 'आप्' किसी सुप् प्रत्यय से उत्तर न हो। यह उदीच्य आचार्यों के मत में होता है।

उदा० (1) खट्वाका
खट्वा क—ह्रस्व,
खट्वक टाप्—आकार आदेश, सु।

(2) अखट्वाका
न खट्वा—इस विग्रह की दशा में पूर्ववत् सभी कार्य।

(3) परमखट्वाका
परमा चाऽसौ खट्वा—बहुव्रीहि, शेष पूर्ववत्।

(3447) ठस्येकः *50* (1170)

अङ्गस्य निमित्तं यष्ठः, कश्चाङ्गस्य निमित्तम्? प्रत्ययः, तस्य प्रत्ययठस्य इक इत्ययमादेशो भवति। 'प्राग्वहतेष्ठक्' (4.4.1) आक्षिकः, शालाकिकः। 'लवणाट्ठञ्' (4.4.52), लावणिकः। ठगादिषु यदि वर्णमात्रं प्रत्ययः, उच्चारणार्थोऽकारः, तदा इहाप्यकार उच्चारणार्थः, वर्णमात्रं तु स्थानित्वेनोपादीयते। सङ्घातग्रहणे तु प्रत्ययेऽत्रापि सङ्घातग्रहणमेव। तत्र 'कणेष्ठः' (उणा० 108); कण्ठः–इत्येवमादीनामुणादीनाम् 'उणादयो बहुलम्' (3.3.1) इति न भवति। मथितं पण्यमस्य माथितिकः–इत्यत्र तु 'यस्येति च' (6.4.148) इति लोपे कृते 'इसुसुक्तान्तात्कः' (7.3.51) इति स्थानिवद्भावादिकस्य कादेशः प्राप्नोति; 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या०प०) इति न भवति। 'यस्येति च' (6.4.148) इति लोपस्य स्थानिवद्भावाद्वा। पूर्वस्मादपि हि विधौ स्थानिवद्भावः।

अर्थ—अङ्ग का निमित्त जो 'ठ', इस प्रत्यय के ठकार के स्थान पर 'इक' आदेश होता है।

'इक' अदन्त आदेश है।

उदा० (1) आक्षिकः
अक्ष ठक्—'प्राग्वहतेष्ठक्' से 'ठक्',
आक्ष् इक सु—ठस्येकः।

(2) शालाकिकः
शलाका—पूर्ववत्।

(3) लावणिकः
लवण ठञ्—लवणाट्ठञ्,
लावणिक सु—ठस्येकः, आदिवृद्धि।

ठगादि०—ठक्, ठञ् तथा ठन् के अन्त्य हल् (क्रमशः ककार, ञकार तथा नकार) की इत्संज्ञा निर्विवाद है; परन्तु ठकारस्थ अकार के विषय में दो मत हैं—

(क) वर्ण पक्ष—ठक् आदि में यदि वर्णमात्र (अर्थात् 'ठ्') को प्रत्यय स्वीकार करते हैं तो, अकार उच्चारणार्थ मानना चाहिए। तब यहाँ पर भी ('ठस्य' में ठकारोत्तरवर्त्ती) अकार उच्चारणार्थ मानना चाहिए। वर्णमात्र का स्थानिवद् होने से उपादान होता है।

(ख) संघातपक्ष—ठक् आदि में यदि संघात (अर्थात् 'ठ') का ग्रहण किया जाता है तो यहाँ (अर्थात् 'इक' आदेश के विषय में) भी संघात का ग्रहण होता है। तब 'इक' आदेश 'ठ् + अ' इस समग्र संघात के स्थान पर होता है।

कणेष्ठः—कण्ठः—इत्यादि उणादियों में 'उणादयो बहुलम्' से नहीं होता है।

मथितं०—मथितं पण्यम् अस्य—माथितिकः। यहाँ 'यस्येति च' से लोप कर देने पर 'इसुसुक्तान्तात्कः' से स्थानिवद्भाव होने से इक के स्थान पर 'क' आदेश प्राप्त होता है। 'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' से नहीं होता है। 'यस्येति च' से लोप के स्थानिवद्भाव होने से होता है। पूर्वस्मात् अर्थात् पूर्व से उत्तर की विधि में स्थानिवद्भाव होता है।

(3448) इसुसुक्तान्तात् कः *51* (1221)

इस्, उस्–इत्येवमन्तानामुगन्तानां तान्तानां चाङ्गानामुत्तरस्य ठस्य 'क' इत्ययमादेशो भवति। इस्–सार्पिष्कः। उस्–धानुष्कः। याजुष्कः। उक्–नैषादकर्षुकः। शाबरजम्बुकः। मातृकम्। पैतृकम्। तान्तात्–औदश्वित्कः। शाकृत्कः। याकृत्कः। इसुसोः प्रतिपदोक्तयोर्ग्रहणादिह न भवति–आशिषा चरति आशिषिकः। उषा चरति औषिकः। *दोष उपसंख्यानम्*। दोर्भ्यां चरति दौष्कः।

अर्थ—इस् तथा उस् है अन्त में जिसके, उक् प्रत्याहार है अन्त में जिसके तथा तकार है अन्त में जिसके—ऐसे अङ्ग से उत्तर 'ठ्' के स्थान पर 'क' आदेश होता है।

उदा० (क) इस्—
(1) सार्पिष्कः

सर्पिष् ठक्—'तदस्य पण्यम्' से 'ठक्', 'सर्पिष्' में 'इस्' औणादिक प्रत्यय का है, षत्व के असिद्ध होने से यह 'इस्' ही है,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सार्पिष् क—आदिवृद्धि, 'क' आदेश, सु। 'इसुसोः सामर्थ्ये' से षत्व हुआ है।

(ख) उस्—

(2) धानुष्कः
धनुष् ठक्—पूर्ववत्। धनुः प्रहरणम् अस्य।

(3) याजुष्कः
यजुष् ठक्—पूर्ववत्।

(ग) उक्—

(4) नैषादकर्षुकः
निषादकर्ष्यां जातः—ओर्देशे ठञ्,
निषादकर्षु क सु—केऽणः।

(5) शाम्बरजम्बुकः (पूर्ववत्)।

(6) मातृकम्
मातुरागतम्—ऋतष्ठञ्,
मातृ क सु—इसुसुक्ता०।

(घ) तकारान्तात्—

(7) औदश्वित्कः
उदश्वित् ठक्—उदश्वितोऽन्यतरस्याम्,
औदश्वित् क—आदिवृद्धि, 'क' आदेश, सु।

(8) शाकृत्कः
शकृता संसृष्टे—ठक्,
शाकृत् क सु—पूर्ववत्।

(9) याकृत्कः
यकृत् ठक्—पूर्ववत्।

इसुसोः०—इस् तथा उस्—इनका प्रतिपदोक्त का ग्रहण होता है; लाक्षणिक इस् तथा उस का ग्रहण नहीं होता है।

(10) आशिषिकः
आशिषा चरति—यहाँ 'इस्' लाक्षिणक[1] है, अतः 'इसुसुक्ता०' से 'क' नहीं हुआ,
आशिष् इक—सु। 'शासिवसिघसीनां०' से षत्व होता है।

(11) औषिकः
उषा[2] चरति—सभी कार्य पूर्ववत्।

1. आ शास् क्विप्—इस दशा में 'शास इदङ्हलोः' से 'इदङ्' तथा 'शासः क्वावुपसङ्ख्यानम्' से इत्त्व होता है।

2. वस् क्विप्—सर्वापहारलोप, 'वचिस्वपियजा०' से सम्प्रसारण, 'सम्प्रसारणाच्च' से पूर्वरूप करके 'उस्' रूप बनता है, पूर्ववत् 'शासिवसिघसी०' से षत्व होता है।

दोष०—'दोष्' से पर 'ठ' को 'क' होता है।

(12) दौष्कः
दोर्भ्यां चरति—ठक्, क, आदिवृद्धि।

(3449) चजोः कु घिण्ण्यतोः *52* (2863)

चकारजकारयोः कवर्गादेशो भवति घिति ण्यति च प्रत्यये परतः। घिति—पाकः। त्यागः। रागः। ण्यति—पाक्यम्। वाक्यम्। रेक्यम्।

अर्थ—चकार तथा जकार के स्थान पर कवर्ग आदेश होता है, घित् तथा ण्यत् के परे रहते।

चकार में अकार उच्चारणार्थ है। घित् = जिसका घकार इत् है।

ध्यातव्य है कि यहाँ दो निमित्त (घित् तथा ण्यत्) हैं तथा दो ही कार्यी (चकार, जकार) हैं। तदपि यथासंख्य नियम प्रवृत्त नहीं होता है।[1]

उदा० (क) घिति—

(1) पाकः
पच् घञ्—भाव में प्रत्यय, लशक्वतद्धिते, हलन्त्यम्,
पाच् अ—अत उपधायाः,
पाक् अ—कुत्व, 'स्थानेऽन्तरतमः' से ककार, सु।

(2) त्यागः
त्यज् घञ्—पूर्ववत्,
त्याज् अ—पूर्ववत्,
त्याग् अ सु—'स्थानेऽन्तरतमः' से गकार।

(3) रागः
रञ्ज् घञ्—अनुनासिकलोप,
राग् अ सु—उपधावृद्धि, गकार।

(ख) ण्यति—

(4) पाक्यम्
पच् ण्यत्—ऋहलोर्ण्यत्, चुटू, हलन्त्यम्,
पाच् य—अत उपधायाः,
पाक् य सु—कुत्व, विभक्तिकार्य।

(5) वाक्यम्
वच् ण्यत्—पूर्ववत्।

1. न्यास 7.2.52 यथासङ्ख्यमिह न भवति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(6) रेक्यम्
रिच् य—ण्यत्, अनुबन्धलोप,
रेक् य सु—पुगन्तलघूपधस्य च, कुत्व।

(3450) न्यङ्क्वादीनां च *53* (2864)

'न्यङ्कु'-इत्येवमादीनां कवर्गादेशो भवति। न्यङ्कुः-'नावञ्चेः' (उणा० 17) इति उप्रत्ययः। मद्गुः-'मिमस्जिभ्य उः' (उणा० 7) इति मस्जेरुप्रत्ययः। भृगुः-'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च' (उणा० 28) इत्युप्रत्ययः। दूरेपाकः। फलेपाकः। दूरे पच्यते स्वयमेव, फले पच्यते स्वयमेव-पचाद्यच्, निपातनाद्वृद्धिः, 'तत्पुरुषे कृति बहुलम्' (6.3.14) इति सप्तम्या अलुक्। क्षणेपाकः-इत्यपि हि केचित् पठन्ति। दूरेपाकाः, फलेपाकाः-इति टाबन्तमपरेऽधीयते। उकारान्तावपरे-दूरेपाकुः, फलेपाकुरिति। तेषामुप्रत्ययो निपातनादेव। तक्रम्, वक्रमिति-तञ्चतेः, वञ्चतेश्च 'स्फायितञ्चिवञ्चि' (उणा० 108) इत्यादिना सूत्रेण रक्। व्यतिषङ्गः। व्यतिषजतीति पचाद्यच् (3.1. 134)। अनुषङ्गः। अवसर्गः। उपसर्गः। (मेघः)। श्वपाकः, मांसपाकः, कपोतपाकः, उलूकपाक इति-कर्मोपपदादण् (3।2।1) प्रत्ययः। संज्ञायाम्-मेघः। अर्घः। अवदाघः। निदाघः। अर्हतेर्घञ्-अर्घः। अवपूर्वस्य निपूर्वस्य च दहेः-अवदाघः। निदाघः। संज्ञाया अन्यत्र-अर्हः। अवदाहः। निदाहः। न्यग्रोधः, वीरुत्-इत्यत्र न्यक्पूर्वस्य रुहेः पचाद्यचि विपूर्वस्य क्विपि धकारो विधीयते। न्यग्रोहयतीति न्यग्रोधः। विरोहयतीति वीरुत्।

अर्थ—न्यङ्कु आदि शब्दों के चकार व जकार के स्थान पर कवर्ग आदेश होता है।

उदा० (1) न्यङ्कुः
नि अञ्च् उ—'नावञ्चेः' से 'उ',
नि अन् क् उ—कुत्व,
नि अङ् कु—अनुस्वार, परसवर्ण,
न्यङ्कु सु—इको यणचि।

(2) मद्गुः
मस्ज् उ—मिमस्जिभ्य उः,
मद्ग् उ—झलां जश् झशि, कुत्व, सु।

(3) भृगुः
भ्रस्ज् उ—'प्रथिम्रदिभ्रस्जां० से 'उ',
भृज् उ—सम्प्रसारण, सकारलोप,
भृग् उ सु—कुत्व।

(4) दूरेपाकः
कर्मकर्त्ता में पचादिलक्षण 'अच्' होता है। निपातन से वृद्धि। 'तत्पुरुषे कृति बहुलम्' से विभक्ति का अलुक्।

(5) फलेपाकः (पूर्ववत्)।
(6) क्षणेपाकः (पूर्ववत्)।

दूरेपा०—कुछ विद्वान दूरेपाकाः, फलेपाकाः—इस प्रकार टाप् प्रत्ययान्त पाठ भी मानते हैं। अन्य विद्वान् उकारान्त पाठ मानते हैं।

(7) दूरेपाकुः, (8) फलेपाकुः।

(9) तक्रम्
तञ्च् रक्—'स्फायितञ्चिवञ्चि०' से 'रक्',
तक् र सु—कुत्व।

(10) वक्रम्
वञ्च् रक्—पूर्ववत्।

(11) व्यतिषङ्गः
व्यतिषजति—पचादिलक्षण 'अच्'।

(12) अनुषङ्गः
अनु षञ्ज् अच्—पूर्ववत्।

(13) अवसर्गः
अव सृज् अच्—पचादिलक्षण 'अच्',
अव सर्ग् अ—लघूपधगुण, कुत्व।

(14) उपसर्गः
उप सृज् अच्—पूर्ववत्।

(15) मेघः
मिह् अच्—लघूपधगुण, कुत्व सु।

(16) श्वपाकः
श्वपच् अण्—पूर्ववत्। 'कर्मण्यण्' से 'अण्'।

(17) मांसपाकः (पूर्ववत्)।
(18) कपोतपाकः (पूर्ववत्)।
(19) उलूकपाकः
पूर्ववत् 'अण्'।

(20) मेघः, (21) निदाघः, (22) अवदाघः
'दह्' धातु से 'निदाघ' तथा 'अवदाघ' बनते हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(23) अर्घः
अर्ह् घञ्—पूर्ववत् कुत्व।

संज्ञा अर्थ गम्यमान हो तो ये रूप होते हैं। संज्ञा से अतिरिक्त, (24) अर्हः, (25) अवदाहः, (26) निदाहः रूप बनते हैं।

(27) न्यग्रोधः
न्यक् रुह् अच्—हकार को धकार होता है।

(28) वीरुत्
वि रुह् क्विप्—सर्वापहार लोप,
वि रुध्—हकार को धकार, सु, लोप, पदसंज्ञा,
विरुत्—झलां जशोऽन्ते, वाऽवसाने।

(3451) हो हन्तेर्ञ्णिन्नेषु *54* (358)

हन्तेर्हकारस्य कवर्गादेशो भवति ञिति, णिति प्रत्यये परतो नकारे च। घातयति। घातकः। साधुघाती। धातङ्घातम्। घातो वर्तते। नकारे-घ्नन्ति। घ्नन्तु। अघ्नन्। ह इति किम्? अलोऽन्त्यस्य मा भूत्। हन्तेरिति किम्? प्रहारः। प्रहारकः। ञ्णित्प्रत्ययो हन्तेर्विशेषणम्। नकारो हकारस्य-नकारे अनन्तरस्य हन्तिहकारस्येति। तच्चानन्तर्यं श्रुतिकृतं सन्निपातकृतमाश्रीयते। स्थानिवद्भाव-शास्त्रकृतं तु यदनानन्तर्यं तदविघातकम्; वचनसामर्थ्यात्। यद्यपि सर्वैरेव ञ्णिन्नैर्हन्तिहकारो विशिष्यते, तथापि 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या०प०) इति ञ्णिति धात्ववयवेन व्यवहितेऽपि सति भवति। इह तु न भवति-हननमिच्छति हननीयति, हननीयतेर्ण्वुल्, हननीयक इति।

अर्थ—'हन्' अङ्ग के हकार के स्थान पर कवर्ग आदेश होता है; ञित्, णित् तथा नकार परे रहते।

'स्थानेऽन्तरतमः' से हकार के स्थान पर घकार होता है।

उदा० (1) घातः
हन् घञ्—अनुबन्धलोप,
हान् अ—अत उपधायाः,
हात् अ—हनस्तो०,
घात सु—घकार।

(2) घातयति
हन् णिच्—अनुबन्धलोप,
हात्—पूर्ववत् उपधावृद्धि, तकार,
घाति—घकार, धातुसंज्ञा, शप् आदि,
घाते शप् ति—सार्वधातुकार्धधा०, अय्।

(3) घातकः
हन् ण्वुल्—अनुबन्धलोप, शेष पूर्ववत्,
घात् अक सु—युवोरनाकौ।

(4) साधुघाती
साधु हन् णिनि—पूर्ववत् उपधावृद्धि, तकार, घकार,
साधुघतिन् सु—विभक्तिकार्य।

(5) घातङ्घातम्
हन् णमुल्—आभीक्ष्ण्ये णमुल्, अनुबन्धलोप,
घात् अम्—घत्व, तकार, उपधावृद्धि,
घातम् घातम्—द्विर्वचन, अनुस्वार, परसवर्ण।

(ग) नकारे—
(6) घ्नन्ति
हन् झि—'लट्, झोऽन्तः,
ह् न् अन्ति— 'गमहन०' से उपधालोप,
घ् न् अन्ति—घकार।

(7) घ्नन्तु
हन् झि—सभी कार्य पूर्ववत्, एरुः।

(8) अघ्नन्
हन् झि—लङ्, 'इतश्च' से इकारलोप, शेष कार्य पूर्ववत्, अट् आगम।

ह इति०—हकार के स्थान पर ही कुत्व होता है। तब अलोऽन्त्य परिभाषा से अन्त्य अल् (न्) को कुत्व नहीं होता।

हन्ते०—हन् अङ्ग के हकार को कुत्व होता है।

(9) प्रहारः
प्र ह घञ्—अनुबन्धलोप, ञित् प्रत्यय परे है, 'हन्' अङ्ग का हकार न होने से कुत्व नहीं होता है, 'अचो ञ्णिति' से वृद्धि, उरण् रपरः,
प्रहार् अ—सु।

(10) प्रहारकः
प्र ह ण्वुल्—अनुबन्धलोप, युवोरनाकौ,
प्र हार् अक—'हन्' का हकार न होने से कुत्व नहीं हुआ,
प्रहारक—सु।

ञ्णित्०—'ञ्णित् प्रत्ययः' यह 'हन्' का विशेषण है। नकार हकार का विशेषण है अर्थात् अव्यवहित नकार परे रहते 'हन्' के हकार के स्थान पर कुत्व होता है। यह अव्यवहितता श्रुतिकृत तथा सन्निपातकृत ही मानी जाती है। वचनसामर्थ्य से शास्त्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्थानिवद्भाव कृत जो अव्यवहितता होती है, वह अविघातक होती है।

यद्यपि०—यद्यपि 'ञ्णिन्नैः' इस समग्र पद के द्वारा हन् धातु का हकार विशेषित होता है। तथापि 'येन नाऽव्यवधानं तेन व्यवहितेऽपि०' से ञित् तथा णित् प्रत्यय के परे रहते तथा धातु के अवयव (अकार, नकार) से व्यवहित होने पर भी कुत्व हो जाता है। निम्नलिखित में कुत्व नहीं होता है—

(11) हननीयकः
हननम् इच्छति—'सुप आत्मनः क्यच्' से 'क्यच्',
हनन य—अनुबन्धलोप,
हननीय—धातुसंज्ञा, 'धातोः' के अधिकार में,
हननीय ण्वुल्—ण्वुल्तृचौ, अनुबन्धलोप,
हननीय अक सु—हन् अङ्ग के हकार को कुत्व नहीं हुआ।

(3452) अभ्यासाच्च *55* (2430)

अभ्यासादुत्तरस्य हन्तिहकारस्य कवगदिशो भवति। जिघांसति। जङ्घन्यते। अहं जघन। अभ्यासनिमित्ते प्रत्यये हन्तेरङ्गस्य योऽभ्यासस्तस्मादेवैतत् कुत्वम्। इह न भवति–हननीयितुमिच्छति जिहननीयिषति।

अर्थ—अभ्यास से उत्तर 'हन्' अङ्ग के हकार के स्थान पर कुत्व होता है।

उदा० (1) जिघांसति
हन् सन्—धातोः कर्मणः समानकर्तृ०,
हन् हन् स—सन्यङोः, पूर्वोऽभ्यासः,
ह हन् स—हलादिः शेषः,
ज हन् स—कुहोश्चुः, अभ्यासे चर्च,
जि हन् स—सन्वल्लघुनि०, सन्यतः,
जिघान् स—अभ्यासाच्च, 'अज्झनगमां' से दीर्घ,
जिघांस—नश्चाऽपदान्तस्य झलि, धातुसंज्ञा,
जिघांस शप् ति—अतो गुणे।

(2) जङ्घन्यते
हन् यङ्—धातोरेकाचो हलादे०,
ज हन् य—सन्यङोः, पूर्वोऽभ्यासः, हलादिः शेषः, कुहोश्चुः, अभ्यासे चर्च,
ज न् हन् य—नुगतोऽनुनासि०, अभ्यासाच्च,
जङ्घन्य—नश्चाऽपदा०, अनुस्वारस्य ययि०, धातुसंज्ञा,
जङ्घन्य शप् त—अनुदात्तङित आत्मनेपदम्, अतो गुणे।

(3) जघन अहम्
हन् णल्—लिट्, उ०पु० एकवचन, परस्मैपदानां णलतुसु०, चुटू, हलन्त्यम्,
ज ह न् अ—द्वित्व, अभ्यासकार्य,
जघन—णलुत्तमो वा, अणित् पक्ष।

अभ्यास०—अभ्यास का निमित्त जो प्रत्यय, उसके परे रहते हन् अङ्ग का जो अभ्यास, उससे उत्तर हन् के हकार को कुत्व होता है। अतः निम्नलिखित में कुत्व नहीं होता—

(4) जिहननीयिषति
हननम् आत्मन इच्छति—'सुप आत्मनः०'
हनन क्यच्—अनुबन्धलोप,
हननीय—धातुसंज्ञा,
हननीयितुम् इच्छति—धातोः कर्मणः समा०,
हननीय सन्—इट्, 'सन्यङोः' से द्वित्व,
जिहननीयिष—अभ्यासकार्य, कुहोश्चुः, अभ्यासे चर्च, सन्वल्लघुनि०, सन्यतः, यहाँ अभ्यास का निमित्त 'सन्' है, उसके परे रहते 'हन्' अङ्ग नहीं है, अपितु 'हननीय' शब्द है। जिसके परे रहते हन् अङ्ग है, वह 'ल्युट्' प्रत्यय है, जो अभ्यास का निमित्त नहीं है; अतः अभ्यास (जि) से उत्तर हकार को कुत्व नहीं हुआ है।
जिहननीयिषति—धातुसंज्ञा, शप्, अतो गुणे।

(3453) हेरचङि *56* (2531)

हिनोतेर्हकारस्याभ्यासादुत्तरस्य कवगदिशो भवति अचङि। प्रजिघीषति। प्रजेघीयते। प्रजिघाय। अचङीति किम्? प्राजीहयद् दूतम्। अचङीति शक्यमकर्तुम्। कथम्? चङ्यभ्यासनिमित्ते णौ हिनोतिरङ्गं भवति, तत्राभ्यासनिमित्ते प्रत्यये हेरङ्गस्येति विज्ञायमाने प्राप्तिरेव नास्ति? तत्क्रियते ज्ञापकार्थम्। एतज्ज्ञाप्यते–'हेरचङि' इति चङोऽन्यत्र हेर्ण्यधिकस्यापि कुत्वं भवतीति। तेन प्रजिघाययिषतीति सिद्धं भवति।

अर्थ—अभ्यास से उत्तर 'हि' अङ्ग के हकार के स्थान पर कुत्व होता है, यदि चङ् परे न हो।

उदा० (1) प्रजिघीषति
हि सन्—धातोः कर्मणः समान०,
हि स—'एकाच उपदेशेऽनुदा०' से इट् का निषेध, 'इको झल्' से सन् किद्वत्, 'सार्वधातुकार्धधातु०' से गुण प्राप्त, 'क्ङिति च' से गुण का निषेध,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ही स—'अज्झनगमां सनि' से दीर्घादेश,
जि ही स—सन्यङोः, ह्रस्वः, कुहोश्चुः अभ्यासे चर्च,
जिघीष—कुत्व, आदेशप्रत्यययोः, धातुसंज्ञा,
प्र जिघीष शप् ति—अतो गुणे।

(2) प्रजेघीयते
हि यङ्—
ही य—अकृत् सार्वधातु०,
हि ही य—सन्यङोः, पूर्वोऽभ्यासः, ह्रस्वः,
जि ही य—कुहोश्चुः, अभ्यासे चर्च,
जेघीय—गुणो यङ्लुकोः, हेरचङि, धातुसंज्ञा,
प्र जेघीयते—अनुदात्तङित आत्मने०, शप्।

(3) प्रजिघाय
हि णल्—लिट्, तिप्,
जि हाय् अ—अचो ञ्णिति, एचोऽयवायावः, द्वित्व, रूपातिदेश, कुहोश्चुः, अभ्यासे चर्च,
प्र जिघाय—हेरचङि।

अचङी०—चङ् परे हो तो कुत्व नहीं होता है।

(4) प्राजीहयद्
हि णिच्—अनुबन्धलोप, वृद्धि, आय्,
हायि—धातुसंज्ञा,
हाय् इ चङ् त्—लुङ्, 'णिश्री०' से चङ्,
हय् अ त्—णेरनिटि, णौ चङ्युपधाया ह्रस्वः,
हि हयत्—चङि, णौ कृतं स्थानिवद्भवति,
जिहयत्—कुहोश्चुः, अभ्यासे चर्च, सन्वल्लघु०,
प्र अ जीहयत्—दीर्घो लघोः, अट्।

अचङी०—'अचङि' का ग्रहण व्यर्थ है। क्यों ? 'चङ्' अभ्यास का निमित्त है, 'हि' अङ्ग से 'णि' परे है। चूँकि अभ्यास के निमित्त प्रत्यय के परे रहते ही अभ्यास से उत्तर 'हि' अङ्ग को कुत्व होता है; अतः यहाँ कुत्व की प्राप्ति ही नहीं। इसलिये 'अचङि' पद व्यर्थ होकर ज्ञापित होता है कि 'हेरचङि' से 'चङ्' से अतिरिक्त स्थल पर भी 'हि' अङ्ग को कुत्व होता है। तब निम्नलिखित में कुत्व हो जाता है—

(5) प्रजिघायिषति
हि णिच्—चुटू, हलन्त्यम्,
हायि—धातुसंज्ञा,
हायि सन्—धातोः कर्मणः समान०,
हायि इट् स—आर्धधातुकस्येड् वलादेः, गुण, अय् आदेश,
जिहायिष—सन्यङोः, अभ्यास कार्य, कुत्व, धातुसंज्ञा,
प्रजिघायिषति—शप्, अतो गुणे।

'जिहायिष' इस दशा में अभ्यास का निमित्त 'सन्' प्रत्यय है, 'हि' अङ्ग से उत्तर सन् नहीं है; अपितु 'णि' प्रत्यय है, जो अभ्यास का निमित्त नहीं है। अतः 'हि' अङ्ग को कुत्व प्राप्त नहीं था। ज्ञापक से कुत्व होता है।

(3454) सन्लिटोर्जेः *57* (2331)

सनि लिटि च प्रत्यये जेरङ्गस्य योऽभ्यासस्तस्मादुत्तरस्य कवर्गादेशो भवति। जिगीषति। जिगाय। सन्लिटोरिति किम्? जेजीयते। जिनातेः सम्प्रसारणे कृते यद्यपि जिर्भवति, तथापि लाक्षणिकत्वात्तस्य ग्रहणं न भवति। जिज्यतुः, जिज्युः-इत्येव भवति।

अर्थ—अभ्यास से उत्तर 'जि' अङ्ग के स्थान पर कवर्ग आदेश होता है, सन् तथा लिट् प्रत्यय के परे रहते।

उदा० (1) जिगीषति
जि सन्—धातोः कर्मणः०,
जी स—अज्झनगमां सनि,
जि जी स—सन्यङोः, पूर्वोऽभ्यासः, ह्रस्वः,
जिगीष—कुत्व, आदेशप्रत्यययोः, धातुसंज्ञा,
जिगीष शप् ति—शप्, अतो गुणे।

(2) जिगाय
जि णल्—लिट्,
जै अ—अचो ञ्णिति,
जाय् अ—एचोऽयवायावः,
जि जाय् अ—द्वित्व, रूपातिदेश,
जि गाय् अ—कुत्व।

सन्लिटो०—सन् तथा लिट् परे रहते 'जि' अङ्ग को कुत्व होता है।

(3) जेजीयते
जि यङ्—'सन्यङोः' से द्वित्व,
जि जि य—पूर्वोऽभ्यासः,
जे जीय—गुणोः यङ्लुकोः, धातुसंज्ञा, 'जि' अङ्ग को कुत्व नहीं हुआ,
जेजीयते—शप्, अतो गुणे।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जिनाते०—लक्षणप्रतिपदोक्त परिभाषा के द्वारा 'जि जये' का ही यहाँ ग्रहण होता है; क्रैयादिक 'जि' का ग्रहण नहीं होता। सम्प्रसारण करने पर 'जि' बनता है, उसके लाक्षणिक होने से यहाँ उसका ग्रहण नहीं होता है।

(4) जिज्यतुः
जि अतुस्—लिट्, प्र०पु० द्विवचन,
जि ज्यतुस्—द्वित्व, 'एरनेकाचो०' से यण्।

(5) जिज्युः
जि उस्—लिट्, प्र०पु० बहुवचन, शेष पूर्ववत्।

(3455) विभाषा चेः *58* (2525)

चिनोतेरङ्गस्य सन्लिटोरभ्यासादुत्तरस्य विभाषा कवर्गादेशो भवति। चिचीषति, चिकीषति। चिकाय, चिचाय। 'सन्लिटोः' इत्येव-चेचीयते।

अर्थ—अभ्यास से उत्तर 'चि' अङ्ग को कवर्ग आदेश विकल्प से होता है, सन् तथा लिट् परे रहते।

उदा० (1) चिचीषति
चि सन्—'अज्झनगमां०' से दीर्घ,
ची स—सन्यङोः,
चिचीष—ह्रस्वः, षत्व, धातुसंज्ञा,
चिचीषति—शप्, अतो गुणे।

(2) चिकीषति
अभ्यास से उत्तर 'चि' अङ्ग को कुत्व हो गया है।

(3) चिचाय
चि णल्—चुटू, हलन्त्यम्, अचो ञ्णिति, आय् आदेश,
चाय् अ—द्वित्व, रूपातिदेश,
चिचाय् अ—रूप बना।

(4) चिकाय
पक्ष में 'चि' अङ्ग को कुत्व हो गया है।

सन्लि०—सन् तथा लिट् के परे रहते ही 'चि' को कुत्व होता है।

(5) चेचीयते
चि यङ्—प्रत्यय,
चिचिय—द्वित्व,
चेचीय—गुणो यङ्लुकोः, अकृत् सार्वधातु०, धातुसंज्ञा, 'चि' अङ्ग को कुत्व नहीं हुआ,
चेचीयते—'त', शप्, अतो गुणे।

'चि' धातु की रूपमाला (लिट् लकार) नीचे दिखाई जा रही है—

परस्मैपद

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	चिकाय	चिक्युतुः	चिक्युः
	चिचाय	चिच्यतुः	चिच्युः
मध्यम पुरुष	चिकयिथ	चिक्यथुः	चिक्य
	चिकेथ	चिच्यथुः	चिच्य
	चिचयिथ		
	चिचेथ		
उत्तम पुरुष	चिकाय, चिकय	चिक्यिव	चिक्यिम
	चिचाय, चिचय	चिच्यिव	चिच्यिम

आत्मनेपद

	एकवचन	द्विवचन	बहुवचन
प्रथम पुरुष	चिक्ये	चिक्याते	चिक्यिरे
	चिच्ये	चिच्याते	चिच्यिरे
मध्यम पुरुष	चिक्यिषे	चिक्याथे	चिक्यिढ्वे
	चिच्यिषे	चिच्याथे	चिच्यिढ्वे
			चिक्यिध्वे
			चिच्यिध्वे
उत्तम पुरुष	चिक्ये	चिक्यिवहे	चिक्यिमहे
	चिच्ये	चिच्यिवहे	चिच्यिमहे

(3456) न क्वादेः *59* (2875)

कवगर्दिर्घातोश्चजोः कवगर्दिशो न भवति। कूजो। वर्त्तते खर्जः। गर्जः। कूज्यं भवता, खर्ज्यं गर्ज्यं भवता।

अर्थ—कवर्ग है आदि में जिसके, ऐसे अङ्ग के चकार व जकार के स्थान पर कवर्ग नहीं होता है।

उदा० (1) कूजः
कूज् अ—विभक्तिकार्य।

(2) खर्जः
खर्ज् अ सु—पूर्ववत्।

(3) गर्जः
गर्ज् अ सु—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(4) कूज्यम्
कूज् य सु—विभक्तिकार्य।
(5) खर्ज्यम् (पूर्ववत्)।
(6) गर्ज्यम् (पूर्ववत्)।
सर्वत्र 'चजोः कु घिण्ण्यतोः' से कवर्ग प्राप्त था।

(3457) अजिव्रज्योश्च *60* (2876)

अजि, व्रजि-इत्येतयोश्च कवर्गादिशो न भवति। समाजः। उदाजः। व्रजि-परिव्राजः। परिव्राज्यम्। 'अजेस्तु'-'अजेर्व्यघञपोः' (2.4.56) इति वीभावस्य विधानात् ण्यति नास्त्युदाहरणम्।

अर्थ—अज् तथा व्रज् अङ्गों के चकार व जकार के स्थान पर कवर्ग आदेश नहीं होता है।

उदा० (1) समाजः
सम् अज् घञ्—'समुदोरजः पशुषु' से 'घञ्', 'हलश्च'
सम् आज् अ—पूर्ववत् प्राप्त कुत्व का निषेध,
समाज सु—विभक्तिकार्य।

(2) उदाजः
उद् अज् घञ्—पूर्ववत्।

(3) परिव्राजः
परिव्रज् घञ्—पूर्ववत्।

(4) परिव्राज्यम्
परि व्रज् ण्यत्—कुत्व का निषेध।

अजेस्तु०—'अजेर्व्यघञपोः' से 'वी' आदेश का विधान होने से 'ण्यत्' परे रहते उदाहरण प्राप्त नहीं होता है।

(3458) भुजन्युब्जौ पाण्युपतापयोः *61* (2877)

भुज, न्युब्ज-इत्येतौ शब्दौ निपात्येते पाणौ, उपतापे च। भुज्यतेऽनेनेति भुजः = पाणिः। 'हलश्च' (3.3.121) इति घञ्। तत्र कुत्वाभावः गुणाभावश्च निपात्यते। 'उब्ज आर्जवे' (धा०पा० 1304), न्युब्जिताः शेरतेऽस्मिन्निति न्युब्जः। उपतापः = रोगः, तथैव घञि कुत्वाभावो निपात्यते। पाण्युपतापयोरिति किम्? भोगः, समुद्गः।

अर्थ—'हाथ' तथा 'रोग' अर्थों में यथासंख्य 'भुज' तथा 'न्युब्ज' शब्द निपातनसिद्ध हैं।

उदा० (1) भुजः
भुज्यतेऽनेनेति—'हलश्च' से 'घञ्', कुत्व नहीं हुआ।
भुज् अ—गुण का अभाव, सु।

(2) न्युब्जः
न्युब्जिताः शेरतेऽस्मिन्निति—पूर्ववत् 'घञ्' व कुत्व का अभाव।

पाण्युप०—हाथ तथा रोग—इन अर्थों में निपातन होता है।

(3) भोगः
भुज् घञ्—लघूपधगुण, कुत्व, सु।

(4) समुद्गः
सम् उब्ज् घञ्—कुत्व,
समुब्ग् अ—बकार को दकार,
समुद्ग—सु।

(3459) प्रयाजानुयाजौ यज्ञाङ्गे *62* (2878)

प्रयाज, अनुयाज-इत्येतौ निपात्येते यज्ञाङ्गे। पञ्च प्रयाजाः (आश्व०श्रौ० 1.4.2)। पञ्चानुयाजाः। त्वमग्ने प्रयाजानां पश्चात् त्वं पुरस्तात्। यज्ञाङ्गे इति किम्? प्रयागः। अनुयागः। प्रयाजानुयाजग्रहणं प्रदर्शनार्थम्-अन्यत्राप्येवम्प्रकारे कुत्वं न भवति। एकादशोपयाजाः (ऐ०ब्रा० 2.1.8), उपांशुयाजमन्तरा यजति, अष्टौ पत्नीसंयाजा भवन्ति (ऐ०ब्रा० 3.3.2) ऋतुयाजैश्चरन्ति (ऐ०ब्रा० 2.9.9)-इत्येवमादि सिद्धं भवति।

अर्थ—यज्ञकार अङ्ग—अर्थ गम्यमान हो तो 'प्रयाज' तथा 'अनुयाज' शब्द निपातनसिद्ध हैं।

उदा० (1) प्रयाजः
प्र यज् घञ्—अत उपधायाः, कुत्व प्राप्त,
प्रयाज् अ सु—निपातन से कुत्व का अभाव।

(2) अनुयाजः
अनु यज् घञ्—पूर्ववत्।

यज्ञाङ्ग०—यज्ञ का अङ्ग इस अर्थ में ही पूर्वोक्त शब्द निपातित हैं।

(3) प्रयागः
यहाँ कुत्व का अभाव नहीं हुआ।

(4) अनुयागः (पूर्ववत्)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयाजा०—प्रयाज तथा अनुयाज—इन शब्दों का ग्रहण प्रदर्शन के लिए है। अन्य स्थलों पर भी इसी प्रकार कुत्व नहीं होता है। यथा—

(5) उपयाजाः, (6) उपांशुयाजम्, (7) पत्नीसंयाजा, (8) ऋतुयाजैः।

(3460) वञ्चेर्गतौ *63* (2879)

वञ्चेरङ्गस्य गतौ वर्त्तमानस्य कवर्गादेशो न भवति। वञ्च्यं वञ्चयन्ति वणिजः। गताविति किम्? वङ्कं काष्ठम्। कुटिलमित्यर्थः।

अर्थ—वञ्च् अङ्ग के चकार के स्थान पर कवर्ग आदेश नहीं होता है, गति अर्थ हो तो।

उदा० (1) वञ्च्यम्
वञ्च् ण्यत्—गति अर्थ है, प्राप्त कुत्व का निषेध,
वञ्च्य सु—विभक्तिकार्य।

गताव०—गति अर्थ में ही सूत्रोक्त कुत्व का अभाव होता है।

(2) वङ्कं काष्ठम्
वञ्च् घञ्—'हलश्च' से 'घञ्',
वन्क् अ—अनुबन्धलोप, कुत्व हो गया, अनुस्वार, परसवर्ण,
वङ्कम्—सु।

(3461) ओक उचः के *64* (2880)

उचेर्धातोः के प्रत्यये 'ओकः' इति निपात्यते। किं पुनरत्र निपात्यते? कुत्वम्, गुणश्च। न्योकः शकुन्तः। न्योको गृहम्। कर्त्तरि इगुपधलक्षणः कः प्रत्ययः (3.1.135)। अधिकरणादौ तु कारकान्तरे 'घञर्थे कविधानाम्' (वा०) इति। किमर्थं पुनरयं घञ्येव न व्युत्पाद्यते? स्वरार्थमन्तोदात्तोऽयमिष्यते, घञि सत्याद्युदात्तः स्यात्। दिवौकसः, जलौकसः—इत्येवमादावप्यसुनि प्रत्यये 'उणादयो बहुलम्' (3.3.1) इति कुत्वं द्रष्टव्यम्।

अर्थ—'क' प्रत्यय परे रहते 'उच्' धातु से कुत्व होकर 'ओक' शब्द निपातनसिद्ध है। यहाँ कुत्व व गुणकार्यों का निपातन होता है।

उदा० (1) न्योकः
नि उच् क—इगुपधज्ञाप्रीकिरः कः,
नि ओक् अ—गुण, कुत्व,
न्योक सु—यण्।
इसी प्रकार—न्योको वृक्षः।

कर्त्तरि०—कर्त्ता अर्थ में इगुपधलक्षण 'क' होता है। अधिकरण आदि अन्य कारक में 'घञर्थे कविधानम्' से प्रत्यय होता है।

किमर्थ०—तब क्यों न उक्त 'ओक' शब्द घञ् के अर्थ में व्युत्पादित किया जाता है? स्वर के लिए यह अन्तोदात्त इष्ट है। 'घञ्' करने पर आद्युदात्त हो जाता है।

दिवौ० (2) दिवौकसः
यहाँ पर भी 'असुन्' प्रत्यय करने पर 'उणादयो बहुलम्' से कुत्व होना चाहिए।

(3) जलौकसः (पूर्ववत्)।

(3462) ण्य आवश्यके *65* (2881)

ण्ये परतः आवश्यकेऽर्थे कवर्गो न भवति। अवश्यपाच्यम्। अवश्यवाच्यम्। अवश्यरेच्यम्। आवश्यके इति किम्? पाक्यम्। वाक्यम्। रेक्यम्।

अर्थ—'आवश्यक' अर्थ में वर्त्तमान अङ्ग के चकार व जकार के स्थान पर कवर्ग आदेश नहीं होता है, 'ण्य' प्रत्यय परे रहते।

उदा० (1) अवश्यपाच्यम्
अवश्यम् पच् ण्यत्—ऋहलोर्ण्यत्, कृत्याश्च, मयूरव्यंसका० से समास, अनुबन्ध।
अवश्यपाच् य—'अवश्यमः०' से मलोप, प्राप्त कुत्व का निषेध,
अवश्यपाच्य—सु।

(2) अवश्यवाच्यम्
अवश्यम् वच् ण्यत्—पूर्ववत्।

(3) अवश्यरेच्यम्
अवश्यम् रिच् ण्यत्—लघूपधगुण।

आवश्यक०—आवश्यक अर्थ में ही कुत्वनिषेध होता है।

(4) पाक्यम्
पच् ण्यत्—'अवश्य' अर्थ नहीं है, अतः कुत्वनिषेध नहीं हुआ।

(5) वाक्यम्
वच् ण्यत्—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(6) रेक्यम्
पूर्ववत् कुत्व, लघुपधगुण।

(3463) यजयाचरुचप्रवचर्चश्च *66* (2882)

यज, याच, रुच, पवच, ऋच-इत्येतेषां ण्ये परतः कवर्गादिशे न भवति। यज-याज्यम्। याच-याच्यम्। रुच-रोच्यम्। प्रवच-प्रवाच्यम्। ऋच-अर्च्यम्। ऋदुपधादपि ऋचेरत एव निपातनाद् ण्यद्भवति। प्रवचग्रहणं शब्दसंज्ञार्थम्। प्रवाच्यो नाम पाठविशेषोपलक्षितो ग्रन्थोऽस्ति। अपरे पुनराहुः-उपसर्गपूर्वस्य नियमार्थम्-प्रपूर्वस्यैव वचेरशब्दसंज्ञायां कुत्वप्रतिषेधो यथा स्यात्, अन्योपसर्गपूर्वस्य मा भूदिति। 'अविवाक्यमहः' इति पठन्ति, एतत्तु विशेष एवेष्यते-दशरात्रस्य यद् दशममहः। अन्यत्राविवाच्यमेव भवति। *ण्यति प्रतिषेधे त्यजेरुपसंख्यानम्* (म० भा०)। त्याज्यम्।

अर्थ—यज, याच, रुच, प्रवच तथा ऋच—इन अङ्गों के चकार व जकार के स्थान पर कवर्ग आदेश नहीं होता है, 'ण्य' परे रहते।

उदा० (1) याज्यम्
यज् ण्यत्—प्राप्त कुत्व का अभाव, चुटू, हलन्त्यम्,
याज्य सु—अत उपधायाः।

(2) याच्यम्
यच् ण्यत्—पूर्ववत्।

(3) रोच्यम्
रुच् ण्यत्—पुगन्तलघूपधस्य च, शेष पूर्ववत्।

(4) प्रवाच्यम्
प्र वच् ण्यत्—अत उपधायाः, कुत्वनिषेध।

(5) अर्च्यम्
ऋच् ण्यत्—लघूपधगण, शेष पूर्ववत्।

ऋदुप०—ऋच् धातु से 'ण्यत्' को बाध कर 'ऋदुपधाच्चाक्लृपि०' से 'क्यप्' होना चाहिए था, परन्तु निपातन से 'ण्यत्' ही होता है।

प्रवच०—'वचोऽशब्दसञ्ज्ञायाम्' इससे पूर्वतः कुत्व के निषेध प्राप्त होने पर 'प्रवच्' का यहाँ पाठ किसलिए है ?

'प्रवच' का ग्रहण शब्दसंज्ञा के लिए है। 'प्रवाच्य' नामक पाठ-विशेष से उपलक्षित ग्रन्थ का नाम है।

अपरे०—अन्य विद्वान् ऐसा कहते हैं—प्र पूर्वक 'वच्' का ग्रहण नियम के लिए है। यह नियम करता है कि अशब्द संज्ञा में प्र पूर्वक वच् से ही कुत्व का निषेध होता है; अन्य उपसर्ग-पूर्वक वच् से कुत्वनिषेध नहीं होता। यथा—

अविवाक्यमहः—ऐसा पाठ करते हैं। यह विशेष होता है। अन्यत्र 'अविवाच्यम्' ही होता है।

ण्यति०—त्यज् अङ्ग को कुत्व नहीं होता है, ण्यत् परे रहते।

(6) त्याज्यम्
त्यज् ण्यत्—अत उपधायाः, कुत्वनिषेध, सु।

(3464) वचोऽशब्दसंज्ञायाम् *67* (2883)

वचोऽशब्दसंज्ञायां ण्यति परतः कवर्गो न भवति। वाच्यमाह। अवाच्यमाह। अशब्दसंज्ञायामिति किम्? अवधुषितं वाक्यमाह।

अर्थ—शब्दसंज्ञा के विषय को छोड़कर अन्यत्र 'वच्' अङ्ग के चकार को कुत्व नहीं होता है, 'ण्य' परे रहते।

उदा० (1) वाच्यम्
वच् ण्यत्—कुत्वनिषेध,
वाच्य सु—अत उपधायाः।

(2) अवाच्यम्
नञ् वच् ण्यत्—पूर्ववत्।

अशब्द०—शब्दसंज्ञा के विषय को छोड़कर अन्यत्र कुत्व-निषेध होता है।

(3) वाक्यम् (अवधुषितम् आह)
यहाँ कुत्व हो गया है।

(3465) प्रयोज्यनियोज्यौ शक्यार्थे *68* (2884)

प्रयोज्य, नियोज्य-इत्येतौ शब्दौ शक्यार्थे निपात्येते। शक्यः प्रयोक्तुं प्रयोज्यः। शक्यो नियोक्तुं नियोज्यः। शक्यार्थ इति किम्? प्रयोग्यः, नियोग्यः।

अर्थ—'शक्य' अर्थ गम्यमान हो तो 'प्रयोज्य' तथा 'नियोज्य' शब्द निपातनसिद्ध हैं।

उदा० (1) प्रयोज्यः
शक्यः प्रयोक्तुम्—'ण्यत्' हुआ,
प्र युज् य—अनुबन्धलोप, लघूपधगुण, सु।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(2) नियोज्यः
शक्यो नियोक्तुम्—पूर्ववत् ण्यत्, कुत्वाभाव।

शक्यार्थे०—शक्य अर्थ में ही पूर्वोक्त शब्दों का निपातन होता है।

(3) प्रयोग्यः
प्र युज् ण्यत्—यहाँ शक्य अर्थ न रहने से कुत्वनिषेध नहीं हुआ,
प्रयोग् य—लघूपधगुण, सु।

(4) नियोग्यः
'प्रयोग्य' की तरह।

(3466) भोज्यं भक्ष्ये *69* (2885)

भोज्यं निपात्यते भक्ष्येऽभिधेये। भोज्य ओदनः। भोज्या यवागूः। इह भक्ष्यमभ्यवहार्यमात्रम्। भक्ष्य इति किम् ? भोग्यः कम्बलः।

अर्थ—'भक्ष्य' अर्थ में 'भोज्य' शब्द निपातनसिद्ध है।

उदा० (1) भोज्यः
भुज् ण्यत्—लघूपधगुण, कुत्वनिषेध,
भोज् य—सु।
इसी प्रकार—भोज्या यवागूः।

भक्ष्य०—भक्ष्य अर्थ में ही 'भोज्य' शब्द निपातित है।

(2) भोग्यः कम्बलः
यहाँ 'भक्ष्य' अर्थ न होने से कुत्वनिषेध नहीं हुआ। शेष पूर्ववत्।

(3467) घोर्लोपो लेटि वा *70* (3584)

यहाँ शब्दों का दो बार पाठ नहीं हो। क्यों ? जितने शब्दों के द्वारा अर्थ का बोध होता है, उतने शब्दों का प्रयोग करना चाहिए। यथा—

अहिरहिरहिः, बुध्यस्व बुध्यस्व बुध्यस्व।

क्रिया०—क्रियासमभिहार अर्थ में द्वित्व होता है। यथा—

(10) स भवान् लुनीहि लुनीहीत्येवाऽयं लुनाति।

आभीक्ष्ण्ये०—आभीक्ष्ण्य अर्थ में द्वित्व होता है।

(12) भुक्त्वा भुक्त्वा व्रजति
(13) भोजं भोजं व्रजति

नित्य०—'नित्य इत्येव सिद्धम्' यह कहा जा चुका है।
डाचि०—डाच् प्रत्यय परे रहते द्वित्व होता है।

(14) पटपटाकरोति—पटपटायते।

अव्यक्ता०—अव्यक्तानुकरणलक्षण 'डाच्' प्रत्ययान्त को द्वित्व होता है। अतः निम्नलिखित में द्वित्व नहीं होता है—

(15) द्वितीयाकरोति
'द्वितीय' शब्द अव्यक्तानुकरण नहीं है। अतः 'डाच्' परे रहते द्वित्व नहीं हुआ।

(16) तृतीयाकरोति (पूर्ववत्)।

तदर्थ०—इसलिए ही कुछ विद्वान् 'डाचि बहुलम्' यह पाठ करते हैं।

पूर्व०—पूर्व तथा प्रथम शब्दों को अर्थातिशय की विवक्षा में द्वित्व होता है।

(17) पूर्वं पूर्वं पुष्प्यन्ति
द्वित्व हुआ।
(18) प्रथमं प्रथमं पच्यन्ते (पूर्ववत्)।

आतिशा०—पक्ष में आतिशयिक भी उपलब्ध होता है। 'सर्वस्य द्वे' से द्वित्व का विधान है। यहाँ 'विभाषा' का अधिकार होने से विकल्प से द्वित्व होता है। जब द्वित्व नहीं होता तो पक्ष में आतिशयिक भी रहता है। यथा—
पूर्वतरं पुष्प्यन्ति, प्रथमतरं पच्यन्ते।

डतर०—समान सम्प्रधारणा वाले डतर व डतम प्रत्ययान्त शब्दों को स्त्रीनिगद भाव में द्वित्व होता है।

(19) कतरा कतरा अनयोराढ्यता
उभाविमावाढ्यौ—यहाँ 'कतरा' में 'किंयत्तदोः' से 'डतरच्' हुआ है। द्वित्व हुआ।

(20) कतमा कतमा एषामाढ्यता
यहाँ 'वा बहूनां जाति०' से 'डतमच्' हुआ है। द्वित्व हुआ।

डतर०—डतर-डतम प्रत्ययान्त से अन्यत्र भी द्वित्व उपलब्ध होता है। यथा—
उभाविमावाढ्यौ, कीदृशी कीदृशी अनयोराढ्यता।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तथा०—स्त्रीनिगद भाव से अन्यत्र भी द्वित्व प्राप्त होता है। यथा—

उभाविमावाढ्यौ। कतरः कतरोऽनयोर्विभवः।

कर्मव्यतिहार अर्थ में सर्वनाम को द्वित्व होता है। बहुलता से समास की तरह होता है। जिस पक्ष में समास नहीं होता है, उस पक्ष में पूर्व पद को प्रथमा एकवचन होता है।

(21) अन्यम् अन्यम् इमे ब्राह्मणा भोजयन्ति
समास नहीं हुआ।

(22) अन्योऽन्यम् इमे ब्राह्मणा भोजयन्ति।
समास हुआ।

(23) अन्योऽन्यस्य ब्राह्मणा भोजयन्ति।
पूर्ववत्। षष्ठ्यन्त का समास।

(24) इतरेतरं भोजयन्ति।
समास हुआ।

(25) इतरेतरस्य भोजयन्ति।
षष्ठ्यन्त का समास।

स्त्रीनपुं०—स्त्रीलिङ्ग तथा नपुंसक लिङ्ग में जो सर्वनाम शब्द कर्मव्यतिहार अर्थ में वर्तमान है, उसके उत्तर पद को विकल्प से 'आम्' आदेश होता है।

(26) अन्योऽन्याम् इमे ब्राह्मण्यौ भोजयतः
'अन्याम्' का द्विर्वचन, विभक्ति को 'आम्' आदेश, पूर्व पद को बहुलता से ह्रस्वादेश।

(27) अन्योऽन्यं भोजयतः
उत्तर पद को भी पूर्ववत् ह्रस्वादेश।

(28) इतरेतरां भोजयतः
समासवद्भाव होने पर सर्वनाम शब्द को पुंवद्भाव होकर 'टाप्' की निवृत्ति हो जाती है।

(29) इतरेतरं भोजयतः
समास।

(30) अन्योऽन्याम् ब्राह्मणकुले भोजयतः
नपुंसक लिङ्ग का रूप है। पूर्ववत् उत्तर पद को 'आम्' हुआ है।

(31) इतरेतरामिमे ब्राह्मणकुले भोजयतः
नपुंसकलिङ्ग में।

(32) इतरेतरमिमे ब्राह्मणकुले भोजयतः (पूर्ववत्)।

(3627) अकृच्छ्रे प्रियसुखयोरन्यतरस्याम् *13* (2148)

प्रिय, सुख-इत्येतयोरन्यतरस्यां द्वे भवतः अकृच्छ्रे द्योत्ये। कृच्छ्रम् = दुःखम्, तदभावोऽकृच्छ्रम्। प्रियप्रियेण ददाति। सुखसुखेन ददाति। प्रियेण ददाति। सुखेन ददाति। अखिद्यमानो ददातीत्यर्थः। अकृच्छ्र इति किम्। प्रियः पुत्रः। सुखो रथः।

अर्थ—अकृच्छ्र अर्थ गम्यमान हो तो प्रिय तथा सुख—इन शब्दों को विकल्प से द्वित्व होता है।

उदा० (1) प्रियप्रियेण ददाति
प्रियेण प्रियेण—सुप् का लुक्,
प्रियप्रिय टा—टाङसिङसामिनात्०।

(2) सुखसुखेन ददाति
सुखेन सुखेन—पूर्ववत्।

(3) प्रियेण ददाति
पक्ष में द्वित्व नहीं हुआ।

(4) सुखेन ददाति
पक्ष में द्वित्व नहीं हुआ।

अकृच्छ्रे—अकृच्छ्र अर्थ में ही द्वित्व होता है।
प्रियः पुत्रः, सुखो रथः
द्वित्व नहीं हुआ।

(3628) यथास्वे यथायथम् *14* (2149)

यो य आत्मा यद्यदात्मीयं तत्तद्यथास्वं तस्मिन् यथायथमिति निपात्यते। यथाशब्दस्य द्विर्वचनं नपुंसकलिङ्गता च निपात्यते। ज्ञाताः सर्वे पदार्था यथायथम्। यथास्वभावमित्यर्थः। सर्वेषां तु यथायथं यथात्मीयमित्यर्थः।

अर्थ—'यथायथम्' शब्द निपातनसिद्ध है। 'यथा' शब्द को द्वित्व तथा उसे नपुंसकलिङ्गता—ये कार्य निपातन से होते हैं।

उदा० (1) यथायथम्
यथा यथा—ह्रस्वो नपुंसके०,
यथायथ सु—विभक्तिकार्य।

(3629) द्वन्द्वं रहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु *15* (2150)

'द्वन्द्वम्' इति द्विशब्दस्य द्विर्वचनं पूर्वपदस्याम्भावः अत्वं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चोत्तरपदस्य निपात्यते रहस्य, मर्यादावचन, व्युत्क्रमण, यज्ञपात्र-प्रयोग, अभिव्यक्ति-इत्येतेषु अर्थेषु। तत्र रहस्यं द्वन्द्वशब्दवाच्यम्, इतरे विषयभूताः। द्वन्द्वं मन्त्रयन्ते। मर्यादावचने-मर्यादा = स्थित्यनतिक्रमः। आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते। मात्रा पुत्रेण मिथुनं गच्छति, पौत्रेण, तत्पुत्रेणापीति मर्यादार्थः। व्यत्क्रमणे-द्वन्द्वं व्युत्क्रान्ताः। व्युत्क्रमणम् = भेदः, पृथगवस्थानम्। द्विवर्गसम्बन्धेन पृथगवस्थिता द्वन्द्वं व्युत्क्रान्ता इत्युच्यन्ते। यज्ञपात्रप्रयोगे-द्वन्द्वं न्यञ्चि यज्ञपात्राणि प्रयुनक्ति धीरः। अभिव्यक्तौ-द्वन्द्वं नारदपर्वतौ। द्वन्द्वं संकर्षणवासुदेवौ। द्वावप्यभिव्यक्तौ साहचर्येणेत्यर्थः। अन्यत्रापि द्वन्द्वमित्येतद् दृश्यते, तदर्थं योगविभागः कर्त्तव्यः। द्वन्द्वं युद्धं वर्त्तते। द्वन्द्वानि सहते धीरः। 'चार्थे द्वन्द्व' (2.2.29) इति।

अर्थ—रहस्य, मर्यादावचन, व्युत्क्रमण, यज्ञपात्र, प्रयोग तथा अभिव्यक्ति—इन अर्थों में 'द्वन्द्व' शब्द निपातनसिद्ध है। यहाँ 'द्वि' शब्द को द्वित्व, पूर्व पद को 'अम्' आदेश तथा उत्तर पद को अकार—ये कार्य निपातन से होते हैं।

रहस्य द्वन्द्व शब्दवाच्य है; अन्य विषयभूत हैं।

उदा० (1) द्वन्द्वं मन्त्रयन्ते
द्वि औ द्वि औ—समासवत्, सुप् का लुक्,
द्वि द्वि—पूर्व पद को 'अम्' आदेश तथा उत्तर पद को अकार,
द्वम् द्व सु—अनुस्वार, परसवर्ण।

(2) आचतुरं हीमे पशवो द्वन्द्वं मिथुनायन्ते

'आङ्मर्यादाभि०' से अव्ययीभाव हुआ। 'अव्ययीभावे शरत्०' से समासान्त 'टच्' हुआ।

(3) द्वन्द्वं व्युत्क्रान्ताः
वयुत्क्रमण = भेद, पृथक् अवस्थान। द्विवर्ग के सम्बन्ध से पृथक् अवस्थित द्वन्द्व व्युत्क्रान्त हैं।

(4) द्वन्द्वं न्यञ्चि यज्ञपात्राणि
यज्ञपात्र-प्रयोग में 'द्वन्द्व' हुआ।

(5) द्वन्द्वं नारदपर्वतौ
अभिव्यक्ति में 'द्वन्द्व' शब्द।
इसी प्रकार 'द्वन्द्वं सङ्कर्षणवासुदेवौ।

अन्यत्र०—अन्य स्थलों पर भी 'द्वन्द्वम्' शब्द दृष्टिगोचर होता है। अतः योगविभाग करना चाहिए। यथा—

द्वन्द्वं युद्धं वर्त्तते, द्वन्द्वानि सहते वीरः, चार्थे द्वन्द्वः। इत्यादि।

(3630) पदस्य *16* (401)

'पदस्य' इत्ययमधिकारः प्रागपदान्ताधिकारात् (8.3.55)। यदित ऊर्ध्वमनुक्रमिष्यामः पदस्येत्येवं तद्वेदितव्यम्। वक्ष्यति-'संयोगान्तस्य लोपः' (8.2.23)। पचन्। यजन्। पदस्येति किम्? पचन्तौ। यजन्तौ। वक्ष्यमाणवाक्यापेक्षया 'पदस्य' इत्यधिकृतस्य षष्ठ्यर्थव्यवस्था द्रष्टव्या-क्वचित् स्थानषष्ठी, क्वचिदवयवषष्ठी।

अर्थ—यह अधिकार है। 'अपदान्तस्य मूर्धन्यः' (8.3.55) से पूर्व तक यह अधिकार चलता है। यहाँ से लेकर जो कहा जायेगा, वह 'पद' के स्थान पर होता है—ऐसा जानना चाहिए। आगे कहा जायेगा—संयोगान्तस्य लोपः। उदाहरण आगे देखें।

वक्ष्यमा०—वक्ष्यमाण वाक्य के आपेक्ष से 'पदस्य' इस अधिकृत शब्द की षष्ठ्यर्थ व्यवस्था होती है। यथा—कहीं स्थानषष्ठी जाननी चाहिए तथा कहीं अवयवषष्ठी।

(3631) पदात् *17* (402)

पदादित्ययमधिकारः प्राक् 'कुसने च सुप्यगोत्रादौ' (8.1.69) इत्येतस्माद्। यदित ऊर्ध्वमनुक्रमिष्यामः पदादित्येवं तद्वेदितव्यम्। वक्ष्यति-'आमन्त्रितस्य' (8.1.19)। आमन्त्रितस्य पदात्परस्यानुदात्तादेशो भवतीति। पचसि देवदत्त। पदादिति किम्? देवदत्त पचसि।

अर्थ—यह अधिकार है, जो 'कुत्सने च सुप्य०' (8.1.69) से पूर्व तक चलता है। यहाँ से आगे जो कहा जायेगा, वह 'पद से उत्तर' को होता है—ऐसा जानना चाहिए। आगे 'आमन्त्रितस्य' आदि सूत्रों का पाठ किया जायेगा। इसका अर्थ है कि पद से उत्तर आमन्त्रितसंज्ञक को अनुदात्त आदेश होता है। यथा—पचति देवदत्त।

पदादि०—'पदात्' इस प्रकार इसलिए कहा गया है कि 'देवदत्त पचसि' यहाँ न हो।

(3632) अनुदात्तं सर्वमपादादौ *18* (403)

'अनुदात्तम्' इति च, 'सर्वम्' इति च; 'अपादादौ' इति च-एतत्त्रयमधिकृतं वेदितव्यमापादपरिसमाप्तेः। इत उत्तरं यद्वक्ष्यामः 'अनुदात्तं सर्वमपादादौ' इत्येवं तद्वेदितव्यम्। वक्ष्यति-'आमन्त्रितस्य च' (8.1.19) इति। पचसि देवदत्त। अपादादाविति किम्? यत्ते नियतं रजसं मृत्यो अनवधृष्यम् (अथ० 8.2.10)। 'बहुवचनस्य वस्नसौ'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(8.1.21)। ग्रामो वः स्वम्। जनपदो नः स्वम्। अपादाविति किम्?

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं शत्रुमर्दनः॥

पादग्रहणेनात्र ऋक्पादः, श्लोकपादश्च गृह्यते। सर्वग्रहणं सर्वमनूद्यमानं विधीयमानं चानुदात्तं यथा स्यादिति। तेन युष्मदस्मदादेशानामपि वाक्यभेदेनानुदात्तत्वं विधीयते। युष्मदस्मदादेशाश्च सर्वत्र सुबन्तस्य पदस्य यथा स्युः–यत्रापि स्वादिपदं पदसंज्ञं भवति। ग्रामो वां दीयते। जनपदो नौ दीयते।

अर्थ—इस पाद की समाप्तिपर्यन्त अनुदात्तम्, सर्वम् तथा अपादादौ—इन तीन पदों का अधिकार चलता है। यहाँ से आगे जो कहा जायेगा, वहाँ इन तीनों का अधिकार उपस्थित होता है—ऐसा जानना चाहिए। आगे 'आमन्त्रितस्य च' इत्यादि सूत्रों का पाठ किया जायेगा।

उदा० (1) पचसि देवदत्त
यहाँ अनुदात्त हुआ।

अपादा०—पाद के आदि में यह नहीं होता है। यथा—
यत्ते नियतं रजसं भृत्यो अनवधृष्यम्।
इसी प्रकार आगे कहा जायेगा—'बहुवचनस्य वस्नसौ'।

(3) ग्रामो वः स्वम्
'वस्' आदेश हुआ।

(4) जनपदो नः स्वम्
'नस्' आदेश हुआ।

अपादा०—पाद के आदि में ये आदेश नहीं होते हैं। यथा—

रुद्रो विश्वेश्वरो देवो युष्माकं कुलदेवता।
स एव नाथो भगवानस्माकं शत्रुमर्दनः॥

यहाँ 'युष्माकम्' तथा 'अस्माकम्' शब्द पाद के आदि में वर्तमान हैं। अतः इनके स्थान पर प्राप्त यथासंख्य 'वस्' तथा 'नस्' आदेश नहीं होते हैं।

पाद०—'पाद' शब्द से ऋक्पाद तथा श्लोकपाद—दोनों का ग्रहण होता है। 'सर्वम्' पद का ग्रहण करने से कहा जाता हुआ तथा विधीयमान सभी को अनुदात्त होता है। अतः युष्मद् व अस्मद् आदेशों को भी वाक्यभेद से अनुदात्त स्वर का विधान किया जाता है।

युष्मद०—युष्मद् तथा अस्मद् आदेश सम्पूर्ण सुबन्त पद के स्थान पर हों। जहाँ भी सु आदि प्रत्यय होकर पदसंज्ञा होती है। यथा—

ग्रामो वां दीयते। जनपदो नौ दीयते।

(3633) आमन्त्रितस्य च *19* (3654)

आमन्त्रितस्य पदस्य पदात्परस्यापादादौ वर्त्तमानस्य सर्वस्यानुदात्तो भवति। पचसि देवदत्त। आमन्त्रिताद्युदात्तत्वे प्राप्ते वचनम्। *समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः* (म०भा०)। इह मा भूवन्–अयं दण्डो हरानेन, ओदनं पच तव भविष्यति, ओदनं पच मम भविष्यति। इह च यथा स्यात्–इह देवदत्त माता ते कथयति। नद्यास्तिष्ठति कूले। शालीनां ते ओदनं दास्यामि इति। आमन्त्रितान्तं तिङन्तं युष्मदस्मदादेशाश्च यस्मात्पराणि न तेषां सामर्थ्यमिति तदाश्रया निघातयुष्मदस्मदादेशा न स्युः, 'समर्थः पदविधिः' (2.1.1) इति वचनात्।

अर्थ—पद से उत्तर पदसंज्ञक, आमन्त्रितसंज्ञक जो पाद के आदि में वर्त्तमान नहीं है, उस सम्पूर्ण को अनुदात्त होता है।

उदा० (1) पचसि देवदत्त।
(2) पचसि यज्ञदत्त।

आम०—आमन्त्रित को आद्युदात्त प्राप्त होने पर यह विधान है।

समान०—समान वाक्य में निघात (अर्थात् सर्वानुदात्त) युष्मद् व अस्मद् आदेश होते हैं। अतः यहाँ नहीं होते हैं। यथा—
अयं दण्डो, हराऽनेन, औदनं पच तव भविष्यति—
यहाँ एकवाक्य में न होने से नहीं होता है।
इसी प्रकार—ओदन पच मम भविष्यति।

इह च०—निम्नलिखित में होता है—
(3) इह देवदत्त माता ते कथयति।
(4) शालीनां ते ओदनं दास्यामि।

आमन्त्रि०—आमन्त्रिन्त तिङन्त तथा युष्मद् व अस्मद् के आदेश जिससे पर होते हैं, उनकी सामर्थ्य नहीं होती है। अतः तदाश्रय युष्मद् व अस्मद् आदेश निघात नहीं होते हैं। 'समर्थः पदविधिः' कहा गया है।

(3634) युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ *20* (404)

युष्मद्-अस्मद्–इत्येतयोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथा-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संख्यं वाम्, नौ–इत्येतावादेशौ भवतस्तौ चानुदात्तौ। 'पदस्य पदादनुदात्तं सर्वमपादादौ' इति सर्वमिह सम्बध्यते। ग्रामो वां स्वम्। जनपदो नौ स्वम्। ग्रामो वां दीयते। जनपदो नौ दीयते। ग्रामो वां पश्यति। जनपदो नौ पश्यति। एकवचनबहुवचनान्तयोरादेशान्तरविधानाद् द्विवचनान्तयोरेतावादेशौ विज्ञायेते। षष्ठीचतुर्थीद्वितीयास्थयोरिति किम्? ग्रामे युवाभ्यां कृतम्। स्थग्रहणं श्रूयमाणविभक्त्यर्थम्। इह मा भूत्–इति युष्मत्पुत्र इति।

अर्थ—षष्ठी, चतुर्थी तथा द्वितीया में स्थित युष्मद् व अस्मद्—इन शब्दों के स्थान पर यथासंख्य 'वाम्' तथा 'नौ' आदेश होते हैं और ये अनुदात्त होते हैं।

यहाँ पदस्य, पदात्, अनुदात्तम्, सर्वम्, अपादादौ—इन सबका अनुवर्त्तन है।

उदा० (1) ग्रामो वां स्वम्
युवयोः के स्थान पर 'वाम्' हुआ।

(2) जनपदो नौ स्वम्
आवयोः के स्थान पर 'नौ' हुआ।

(3) ग्रामो वां दीयते
चतुर्थी में 'वाम्' हुआ।

(4) जनपदो नौ दीयते
चतुर्थी में 'नौ' आदेश।

(5) गामो वां पश्यति
'युवाम्' के स्थान पर।

(6) जनपदो नौ पश्यति
'आवाम्' के स्थान पर 'नौ' हुआ।

एकवच०—एकवचन में 'ते मयावेकवचनस्य' से ते, मे तथा बहुवचन में 'बहुवचनस्य वस्नसौ' सूत्र से वस् तथा नस्—इस प्रकार अन्य आदेशों का विधान होने से द्विवचनान्त युष्मद् व अस्मद् शब्दों को ये आदेश (वाम्, नौ) होते हैं।

षष्ठी—षष्ठी, चतुर्थी तथा द्वितीया—इन विभक्तियों में ही 'वाम्' तथा 'नौ' आदेश होते हैं। यथा—
ग्रामे युवाभ्यां कृतम्।

युवाभ्याम् पाद के आदि में स्थित नहीं है, द्विवचन का रूप है, परन्तु तृतीया विभक्ति का रूप होने से इसके स्थान पर 'वाम्' नहीं हुआ।

स्थ०—'स्थ' शब्द का ग्रहण श्रूयमाण विभक्ति के लिए है। अतः निम्नलिखित में नहीं होता है—
युष्मत्पुत्रः।

(3635) बहुवचनस्य वस्नसौ *21* (405)

बहुवचनान्तयोर्युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्यथासंख्यं वस्, नस्–इत्येतावादेशौ भवतः। ग्रामो वः स्वम्। जनपदो नः स्वम्। ग्रामो वो दीयते। जनपदो नो दीयते। ग्रामो वः पश्यति। जनपदो नः पश्यति।

अर्थ—षष्ठी, चतुर्थी तथा द्वितीया में स्थित, अपादादि में वर्त्तमान बहुवचनान्त युष्मद् तथा अस्मद् शब्दों के स्थान पर 'वस्' तथा 'नस्' आदेश होते हैं और वे अनुदात्त होते हैं।

उदा० (1) ग्रामो वः स्वम्
'युष्माकम्' के स्थान पर।

(2) जनपदो नः स्वम्
'अस्माकम्' के स्थान पर।

(3) ग्रामो वो दीयते
चतुर्थी विभक्ति।

(4) जनपदो नो दीयते
चतुर्थी विभक्ति।

(5) ग्रामो वः पश्यति
'युष्मान्' के स्थान पर।

(6) जनपदो नः पश्यति
'अस्मान्' के स्थान पर।

(3636) तेमयावेकवचनस्य *22* (406)

युष्मदस्मदोरेकवचनान्तयोः षष्ठीचतुर्थीस्थयोर्यथासंख्यं ते, मे–इत्येतावादेशौ भवतः। ग्रामस्ते स्वम्। ग्रामो मे स्वम्। ग्रामस्ते दीयते। ग्रामो मे दीयते। द्वितीयान्तस्यादेशान्तरविधानसामर्थ्यात्षष्ठीचतुर्थ्योरेवायं योगः।

अर्थ—षष्ठी, चतुर्थी तथा द्वितीया में स्थित, जो पादादि में वर्त्तमान नहीं हैं, ऐसे एकवचनान्त युष्मद् तथा अस्मद् शब्दों के स्थान पर 'ते' तथा 'मे' आदेश होते हैं और वे अनुदात्त होते हैं।

उदा० (1) ग्रामस्ते स्वम्
'तव' के स्थान पर।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(2) ग्रामो मे॒ स्वम्
'मम' के स्थान पर।

(3) ग्रामस्ते॒ दीयते
'तुभ्यम्' के स्थान पर।

(4) ग्रामो मे॒ दीयते
'मह्यम्' के स्थान पर।

द्वितीया०—द्वितीयान्त युष्मद् तथा अस्मद् शब्दों के स्थान पर 'त्वा' तथा 'मा' आदेशों के विधानसामर्थ्य से यहाँ षष्ठी तथा चतुर्थी विभक्तियों के उदाहरण दिखाये जा रहे हैं।

(3637) त्वामौ द्वितीयायाः *23* (407)

'एकवचनस्य' इति वर्तते। द्वितीयाया यदेकवचनं तदन्तयो-र्युष्मदस्मदोर्यथासंख्यं त्वा, मा–इत्येतावादेशौ भवतः। ग्रामस्त्वा॒ पश्यति। ग्रामो मा॒ पश्यति।

अर्थ—'एकवचनस्य' का अनुवर्त्तन है। द्वितीया विभक्ति में स्थित, जो पाद के आदि में वर्त्तमान नहीं हैं, ऐसे एकवचनान्त युष्मद् तथा अस्मद् शब्दों के स्थान पर यथासंख्य 'त्वा' तथा 'मा' आदेश होते हैं और वे अनुदात्त होते हैं।

उदा० (1) ग्रामस्त्वा॒ पश्यति
'त्वाम्' के स्थान पर।

(2) ग्रामो मा॒ पश्यति
'ग्राम्' के स्थान पर।

(3638) न चवाहाहैवयुक्ते *24* (408)

च, वा, ह, अह, एव–एभिर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति। पूर्वेण प्रकरणेन प्राप्ताः प्रतिषिद्ध्यन्ते। ग्रामस्तव च स्वम्, ग्रामो मम च स्वम्, युवयोश्च स्वम्, आवयोश्च स्वम्; युष्माकं च स्वम्; अस्माकं च स्वम्। ग्रामस्तुभ्यं च दीयते, ग्रामो मह्यं च दीयते; युवाभ्यां च दीयते, आवाभ्यां च दीयते; युष्मभ्यं च दीयते, अस्मभ्यं च दीयते। ग्रामस्त्वां च पश्यति, ग्रामो मां च पश्यति; युवां च पश्यति, आवां च पश्यति; युष्मांश्च पश्यति, अस्मांश्च पश्यति। वा–ग्रामस्तव वा स्वम्, ग्रामो मम वा स्वम्; युवयोर्वा स्वभ्, आवयोर्वा स्वम्; युष्माकं वा स्वम्, अस्माकं वा स्वम्। ग्रामस्तुभ्यं वा दीयते, ग्रामो मह्यं वा दीयते; युवाभ्यां वा दीयते, आवाभ्यां वा दीयते; युष्मभ्यं वा दीयते, अस्मभ्यं वा दीयते। ग्रामस्त्वां वा पश्यति, ग्रामो मां वा पश्यति; युवां वा पश्यति, आवां वा पश्यति; युष्मान् वा पश्यति, अस्मान्वा पश्यति। ह–ग्रामस्तव ह स्वम्, ग्रामो मम ह स्वम्; युवयोर्ह स्वम्, आवयोर्ह स्वम्; युष्माकं ह स्वम्, अस्माकं ह स्वम्। ग्रामस्तुभ्यं ह दीयते, गामो मह्यं ह दीयते; युवाभ्यां ह दीयते, आवाभ्यां ह दीयते; युष्मभ्यं ह दीयते, अस्मभ्यं ह दीयते। ग्रामस्त्वां ह पश्यति, ग्रामो मां ह पश्यति। युवां ह पश्यति, आवां ह पश्यति; युष्मान् ह पश्यति, अस्मान् ह पश्यति। अह–ग्रामस्तवाह स्वम्, ग्रामो ममाह स्वम्; युवयोरह स्वम्, आवयोरह स्वम्; युष्माकमह स्वम्, अस्माकमह स्वम्, ग्रामस्तुभ्यमह दीयते, ग्रामो मह्यमह दीयते; युवाभ्यामह दीयते, आवाभ्यामह दीयते; युष्मभ्यामह दीयते, अस्मभ्यमह दीयते। ग्रामस्त्वामह पश्यति, ग्रामो मामह पश्यति, युवामह पश्यति, आवामह पश्यति, युष्मानह पश्यति, अस्मानह पश्यति। एव–ग्रामस्तवैव स्वम्, ग्रामो ममैव स्वम्; युवयोरेव स्वम्, आवयोरेव स्वम्; युष्माकमेव स्वम्, अस्माकमेव स्वम्; ग्रामस्तुभ्यमेव दीयते, ग्रामो मह्यमेव दीयते; युवाभ्यामेव दीयते, आवाभ्यामेव दीयते; युष्मभ्यमेव दीयते, अस्मभ्यमेव दीयते। ग्राम-स्त्वामेव पश्यति, ग्रामो मामेव पश्यति; युवामेव पश्यति, आवामेव पश्यति; युष्मानेव पश्यति, अस्मानेव पश्यति। युक्तग्रहणं साक्षाद्योगप्रतिपत्त्यर्थम्। युक्तयुक्ते प्रतिषेधो न भवति। ग्रामश्च ते स्वम्, नगरं च मे स्वम्।

अर्थ—च, वा, ह, अह तथा एव—इन शब्दों से युक्त होने पर युष्मद् तथा अस्मद् शब्दों के स्थान पर विहित वाम् तथा नौ आदि आदेश नहीं होते हैं।

उदा० **(क) चशब्देन युक्ते—**

1. ग्रामस्तव च स्वम्।	2. ग्रामो मम च स्वम्।
3. युवयोश्च स्वम्।	4. आवयोश्च स्वम्।
5. युष्माकं च स्वम्।	6. अस्माकं च स्वम्।
7. ग्रामस्तुभ्यं च दीयते।	8. ग्रामो मह्यं च दीयते।
9. युवाभ्यां च दीयते।	10. आवाभ्यां च दीयते।
11. युष्मभ्यं च दीयते।	12. अस्मभ्यं च दीयते।
13. ग्रामस्त्वां च पश्यति।	14. ग्रामो मां च पश्यति।
15. युवां च पश्यति।	16. आवां च पश्यति।
17. युष्मांश्च पश्यति।	18. अस्मांश्च पश्यति।

(ख) वाशब्देन युक्ते—

19. ग्रामस्तव वा स्वम्।	20. ग्रामो मम वा स्वम्।
21. युवयोर्वा स्वम्।	22. आवयोर्वा स्वम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

23. युष्माकं वा स्वम्। 24. अस्माकं वा स्वम्।
25. ग्रामस्तुभ्यं वा दीयते। 26. ग्रामो मह्यं वा दीयते।
27. युवाभ्यां वा दीयते। 28. आवाभ्यां वा दीयते।
29. युष्मभ्यं वा दीयते। 30. अस्मभ्यं वा दीयते।
31. ग्रामस्त्वा वा पश्यति। 32. ग्रामो वा मां पश्यति।
33. युवां वा पश्यति। 34. आवां वा पश्यति।
35. युष्मान् वा पश्यति। 36. अस्मान्वा पश्यति।

(ग) हशब्देन युक्ते—

37. ग्रामस्तव ह स्वम्। 38. ग्रामो मम ह स्वम्।
39.युवयोर्ह स्वम्। 40. आवयोर्ह स्वम्।
41.युष्माकं ह स्वम्। 42. अस्माकं ह स्वम्।
43.ग्रामस्तुभ्यं ह दीयते। 44. ग्रामो मह्यं ह दीयते।
45.युवाभ्यां ह दीयते। 46. आवाभ्यां ह दीयते।
27.युष्मभ्यं ह दीयते। 48. अस्मभ्यं ह दीयते।
49.ग्रामस्त्वां ह दीयते। 50. ग्रामो मां ह पश्यति।
51.युवां ह पश्यति। 52. आवां ह पश्यति।
53.युष्मान् ह पश्यति। 54. अस्मान् ह पश्यति।

(घ) अहशब्देन युक्ते—

55.ग्रामस्तवाह स्वम्। 56. ग्रामो ममाह स्वम्।
57.युवयोरह स्वम्। 58. आवयोरह स्वम्।
59.युष्माकमह स्वम्। 60. अस्माकमह स्वम्।
61.ग्रामस्तुभ्यमह दीयते। 62. ग्रामो मह्यमह दीयते।
63.युवाभ्यामह दीयते। 64. आवाभ्यामह दीयते।
65.युष्मभ्यमह दीयते। 66. अस्मभ्यमह दीयते।
67.ग्रामस्त्वामह पश्यति। 68. ग्रामो मामह पश्यति।
69.युवामह पश्यति। 70. आवामह पश्यति।
71.युष्मानह पश्यति। 72. अस्मानह पश्यति।

(ङ) एवशब्देन युक्ते—

73.ग्रामस्तवैव स्वम्। 74. ग्रामो ममैव स्वम्।
75.युवयोरेव स्वम्। 76. आवयोरेव स्वम्।
77.युष्माकमेव स्वम्। 78. अस्माकमेव स्वम्।
79.ग्रामस्तुभ्यमेव दीयते। 80. ग्रामो मह्यमेव दीयते।
81.युवाभ्यामेव दीयते। 82. आवाभ्यामेव दीयते।
83.युष्मभ्यमेव दीयते। 84. अस्मभ्यमेव दीयते।
85.ग्रामस्त्वामेव पश्यति। 86. ग्रामो मामेव पश्यति।
87.युवामेव पश्यति। 88. आवामेव पश्यति।
89.युष्मानेव पश्यति। 90. अस्मानेव पश्यति।

यहाँ एकवचन में ते, मे आदेश, द्विवचन में वाम्, नौ आदेश तथा बहुवचन में वस्, नस् आदेश प्राप्त थे।

युक्त०—सूत्र में 'युक्त' शब्द का ग्रहण साक्षात् योग के ज्ञान के लिए है। तब निम्नलिखित में प्रतिषेध नहीं होता है—

(91) ग्रामश्च ते स्वम्, (92) नगरं च मे स्वम्।

(3639) पश्यार्थैश्चानालोचने *25* (409)

पश्यार्थाः = दर्शनार्थाः, दर्शनम् = ज्ञानम्, आलोचनम् = चक्षुर्विज्ञानम्। तैः पश्यार्थैरनालोचने वर्तमानैर्युक्ते युष्मदस्मदोर्वान्नावादयो न भवन्ति। ग्रामस्तव स्वं समीक्ष्यागतः, ग्रामो मम स्वं समीक्ष्यागतः, ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः, ग्रामो मह्यं दीयमानं समीक्ष्यागतः, ग्रामस्त्वां समीक्ष्यागतः, ग्रामो मां समीक्ष्यागतः। अनालोचन इति किम्? ग्रामस्त्वा पश्यति, ग्रामो मा पश्यति। *पश्यार्थैर्युक्तयुक्तेऽपि च प्रतिषेध इष्यते*। तथा चैवोदाहृतम्।

अर्थ—अनालोचन अर्थ में वर्त्तमान पश्यार्थ शब्दों से युक्त युष्मद् और अस्मद् शब्दों के स्थान पर विहित 'वाम्' तथा 'नौ' आदि आदेश नहीं होते हैं।

उदा० (1) ग्रामस्तव स्वं समीक्ष्यागतः
'ते' आदेश प्राप्त था।

(2) ग्रामो मम स्वं समीक्ष्यागतः
'मे' प्राप्त था।

(3) ग्रामस्तुभ्यं दीयमानं समीक्ष्यागतः
'ते' प्राप्त था।

(4) ग्रामो मह्यं दीयमानं समीक्ष्यागतः
'मे' प्राप्त था।

(5) ग्रामस्त्वां समीक्ष्यागतः
'त्वा' प्राप्त था।

(6) ग्रामो मां समीक्ष्यागतः
'मा' आदेश प्राप्त था।

अनालो०—**आलोचन** अर्थ में ही 'वाम्' आदि आदेशों का निषेध होता है।

(7) ग्रामस्त्वा पश्यति
'त्वा' आदेश हुआ।

(8) ग्रामो मा पश्यति
'मा' आदेश हुआ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3640) सपूर्वायाः प्रथमाया विभाषा *26* (410)

विद्यमानपूर्वात् प्रथमान्तात् पदादुत्तरयोर्युष्मदस्मदोर्विभाषा वाऽऽवादयो न भवन्ति। ग्रामे कम्बलस्ते स्वम्, ग्रामे कम्बलस्तव स्वम्, ग्रामे कम्बलो मे स्वम्, ग्रामे कम्बलो मम स्वम्। ग्रामे कम्बलस्ते दीयते, ग्रामे कम्बलस्तुभ्यं दीयते; ग्रामे कम्बलो मे दीयते, ग्रामे कम्बलो मह्यं दीयते। ग्रामे छात्रास्त्वा पश्यन्ति, ग्रामे छात्रास्त्वां पश्यन्ति; ग्रामे छात्रा मा पश्यन्ति, ग्रामे छात्रा मां पश्यन्ति। सपूर्वाया इति किम्? कम्बलस्ते स्वम्, कम्बलो मे स्वम्। प्रथमाया इति किम्? कम्बलो ग्रामे ते स्वम्। कम्बलो ग्रामे मे स्वम्। *युस्मदस्मदोर्विभाषा अनन्वादेश इति वक्तव्यम्* (म० भा०)। इह मा भूत्–अथो ग्रामे कम्बलस्ते स्वम्, अथो ग्रामे कम्बलो मे स्वम्। अपर आह–*सर्व एव वाऽऽवादयोऽनन्वादेशे विभाषा वक्तव्याः* (म० भा०)। कम्बलस्ते स्वम्, कम्बलस्तव स्वम्; कम्बलो मे स्वम्, कम्बलो मम स्वम्। अनन्वादेश इति किम्? अथो कम्बलस्ते स्वम्, अथो कम्बलो मे स्वम्। न तर्हीदानीमिदं वक्तव्यम्–'सपूर्वायाः प्रथमायाः विभाषा' इति? वक्तव्यं च। किं प्रयोजनम्? अन्वादेशार्थम्, अन्वादेशे हि विभाषा यथा स्यात्। अथो ग्रामे कम्बलस्ते स्वम्, अथा ग्रामे कम्बलस्तव स्वम्; अथो ग्रामे कम्बलो मे स्वम्, अथो ग्रामे कम्बलो मम स्वम्।

अर्थ—विद्यमान् पूर्व प्रथमान्त पद से उत्तर युष्मद् तथा अस्मद् शब्दों के स्थान पर 'वाम्' तथा 'नौ' आदि आदेश विकल्प से नहीं होते हैं।

उदा० (1) ग्रामे कम्बलस्ते स्वम्
'ते' हुआ है।

(2) ग्रामे कम्बलस्तव स्वम्
आदेश नहीं हुआ।

(3) ग्रामे कम्बलो मे स्वम्
'मे' हुआ।

(4) ग्रामे कम्बलो मम स्वम्
आदेश अभाव पक्ष।

(5) ग्रामे कम्बलस्ते दीयते
'ते' आदेश पक्ष।

(6) ग्रामे कम्बलस्तुभ्यं दीयते
आदेश अभाव।

(7) ग्रामे कम्बलो मे दीयते
आदेश पक्ष।

(8) ग्रामे कम्बलो मह्यं दीयते
आदेश अभाव।

(9) ग्रामे छात्रास्त्वा पश्यन्ति
आदेश पक्ष।

(10) ग्रामे छात्रास्त्वां पश्यन्ति
आदेश अभाव।

(11) ग्रामे छात्रा मा पश्यन्ति
आदेश पक्ष।

(12) ग्रामे छात्रा मां पश्यन्ति
आदेश अभाव पक्ष।

सपूर्वा०—विद्यमान पूर्व प्रथमान्त पद से उत्तर 'वाम्' आदि आदेश विकल्प से नहीं होते हैं।

(13) कम्बलस्ते स्वम्

प्रथमान्त 'कम्बलः' शब्द से पूर्व कोई पद नहीं है। अतः पाक्षिक आदेश नहीं हुआ, नित्य हुआ।

(14) कम्बलो मे स्वम् (पूर्ववत्)।

प्रथमा०—विद्यमानपूर्व प्रथमान्त पद से उत्तर 'वाम्' आदि आदेश विकल्प से नहीं होते हैं।

(15) कम्बलो ग्रामे ते स्वम्

'ग्रामे' पद सपूर्व है, परन्तु प्रथमान्त नहीं है। अतः इससे उत्तर पाक्षिक आदेश नहीं हुआ।

(16) कम्बलो ग्रामे मे स्वम् (पूर्ववत्)।

युष्मद०—अन्वादेश से अन्य स्थलों पर युष्मद् व अस्मद् के स्थान पर विकल्प से 'वाम्' आदि आदेश होते हैं। अतः निम्नलिखित में विभाषा नहीं होती है—

(17) अथो ग्रामे कम्बलस्ते स्वम्।
(18) अथो ग्रामे कम्बलो मे स्वम्।

अपर०—दूसरे कहते हैं कि सभी 'वाम्' तथा 'नौ' आदि आदेश विकल्प से होते हैं, अन्वादेश से अन्यत्र।

(19) कम्बलस्ते स्वम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आदेश हुआ।

(20) कम्बलस्तव स्वम्
आदेश अभाव।

(21) कम्बलो मे स्वम्।
आदेश पक्ष।

(22) कम्बलो मम स्वम्
आदेश अभाव।

अनन्वा०—अन्वादेश से अन्यत्र ही विभाषा होती है।

(23) अथो कम्बलस्ते स्वम्
नित्य आदेश।

(24) अथो कम्बलो मे स्वम्
नित्य आदेश।

न तर्हि०—तब 'सपूर्वायाः प्रथमायाः विभाषा' इस प्रकार नहीं कहना चाहिए। अवश्य कहना चाहिए। क्या प्रयोजन है? अन्वादेश के लिए यह पाठ करना चाहिए। अन्वादेश में विभाषा हो जाय।

(25) अथो ग्रामे कम्बलस्ते स्वम्।
(26) अथो ग्रामे कम्बलस्तव स्वम्।
(27) अथो ग्रामे कम्बलो मे स्वम्।
(28) अथो ग्रामे कम्बलो मम स्वम्।

(3641) तिङो गोत्रादीनि कुत्सनाभीक्ष्णययोः *27* (3934)

तिङन्तात्पदात्पराणि गोत्रादीनि कुत्सने आभीक्ष्ण्ये चार्थे वर्तमानानि अनुदात्तानि भवन्ति। पचति गोत्रम्। जल्पति गोत्रम्। आभीक्ष्ण्ये-पचतिपचति गोत्रम्। जल्पतिजल्पति गोत्रम्। ब्रुव-पचति ब्रुवम्। जल्पति ब्रुवम्। जल्पतिजल्पति ब्रुवम्। पचतिपचति ब्रुवम्। 'ब्रुवः'-इति ब्रुवः कन्निपातनाद्, वच्यादेशाभावश्च। गोत्र। ब्रुव। प्रवचन। प्रसहन। प्रकथन। प्रत्ययन। प्रचक्षण। प्राय। विचक्षण। अवचक्षण। स्वाध्याय। भूयिष्ठ। *वा नाम* (ग०सू० 178)। नामेत्येतद्वा निहन्यते। पक्षे आद्युदात्तमेव भवति-पचति नाम, पठति नामं। तिङ इति किम्? कुत्सितं गोत्रम्। गोत्रादीनीति किम्? पचति पापम्। कुत्सनाभीक्ष्णययोरिति किम्? खनति गोत्रं समेत्य कूपम्। कुत्सनाभीक्ष्णयग्रहणं च पाठविशेषणं द्रष्टव्यम्। तेनान्यत्रापि गोत्रादिग्रहणेन कुत्सनाभीक्ष्णययोरेव कार्यं भवति (म० भा)।

अर्थ—कुत्सन तथा आभीक्ष्ण्य अर्थों में वर्त्तमान जो तिङन्त पद, उससे उत्तर गोत्रादि शब्द अनुदात्त होते हैं।

उदा० (1) पचति गोत्रम्
अनुदात्त हुआ।

(2) जल्पति गोत्रम् (पूर्ववत्)।
(3) पचतिपचति गोत्रम्
आभीक्ष्ण्य अर्थ में द्वित्व हुआ है।

(4) जल्पतिजल्पति गोत्रम् (पूर्ववत्)।
(5) पचति ब्रुवम्
अनुदात्त हुआ।

(6) जल्पति ब्रुवम् (पूर्ववत्)।
(7) पचतिपचति ब्रुवम्
'आभीक्ष्ण्य' में।

(8) जल्पतिजल्पति ब्रुवम् (पूर्ववत्)।

ब्रुवः०—'ब्रुवः' यह निपातन से 'कन्' हुआ। वच् आदेश का अभाव निपातन से हुआ है।

नामेत्ये०—'नाम' शब्द विकल्प से सर्वानुदात्त होता है।

(9) पचति नाम
अनुदात्त हुआ।
(10) पचति नामं
पक्ष में आद्युदात्त।

तिङ०—तिङन्त पद से उत्तर गोत्र आदि शब्द अनुदात्त होते हैं।

कुत्सितं गोत्रम्—यहाँ 'नाम' तिङन्त से उत्तर नहीं है। अतः अनुदात्त नहीं हुआ।

गोत्रादी०—तिङन्त पद से उत्तर **गोत्र** आदि शब्दों को अनुदात्त होता है।

(11) पचति पापम्
'पचति' इस तिङन्त से उत्तर 'पाप' शब्द है। इसे अनुदात्त नहीं हुआ।

कुत्सना०—**कुत्सना** तथा **आभीक्ष्ण्य** अर्थों में ही गोत्र आदि शब्दों को अनुदात्त होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(12) खनति गोत्रं समेत्य कूपम्

तिङन्त पद 'खनति' है। इससे उत्तर 'गोत्र' शब्द है; परन्तु न तो कुत्सन अर्थ है; न ही आभीक्ष्ण्य अर्थ है। अतः अनुदात्त नहीं हुआ।

कुत्सना०—कुत्सन तथा आभीक्ष्ण्य शब्दों का ग्रहण पाठ-विशेषण जानना चाहिए। तब अन्यत्र भी गोत्र-ग्रहण से कुत्सन तथा आभीक्ष्ण्य अर्थों में कार्य नहीं होता है।

(3642) तिङ्ङतिङः *28* (3935)

तिङन्तं पदमतिङन्तात् पदात्पदात् परमनुदात्तं भवति। देवदत्तः पचति। यज्ञदत्तः पचति। तिङिति किम्? नील-मुत्पलम्। शुक्लं वस्त्रम्। अतिङ इति किम्? भवति पचति।

अर्थ—अतिङन्त पद से उत्तर तिङन्त पद को अनुदात्त होता है।

उदा० (1) देवदत्तः पचति

'देवदत्तः' अतिङन्त पद है। इससे उत्तर 'पचति' तिङन्त पद को अनुदात्त होता है।

(2) यज्ञदत्तः पचति

पूर्ववत् अनुदात्त।

तिङिति०—अतिङन्त पद से उत्तर तिङन्त पद को अनुदात्त होता है।

(3) नीलम् उत्पलम्

'नीलम्' अतिङन्त पद है। इससे उत्तर 'उत्पलम्' सुबन्त पद है। इसके तिङन्त न होने से अनुदात्त नहीं हुआ। 'नब् विषयस्यानि०' से आद्युदात्त हुआ।

(4) शुक्लं वस्त्रम्

पूर्ववत् अनुदात्त नहीं हुआ।

अतिङ०—अतिङन्त पद से उत्तर तिङन्त पद को अनुदात्त होता है।

(5) भवति पचति

'पचति' तिङन्त पद है, जो तिङन्त 'भवति' से उत्तर है। अतः अनुदात्त नहीं हुआ।

(3643) न लुट् *29* (3936)

पूर्वेणातिप्रसक्ते प्रतिषेधः आरभ्यते। लुडन्तं तिङन्तं नानुदात्तं भवति। श्वः कर्त्ता। श्वः कर्तारौ। मासेन कर्तारः। तासेः परस्य लसार्वधातुकस्यानुदात्तत्वे सति सर्वतासिरे-वोदात्तः। यत्र तु टिलोपः, तत्रोदात्तनिवृत्तिस्वरो भवति।

अर्थ—पूर्व सूत्र के द्वारा अतिप्रसक्त होने पर प्रतिषेध का विधान किया जा रहा है। लुट् प्रत्ययान्त तिङन्त अनुदात्त नहीं होता है।

उदा० (1) श्वः कर्त्ता

कृ तास् डा—टिलोप आदि होकर 'कर्त्ता' बनता है। इसे अनुदात्त नहीं हुआ।

(2) श्वः कर्तारौ (पूर्ववत्)।

(3) मासेन कर्तारः (पूर्ववत्)।

तासेः—तास् से पर लसार्वधातुक के अनुदात्त होने पर सर्वतासि ही उदात्त होता है। जहाँ टि का लोप होता है, वहाँ उदात्त निवृत्तिस्वर होता है।

(3644) निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् *30* (3937)

'न' इति वर्तते। यत्, यदि, हन्त, कुवित्, नेत्, चेत्, चण्, कच्चित्, यत्र-इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवति। यत्करोति, यत्पचति। यदि करोति, यदि पचति। हन्त करोति, हन्त पचति। कुवित्-कुवित्करोति, कुवित्पचति। नेत्-नेज्जिह्मायन्तो नरकं पताम (ऋ०खि० 3.22)। चेत्-स चेद् भुङ्क्ते। स चेदधीते। चण्-णिद्विशिष्टोऽयं चेदर्थे वर्तते। अयं च मरिष्यति। अयं चेन्मरिष्यतीत्यर्थः। समुच्चयादिषु तु यश्चशब्दस्तेन योगेन विधिरयं न भवति। कच्चित् कच्चिद् भुङ्क्ते। कच्चि-दधीते। यत्र यत्र भुङ्क्ते। यत्राधीते। निपातैरिति किम्? यत्कूजति शकटम्। गच्छत्कूजति शकटमित्यर्थः। इण शतरि रूपमेतत्। युक्तमिति किम्? यत्र क्वं च ते मनो दक्षं दधस उत्तरम् (ऋ० 6.16.17)।

अर्थ—'न' का अनुवर्त्तन है। यत्, यदि, हन्त, कुवित्, नेत्, चेत्, चण्, कच्चित् तथा यत्र—इन निपातों से युक्त तिङन्त पद अनुदात्त नहीं होता है।

उदा० (1) यत्करोति

'यत्' से युक्त होने के कारण अनुदात्त नहीं हुआ। मध्योदात्त।

(2) यत्पचति

अनुदात्त नहीं हुआ। 'पच्' को धातुस्वर हुआ।

(3) यदि करोति

अनुदात्त नहीं हुआ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(4) यदि पचति
अनुदात्त नहीं हुआ

(5) हन्त करोति
अनुदात्त नहीं हुआ।

(6) हन्त पचति
अनुदात्त नहीं हुआ।

(7) कुवित् करोति
अनुदात्त नहीं हुआ।

(8) कुवित् पचति
अनुदात्त नहीं हुआ।

(9) नोज्जिह्मायन्तो नरकं पताम (पूर्ववत्)।

(10) स चेद् भुङ्क्ते।
अनुदात्त हुआ।

(11) स चेद् अधीते
अनुदात्त हुआ।

चण्०—णित् विशिष्ट यह चण् 'अव्यय' 'चेत्' अर्थ में होता है।

(12) अयं च मरिष्यति
अनुदात्त नहीं हुआ।

समुच्च०—समुच्चयादि में जो 'च' शब्द, उसके योग से यह विधि नहीं होती है।

(13) कच्चित् कच्चिद् भुङ्क्ते
यहाँ नहीं हुआ।

(14) कच्चिद् अधीते (पूर्ववत्)।

(15) यत्र यत्र भुङ्क्ते (पूर्ववत्)।

(16) यत्राऽधीते (पूर्ववत्)।

निपातै०—निपातसंज्ञक यद् आदि शब्दों से युक्त तिङन्त को अनुदात्त नहीं होता है।

(17) यत्कूजति शकटम्
'यत्' निपात नहीं है। अतः इससे उत्तर तिङन्त पद 'कूजति' को अनुदात्तस्वर का निषेध नहीं हुआ। इण् धातु से शतृ प्रत्यय करने पर 'यत्' शब्द बनता है।

युक्तमि०—युक्त होने पर ही तिङन्त पद को अनुदात्त नहीं होता है।

(18) यत्र क्व च ते मनो दक्षं।

(3645) नह प्रत्यारम्भे *31* (3938)

'नह' इत्येतेन युक्ते प्रत्यारम्भे तिङन्तं नानुदात्तं भवति। चोदितस्यावधीरणे उपालिप्सया प्रतिषेधयुक्तः प्रत्यारम्भः क्रियते। नह भोक्ष्यसे। नहाध्येष्यसे। प्रत्यारम्भ इति किम्? नह वै तस्मिंश्च लोके दक्षिणामिच्छन्ति।

अर्थ—प्रत्यारम्भ में 'नह' शब्द से युक्त होने पर तिङन्त पद अनुदात्त नहीं होता है।

उदा० (1) नह भोक्ष्यसे
'स्य' प्रत्ययस्वर से उदात्त हुआ।

(2) नहाध्येष्यसे
अनुदात्त नहीं हुआ।

प्रत्यारम्भ में ही अनुदात्त स्वर को निषेध होता है।

(3) नह वै तस्मिंश्च लोके दक्षिणाम् इच्छन्ति
यहाँ नहीं हुआ।

(3646) सत्यं प्रश्ने *32* (3939)

'सत्यम्' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति प्रश्ने। सत्यं भक्ष्यसे। सत्यमध्येष्यसे। प्रश्न इति किम्? सत्यं वक्ष्यामि नानृतम् (अथ० 4.9.7)।

अर्थ—प्रश्न अर्थ में 'सत्यम्' शब्द से युक्त होने पर तिङन्त पद को अनुदात्त स्वर नहीं होता है।

उदा० (1) सत्यं भोक्ष्यसे
यहाँ नहीं हुआ।

(2) सत्यम् अध्येष्यसे (पूर्ववत्)।

प्रश्न०—प्रश्न अर्थ में ही यह निषेध होता है।

(3) सत्यं वक्ष्यामि नाऽनृतम्
यहाँ प्रश्न नहीं है। अतः निषेध नहीं हुआ।

(3647) अङ्गाप्रातिलोम्ये *33* (3940)

'अङ्ग' इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये गम्यमाने नानुदात्तं भवति। अङ्ग कुरु। अङ्ग पचं। अङ्ग पठं। अप्रातिलोम्य इति किम्? अङ्ग कूज वृषल3 इदानीं ज्ञास्यसि जाल्म। कूजनमनभिमतमसौ कुर्वन्प्रतिलोमो भवति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—प्रातिलोम्य अर्थ से अन्यत्र अङ्ग शब्द से युक्त तिङन्त पद अनुदात्त होता है।

उदा० (1) अङ्ग कुरु,
उकार प्रत्ययस्वर से उदात्त है।

(2) अङ्ग पचं
धातुस्वर से आद्युदात्त है।

(3) अङ्ग पठं (पूर्ववत्)।

अप्राति०—अप्रातिलोम्य अर्थ में ही अङ्ग शब्द को अनुदात्त नहीं होता है।

(4) अङ्ग कूज वृषल इदानीं ज्ञास्यसि जाल्म
यहाँ अमर्ष अर्थ में होने से अनुदात्त नहीं हुआ।

(3648) हि च *34* (3941)

'हि' इत्यनेन युक्तं तिङन्तमप्रातिलोम्ये नानुदात्तं भवति। स हि कुरु। स हि पचं। स हि पठं। 'अप्रातिलोम्ये' इत्येव-स हि कूज वृषल इदानीं ज्ञास्यति जाल्म।

अर्थ—प्रातिलोम अर्थ से अन्यत्र 'हि' शब्द से युक्त तिङन्त पद अनुदात्त होता है।

उद० (1) स हि कुरु
अनुदात्त नहीं हुआ।

(2) स हि पच
अनुदात्त नहीं हुआ।

(3) स हि पठ
अनुदात्त नहीं हुआ।

अप्राति०—अप्रातिलोम्य अर्थ में ही अनुदात्त का निषेध होता है।

(4) स हि कूज वृषल इदानीं ज्ञास्यसि जाल्म
यहाँ नहीं हुआ।

(3649) छन्दस्यनेकमपि साकाङ्क्षम् *35* (3942)

'हि च' इति वर्तते। छन्दसि विषये हि-युक्तं तिङन्तं साकाङ्क्षमनेकमपि नानुदात्तं भवति, एकमपि। कदाचिद्-एकम्, कदाचिदनेकमित्यर्थः। तत्रानेकं तावत्-अनृतं हि मतो वदति, पाप्मा एनं विपुनाति। तिङन्तद्वयमप्येतत्र निहन्यते। एकं खल्वपि-अग्निर्हि अग्ने उदजयत्। तिङन्तद्वयमपि हिशब्दयुक्तमेतत्। तत्रैकमुदजयदित्यादिरुदात्तम्, अपरमनुदात्तम्। अजाह्यग्नेरजनिष्ट गर्भात् सा वा अपश्यज्जनितारमग्ने (तै० 4.2.10.4)। अजनिष्टेत्याद्युदात्तम् अपश्यदित्यनुदात्तम्।

अर्थ—'हि' का अनुवर्त्तन है। वेद के विषय में 'हि' शब्द से युक्त तिङन्त पद साकांक्ष अनेक हो चाहे एक हो, अनुदात्त नहीं होता है। कभी एक तिङन्त होता है, कभी अनेक होते हैं।

उदा० (1) अनृतं हि मत्तो वदति, पाप्मा एवं विपुनाति
यहाँ दो तिङन्त हैं। दोनों को अनुदात्त नहीं होता है।

(2) अग्निर्हि अग्ने उदजयत्
यहाँ एक तिङन्त है। अनुदात्त नहीं हुआ। उदजयत् आद्युदात्त हुआ। दूसरा अनुदात हुआ।

(3) अजा ह्यग्नेरजनिष्ट गर्भम्, सा वा अपश्यज्जनितारमग्रे।
अजनिष्टा आद्युदात्त हुआ तथा अपश्यत् अनुदात्त।

(3650) यावद्यथाभ्याम् *36* (3943)

'यावत्', 'यथा'-इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं भवति। यावद् भुङ्क्ते। यथा भुङ्क्ते। यावदधीते। यथाधीते। देवदत्तः पचंति यावत्। देवदत्तः पचंति यथा। परेणापि योगे भवति प्रतिषेधः।

अर्थ—यावत् तथा यथा—इन शब्दों से युक्त तिङन्त पद अनुदात्त नहीं होता है।

उदा० (1) यावद् भुङ्क्ते
अनुदात्त-निषेध।

(2) यथा भुङ्क्ते (पूर्ववत्)।
(3) यावद् अधीते (पूर्ववत्)।
(4) यथाऽधीते (पूर्ववत्)।
(5) देवदत्तः पचति यावत्
पर योग होने पर भी अनुदात्त नहीं होता है।
(6) देवदत्तः पचति यथा (पूर्ववत्)।

(3651) पूजायां नानन्तरम् *37* (3944)

'यावत्', 'यथा'-इत्येताभ्यां युक्तमनन्तरं तिङन्तं पूजायां विषये नानुदात्तं न भवति। किं तर्हि? अनुदात्तमेव। यावत्पचति शोभनम्। यथा पचति शोभनम्। यावत् करोति चारु। यथा करोति चारु। पूजायामिति किम्?

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यावद् भुङ्क्ते। यथा भुङ्क्ते। अनन्तरमिति किम्? यावद्देवदत्तः पचति शोभनम्। यथा देवदत्तः करोतिं चारु। पूर्वेणात्र निघातः प्रतिषिध्यते।

अर्थ—पूजा के विषय में यावत् तथा यथा—इन शब्दों से युक्त अनन्तर तिङन्त शब्द अनुदात्त होता है।

उदा० (1) यावत् पचति शोभनम्
अनुदात्त हुआ।

(2) यथा पचति शोभनम् (पूर्ववत्)।

(3) यावत् करोति चारु (पूर्ववत्)।

(4) यथा करोति चारु (पूर्ववत्)।

पूजा०—पूजा अर्थ में ही अनुदात्त-निषेध नहीं होता है।

(5) यावद् भुङ्क्ते
पूजा अर्थ नहीं है। अनुदात्त-निषेध हुआ।

(6) यथा भुङ्क्ते (पूर्ववत्)।

अनन्त०—अनन्तर होने पर ही अनुदात्त होता है।

(7) यावद् देवदत्तः पचति शोभनम्
पूजा अर्थ है; परन्तु 'यावत्' व तिङन्त पद 'पचति' का अनन्तर योग नहीं है। अनुदात्त-निषेध नहीं हुआ।

(8) यथा देवदत्तः करोति चारु (पूर्ववत्)।

(3652) उपसर्गव्यपेतं च *38* (3945)

यावद्यथाभ्यां युक्तं उपसर्गव्यपेतं च पूजायां विषये नानुदात्तं न भवति, किं तर्हि? अनुदात्तमेव भवति। पूर्वमनन्तरमित्युक्तम्, उपसर्गव्यवधानार्थोऽयमारम्भः। यावत् प्रपचति शोभनम्। यथा प्रपचति शोभनम्। यावत्प्रकरोति चारु। यथा प्रकरोति चारु। अनन्तरमित्येव-यावद्देवदत्तः प्रपचति। यथा विष्णुमित्रः प्रकरोति चारु।

अर्थ—पूजा अर्थ में वर्त्तमान यावत् तथा यथा शब्दों से युक्त उपसर्ग से व्यवहित तिङन्त पद को अनुदात्त-निषेध नहीं होता है, अर्थात् अनुदात्त नहीं होता है। पूर्व सूत्र के द्वारा अनन्तर योग की स्थिति में निषेध किया गया था, यह उपसर्ग का व्यवधान होने पर प्रतिषेध-विधान किया जा रहा है।

उदा० (1) यावत् प्रपचति शोभनम्
यहाँ 'प्र' का व्यवधान होने से पूर्व सूत्र की प्रवृत्ति नहीं थी। अनुदात्त-निषेध नहीं हुआ।

(2) यथा प्रपचति शोभनम् (पूर्ववत्)।

(3) यावत् प्रकरोति चारु (पूर्ववत्)।

(4) यथा प्रकरोति चारु (पूर्ववत्)।

अनन्त०—अनन्तर योग में ही यह होता है।

(5) यावद् देवदत्तः प्रपचति
'प्रपचति' तथा 'यावत्' में व्यवधान है।

(6) यथा विष्णुमित्रः प्रकरोति चारु (पूर्ववत्)।

(3653) तुपश्यपश्यताहैः पूजायाम् *39* (3946)

तु, पश्य, पश्यत, अह-इत्येतैर्युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये। तु-माणवकस्तु भुङ्क्ते शोभनम्। पश्य-पश्य माणवको भुङ्क्ते शोभनम्। पश्यत-पश्यत माणवको भुङ्क्ते शोभनम्। अह-अह माणवको भुङ्क्ते शोभनम्। पूजायामिति किम्? पश्य मृगो धावति। 'पूजायाम्' इति वर्तमाने पुनः 'पूजायाम्' इत्युच्यते निघात-प्रतिषेधार्थम्। तद्धि प्रतिषेधस्य प्रतिषेधेन सम्बद्धमिति।

अर्थ—पूजा के विषय में तु, पश्य, पश्यत तथा अह—इन शब्दों से युक्त तिङन्त अनुदात्त नहीं होता है।

उदा० (1) माणवकस्तु भुङ्क्ते शोभनम्
'तु' का योग है।

(2) पश्य माणवको भुङ्क्ते शोभनम् (पूर्ववत्)।

(3) पश्यत माणवको भुङ्क्ते शोभनम् (पूर्ववत्)।

(4) अह माणवको भुङ्क्ते शोभनम् (पूर्ववत्)।

पूजा०—पूजा अर्थ में ही यह प्रतिषेध होता है।

(5) पश्य मृगो धावति
यहाँ पूजा नहीं है।

पूजा०—'पूजायाम्' का अधिकार प्राप्त होने पर भी पुनः 'पूजायाम्' का ग्रहण निघात के निषेध के लिए है। वह प्रतिषेध के प्रतिषेध से सम्बद्ध है।

(3654) अहो च *40* (3947)

'अहो'-इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति पूजायां विषये। अहो देवदत्तः पचति शोभनम्। अहो विष्णुमित्रः करोति चारु। पृथग्योगकरणमुत्तरार्थम्।

अर्थ—पूजा के विषय में 'अहो' शब्द से युक्त तिङन्त पद अनुदात्त नहीं होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदा० (1) अहो देवदत्तः पचति शोभनम्
पूजा अर्थ है, 'अहो' से युक्त है। निघात-प्रतिषेध हुआ।

(2) अहो विष्णुमित्रः करोति चारु (पूर्ववत्)।

पृथग् योग उत्तर शास्त्र के लिए है।

(3655) शेषे विभाषा *41* (3948)

'अहो' इत्यनेन युक्तं तिङन्तं शेषे विभाषा नानुदात्तं भवति। कश्च शेषः? यदन्यत्पूजायाः। कटमहो करिष्यसि। मम गेहमेष्यसि। असूयावचनमेतत्। 'पूजायाम्'-इत्यस्य चानुकृष्टत्वादनधिकारे सिद्धे शेषवचनं विस्पष्टार्थम्।

अर्थ—शेष अर्थों में 'अहो' शब्द से युक्त तिङन्त पद को विकल्प से अनुदात्त नहीं होता है।

पूजा से अतिरिक्त 'शेष' कहलाता है।

उदा० (1) कटमहो करिष्यसि

पूजा अर्थ नहीं है। 'अहो' से युक्त तिङन्त पद 'करिष्यसि' पद है। अनुदात्त-निषेध हुआ।

(2) कटमहो करिष्यसि
पक्ष में अनुदात्त-निषेध नहीं हुआ।

(3) मम गेहम् एष्यसि
यह असूयावचन है। अनुदात्त-निषेध।

(4) मम गेहम् एष्यसि
पक्ष में अनुदात्त-निषेध का प्रतिषेध।

पूजाया०—'पूजायाम्' इसका पूर्वत्र अनुकृष्ट होने से अनधिकार की दशा में सिद्ध होने पर 'शेषे' का ग्रहण स्पष्टता के लिए है।

(3656) पुरा च परीप्सायाम् *42* (3949)

'पुरा'-इत्यनेन युक्तं तिङन्तं परीप्सायामर्थे विभाषा नानुदात्तं भवति। परीप्सा=त्वरा। अधीष्व माणवक। पुरा विद्योतते विद्युत्। पुरा स्तनयति स्तनयित्नुः। पुराशब्दोऽत्र भविष्यदासत्तिं द्योतयति। परीप्सायामिति किम्? नडेन स्म पुराधीयते। अत्र भूतकालविप्रकर्षं पुराशब्दो द्योतयति। ऊर्णया स्म पुराधीयते।

अर्थ—परीप्सा अर्थ में 'पुरा' शब्द से युक्त तिङन्त पद विकल्प से अनुदात्त नहीं होता है।

'परीप्सा' त्वरा को कहते हैं।

उदा० (1) अधीष्व माणवक, पुरा विद्योतते विद्युत्
अनुदात्त-निषेध।

(2) पुरा विद्योतते विद्युत्
निषेध नहीं हुआ।

(3) पुरा स्तनयति स्तनयित्नुः
निघात-निषेध।

(4) पुरा स्तनयति स्तनयित्नुः
निघात-निषेध नहीं हुआ।

परीप्सा०—परीप्सा अर्थ में ही विकल्प से निघात-प्रतिषेध होता है।

(5) नडेन स्म पुराऽधीयते

'पुरा' का योग है, 'अधीयते' तिङन्त पद है, परन्तु त्वरा अर्थ नहीं है। अतः पाक्षिक निषेध नहीं हुआ।

(6) ऊर्णया स्म पुराऽधीयते (पूर्ववत्)।

(3657) नन्वित्यनुज्ञैषणायाम् *43* (3950)

'ननु' इत्यनेन युक्तं तिङन्तं नानुदात्तं भवति अनुज्ञैषणायां विषये। अनुज्ञाया एषणा=प्रार्थना, अनुज्ञैषणा। अनुज्ञा-प्रार्थनेत्यर्थः। ननु करोमि भोः। (ननु गच्छामि भोः।) अनुजानीष्व माम्, करणं प्रतीत्यर्थः। अनुज्ञैषणायामिति किम्? अकार्षीः कटं देवदत्त? ननु करोमि भोः। पृष्टप्रतिवचनमेतत्, नानुज्ञैषणा।

अर्थ—अनुज्ञैषणा अर्थ में 'ननु' शब्द से युक्त तिङन्त पद अनुदात्त नहीं होता है।

अनुज्ञा की प्रार्थना 'अनुज्ञैषणा' कहलाती है।

उदा० (1) ननु करोमि भोः
निघात-प्रतिषेध।

(2) ननु गच्छामि भोः (पूर्ववत्)।

अनुज्ञै०—अनुज्ञैषणा अर्थ में ही निघात-प्रतिषेध होता है।

(3) अकार्षीः कटं देवदत्त, ननु करोमि भोः
यहाँ अनुज्ञा की एषणा नहीं है; अपितु प्रश्न का प्रतिवचन है।

(3658) किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् *44* (3951)

'किम्'-इत्येतत्क्रियाप्रश्ने यदा वर्तते तदानेन युक्तं

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तिङन्तमनुपसर्गमप्रतिषिद्धं नानुदात्तं भवति। किं देवदत्तः पचति, आहोस्विद् भुङ्क्ते। किं देवदत्तः शेते, आहोस्विदधीते। अत्र केचिदाहुः–पूर्वं किंयुक्तमिति तन्न निहन्यते। उत्तरं तु न किंयुक्तमिति तन्निहन्यत एवेति। अपरे त्वाहुः–यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योग इति, उभयत्र प्रतिषेधेन भवितव्यमिति। क्रियाग्रहणं किम्? साधनप्रश्ने मा भूत्–किं देवदत्त ओदनं पचति आहोस्विच्छाकमिति। प्रश्न इति किम्? किमधीते देवदत्तः। क्षेपे किंशब्दोऽयम्, न प्रश्ने। अनुपसर्गमिति किम्? किं देवदत्तः प्रपचति, आहोस्वित्प्रकरोति। अप्रतिषिद्धमिति किम्? किं देवदत्तो न पठति, आहोस्विन्न करोति।

अर्थ—जब 'किम्' शब्द क्रियाप्रश्न में वर्त्तमान हो तो इससे युक्त, अप्रतिषिद्ध, उपसर्ग से रहित तिङन्त पद अनुदात्त नहीं होता है।

उदा० (1) किं देवदत्तः पचति, आहोस्विद् भुङ्क्ते

'किम्' शब्द क्रियाप्रश्न में वर्त्तमान है, 'भुङ्क्ते' तिङन्त पद उपसर्गरहित है। निघात-प्रतिषेध हुआ।

(2) किं देवदत्तः शेते, आहोस्विद् अधीते (पूर्ववत्)।

अत्र०—यहाँ कुछ विद्वान् कहते हैं कि पूर्व तिङन्त पद 'पचति' किम् शब्द से युक्त है। अतः निघात-निषेध होता है, परन्तु उत्तर तिङन्त पद 'भुङ्क्ते' किम् शब्द से युक्त नहीं है। अतः निघात होता है।

अपरे०—अन्य विद्वान् कहते हैं कि यद्यपि एक तिङन्त पद के समीप 'किम्' शब्द का श्रवण होता है, तथापि सम्पूर्ण संशय विषय का उसके साथ योग होता है, अतः दोनों तिङन्त पदों को निघात-निषेध होता है।

क्रिया०—क्रियाप्रश्न की दशा में ही निघात-निषेध होता है। तब साधन के प्रश्न की दशा में निषेध नहीं होता।

(3) किं देवदत्त ओदनं पचति, आहोस्विच् छाकम्

यहाँ 'पचन' क्रिया के विषय में प्रश्न नहीं है, साधनरूप 'ओदन' के विषय में प्रश्न है। निघात-निषेध नहीं हुआ।

प्रश्न०—प्रश्न की दशा में ही निघात-निषेध होता है।

(4) किमधीते देवदत्तः ?

यहाँ 'किम्' शब्द प्रश्न अर्थ में नहीं है, अपितु निन्दा अर्थ में है। अतः निघात-निषेध नहीं हुआ।

अनुप०—उपसर्गरहित तिङन्त पद को निघात-निषेध होता है।

(5) किं देवदत्तः प्रपचति, आहोस्वित् प्रकरोति

यहाँ क्रिया के विषय में प्रश्न है, 'किम्' शब्द का योग है, परन्तु 'प्रकरोति' तिङन्त पद उपसर्गयुक्त है। निघात-निषेध नहीं हुआ।

अप्रति०—निषेधरहित होने पर ही निघात-निषेध होता है।

(6) किं देवदत्तो न पठति, आहोस्विन्न करोति

क्रिया के विषय में प्रश्न है, 'किम्' शब्द का योग है, 'करोति' तिङन्त पद अनुपसर्ग है, परन्तु 'न' का योग होने से अप्रतिषिद्ध नहीं है। अतः निघात-निषेध नहीं हुआ।

(3659) लोपे विभाषा *45* (3952)

किमो लोपे क्रियाप्रश्ने तिङन्तमनुपसर्गमप्रतिषिद्धं विभाषा नानुदात्तं भवति। क्व चास्य लोपः? यत्र गम्यते चार्थः, न च प्रयुज्यते किंशब्दः। देवदत्तः पचति आहोस्वित्पठति? विनैव किमा प्रश्नोऽवगम्यते। प्राप्तविभाषेयं किमर्थेन योगात्। पूर्ववत् प्रत्युदाहरणानि।

अर्थ—क्रिया के सम्बन्ध में प्रश्न की दशा में तथा किम् शब्द के लोप की दशा में अनुपसर्ग, अप्रतिषिद्ध, तिङन्त पद को अनुदात्त-निषेध विकल्प से होता है।

'किम्' शब्द का लोप कहाँ होता है ? जहाँ इसके अर्थ की प्रतीति हो, परन्तु 'किम्' शब्द का प्रयोग न हो।

उदा० (1) देवदत्तः पचति ? आहोस्वित् पठति

क्रिया के विषय में प्रश्न है, 'किम्' शब्द के प्रयोग के विना ही प्रश्न अर्थ गम्यमान है।

'किम्' शब्द के अर्थ के योग से यह प्राप्त विभाषा है। प्रत्युदाहरण पूर्ववत् जानने चाहिए।

(3660) एहिमन्ये प्रहासे लट् *46* (3953)

'एहिमन्ये'–इत्यनेन युक्तं लङन्तं नानुदात्तं भवति प्रहासे। प्रकृष्टो हासः प्रहासः = क्रीडा। एहि मन्ये ओदनं भोक्ष्यसे, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः। एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन पिता। प्रहास इति किम्? एहि मन्यसे ओदनं भोक्ष्ये इति। सुष्ठु मन्यसे। साधु मन्यसे। 'गत्यर्थलोटा लट्' (8.1.51) इत्येव सिद्धे सत्यारम्भो नियमार्थः–एहिमन्येयुक्ते प्रहास एव यथा स्यात्,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्यथा मा भूदिति–एहि मन्यसे ओदनं भोक्ष्य इति। 'एहिमन्ये' इत्युत्तमोपादानमतन्त्रम्। प्रहास एव हि मन्यते-रुत्तमो विहितः, ततोऽन्यत्र मध्यम एव भवति। तत्रानेन नियमेन निवृत्तिः क्रियते–एहि ओदनं भोक्ष्य इति।

अर्थ—'एहि मन्ये' का योग होने पर लृट् प्रत्ययान्त तिङन्त शब्द अनुदात्त नहीं होता है, प्रहास अर्थ में।

उदा० (1) एहि मन्ये आदेनं भोक्ष्यसे, न हि भोक्ष्यसे, भुक्तः सोऽतिथिभिः।

यहाँ 'एहि मन्ये' का योग है। 'भोक्ष्यसे' लृट् प्रत्ययान्त पद है। 'प्रहास' अर्थ गम्यमान है। अनुदात्त नहीं हुआ।

(2) एहि मन्ये रथेन यास्यसि, न हि यास्यसि, यातस्तेन पिता। (पूर्ववत्)।

प्रहास०—प्रहास अर्थ में ही निघात-प्रतिषेध होता है।

(3) एहि मन्यसे ओदनं भोक्ष्ये, सुष्ठु मन्यसे।

यहाँ प्रहास अर्थ नहीं है। अतः निघात-प्रतिषेध नहीं होता।

गत्यर्थ०—यह 'गत्यर्थलोटा लृट्' से ही सिद्ध है। तब नियमार्थ विधान किया गया है। यह नियम करता है कि 'एहि मन्ये' पद से युक्त होने पर प्रहास अर्थ में ही निघात-प्रतिषेध होता है, अन्यत्र नहीं होता है। यथा—

एहि मन्यसे ओदनं भोक्ष्ये।

एहि०—'एहि मन्ये' इस प्रकार उत्तम पुरुष का उपादान अनुचित है। प्रहास अर्थ में ही 'मन्' धातु से उत्तम पुरुष विहित है। इससे अन्य स्थल पर तो मध्यम पुरुष ही होता है। तब इस नियम से निवृत्ति की जाती है। यथा—

एहि मन्यसे ओदनं भोक्ष्ये।

(3661) जात्वपूर्वम् *47* (3954)

'जातु' इत्येतदविद्यमानपूर्वं तेन युक्तं तिङन्तं नानुदात्तं भवति। जातु भोक्ष्यसे। जातु करिष्यामि। अपूर्वमिति किम्? कटं जातु करिष्यति।

अर्थ—पूर्व में नहीं है विद्यमान जिसके, ऐसे 'जातु' शब्द से युक्त होने पर तिङन्त पद निघात नहीं होता है।

उदा० (1) जातु भोक्ष्यसे

'जातु' का योग है। 'भोक्ष्यसे' तिङन्त पद है। अनुदात्त-प्रतिषेध हुआ।

(2) जातु करिष्यामि (पूर्ववत्)।

अपूर्व०—नहीं है पूर्व में जिसके, ऐसे 'जातु' शब्द से युक्त होने पर ही तिङन्त पद को निघात-प्रतिषेध होता है।

(3) कटं जातु करिष्यति

'जातु' शब्द से युक्त 'करिष्यति' को निघात-प्रतिषेध नहीं हुआ, क्योंकि जातु शब्द से पूर्व 'कटम्' पद विद्यमान है।

(3662) किंवृत्तं च चिदुत्तरम् *48* (3955)

किमो वृत्तं किंवृत्तम्। किंवृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्, डतरडतमौ च प्रत्ययौ। तत्किंवृत्तं चिदुत्तर-मविद्यमानपूर्वं यत्तेन युक्तं नानुदात्तं भवति। कश्चिद् भुङ्क्ते। कश्चिद्भोजयति। कश्चिदधीते केनचित्करोति। कस्मैचिद्ददाति। कतरश्चित्करोति। कतमश्चिद् भुङ्क्ते। चिदुत्तरमिति किम्? को भुङ्क्ते। अपूर्वमित्येव–देवदत्तः किञ्चित्पठति।

अर्थ—'किम्' का वृत्त 'किंवृत्त' कहलाता है। 'किंवृत्त' के द्वारा तद्विभक्त्यन्त शब्द तथा डतर व डतम प्रत्ययों की प्रतीति होती है। 'चित्' शब्द है उत्तर में जिसके तथा कोई पद विद्यमान नहीं है पूर्व में जिसके, ऐसे किंवृत्त से युक्त होने पर निघात-प्रतिषेध होता है।

उदा० (1) कश्चिद् भोजयति

निघात का निषेध हुआ।

(2) कश्चिद् अधीते (पूर्ववत्)।

(3) केनचित् करोति (पूर्ववत्)।

(4) कस्मैचिद् ददाति (पूर्ववत्)।

(5) कतरश्चित् करोति (पूर्ववत्)।

(6) कतमश्चिद् भुङ्क्ते (पूर्ववत्)।

चिदुत्त०—चित् है उत्तर में जिसके, ऐसे किंवृत्त का योग होने पर निघात-प्रतिषेध होता है।

(7) को भुङ्क्ते

'कः' पद से उत्तर 'चित्' नहीं है। निघात-प्रतिषेध नहीं हुआ।

अपूर्व०—पूर्व में विद्यमान नहीं है जिसके, ऐसे किंवृत्त से युक्त होने पर ही निघात-प्रतिषेध होता है।

देवदत्तः किञ्चित् पठति

'किम्' से उत्तर 'चित्' शब्द है; परन्तु इससे पूर्व 'देवदत्तः' पद विद्यमान है। निघात-प्रतिषेध नहीं हुआ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3663) आहोउताहो चानन्तरम् *49* (3956)

निघातप्रतिषेधोऽनुवर्तते। 'अपूर्वम्' इति च। आहो, उताहो-इत्येताभ्यामपूर्वाभ्यां युक्तमनन्तरं तिङन्तं नानुदात्तं भवति। आहो भुङ्क्ते। उताहो भुङ्क्ते। आहो पठति। उताहो पठति। अनन्तरमिति किम्? 'शेषे विभाषा' (8.1.50) वक्ष्यति। 'अपूर्वम्' इत्येव-देवदत्त आहो भुङ्क्ते। देवदत्त उताहो भुङ्क्ते।

अर्थ—निघात का प्रतिषेध होता है—इसका अनुवर्त्तन है। 'अपूर्वम्' पद भी अनुवृत्त है।

पूर्व में कोई पद विद्यमान नहीं है जिनके, ऐसे आहो तथा उताहो—इन शब्दों से अव्यवहित युक्त होने पर तिङन्त पद को निघात का प्रतिषेध होता है।

उदा० (1) आहो भुङ्क्ते

'आहो' से पूर्व कोई पद विद्यमान नहीं है। 'आहो' से अव्यवहित तिङन्त पद 'भुङ्क्ते' का योग है। निघात-प्रतिषेध हुआ।

(2) उताहो भुङ्क्ते (पूर्ववत्)।
(3) आहो पठति (पूर्ववत्)।
(4) उताहो पठति (पूर्ववत्)।

अनन्तर०—अव्यवहित तिङन्त पद को निघात का प्रतिषेध होता है। व्यवहित होने पर 'शेषे विभाषा' आगे कहा जायेगा।

अपूर्वम्०—विद्यमान नहीं है पूर्व में जिसके, ऐसे आहो तथा उताहो से युक्त होने पर तिङन्त पद अनुदात्त नहीं होता है।

(5) देवदत्त आहो भुङ्क्ते

'आहो' से पूर्व 'देवदत्तः' पद है। इससे युक्त होने पर 'भुङ्क्ते' इस तिङन्त पद को निघात-प्रतिषेध नहीं हुआ।

(6) देवदत्त उताहो भुङ्क्ते (पूर्ववत्)।

(3664) शेषे विभाषा *50* (3957)

'आहो', 'उताहो'-इत्येताभ्यां युक्तं तिङन्तं नानुदात्तं शेषे विभाषा भवति। कश्च शेषः? यदन्यदनन्तरात्। आहो देवदत्तः पचति, पचति। उताहो देवदत्तः पचति, पचति। आहो देवदत्तः पठति, पठति, उताहो देवदत्तः पठति, पठति।

अर्थ—शेष स्थलों पर आहो व उताहो—इन शब्दों से युक्त होने पर तिङन्त पद को अनुदात्त-निषेध विकल्प से होता है। शेष क्या है? अनन्तर से जो अन्य है, उसे 'शेष' कहेंगे। भाव यह है कि 'आहो' तथा 'उताहो' से व्यवहित तिङन्त पद को अनुदात्त-निषेध विकल्प से होता है।

उदा० (1) आहो देवदत्तः पचति

'आहो' शब्द से तिङन्त पद 'पचति' युक्त है। अतः विकल्प से अनुदात्त-निषेध हुआ।

(2) आहो देवदत्तः पचति
पक्ष में अनुदात्त हुआ।

(3) उताहो देवदत्तः पचति
अनुदात्त-निषेध।

(4) उताहो देवदत्तः पचति
पक्ष में निघात।

(5) आहो देवदत्तः पठति
निघात-निषेध।

(6) आहो देवदत्तः पठति
निघात हुआ।

(7) उताहो देवदत्तः पठति
निघात-निषेध।

(8) उताहो देवदत्तः पठति
निघात हुआ।

(3665) गत्यर्थलोटा लृण्न चेत्कारकं सर्वान्यत् *51* (3958)

गमिना समानार्था गत्यर्थाः, गत्यर्थानां लोट् गत्यर्थलोट्, तेन। गत्यर्थलोटा युक्तं लृङन्तं तिङन्तं नानुदात्तं भवति, न चेत्कारकं सर्वमन्यद्भवति। यत्रैव कारके कर्तरि कर्मणि वा लोट्, तत्रैव यदि लृडपि भवतीत्यर्थः। कर्तृकर्मणी एवात्र तिङन्तवाच्ये कारकग्रहणेन गृह्येते, न करणादि कारकान्तरम्। आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम्। आगच्छ देवदत्त ग्राममोदनं भोक्ष्यसे। उह्यन्तां देवदत्तेन शालयः, तेनैव भोक्ष्यन्ते। उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते। गत्यर्थग्रहणं किम्? पच देवदत्त ओदनं भोक्ष्यसे एनम्। लोटेति किम्? आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्येनम्। लृडिति किम्? आगच्छ ग्रामं पश्यस्येनम्। न चेत्कारकं सर्वान्यदिति किम्? आगच्छ देवदत्त ग्रामं पिता ते ओदनं भोक्ष्यते। उह्यन्तां देवदत्तेन शालयः सक्तवस्तेन पास्यन्ते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वग्रहणं किम्? आगच्छ देवदत्त ग्रामं त्वं चाहं च द्रक्ष्याव एनम्–इत्यत्रापि निघातप्रतिषेधो यथा स्यात्। लडन्तवाच्ये हि सर्वस्मिन् कारकेऽन्यस्मिन् भवितव्यम्। इह तु यल्लोडन्तस्य कारकं तच्चान्यच्च लडन्तेनोच्यते इति।

अर्थ—गम् के समानार्थक गत्यर्थक कहलाते हैं। गत्यर्थक का लोट् गत्यर्थलोट् हुआ। उस गत्यर्थलोट् से युक्त लट् प्रत्ययान्त तिङन्त अनुदात्त नहीं होता है, यदि कारक सम्पूर्ण अन्य न हो।

'सर्वान्यत्' का अर्थ यह है कि जिस कारक में लोट् प्रत्ययान्त शब्द हो, उसी कारक में लट् प्रत्ययान्त शब्द हो।

उदा० (1) आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनम्

'आगच्छ' गत्यर्थ लोट् है। इससे युक्त लट् प्रत्ययान्त 'द्रक्ष्यसि' है। निघात नहीं हुआ।

(2) आगच्छ देवदत्त, ग्रामम् ओदनं भोक्ष्यसे (पूर्ववत्)।

(3) उह्यन्तां देवदत्तेन शालयः, तेनैव भोक्ष्यन्ते (पूर्ववत्)।

(4) उह्यन्तां देवदत्तेन शालयः, यज्ञदत्तेन भोक्ष्यन्ते (पूर्ववत्)।

गत्यर्थ०—गत्यर्थक लोट् से युक्त होने पर ही तिङन्त को निघात-निषेध होता है।

(5) पच देवदत्तौदनं, भोक्ष्यस एनम्

'पच' लोट् प्रत्ययान्त है, परन्तु गत्यर्थक लोट् नहीं है। अतः इससे युक्त लट् प्रत्ययान्त 'भोक्ष्यसे' तिङन्त पद को निघात-निषेध नहीं हुआ।

लोटेति०—गत्यर्थक लोट् से युक्त होने पर ही तिङन्त पद को निघात-निषेध होता है।

(6) आगच्छेर्देवदत्त ग्रामं द्रक्ष्यस्येनम्

'द्रक्ष्यसि' लट् प्रत्ययान्त पद है। 'आगच्छेः' पद गत्यर्थक तो है, परन्तु लोट् प्रत्ययान्त नहीं है। अतः इससे युक्त होने पर तिङन्त 'द्रक्ष्यसि' को निघात-निषेध नहीं हुआ।

लडिति०—लट् प्रत्ययान्त तिङन्त को ही निघात-निषेध होता है।

(7) आगच्छ देवदत्त ग्रामं पश्यस्येनम्

'पश्यसि' लट् प्रत्ययान्त नहीं है। अतः इसे निघात-निषेध नहीं हुआ।

न चेत् कारकं०—यदि लोट् प्रत्ययान्त तथा लट् प्रत्ययान्त शब्द एक ही कारक में हों तो लट् प्रत्ययान्त को अनुदात्त होता है।

(8) आगच्छ देवदत्त ग्रामं, पिता ते ओदनं भोक्ष्यते

गत्यर्थक लोट् 'आगच्छ' से लट् प्रत्ययान्त 'भोक्ष्यते' तिङन्त पद युक्त है, परन्तु अन्य कारक होने से निघात-निषेध नहीं हुआ।

(9) उह्यन्तां देवदत्तेन शालयः, सक्तवस्तेन पास्यन्ते (पूर्ववत्)।

सर्वग्रह०—सर्व का ग्रहण किया गया है, ताकि निम्नलिखित में न हो—

(10) आगच्छ देवदत्त ग्रामं त्वं चाऽहं च द्रक्ष्याव एनम्

यहाँ पर भी निघात-प्रतिषेध होता है।

(3666) लोट् च *52* (3959)

लोडन्तं तिङन्तं गत्यर्थलोटा युक्तं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति। लोडन्तयोरेकं कारकं यदि भवतीत्यर्थः। आगच्छ देवदत्त ग्रामं पश्य। आव्रज विष्णुमित्र ग्रामं शाधि। आगम्यतां देवदत्तेन, ग्रामो दृश्यतां यज्ञदत्तेन। 'गत्यर्थानाम्' इत्येव–पच देवदत्त ओदनं भुङ्क्ष्वेनम्। 'लोटा' इत्येव–आगच्छेर्देवदत्त ग्रामं पश्यैनम्। 'न चेत्कारकं सर्वान्यत्' इत्येव–आगच्छ देवदत्त ग्रामं पश्यत्वेनं यज्ञदत्तः। सर्वग्रहणानुवृत्तेस्त्विह भवत्येव–आगच्छ देवदत्त ग्रामं त्वं चाहं च पश्याव। पृथग्योगकरणमुत्तरार्थम्।

अर्थ—गत्यर्थक लोट् से युक्त लोट् प्रत्ययान्त तिङन्त को निघात का निषेध होता है, यदि दोनों का कारक भिन्न न हो।

उदा० (1) आगच्छ देवदत्त ग्रामं पश्य

'आगच्छ' गत्यर्थक लोट् है। 'पश्य' लोट् प्रत्ययान्त है। इससे युक्त तिङन्त 'पश्य' को निघात-निषेध हुआ।

(2) आव्रज विष्णुमित्र ग्रामं शाधि (पूर्ववत्)।

(3) आगम्यतां देवदत्तेन, ग्रामो दृश्यतां यज्ञदत्तेन (पूर्ववत्)।

गत्यर्था०—गत्यर्थक लोट् से युक्त लोट् प्रत्ययान्त तिङन्त को निघात-निषेध होता है।

(4) पच देवदत्तौदनं भुङ्क्ष्वैनम्

'पच' लोट् प्रत्ययान्त पद है, 'भुङ्क्ष्व' लोट् प्रत्ययान्त तिङन्त है। परन्तु 'पच' गत्यर्थक नहीं है। अतः निघात-निषेध नहीं हुआ।

लोटा०—गत्यर्थक लोट् से युक्त लोट् प्रत्ययान्त तिङन्त को निघात-निषेध होता है।

(5) आगच्छेर्देवदत्त ग्रामं पश्यैनम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'आगच्छेः' गत्यर्थक पद है, परन्तु लोट् प्रत्ययान्त नहीं है। अतः इससे युक्त लोट् प्रत्ययान्त 'पश्य' तिङन्त को निघात-निषेध नहीं हुआ।

न चेत्कारकं०—यदि कारक सम्पूर्ण अन्य न हो। यथा—

(6) आगच्छ देवदत्त ग्रामं, पश्यत्वेनं यज्ञदत्तः

'आगच्छ' गत्यर्थक लोट् है। इससे युक्त 'पश्यतु' लोट्प्रत्ययान्त तिङन्त है, परन्तु अन्यत् कारक होने से 'पश्यतु' को निघात-निषेध नहीं हुआ।

सर्वग्रह०—'सर्व' शब्द का अनुवर्त्तन होने से यहाँ निषेध होता है।

(7) आगच्छ देवदत्त ग्रामं त्वं चाऽहं च पश्याव।

पृथग्यो०—प्रकृत सूत्र का पृथक् पाठ उत्तर शास्त्र के लिए है।

(3667) विभाषितं सोपसर्गमनुत्तमम् *53* (3960)

सर्वं पूर्वमनुवर्तते। प्राप्तविभाषेयम्। लोडन्तं सोपसर्गमुत्तमवर्जितं गत्यर्थलोटा युक्तं तिङन्तं विभाषितं नानुदात्तं भवति, न चेत्कारकं सर्वान्यद्भवति। आगच्छ देवदत्त ग्रामं प्रविश। आगच्छ देवदत्त ग्रामं प्रशाधि। सोपसर्गमिति किम्? आगच्छ देवदत्त ग्रामं पश्य। अनुत्तममिति किम्? आगच्छानि देवदत्त ग्रामं प्रविशानि।

अर्थ—सम्पूर्ण अधिकार पूर्ववत् है। यह प्राप्त विभाषा है। गत्यर्थक लोट् प्रत्ययान्त से युक्त उत्तम पुरुष से रहित लोट् प्रत्ययान्त सोपसर्ग तिङन्त विकल्प से अनुदात्त नहीं होता है, यदि कारकभिन्न न हो तो।

उदा० (1) आगच्छ देवदत्त, ग्रामं प्रविश
अनुदात्त-निषेध हुआ।

(2) आगच्छ देवदत्त ग्रामं प्रविश
पक्ष में अनुदात्त हुआ।

(3) आगच्छ देवदत्त ग्रामं प्रशाधि
अनुदात्त-निषेध।

(4) आगच्छ देवदत्त ग्रामं प्रशाधि
पक्ष में अनुदात्त।

सोपसर्ग०—सोपसर्ग लोट् प्रत्ययान्त तिङन्त को निघात-प्रतिषेध होता है।

(5) आगच्छ देवदत्त, ग्रामं पश्य

'आगच्छ' इस लोट् प्रत्ययान्त से युक्त 'पश्य' यह लोट् प्रत्ययान्त तिङन्त है, परन्तु सोपसर्ग न होने से विकल्प नहीं हुआ।

अनुत्त०—उत्तम पुरुष के प्रयोग को छोड़कर निघात-प्रतिषेध विकल्प से होता है।

(6) आगच्छानि देवदत्त, ग्रामं प्रविशानि

उत्तम पुरुष का प्रयोग होने से निघात-प्रतिषेध का विकल्प नहीं हुआ।

(3668) हन्त च *54* (3961)

पूर्वं सर्वमनुवर्तते गत्यर्थलोटं वर्जयित्वा। 'हन्त'-इत्यनेन युक्तं लोडन्तं सोपसर्गमुत्तमवर्जितं विभाषितं नानुदात्तं भवति। हन्त प्रविंश प्रविश। हन्त प्रशांधि प्रशाधि। सोपसर्गमित्येव-हन्त कुरु। 'निपातैर्यद्यदिहन्त' (8.1.30) इति नित्यमत्र निघातप्रतिषेधो भवति। अनुत्तममित्येव-हन्त प्रभुञ्जावहै। हन्त प्रभुञ्जामहै।

अर्थ—'गत्यर्थलोटा' पद का छोड़कर सभी अधिकार पूर्ववत् हैं।

'हन्त' शब्द से युक्त लोट् प्रत्ययान्त, उत्तम पुरुष को छोड़कर शेष सोपसर्ग तिङन्त को विकल्प से निघात-प्रतिषेध होता है।

उदा० (1) हन्त प्रविश
अनुदात्त-निषेध हुआ।

(2) हन्त प्रविश
अनुदात्त हुआ।

(3) हन्त प्रशाधि
अनुदात्त-प्रतिषेध।

(4) हन्त प्रशाधि
अनुदात्त हुआ।

सोपसर्ग०—सोपसर्ग तिङन्त को ही विकल्प से निघात-प्रतिषेध होता है।

(5) हन्त कुरु
यहाँ 'निपातैर्यद्यदिहन्त' से नित्य निघात-प्रतिषेध होता है।

अनुत्तम०—उत्तम पुरुष के प्रयोग को छोड़कर निघात-प्रतिषेध होता है।

(6) हन्त प्रभुञ्जावहै

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्तम पुरुष का प्रयोग है। निघात-प्रतिषेध का विकल्प नहीं हुआ।

(7) हन्त प्रभुञ्जामहै (पूर्ववत्)।

(3669) आम एकान्तरमामन्त्रित-मनन्तिके *55* (3962)

आम उत्तरमेकपदान्तरमामन्त्रितान्तमनन्तिके नानुदात्तं भवति। आम् पचसि देवदत्त३। आम् भो देवदत्त३। 'भोः' इत्यामन्त्रितान्तमपि 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (8.1.73) इति नाविद्यमानवद्भवति। आम इति किम्? शाकं पचसि देवदत्त३। एकान्तरमिति किम्? आम् प्रपचसि देवदत्त३। आमन्त्रितमिति किम्? आम् पचति देवदत्तः। अनन्तिक इति किम्? आम देवदत्तः। *आम एकान्तरमामन्त्रितं यत्तस्य एकश्रुतेरनुदात्तस्य च प्रतिषेध इष्यते* (म० भा०)। तदुभयमनेन क्रियत इति केचिदाहुः। प्लुतोदात्तः पुनरसिद्धत्वान्न प्रतिषिध्यते। अपरेषां दर्शनम्-'अनन्तिक इत्यनेन यन्न दूरं न सन्निकृष्टं तत् परिगृह्यते। तेनास्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति। प्लुतोदात्तोऽपि नोदाहर्तव्यः' इति।

अर्थ—दूर अर्थ में आम् से उत्तर जो एकपदान्तर आमन्त्रित संज्ञक, उसे निघात नहीं होता है।

उद० (1) आम् पचसि, देवदत्त३
निघात-प्रतिषेध।

(2) आम् भोः देवदत्त३ (पूर्ववत्)।

भोः इत्या०—'भोः' यह आमन्त्रित होते हुए भी 'नाऽऽमन्त्रिते समानाधिकरणे०' से अविद्यमानवत् नहीं होता है।

आम०—आम् से उत्तर आमन्त्रितसंज्ञक को अनुदात्त नहीं होता है।

(3) शाकं पचसि, देवदत्त३

यहाँ 'आम्' नहीं है। अतः प्रतिषेध नहीं हुआ।

एकान्त०—एकपदान्तर आमन्त्रित को ही निघात-निषेध होता है।

(4) आम् प्रपचसि देवदत्त३

यहाँ 'आम्' से उत्तर आमन्त्रित संज्ञक पद है, परन्तु अनेक पदों का अन्तर है। अतः निषेध नहीं हुआ।

आमन्त्रि०—आमन्त्रितसंज्ञक पद को ही निषेध होता है।

(5) आम् पचति देवदत्तः

'आम्' है, एकपदान्तर है, परन्तु 'देवदत्तः' की आमन्त्रित संज्ञा नहीं है। अतः निघात-प्रतिषेध नहीं हुआ।

अनन्तिक०—दूर अर्थ में वर्त्तमान आमन्त्रितसंज्ञक को निघात-प्रतिषेध होता है।

(6) आम् देवदत्तः
निघात-प्रतिषेध नहीं हुआ।

आम०—आम् से उत्तर एकपदान्तर जो आमन्त्रितसंज्ञक पद, उसको एकश्रुति तथा अनुदात्त का प्रतिषेध होता है। कुछ विद्वान् कहते हैं कि दोनों ही किये जाते हैं। प्लुत उदात्त का निषेध नहीं होता है; असिद्ध होने से।

अपरेषा०—दूसरे विद्वान् कहते हैं कि 'अनन्तिके' के द्वारा जो न दूर है और न ही निकट है—उसका ग्रहण होता है। तब इसमें एकश्रुति की प्राप्ति ही नहीं होती है। अतः प्लुत उदात्त का भी उदाहरण नहीं देना चाहिए।

(3670) यद्धितुपरं छन्दसि *56* (3963)

'आमन्त्रितम्'-इत्येतदस्वरितत्वान्नानुवर्तते। 'तिङ्' इति वर्तत एव। यत्परं हिपरं तुपरं च तिङन्तं छन्दसि नानुदात्तं भवति। यत्परं तावत्-गवां गोत्रमुदसृजोयदङ्गिरः (ऋ० 2.23.18)। हिपरम्-इन्दवो वामुशन्ति हि (तै०सं० 1.4.4.1)। तुपरम्-आख्यास्यामि तु ते। 'निपातैर्यद्यदिहन्त' (8.1.30) इति 'हि च' (8.1.34) इति, 'तुपश्यपश्यताहै' (8.1.39) इति च निघातप्रतिषेधे सिद्धे वचनमिदं नियमार्थम्-एभिरेव परैर्योगे प्रतिषेधो भवति, नान्यैरिति। इह न भवति-जाये स्वो रोहावैहि। एहीत्यनेन गत्यर्थलोटा युक्तस्य 'रोहाव' इत्येतस्य लोडन्तस्य निघातो भवत्येव।

अर्थ—स्वरित का निर्देश न होने से 'आमन्त्रितम्' इसका अनुवर्त्तन नहीं होता है। 'तिङ्' का अनुवर्त्तन है। यत्, हि तथा तु—ये शब्द हैं परे जिसके, ऐसा तिङन्त पद वेद के विषय में अनुदात्त नहीं होता है।

(क) यत्परम्—
उदा० (1) गवां गोत्रमुदसृजोऽयमङ्गिरः
अनुदात्त-निषेध।

(ख) हिपरम्—
(2) इन्दवो वामुशन्ति हि (पूर्ववत्)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(ग) तुपरम्—
(3) आख्यास्यामि तु ते
अनुदात्त-निषेध।

निपातै०—यद्यपि 'निपातैर्यद्यदिहन्तः' से, 'हि च' से तथा 'तुपश्यपश्यताहै' से निघात-प्रतिषेध सिद्ध ही था। अतः यह नियम के लिए विधान किया गया है। यह नियम करता है कि यत्, हि तथा तु—इनके ही परे रहते निघात का प्रतिषेध होता है, अन्य शब्दों के परे रहते नहीं होता। अतः निम्नलिखित में निषेध नहीं होता है—

जाये स्वो रोहावैहि—यहाँ 'एहि' गत्यर्थ लोट् है। इससे युक्त 'रोहाव' इस लोट् प्रत्ययान्त पद को निघात होता है।

(3671) चनचिदिवगोत्रादितद्धिताम्रेडिते-ष्वगतेः *57* (3964)

चन, चिद्, इव, गोत्रादि, तद्धित, आम्रेडित–इत्येतेषु परतः अगतेरुत्तरं तिङन्तं नानुदात्तं भवति। चन–देवदत्तः पचंति चन। चित्–देवदत्तः पचंति चित्। इव–देवदत्तः पचंतीव। गोत्रादि–देवदत्तः पचंति गोत्रम्। देवदत्तः पचंति ब्रुवम्। देवदत्तः पचंति प्रवचनम्। इहापि गोत्रादयः कुत्सनाभीक्ष्णययोरेव गृह्यन्ते। तद्धित–देवदत्तः पचंति-कल्पम्। देवदत्तः पचंतिरूपम्। अनुदात्तस्तद्धित इहोदाहरणम्, अन्यत्र तद्धितस्वरेण तिङ्स्वरो बाध्यते–पचतिदेश्यः। आम्रेडित–देवदत्तः पचंति पचति। अगतेरिति किम्? देवदत्तः प्रपचति चन। अत्रागतिग्रहणे, 'सगतिरपि तिङ्' इत्यत्र च उपसर्गग्रहणं द्रष्टव्यम्। इह मा भूत्–शुक्लीकरोतिं चन। यत्काष्ठं शुक्लीकरोतिं। यत्काष्ठं कृष्णीकरोतिं।

अर्थ—यदि गतिसंज्ञक शब्द से उत्तर तिङन्त पद न हो तो उस तिङन्त को अनुदात्त नहीं होता है, चन, चिद्, इव, गोत्र आदि शब्द, तद्धितप्रत्यय तथा आम्रेडितसंज्ञक—इनके परे रहते।

उदा० (क) चनपरे—
(1) देवदत्तः पचंति चन
निघात-प्रतिषेध हुआ।

(ख) चित्परे—
(2) देवदत्तः पचंति चित् (पूर्ववत्)।

(ग) इवपरे—
(3) देवदत्तः पचंतीव (पूर्ववत्)।

(घ) गोत्रादिशब्दपरे—
(4) देवदत्तः पचंति गोत्रम्
निघात-निषेध।

(5) देवदत्तः पचंति ब्रुवम्
निघात-निषेध।

(6) देवदत्तः पचंति प्रवचनम् (पूर्ववत्)।

इहापि०—यहाँ भी गोत्र आदि शब्दों का कुत्सन तथा आभीक्ष्ण्य अर्थों में ही ग्रहण होता है।

(ङ) तद्धितप्रत्ययपरे—
(7) देवदत्तः पचंतिकल्पम्
'कल्पप्' प्रत्यय हुआ है।

(8) देवदत्तः पचंतिरूपम्
'रूप' तद्धित प्रत्यय है।

अनुदात्त०—यहाँ अनुदात्त तद्धित उदाहरण है। अन्यत्र तद्धितस्वर के द्वारा तिङ् स्वर का बाध होता है।

(9) पचतिदेश्यः

(च) आम्रेडितशब्दपरे—
(10) देवदत्तः पचंति पचति
'तस्य परम् आम्रेडितम्' से आम्रेडित संज्ञा होती है।

अगते०—गतिसंज्ञक से उत्तर तिङन्त को निघात-निषेध होता है।

(11) देवदत्तः प्रपचति चन
'चन' परे है, 'पचति' तिङन्त पद है, 'प्र' की गति संज्ञा है। गतिसंज्ञक शब्दसे पर होने से निघात-निषेध नहीं हुआ।

अत्राग०—यहाँ 'अगति' पद के ग्रहण के विषय में 'सगतिरपि तिङ्' यहाँ उपसर्ग ग्रहण भी जानना चाहिए। यहाँ नहीं होता है।

(12) शुक्लीकरोतिं चन, (13) यत्काष्ठं शुक्लीकरोतिं, (14) यत्काष्ठं कृष्णीकरोतिं।

(3672) चादिषु च *58* (3965)

चादिषु च परतः तिङन्तमगतेः परं नानुदात्तं भवति। चादयः 'नचवाहाहैवयुक्ते' (8.1.24) इत्यत्र ये निर्दिष्टाः, त इह परिगृह्यन्ते। चशब्दे तावत्–देवदत्तः पचंति च खादंति च। वा–देवदत्तः पचंति वा खादंति वा। ह–देवदत्तः पचंति ह खादंति ह। अह–देवदत्तः पचंत्यह खादंत्यह। एव–देवदत्तः पचंत्येव खादंत्येव। 'अगतेः' इत्येव–देवदत्तः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रपचंति च प्रखादुति च। प्रथमस्यात्र तिङन्तस्य 'चवायोगे प्रथमे'(7.1.59) इति निघातः प्रतिषिद्ध्यते एव। परं तु निहन्यते।

अर्थ—गतिसंज्ञक से अतिरिक्त शब्द से उत्तर जो तिङन्त पद, उसे अनुदात्त नहीं होता है, 'च' आदि शब्दों के परे रहते।

'न चवाहाहैवयुक्ते' यहाँ जिनका निर्देश है, उनका ही यहाँ 'चादि' के द्वारा ग्रहण होता है।

उदा० (1) देवदत्तः पचति च खादति च
यहाँ निघात-प्रतिषेध होता है।

(2) देवदत्तः पचति वा खादति वा (पूर्ववत्)।
(3) देवदत्तः पचति ह खादति ह (पूर्ववत्)।
(4) देवदत्तः पचत्यह, खादत्यह।
निघात-प्रतिषेध।

(5) देवदत्तः पचत्येव, खादत्येव (पूर्ववत्)।

अगतेः—गतिभिन्न शब्द से उत्तर तिङन्त शब्द को अनुदात्त-निषेध होता है।

(6) देवदत्तः प्रपचति च प्रखादति च
'प्र' की गति संज्ञा है। अतः निषेध नहीं हुआ।

प्रथम०—प्रथम तिङन्त पद 'प्रपचति' का यहाँ 'चवायोगे प्रथमा' से निघात का प्रतिषेध होता ही है। द्वितीय तिङन्त 'प्रखादति' को सर्वानुदात्त होता है।

(3673) चवायोगे प्रथमा *59* (3966)

'अगतेः' इति पूर्वसूत्रे चानुकृष्टमित्यत्र नानुवर्तते। च, वा–इत्येताभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति। गर्दभाँश्च कालयंति, वीणां च वादयति। गर्दभान्वा कालयंति, वीणां वा वादयति। योगग्रहणं पूर्वाभ्यामपि योगे निघातप्रतिषेधो यथा स्यादिति। प्रथमाग्रहणम्–द्वितीयादेस्तिङन्तस्य मा भूदिति। चवायोगो हि द्विसमुच्चये विकल्पे च सति भवति, स चानेकस्य धर्म इति।

अर्थ—'अगतेः' यह पूर्व सूत्र में अनुवृत्त है तथा यहाँ इसका अनुवर्त्तन नहीं होता है। च तथा वा—इनके योग में तिङ् विभक्ति प्रथमा को अनुदात्त नहीं होता है।

उदा० (1) गर्दभांश्च कालयति, वीणां च वादयति

चित् स्वर से लकार में अकार उदात्त है। अतः मध्योदात्त हुआ। द्वितीय पद को सर्वानुदात्त हुआ।

(2) गर्दभान्वा कालयति, वीणां वा वादयति

योग०—सूत्र में 'योग' शब्द का ग्रहण है, ताकि पूर्व शब्दों के योग में भी निघात का निषेध हो जाय।

प्रथमा०—सूत्र में 'प्रथमा' का ग्रहण है, ताकि द्वितीयादि तिङन्त को यह निषेध न हो।

चवा०—च, वा—इनका योग दो के समुच्चय में तथा विकल्प होने पर होता है। वह अनेक का धर्म है।

(3674) हेति क्षियायाम् *60* (3967)

'ह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति क्षियायां गम्यमानायाम्। क्षिया = धर्मव्यतिक्रमः आचारभेदः। स्वयं ह रथेन यातिं3 उपाध्यायं पदातिं गमयति। स्वयं हौदनं भुङ्क्ते3 उपाध्यायं सक्तून्पाययति। प्रथमस्य तिङन्तस्यात्र निघातः प्रतिषिध्यते। 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' (8.2.104) इति च प्लुतो भवति।

अर्थ—क्षिया अर्थ गम्यमान हो तो 'ह' इस शब्द से युक्त प्रथमा तिङ् विभक्ति अनुदात्त नहीं होती है। आचारभेद को 'क्षिया' कहते हैं।

उदा० (1) स्वयं ह रथेन याति3, उपाध्यायं पदातिं गमयति
निघात-निषेध।

(2) स्वयं हौदनं भुङ्क्ते3, उपाध्यायं सक्तून् पाययति (पूर्ववत्)।

प्रथम०—यहाँ प्रथम तिङन्त पद को निघात का निषेध होता है। 'क्षियाशीःप्रैषेषु तिङाकाङ्क्षम्' से प्लुत होता है।

(3675) अहेति विनियोगे च *61* (3968)

'अह' इत्यनेन युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विनियोगे गम्यमाने। चशब्दात् क्षियायां च। नानाप्रयोजनो नियोगः = विनियोगः। त्वमह ग्रामं गच्छ। त्वमहारण्यं गच्छ। क्षियायाम्–स्वयमह रथेन यातिं3 उपाध्यायं पदातिं गमयति। स्वयमहौदनं भुङ्क्तें3। उपाध्यायं सक्तून्पाययति। पूर्ववन्निघातप्रतिषेधः, प्लुतश्च।

अर्थ—विनियोग अर्थ गम्यमान हो तो 'अह' इस शब्द से युक्त प्रथमा तिङ् विभक्ति अनुदात्त नहीं होती है। चकार के पाठ से 'क्षिया' अर्थ में भी निघात-निषेध होता है।

अनेक प्रयोग वाला नियोग 'विनियोग' कहलाता है।

उदा० (1) त्वमह ग्रामं गच्छ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुदात्त-निषेध। विनियोग अर्थ है।

(2) त्वमहाऽरण्यं गच्छ (पूर्ववत्)।

(3) स्वयमह रथेन याति3, उपाध्यायं पदातिं गमयति 'क्षिया' अर्थ में अनुदात्त-निषेध।

(4) स्वयमहौदनं भुङ्क्ते3, उपाध्यायं सक्तून् पाययति (पूर्ववत्)।

पूर्ववत् निघात-प्रतिषेध तथा प्लुत होता है।

(3676) चाहलोप एवेत्यवधारणम् *62* (3969)

चलोपे अहलोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति। एवेत्येतच्चेदवधारणार्थं प्रयुज्यते, क्व चास्य लोपः? यत्रार्थो गम्यते, न च प्रयुज्यते, तत्र लोपः। तत्र चशब्दः समुच्चयार्थः, अहशब्दः केवलार्थ इति-समानकर्तृके चलोपः, नानाकर्तृके अहलोपः। चलोपे-देवदत्त एव ग्रामं गच्छंतु, स देवदत्त एवारण्यं गच्छतु। ग्रामं चारण्यं च गच्छत्वित्यर्थः। अहलोपे-देवदत्त एव ग्रामं गच्छंतु यज्ञदत्त एवारण्यं गच्छतु। ग्रामं केवलमरण्यं केवलमित्यर्थः। अवधारणमिति किम्? देवदत्तः क्वेव भोक्ष्यते। अनवक्लृप्तावयमेवशब्दः। न क्वचिद्भोक्ष्यत इत्यर्थः। 'एवे चानियोगे' (का०वा०) इति पररूपम्।

अर्थ—'च' का लोप होने पर तथा 'अह' का लोप होने पर ही प्रथमा तिङ् विभक्ति अनुदात्त नहीं होती है, यदि 'एव' पद का अवधारण अर्थ में प्रयोग है तो इसका लोप कहाँ होता है? जहाँ अर्थ का ज्ञान होता है तथा उस शब्द का प्रयोग नहीं होता है, वहाँ लोप जानना चाहिए।

'च' शब्द समुच्चयवाची है तथा 'अह' शब्द केवलवाची है। इस प्रकार समानकर्तृक में ही चकार का लोप होता है तथा नानाकर्तृक में 'अह' का लोप होता है।

उदा० (1) देवदत्त एव ग्रामं गच्छतु, स देवदत्त एवाऽरण्यं गच्छतु

यहाँ 'च' का लोप हुआ है, परन्तु उसके अर्थ का ज्ञान होता है।

(2) देवदतत एव ग्रामं गच्छतु, यज्ञदत्त एवाऽरण्यं गच्छतु

यहाँ 'अह' का लोप है, परन्तु अर्थ का ज्ञान हो रहा है।

अवधा०—अवधारण अर्थ में ही निघात-प्रतिषेध होता है। यथा—

देवदत्तः क्वैव भोक्ष्यते—यहाँ अनवक्लृप्ति अर्थ में 'एव' शब्द का प्रयोग है। इसका अर्थ है—'कहीं नहीं खायेगा'। 'एवे चानियोगे' से पररूप हुआ है।

(3677) चादिलोपे विभाषा *63* (3970)

चादयः 'नचवाहाहैवयुक्ते' (8.1.24) इति सूत्रनिर्दिष्टा गृह्यन्ते, तेषां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता भवति विभाषा। चलोपे-शुक्ला व्रीहयो भवन्ति, भवन्ति। श्वेता गा आज्याय दुहन्ति दुहन्ति। भवन्तीत्येतद्विकल्पेन न निहन्यते। वालोपे-व्रीहिभिर्यजेत यजेत। यवैर्यजेत। यजेत। एवं शेषेष्वपि यथादर्शनमुदाहार्यम्।

अर्थ—चादि के द्वारा 'न चवाहाहैवयुक्ते' सूत्र से निर्दिष्ट अशब्दों का ग्रहण होता है। चादि का लोप होने पर प्रथमा तिङ् विभक्ति विकल्प से अनुदात्त नहीं होती है।

उदा० (1) शुक्ला व्रीहयो भवन्ति

निघात-प्रतिषेध। पक्ष में निघात।

(2) श्वेता गा आज्याय दुहन्ति

पूर्ववत्। पक्ष में निघात।

भवन्ती०—भवन्ति तथा दुहन्ति—इनको विकल्प से निघात नहीं होता है।

(3) व्रीहिभिर्यजेत (पूर्ववत्)।

(4) यवैर्यजेत (पूर्ववत्)।

(3678) वैवावेति च च्छन्दसि *64* (3971)

'वै', 'वाव'-इत्येताभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। अहंवैदे वानामासीत्। रात्रिरसुराणामासीत् (तै०सं० 1.5.9.2)। बृहस्पतिर्वै देवानां पुरोहित आसीत्। शण्डामर्कावसुराणाम् (तै०सं० 6.4.10.1)। वाव-अयं वाव हस्त आसीत्। नेतर आसीत्।

अर्थ—वेद के विषय में 'वै' तथा 'वाव' शब्दों से युक्त प्रथमा तिङ् विभक्ति विकल्प से अनुदात्त नहीं होती है।

उदा० (1) अहर्वै देवानामासीत्

निघात-प्रतिषेध।

(2) रात्रिरसुराणामासीत् (पूर्ववत्)।

(3) बृहस्पतिर्वै देवानां पुरोहित आसीत् (पूर्ववत्)।

(4) अयं वाव हस्त आसीत् (पूर्ववत्)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3679) एकान्याभ्यां समर्थाभ्याम् *65* (3972)

'एक', 'अन्य'–इत्येताभ्यां समर्थाभ्यां युक्ता प्रथमा तिङ्विभक्तिर्विभाषा नानुदात्ता भवति छन्दसि विषये। प्रजामेका जिन्वति। ऊर्जमेकां रक्षति (अपा० 8. 9.13)। जिन्वतीत्येतत्पक्षे न निहन्यते। तयोरन्यः पिप्पलं स्वाद्वत्ति। अनश्नन्नन्यो अभिचाकशीति (ऋ० 1.164. 120)। अत्तीत्येतत्पक्षे न निहन्यते। समर्थाभ्यामिति किम्? एको देवानुपातिष्ठत्। एक इति संख्यापदमेतद् अन्यार्थे न वर्त्तते। एकशब्दस्य व्यवस्थार्थं च समर्थग्रहणम्; व्यभिचारित्वात्तस्य।

अर्थ—वेद के विषय में 'एक' तथा 'अन्य'—इन समर्थों से युक्त प्रथमा तिङ् विभक्ति विकल्प से अनुदात्त नहीं होती है।

उदा० (1) प्रजामेका जिन्वति
निघात नहीं हुआ। पक्ष में निघात हुआ।

(2) ऊर्जमेका रक्षति
अनुदात्त नहीं हुआ।

(3) तयोरन्यः पिप्पलं स्वाद्वत्ति (पूर्ववत्)।

(4) अनश्नन्नन्यो अभिचाकशीति
निघात-प्रतिषेध।

समर्था०—सूत्रोक्त समर्थों से युक्त प्रथमा तिङ् विभक्ति को निघात-प्रतिषेध होता है।

(5) एको देवानुपातिष्ठत्
यहाँ नहीं हुआ।

एक०—'एक' यह संख्यापद है। यह अन्य अर्थ में विद्यमान नहीं है। एक शब्द की व्यवस्था के लिए 'समर्थ' शब्द का ग्रहण है, उसके व्यभिचारी होने से।

(3680) यद्वृत्तान्नित्यम् *66* (3973)

'प्रथमा', 'छन्दसि' इति निवृत्तम्। निघातप्रतिषेध इत्येव। यदो वृत्तं यद्वृत्तम्, यत्र पदे यच्छब्दो वर्तते तत्सर्वं यद्वृत्तम्। इह वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्। डतरडतमौ च प्रत्ययौ इत्येतन्नाश्रीयते। तस्माद्यद्वृत्तादुत्तरं तिङन्तं नानुदात्तं भवति नित्यम्। यो भुङ्क्ते। यं भोजयति। येन भुङ्क्ते। यस्मै ददाति। यत्कामास्ते जुहुमः (ऋ० 10.121.10) यद्भ्यङ् वायुर्वाति (तै०सं० 5.5. 1.1)। यद्वायुः पवते। पञ्चमीनिर्देशेऽप्यत्र व्यवहिते कार्यमिष्यते। *यथाकाम्ये वेति वक्तव्यम्* (म०भा०)। यत्र क्वचन यजन्ते।

अर्थ—प्रथमा, छन्दसि—इन अधिकारों की निवृत्ति हो चुकी है। निघात-निषेध—इसका ही यहाँ अनुवर्त्तन है। 'यद्' का वृत्त यद्वृत्त कहलाता है। जहाँ पद में 'यत्' शब्द वर्त्तमान है, वह सब 'यद्वृत्त' कहलाता है। यहाँ वृत्त ग्रहण के द्वारा तद्विभक्त्यन्त का ज्ञान होता है। यहाँ डतर व डतम—इन प्रत्ययों का आश्रय नहीं किया जाता। अतः यद्वृत्त से उत्तर जो तिङन्त पद, वह नित्य निघात-निषेध होता है।

उदा० (1) यो भुङ्क्ते, (2) यं भोजयति, (3) येन भुङ्क्ते, (4) यस्मै ददाति, (5) यत्कामास्ते जुहुमः, (6) यद्भ्यङ् वायुर्वाति, (7) यद् वायुः पवते। सर्वत्र निघात-निषेध हुआ है।

पञ्चमी०—पञ्चमी का निर्देश होने पर भी यहाँ व्यवधान होने पर कार्य होता है।

यथाका०—यथाकाम्य अर्थ में विकल्प से होता है।

(3681) पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः *67* (3974)

पूजनेभ्यः काष्ठादिभ्य उत्तरपदं पूजितमनुदात्तं भवति। काष्ठ–काष्ठाध्यापकः। काष्ठाभिरूपकः। दारुण–दारुणाध्यापकः। दारुणाभिरूपकः। असमातापुत्र–अमातापुत्राध्यापकः। अयुत–अयुताभिरूपकः। अयुताध्यापकः। अद्भुत–अद्भुताध्यापकः। अनुक्त–अनुक्ताध्यापकः। भृश–भृशाध्यापकः। घोर–घोराध्यापकः। परम–परमाध्यापकः। सु–स्वध्यापकः। अति–अत्यध्यापकः। *मलोपश्च*। इति वार्त्तिककारमतम्। मयूरव्यंसकादित्वात् समासः, समासे चैतदनुदात्तत्वम्। समासान्तोदात्तत्वापदवाद इष्यते। दारुणमध्यापक इत्येवमादिषु न भवति। 'मलोपश्च' इत्येनेनाप्ययमेव विषय आख्यायते। यत्र विभक्तेरभावान्मकारो न श्रूयते तत्रानुदात्तत्वमिति। असमासे हि मलोपो नैवेष्यते। दारुणमधीते दारुणमध्यापक इति। पूजनादित्येव पूजितपरिग्रहे सिद्धे पूजितग्रहणमनन्तरपूजितप्रतिपत्त्यर्थम्। एतदेव ज्ञापकम्–इह प्रकरणे पञ्चमीनिर्देशेऽपि नानान्तर्यमाश्रीयते इति। तथा च 'यद्वृत्तान्नित्यम्' (8.1.66) इत्यत्रोदाहृतम्। 'अनुदात्तम्' इति वर्तमाने पुनरनुदात्तग्रहणं प्रतिषेधनिवृत्त्यर्थम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—पूजनवाची काष्ठ आदि शब्दों से उत्तर पूजित शब्द को अनुदात्त होता है।

उदा० (1) काष्ठाऽध्यापकः
अनुदात्त हुआ।
(2) काष्ठाऽभिरूपकः (पूर्ववत्)।
(3) दारुणाऽध्यापकः (पूर्ववत्)।
(4) दारुणाऽभिरूपकः (पूर्ववत्)।
(5) अमातापुत्राऽध्यापकः (पूर्ववत्)।
(6) अयुताऽभिरूपकः (पूर्ववत्)।
(7) अयुताऽध्यापकः (पूर्ववत्)।
(8) अद्भुताऽध्यापकः (पूर्ववत्)।
(9) अनुक्ताऽध्यापकः (पूर्ववत्)।
(10) भृशाऽध्यापकः (पूर्ववत्)।
(11) घोराऽध्यापकः (पूर्ववत्)।
(12) परमाऽध्यापकः (पूर्ववत्)।
(13) स्वध्यापकः (पूर्ववत्)।
(14) अत्यध्यापकः (पूर्ववत्)।

मकार०—मकार-लोप होता है। यह वार्त्तिककार का मत है। मयूरव्यंसकादि से समास हुआ है। समास में यह अनुदात्त स्वर होता है।

समासा०—समासान्तोदात्त स्वर का अपवाद होता है। 'दारुणमध्यापकः' यहाँ इन स्थलों पर नहीं होता है। 'मलोपश्च' इसके द्वारा भी इसी विषय का आख्यान होता है। जहाँ विभक्ति के अभाव से मकार का श्रवण नहीं होता, वहाँ अनुदात्त स्वर होता है।

असमा०—समास न होने पर मकार का लोप नहीं होता है। दारुणमधीते—दारुणमध्यापकः।

पूजना०—'पूजनात्' इसके द्वारा ही पूजित परिग्रह के सिद्ध होने पर 'पूजित' शब्द का ग्रहण अनन्तर पूजित के ज्ञान के लिए है। यह ज्ञापक सिद्ध होता है कि इस प्रकरण में पञ्चमी के द्वारा निर्देश होने पर भी अनेक व्यवधानों का आश्रय किया जाता है। यह 'यद्वृत्तान्नित्यम्' यहाँ उदाहृत है।

अनुदा०—'अनुदात्तम्' पद के वर्त्तमान रहने पर भी पुनः 'अनुदात्त' का ग्रहण निषेध की निवृत्ति के लिए है।

(3682) सगतिरपि तिङ् *68* (3975)

सगतिरगतिरपि पूजनेभ्यः काष्ठादिभ्य परं पूजितं तिङन्तमनुदात्तं भवति। यत्काष्ठं पचति। यत्काष्ठं प्रपचति। यद्दारुणं पचति। यद्दारुणं प्रपचति। 'तिङ्ङतिङः' (8.1.28) इति निघातस्य 'निपातैर्यद्यदिहन्त' (8.1.30) इति प्रतिषेधे प्राप्ते पुनर्विधानम्। सगतिग्रहणाच्च गतिरपि निहन्यते। गतिग्रहणेन चात्रोपसर्गग्रहणमिष्यते। इह न भवति–यत्काष्ठं शुक्लीकरोति। यत्काष्ठं कृष्णीकरोति।

अर्थ—पूजन काष्ठ आदि शब्दों से उत्तर गतिपूर्वक तथा गतिरहित—इन दोनों अवस्थाओं में पूजित तिङन्त पद अनुदात्त होता है।

उदा० (1) यत्काष्ठं पचति
गतिरहित का प्रयोग।
(2) यत्काष्ठं प्रपचति
गतिसहित।
(3) यद् दारुणं पचति
अगति का उदाहरण।
(4) यद् दारुणं प्रपचति
सगति का उदाहरण।

तिङ्०—'तिङ्ङतिङः' से निघात का 'निपातैर्यद्यदिहन्त' से निषेध प्राप्त होने पर पुनः विधान किया गया है। 'सगति' के ग्रहण से अगति को भी निघात होता है।

गति०—गतिग्रहण के द्वारा यहाँ उपसर्गग्रहण होता है। यहाँ नहीं होता है।
यत्काष्ठं शुक्लीकरोति। यत्काष्ठं कृष्णीकरोति।

(3683) कुत्सने च सुप्यगोत्रादौ *69* (3976)

'पदात्' इति निवृत्तम्। 'सगतिरपि तिङ्' इति वर्तते। कुत्सने च सुबन्ते गोत्रादिवर्जिते परतः सगतिरपि तिङ् अगतिरप्यनुदात्तो भवति। पचति पूति, प्रपतति पूति। पचति मिथ्या, प्रपचति मिथ्या। कुत्सने इति किम्? पचंति शोभनम्। सुपीति किम्? पचंति क्लिश्नाति। अगोत्रादाविति किम्? पचंति गोत्रम्। पचंति ब्रुवम्। पचति प्रवचनम्। *क्रियाकुत्सन इति वक्तव्यम्* (म० भा०)। कर्तुः कुत्सने मा भूत्–पचंति पूतिर्देवदत्तः। प्रपचति पूतिः। *पूतिश्च चानुबन्धो भवतीति वक्तव्यम्* (म० भा०)। तेनायं चकारानुबन्धकत्वादन्तोदात्तो भवति। *विभाषितं चापि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बह्वर्थमनुदात्तं भवतीति वक्तव्यम्* (म०भा०)। पचन्ति पूतिः पचन्ति पूतिः। प्रपचन्ति पूतिः प्रपचन्ति पूतिः। 'सुपि कुत्सने क्रियाया मलोप इष्टोऽतिङीति चोक्तार्थम्। पूतिश्च चानुबन्धो विभाषितं चापि बह्वर्थम्' (म०भा०)।

अर्थ—'पदात्' इस अधिकार की निवृत्ति हो गई है। 'सगतिरपि तिङ्' का अनुवर्त्तन है। कुत्सन अर्थ में सगति तथा अगति—दोनों अवस्थाओं में तिङन्त पद अनुदात्त होता है, सुबन्त पद के परे रहते; परन्तु गोत्रादि के परे रहते नहीं होता है।

उदा० (1) पचति पूति
अनुदात्त हुआ।

(2) प्रपचति पूति
अनुदात्त हुआ।

(3) पचति मिथ्या (पूर्ववत्)।
(4) प्रपचति पूति (पूर्ववत्)।

कुत्सने०—कुत्सन अर्थ में ही तिङन्त को अनुदात्त होता है।

(5) पचति शोभनम्
अनुदात्त नहीं हुआ।

सुपी०—सुबन्त परे रहते ही तिङन्त को अनुदात्त होता है।

(6) पचति क्लिश्नाति
तिङन्त से परे सुबन्त नहीं है। अतः अनुदात्त नहीं हुआ।

अगोत्रा०—गोत्र आदि शब्दों के परे रहते अनुदात्त नहीं होता है।

(7) पचति गोत्रम्
अनुदात्त नहीं हुआ।

(8) पचति ब्रुवम् (पूर्ववत्)।
(9) पचति प्रवचनम् (पूर्ववत्)।

क्रिया०—क्रिया के कुत्सन अर्थ में अनुदात्त होता है। कर्त्ता के कुत्सन में अनुदात्त नहीं होता। यथा—

(10) पचति पूतिर्देवदत्तः।
(11) प्रपचति पूतिः।

पूतिश्च०—'पूति' 'च्' अनुबन्ध वाला होता है। 'च्' अनुबन्ध वाला होने से यह अन्तोदात्त होता है।

विभा०—बह्वर्थ जो तिङन्त, वह विकल्प से अनुदात्त होता है।

(12) पचन्ति पूति। (13) प्रपचन्ति पूति।

प्रकृत सूत्र पर पठित वार्तिकों को काशिकाकार ने निम्नलिखित कारिका में निबद्ध कर दिया है। कारिका का अर्थ इस प्रकार है—

सुपि०—सुबन्त पद परे रहते तिङन्त को अनुदात्त होता है।

क्रिया०—क्रिया का निन्दा अर्थ गम्यमान रहते तिङन्त को अनुदात्त होता है।

मलोप०—मकार का लोप होता है।

पूतिश्च०—पूति शब्द 'च्' अनुबन्ध वाला होता है।

विभाषितं०—बहुत्व अर्थ में तिङन्त पद विकल्प से अनुदात्त होता है।

(3684) गतिर्गतौ *70* (3977)

गतिर्गतौ परतोऽनुदात्तो भवति। अभ्युद्धरति। समुदानयति। अभिसम्पर्याहरति। गतिरिति किम्? देवदत्तः प्रपचति। गताविति किम्? आ मन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः (ऋ० 3.45.1)। याहीत्येतत्प्रति क्रियायोगादाङित्येष गतिः। तस्य गतावित्येतस्मिन्नसति गतिरित्यनाश्रितपरनिमित्तकमनुदात्तत्वं स्यात्।

अर्थ—गति परे रहते गतिसंज्ञक शब्द अनुदात्त होता है।

उदा० (1) अभ्युद्धरति
अभि शब्द को प्रातिपदिक स्वर से अन्तोदात्त स्वर प्राप्त था।

(2) समुदानयति
यहाँ भी आद्युदात्त स्वर प्राप्त था।

(3) अभिसम्पर्याहरति
अनुदात्त हुआ।

गति०—गतिसंज्ञक को ही अनुदात्त होता है।

(4) देवदत्तः प्रपचति
अनुदात्त नहीं हुआ।

गताव०—गति परे रहते ही अनुदात्त होता है।

(5) आमन्द्रैरिन्द्र हरिभिर्याहि
यहाँ अनुदात्त नहीं हुआ।

याही०—'याहि' इसके प्रति क्रियायोग से 'आङ्' यह गतिसंज्ञक है। उसके गति न होने से 'गतिः' इस प्रकार अनाश्रित परनिमित्तक अनुदात्त हो जाय।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3685) तिङि चोदात्तवति *71* (3978)

'गतिः' इति वर्त्तते। तिङन्ते उदात्तवति परतो गतिरनुदात्तो भवति। यत्प्रपचति। यत्प्रकरोति। 'तिङ्ग्रहणमुदात्तवतः परिमाणार्थम्' (म०भा०); अन्यथा हि यं प्रति गतिः, तत्रानुदात्तो भवतीति धातावेवोदात्तवति स्यात्; प्रत्यये न स्यात्–यत्प्रकरोतीति। 'यत्क्रियायुक्ताः प्रादयस्तेषां तं प्रति गत्युपसर्गसंज्ञे भवतः' (जै०प०) इति तिङन्ते धातुमेव प्रति गतिसंज्ञा। आमन्ते तर्हि न प्राप्नोति–प्रपचतितमाम् प्रपचतितरामिति? अत्र केचिदामन्तेन गतेः समासं कुर्वन्ति; तेषामव्ययपूर्वपदप्रकृतिस्वरत्वे सत्यक्रियमाणेऽपि तिङ्ग्रहणे परमनुदात्तवद्भवतीति गतिनिघातो नैव सिद्ध्यति। अथ तरबन्तस्य गतिसमासः? एवमपि सतिशिष्टत्वादाम एव स्वरे सति गतेः 'अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्येवानुदात्तत्वं सिद्धम्। येषाम् 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक्सुबुत्पत्तेः' (पु०प०) इत्यनेन वचनेन कृदन्तेनैव प्राक्सुबुत्पत्तेः समासो भवति, नान्येन' इति दर्शनम्, तेषामेवंविधे विषये समासेन नैव भवितव्यमिति। पृथक् स्वरप्रवृत्तौ सत्यामनेन निघातेन प्रयोजनमस्ति, तदर्थं यत्नः कर्तव्यः। उदात्तवतीति किम्? प्रपंचति। प्रकंरोति।

अर्थ—'गतिः' का अधिकार है। अनुदात्तवान् तिङन्त पद के परे रहते गतिसंज्ञक शब्द अनुदात्त होता है।

उदा० (1) यत्प्रपचति
गति 'प्र' अनुदात्त हुआ।
(2) यत्करोति (पूर्ववत्)।

तिङ्०—उदात्तवान् के परिमाण के लिए तिङ् का ग्रहण है। अन्यथा जिसके प्रति गति है, वहाँ अनुदात्त होता है। अतः उदात्तवान् धातु परे हो तथा प्रत्यय परे न हो। यथा—यत् प्रकरोति।

जिस क्रिया से युक्त प्रादि होते हैं, उनकी उसके प्रति गति तथा उपसर्गसंज्ञा होती है। इस प्रकार तिङन्त परे रहते धातु के प्रति गतिसंज्ञा होती है।

आमन्ते—आम् के अन्त में रहते यह प्राप्त नहीं होता। यथा—प्रपचतितराम्, प्रपचतितमाम्। कुछ विद्वान् आमन्त के साथ गति का समास करते हैं। उनके मत में अव्यय पूर्वपद प्रकृति स्वर होने पर न किये जाने पर भी तिङ् का ग्रहण होने पर द्वितीय अनुदात्तवान् होता है—इस प्रकार गतिसंज्ञक शब्द को सर्वानुदात्त सिद्ध नहीं होता है।

अथ०—यहाँ तरप् प्रत्ययान्त शब्द को गतिसमास होता है? इसी प्रकार भी सतिशिष्ट होने से आम् का ही स्वर होने पर गतिसंज्ञक शब्द का 'अनुदात्तं पदमेकवर्जम्' से ही अनुदात्तं होता है।

येषाम्०—जिनका 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इस वचन के द्वारा कृदन्त के साथ सुप् की उत्पत्ति से पूर्व समास होता है, अन्य के साथ नहीं—यह मत है। उनके इस प्रकार के विषय में समास नहीं होना चाहिए। पृथक् स्वर की प्रवृत्ति होने पर इस निघात से प्रयोजन है। अतः यत्न करना चाहिए।

उदात्त०—उदात्तवान् के परे रहते ही गति को अनुदात्त होता है।

(4) प्रपचति, (5) प्रकरोति
यहाँ अनुदात्त नहीं हुआ।

(3686) आमन्त्रितं पूर्वमविद्यमानवत् *72* (412)

आमन्त्रितं पूर्वमविद्यमानवद्भवति, तस्मिन् सति यत्कार्यं तन्न भवति, असति यत्तद्भवति। कानि पुनरविद्यमानवत्त्वे प्रयोजनानि? आमन्त्रित–तिङ्निघातयुष्मदस्मदादेशाभावाः। देवदत्त, यज्ञदत्तेत्यत्रामन्त्रितस्य पदात्परस्ये(8.1.19)ति निघातो न भवति। षाष्ठिकामन्त्रिताद्युदात्तत्वं (6.1.198) भवति; देवदत्त पचंसीत्यत्र 'तिङ्ङतिङः' (8.1.28) इति निघातो न भवति; देवदत्त तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वम्–इत्येवमादिषु युष्मदस्मदादेशा न भवन्ति। पूजायामनन्तरप्रतिषेधः प्रयोजनम्–यावद्देवदत्त पचसीत्यत्रापि 'पूजायां नानन्तरम्' (8.1.30) इत्येव प्रतिषेधो भवति। 'जात्वपूर्वम्' (8.1.47) इत्येतद्–देवदत्त जातु पचसीत्यत्रापि भवति। 'आहो उताहो चानन्तरम् (8.1.49) इति–आहो देवदत्त पचंसि उताहो देवदत्त पचंसीत्यत्रापि भवति। 'आम एकान्तरमामन्त्रितमनन्तिके' (8.1.55) इति–आम् भोः पचंसि देवदत्त इत्यत्रापि भवति। आमन्त्रितमिति किम्? देवदत्तः पचति। पूर्वमिति किम्? देवदत्त इत्येतस्यामन्त्रिताद्युदात्तत्वे कर्तव्ये नाविद्यमानवद्भवति। पूर्वत्वं च परापेक्षं भवतीति परस्यैव कार्ये स्वनिमित्ते, अन्यनिमित्ते वा तदविद्यमानवद्भवति, न तु स्वकार्ये। देवदत्त पचंसीत्यत्रापि ह्यामन्त्रिताद्युदात्तत्वं भवत्येव। इह–इमं मे गङ्गे यमुने (ऋ० 10.75.5) इति गङ्गेशब्दः पूर्वमामन्त्रितम्, ततः परस्य यमुनेशब्दस्यानुदात्तत्वे

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्तव्ये स्वयमविद्यमानवत्त्वान्निमित्तं न भवति। मेशब्दस्य निमित्तभावं न प्रतिबध्नाति।

अर्थ—पूर्व आमन्त्रितसंज्ञक शब्द अविद्यमान के समान होता है अर्थात् उसके होने पर जो कार्य होता है, वह न हुए के समान होता है।

कानि०—अविद्यमानवत् होने के क्या-क्या प्रयोजन हैं? इसके प्रयोजन आमन्त्रित, तिङ्, निघात तथा युष्मद् व अस्मद् शब्दों को आदेश करना है।

देवदत्त यज्ञदत्त—इस प्रकार आमन्त्रितसंज्ञक शब्द को 'पदात् परस्य' से सर्वानुदात्त नहीं होता। षाष्ठिक आमन्त्रित आद्युदात्त ही होता है।

देवदत्त०—देवदत्त, पचसि? यहाँ 'तिङ्ङतिङः' से निघात नहीं होता। देवदत्त, तव ग्रामः स्वम्, देवदत्त मम ग्रामः स्वम्—इन स्थलों पर युष्मद्-अस्मद् को आदेश नहीं होते। पूजा में अनन्तर प्रतिषेध भी प्रयोजन है। यथा—

यावद् देवदत्त पचसि—इस स्थल पर 'पूजायां नानन्तरम्' से ही निषेध होता है। 'जात्वपूर्वम्' से यहाँ होता है—देवदत्त जातु पचसि।

'आहो उताहो चाऽनन्तरम्' से यहाँ होता है—

आहो देवदत्त पचसि, उताहो देवदत्त पचसि।

'आम एकान्तरम् आमन्त्रितम् अनन्तिके' से निम्नलिखित में होता है—आम् भो पचसि देवदत्त।

आमन्त्रि०—आमन्त्रितसंज्ञक शब्द ही अविद्यमानवत् होता है। देवदत्तः पचति

यहाँ अविद्यमानवत् नहीं हुआ।

पूर्वमि०—पूर्व ही होता है। 'देवदत्त' इसके आमन्त्रितलक्षण आद्युदात्त किये जाने में अविद्यमानवत् नहीं होता है। पूर्वता परापेक्ष होती है। अतः पर के स्थान पर ही कार्य स्वनिमित्त होने पर अथवा अन्यनिमित्त होने पर अविद्यमानवत् होता है; न कि स्वकार्य में।

देवदत्त पचसि—इस स्थल पर भी आमन्त्रितलक्षण आद्युदात्त स्वर होता ही है।

इह०—इमं मे गङ्गे यमने—यहाँ 'गङ्गे' शब्द पूर्व आमन्त्रित है। तब पर आमन्त्रित शब्द 'यमुने' को अनुदात्त स्वर किये जाने में स्वयं अविद्यमानवत् का निमित्त नहीं होता है। 'मे' शब्द का निमित्तभाव नहीं होता है।

(3687) नामन्त्रिते समानाधिकरणे सामान्यवचनम् *73* (413)

अविद्यमानवत्त्वस्य प्रतिषेधः। आमन्त्रितान्ते समानाधिकरणे परतः पूर्वमामन्त्रितान्तं सामान्यवचनं नाविद्यमानवद्भवति, किं तर्हि? विद्यमानवदेव। अग्ने गृहपते। माणवक जटिलकाध्यापक। पूर्वस्य विद्यमानवत्त्वात्परमनुदात्तमेव भवति। आमन्त्रित इति किम्? देवदत्त पचसि। समानाधिकरण इति किम्? देवदत्त पण्डित यज्ञदत्त। अत्र यज्ञदत्तविशेषणं पण्डितशब्दः; न पूर्वेण समानाधिकरणः। सामान्यवचनमिति किम्? पर्यायेषु मा भूत्-'अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये। एते पर्यायाः। एवं ह्युक्तम्-'एतानि ह्यघ्न्ये नामानीति' (वा०सं० 8.43)।

अर्थ—अविद्यमानवद्भाव का निषेध कहा जा रहा है। आमन्त्रितान्त समानाधिकरण के परे रहते पूर्व आमन्त्रितान्त सामान्यवचन अविद्यमानवत् नहीं होता। किस प्रकार होता है? वह विद्यमानवत् होता है।

उदा० (1) अग्ने गृहपते

(2) माणवक जटिलकाऽध्यापक

यहाँ पूर्व के विद्यमानवत् होने से पर को अनुदात्त ही होता है।

आमन्त्रि०—आमन्त्रितसंज्ञक शब्द के परे रहते ही होता है।

(3) देवदत्त पचसि

यहाँ आमन्त्रित शब्द परे नहीं है।

समाना०—समानाधिकरण होने पर अविद्यमानवत् निषेध होता है।

(3) देवदत्त पण्डित यज्ञदत्त

यहाँ यज्ञदत्त का विशेषण 'पण्डित' शब्द है तथा पूर्व के द्वारा समानाधिकरण नहीं है। अतः अविद्यमानवत् निषेध नहीं हुआ।

सामान्य०—सामान्यवचन ही विद्यमानवत् होता है। पर्याय में नहीं होता है।

(4) अघ्न्ये देवि सरस्वति ईडे काव्ये विहव्ये—

ये सभी पर्याय शब्द हैं।

(3688) विभाषितं विशेषवचने बहुवचनम् *74* (3655)

पूर्वेणाविद्यमानवत्त्वे प्रतिषिद्धे विकल्प उच्यते। विशेष-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वचने समानाधिकरणे आमन्त्रितान्ते परतः पूर्वमामन्त्रितं बहुवचनान्तं विभाषितमविद्यमानवद्भवति। देवाः शरण्याः देवाः शरण्याः। ब्राह्मणा वैयाकरणाः, ब्राह्मणा वैयाकरणाः। सामान्यवचनाधिकारादेव विशेषवचन इति सिद्धे विशेषवचनग्रहणं विस्पष्टार्थम्। बहुवचनमिति किम्? माणवक जटिलक। नित्यमेतद्विद्यमानवदेव।

इति श्रीवामनविरचितायां काशिकायां वृत्ता-
वष्टमाऽध्यायस्य प्रथमः पादः॥

अर्थ—पूर्व सूत्र के द्वारा अविद्यमानवद्भाव का निषेध होने पर विकल्प कहा जा रहा है।

विशेषवचन समानाधिकरण आमन्त्रितान्त के परे रहते बहुवचनान्त पूर्व आमन्त्रितसंज्ञक विकल्प से अविद्यमानवत् होता है।

उदा० (1) देवाः शरण्याः
विकल्प से विद्यमानवत् हुआ।

(2) ब्राह्मणा वैयाकरणाः (पूर्ववत्)।

सामान्य०—'सामान्यवचनम्' इस अधिकार से ही विशेषवचन को यह सिद्ध होने पर 'विशेषवचन' का ग्रहण स्पष्टता के लिए है।

बहुव०—**बहुवचनान्त** ही विद्यमानवद् विकल्प से होता है।

(3) माणवक जटिलक
यहाँ विद्यमानवद्भाव नित्य होता है।

इति पण्डितेश्वरचन्द्रविरचितायां काशिकायाः सोमलेखाऽऽख्यायां हिन्दीटीकायाम्
अष्टमाऽध्यायस्य प्रथमः पादः समाप्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3689) पूर्वत्रासिद्धम् *1* (12)

'पूर्वत्रासिद्धम्' इत्यधिकारोऽयमा अध्यायपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः 'पूर्वत्रासिद्धम्' इत्येवं तद्वेदितव्यम्। तत्र येयं सपादसप्ताध्याय्यनुक्रान्ता एतस्यामयं पादोनोऽध्यायोऽसिद्धो भवति। इत उत्तरं चोत्तर उत्तरो योगः पूर्वत्र पूर्वत्रासिद्धो भवति = असिद्धवद्भवति। सिद्धकार्यं न करोतीत्यर्थः। तदेतदसिद्धत्ववचनमादेशलक्षणप्रतिषेधार्थम्, उत्सर्गलक्षणभावार्थं च। अस्मा उद्धर, द्वा अत्र, द्वा आनय, असा आदित्यः–इत्यत्र व्यलोपस्यासिद्धत्वात् 'आद्गुणः' (6.1. 87) इति, 'अकः सवर्णे दीर्घः' (6.1.101) इति च न भवति। अमुष्मै, अमुष्मात्, अमुष्मिन्–इति उत्वस्यासिद्धत्वात् स्मायादयो भवन्ति।

शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा।
मतोर्वत्वे झलां जश्त्वे गुडलिण्मान्निदर्शनम्॥

शुष्किकेति–अत्र 'शुषः कः' (8.2.51) इत्यस्यासिद्धत्वाद् 'उदीचामातः स्थाने यकपूर्वायाः' (7.3.46) इत्येतन्न भवति। शुष्कजङ्घेति–'न कोपधायाः' (6.3.37) इति पुंवद्भावप्रतिषेधो न भवति। क्षामिमानिति–क्षामस्यापत्यं क्षामिः, क्षामो वा अस्यास्तीति क्षामिः, क्षामी वा यस्यास्तीति क्षामिमान्। 'क्षायो मः' (8.2.53) इत्यस्यासिद्धत्वात् 'मादुपधायाश्च' (8.2.9) इति वत्वं न भवति। औजढदिति–वहेर्निष्ठायामूढस्तमाख्यदिति णिच्, तदन्ताल्लुङ्; 'चङि' (6.1.11) इति द्विर्वचने कर्त्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वाण्णौ च यष्टिलोपः, तस्य स्थानिवद्भावाद् ह्त इत्येतद् द्विरुच्यते। 'अनग्लोपे' (7.4.93) इति प्रतिषेधात्सन्वदित्त्वं नास्ति, तेन औजढदिति भवति। औजिढत् इत्येतत्तु क्तिन्नन्तस्य ऊढिशब्दस्य भवति। गुडलिण्मानिति–गुडलिहोऽस्य सन्ति इति मतुप्, तत्र ढत्वजश्त्वयोरसिद्धत्वाद् 'झयः' (8.2.10) इति वत्वं न भवति। येऽत्र षष्ठीनिर्देशाः, पञ्चमीनिर्देशाश्च; तेषाम् 'षष्ठी स्थानेयोगा' (1.1. 49), 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (1.1.66) 'तस्मादित्युत्तरस्य' (1.1.67) इति च कर्तव्ये नासिद्धत्वं भवति; 'कार्यकालं हि संज्ञापरिभाषम्' इति पूर्वत्वमासां परिभाषाणां नास्तीति। 'विप्रतिषेधे परम्' इत्येषा तु परिभाषा येन पूर्वेण लक्षणेन सह स्पर्द्धते, परं लक्षणं तत्प्रति तस्यासिद्धत्वान्न प्रवर्तते। तथा च विस्फोर्यम्, अवगोर्यमिति गुणः परेण 'हलि च' (8.2.77) इति दीर्घत्वेन न बाध्यते। अपवादस्य तु परस्यापि उत्सर्गे कर्त्तव्ये वचनप्रामाण्यादसिद्धत्वं न भवति। तेन दोग्धा, दोग्धुमित्यत्र घत्वस्यासिद्धत्वाद् 'हो ढः' (8.2.31) इति न भवति।

अर्थ—अष्टम अध्याय की समाप्तिपर्यन्त 'पूर्वत्राऽसिद्धम्' यह अधिकार है। इससे आगे जो कहा जायेगा, वह पूर्व के प्रति असिद्ध होता है। यहाँ पर जो सपाद सप्ताध्यायी का प्रवचन किया जा चुका है, उसके प्रति यह पादोन अध्याय (अर्थात् त्रिपादी) असिद्ध होता है।

इससे आगे भी उत्तर-उत्तर योग होता है अर्थात् त्रिपादी में भी पूर्व के प्रति पर शास्त्र असिद्ध रहता है। भाव यह है कि सिद्ध के समान कार्य नहीं होता है।

तदेतत्०—यह असिद्धवचन आदेश लक्षणनिषेध के लिए तथा उत्सर्गलक्षण भाव के लिए होता है।

उदा० (1) अस्मा उद्धर
अस्मै उद्धर—एचोऽयवायावः,
अस्माय् उद्धर—'लोपः शाकल्यस्य' (8.3.19),
अस्मा उद्धर—'आद्गुणः' प्राप्त हुआ।

(2) द्वा अत्र
द्वौ अत्र—एचोऽयवायावः,
द्वाव् अत्र—लोपः शाकल्य०,
द्वा अत्र—'अकः सवर्णे दीर्घः' (6.1.97) प्राप्त।

(3) द्वा आनय
द्वौ आनय—पूर्ववत् वकारलोप, 'अकः सवर्णे दीर्घः' की प्राप्ति।

(4) असा आदित्यः
असौ आदित्यः—पूर्ववत्।

इत्यत्र—इन स्थलों पर वकार, यकारलोप के असिद्ध होने से 'आद्गुणः' से प्राप्त गुण तथा 'अकः सवर्णे दीर्घः' से प्राप्त सवर्णदीर्घ नहीं होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इसी प्रकार अमुष्मै, अमुष्मात्, अमुष्मिन्—इन स्थलों पर उत्व के असिद्ध होने से 'स्मै' आदि आदेश नहीं होते हैं।

शुष्किका शुष्कजङ्घा च क्षामिमानौजढत्तथा।
मतोर्वत्त्वे झलां जश्त्वे गुडलिण्मान्निदर्शनम्॥

इस कारिका का अर्थ इस प्रकार है।

शुष्कि०—'शुष् क्त' इस दशा में 'शुषः कः' से 'क' आदेश हुआ। स्त्रियाम्, अजाद्यतष्टाप् से 'टाप्' हुआ। 'प्रागिवात्कः' से अज्ञात अर्थ में 'क' हुआ।

'शुष्का क' अब 'केऽणः' से ह्रस्वादेश हुआ। तब पूर्ववत् 'टाप्' तथा 'प्रत्ययस्थात् कात् पूर्व०' से इत्त्व होकर 'शुष्किका' बनता है। 'उदीचाम्' से पाक्षिक इत्त्व नहीं होता। यहाँ 'शुषः कः' (8.2.51) असिद्ध है।

शुष्क०—'शुष्कजङ्घा' यहाँ 'न कोपधायाः' से पुंवद्भावनिषेध नहीं होता।

शुष्के जङ्घे अस्याः—बहुव्रीहि समास हुआ। शुषः कः' के असिद्ध रहने से 'न कोपधायाः' से पुंवद्भाव का निषेध नहीं हुआ।

क्षामि०—'क्षै क्त' इस दशा में 'आदेच उपदेशे०' तथा 'क्षायो मः' से 'क्षा म' यह स्थिति बनती है। अब 'क्षामस्याऽपत्यम्' इस अर्थ में 'अत इञ्' से 'इञ्' करके अथवा 'अत इनिठनौ' से 'इनि' प्रत्यय करके क्षामो (क्षामी वा) अस्याऽस्ति—इस विग्रह के अनुसार 'मतुप्' होता है। तब 'मादुपधायाश्च' से प्राप्त वत्त्व के प्रति 'क्षायो मः' (8.2.53) के असिद्ध रहने से यह वत्त्व नहीं होता है।

औजढ०—'वह् क्त' इस दशा में सम्प्रसारण, 'हो ढः' से ढकार होकर 'उद्त' हुआ। 'झषस्तथोर्धो०' से तकार को धकार, 'ष्टुना ष्टुः' से धकार को ढकार हुआ। उद्ढ। 'ढो ढे लोपः' से पूर्व ढकार का लोप तथा 'ढ्रलोपे पूर्वस्य०' से दीर्घ होकर 'ऊढ' बनता है। 'तमाचष्टे' इस अर्थ में 'णिच्' हुआ, 'णाविष्ठवत् कार्यं प्रातिपदिकस्य' से इष्ठवद्भाव होकर टिलोप हुआ। लुङ् आया। 'णिश्रि०' से 'चङ्' हुआ। 'चङि' से द्विर्वचन प्राप्त हुआ। तब ढत्व (8.2.13), धत्व (8.2.40), ष्टुत्व (8.4.40) तथा ढलोप (8.3.13) के असिद्ध होने से णि में जो टि का लोप हुआ, उसके स्थानिवद्भाव से 'हत' इस द्वितीय एकाच् को द्वित्व हुआ। अभ्यास-कार्य, 'कुहोश्चु' से चुत्व तथा 'अभ्यासे चर्च' से जश्त्व होकर 'औजढत्' बनता है। 'अनग्लोपे' इस पद के द्वारा प्रतिषेध होने से सन्वल्लक्षण इत्त्व नहीं होता है। क्तिन् प्रत्ययान्त 'ऊढि' शब्द से 'औजिढत्' बनता है।

गुडलि०—गुडं लेढि—गुडलिह्। क्विप् प्रत्यय, सर्वापहारलोप तथा विभक्तिकार्य। गुडलिहोऽस्य सन्ति—इस अर्थ में मतुप् हुआ, पूर्ववत् ढत्व, जश्त्व के असिद्ध रहने से 'झयः' से प्राप्त वत्व नहीं होता है।

उदा० (1) अस्मा उद्धर। (2) द्वा अत्र। (3) द्वा आनय। (4) असा आदित्यः। (5) अमुष्मै। (6) अमुष्मात्। (7) अमुष्मिन्। (8) शुष्किका। (9) शुष्कजङ्घा। (10) क्षामिमान्। (11) ऊढः। (12) ऊढिः। (13) औजढत्। (14) औजिढत्। (15) गुडलिट्। (16) गुडलिण्मान्।

येऽत्र०—यहाँ जो षष्ठी का निर्देश है, सप्तमी का निर्देश है तथा पञ्चमी का निर्देश है। वहाँ क्रमशः षष्ठी स्थानेयोगा, तस्मिन्निति निर्दिष्टे पूर्वस्य तथा तस्मादित्युत्तरस्य—इन परिभाषाओं की प्रवृत्ति में असिद्धभाव नहीं होता है। 'कार्यकालं हि संज्ञापरिभाषम्' इस प्रकार इन परिभाषाओं का पूर्वत्व तो होता नहीं है। इसी प्रकार 'विप्रतिषेधे परं कार्यम्' यह परिभाषा जिन पूर्वलक्षण के साथ विप्रतिषेध करती है, परलक्षण उसके प्रति उसके असिद्ध होने से प्रवृत्त नहीं होता है।

तथा च०—विस्फोर्यम्, अवगोर्यम्—यहाँ 'पुगन्तलघूप०' से प्राप्त गुण का 'हलि च' (8.2.77) से विहित दीर्घादेशरूप पर कार्य के द्वारा बाध नहीं होता है। अपवादरूप परकार्य को भी उत्सर्ग करने में वचनप्रामाण्यवशात् असिद्धभाव नहीं होता है। तब दोग्धा तथा दोग्धुम्—इन स्थलों पर घत्व के असिद्ध होने से 'हो ढः' से ढकार नहीं होता है।

(17) विस्फोर्यम्
वि स्फुर् ण्यत्—ऋहलोर्ण्यत्, अनुबन्धलोप,
वि स्फोर् य सु—गुण, विभक्तिकार्य।

(18) अवगोर्यम्
अव गुर् ण्यत्—पूर्ववत्।

(19) दोग्धा
दुह् तृच्—ण्वुल्तृचौ,
दुघ् तृ—दाऽऽदेर्धातोर्घः,
दुघ् धृ—झषस्तथोर्धो०,
दोघ् धृ—आर्धधातुकं शेषः, पुगन्तलघूपध०,
दोग् धृ सु—झलां जश् झशि।

(20) दोग्धुम्
दुह् तुमुन्—सभी कार्य पूर्ववत्,
दोग् धुम् सु—अव्ययसंज्ञा, सुलुक्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3690) नलोपः सुप्स्वरसंज्ञातुग्विधिषु कृति *2* (353)

नलोपः पूर्वत्रासिद्धो भवति सुब्विधौ, स्वरविधौ, संज्ञाविधौ, तुग्विधौ च कृति। विधिशब्दोऽयं प्रत्येकमभिसम्बध्यमानः स्वरसंज्ञातुकां विधेयत्वात्तैः कर्मषष्ठीयुक्तैर्भावसाधनोऽभिसम्बध्यते। सुपा तु सम्बन्धसामान्यवचनषष्ठ्यन्तेन कर्मसाधनः। तेन सुपः स्थाने यो विधिः, सुपि च परभूते, सर्वोऽसौ सुब्विधिरिति सर्वत्रासिद्धत्वं भवति। सुब्विधौ तावत्–राजभिः, तक्षभिरित्यत्र नलोपस्यासिद्धत्वाद् 'अतो भिस ऐस्' (7.1.9) इति न भवति। राजभ्याम्, तक्षभ्याम्, राजसु, तक्षस्विति–'सुपि च' (7.3.102) इति, 'बहुवचने झल्येत्' (7.3. 103) इति दीर्घत्वम्, एत्त्वं च न भवति। स्वरविधौ–राजवतीत्यत्र नलोपस्यासिद्धत्वात् 'अन्तोऽवत्याः' (6.1. 220) इति न भवति। पञ्चार्मम्, दशार्ममिति–अत्र नलोपस्यासिद्धत्वाद् 'अर्मे चावर्णं द्व्यच्त्र्यच्' (6.2.90) इति पूर्वपदस्याद्युदात्तत्वं न भवति। पञ्चदण्डी–इत्यत्र नलोपस्यासिद्धत्वात् 'इगन्ते द्विगौ' (6.2.29) इति पूर्वपदप्रकृतिस्वरो न भवति। संज्ञाविधौ–पञ्च ब्राह्मण्यः, दश ब्राह्मण्य इति नलोपस्यासिद्धत्वाद् 'ष्णान्ता षट्' (1.1.24) इति षट्संज्ञा भवति, ततश्च 'न षट्स्वस्रादिभ्यः' (4.1.10) इति टापः प्रतिषेधो भवति। तदेतत्प्रयोजनं कथं भवति? यदि 'प्रतिकार्यं संज्ञाप्रवृत्तिः' इत्येतद्दर्शनम्। या हि जश्शसोर्लुगर्था षट्संज्ञा प्रवृत्ता, तया स्त्रीप्रत्ययप्रतिषेधो न क्रियत इति सा पुनः प्रवर्तयितव्येति। तुग्विधौ–वृत्रहभ्याम्, वृत्रहभिरिति नलोपस्यासिद्धत्वाद् 'ह्रस्वस्य पिति कृति तुक्' (6.1.71) इति तुग्न भवति। अत्र केचित्–'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' (व्या०प०) इति तुकं प्रति नलोपस्यानिमित्तत्वाद् बहिरङ्गलक्षणेन वाऽसिद्धत्वात्तुग्विधिग्रहणमनर्थकमिति प्रतिपन्नाः तु तत् क्रियते परिभाषाद्वयस्यानित्यत्वं ज्ञापयितुम्। कृतीति किम्? वृत्रहच्छत्रम्, वृत्रहच्छाया–'छे च' (6.1.73) इति तुग्भवति। अत्र 'सिद्धे सत्यारम्भो नियमार्थः' (कात० प०)–एतेष्वेव नलोपोऽसिद्धो भवति, नान्यत्र। तेन राजीयति, राजायते, राजाश्वः–इति ईत्वम्, दीर्घत्वम्, एकादेशश्च सिद्धो भवति।

अर्थ—सुप् विधि, स्वरविधि, संज्ञाविधि, तथा कृत् प्रत्यय तुक् विधि—इनमें नकार का लोप असिद्ध होता है।

'विधि' शब्द का प्रत्येक के साथ सम्बन्ध है। अतः स्वर, संज्ञा तथा तुक् के विधेय होने से, कर्म व षष्ठी से युक्त उनके द्वारा भावसाधन भी अभिसम्बद्ध होता है। सुप् के द्वारा सम्बन्ध सामान्य वचन षष्ठ्यन्त के द्वारा कर्मसाधन (सम्बद्ध होता है)। अतः सुप् के स्थान पर जो विधि तथा सुप् के परभूत रहते—यह सब सुब्विधि कहलाती है। अतः सर्वत्र (नलोप) असिद्ध होता है।

उदा० (क) सुब्विधौ—

(1) राजभिः

राजन् भिस्—पदसंज्ञा, नलोपः प्रातिपदिकान्तस्य,

राज भिस्—'अतो भिस ऐस्' से 'ऐस्' आदेश प्राप्त हुआ, परन्तु सुब्विधि में नलोप के असिद्ध होने से अदन्त अङ्ग के न रहने से 'ऐस्' नहीं हुआ।

(2) तक्षभिः

तक्षन् भिस्—पूर्ववत्।

(3) राजभ्याम्

राजन् भ्याम्—यहाँ नकारलोप होकर 'सुपि च' से दीर्घादेश प्राप्त हुआ, नलोप के असिद्ध रहने से नहीं हुआ।

(4) तक्षभ्याम् (पूर्ववत्)।

(5) राजसु

राजन् सु—नकारलोप होकर 'बहुवचने झल्येत्' से एत्त्व प्राप्त हुआ, नलोप के असिद्ध रहने से एत्त्व नहीं हुआ।

(6) तक्षसु

पूर्ववत् एत्त्व नहीं हुआ।

(ख) स्वरविधौ—

राज०—'राजवती' इस स्थल पर नलोप के असिद्ध होने से 'अन्तोऽवत्याः' से स्वर प्राप्त नहीं हुआ।

(7) राजवती

राजन् मतुप्—अनुबन्धलोप,

राज वत्—नलोपः प्रातिपदि०, मादुपधाया०,

राजवत् ङीप्—उगितश्च, 'अन्तोऽवत्याः' से अन्तोदात्त स्वर प्राप्त हुआ, परन्तु नलोप के असिद्ध होने से प्रातिपदिकस्वर से आद्युदात्त हुआ।

पञ्चार्म०—पञ्चार्मम्, दशार्मम्—इन स्थलों पर 'अर्मे चावर्णं०' से पूर्व पद को प्राप्त आद्युदात्त स्वर नलोप के असिद्ध होने से नहीं होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इसी प्रकार 'पञ्चदण्डी' इस स्थल पर 'इगन्तकालकपा०' से पूर्व पद को प्राप्त प्रकृतिस्वर नलोप के असिद्ध होने से नहीं होता है।

(8) पञ्चार्मम्

'दिक्सङ्ख्ये संज्ञायाम्' से समास, नकारलोप हुआ, पूर्व पद को 'अर्मे चाऽवर्णम्' से आद्युदात्त स्वर प्राप्त हुआ, परन्तु नलोप के असिद्ध होने से नहीं हुआ। तब समासलक्षण अन्तोदात्त स्वर हुआ।

(9) दुशार्मम्

पूर्ववत् अन्तोदात्त स्वर।

(10) पञ्चदुण्डी

पञ्चानां दण्डिनां समाहारः—'तद्धितार्थोत्तरपद०' से समास,

पञ्च दण्डिन्—समाहार अर्थ में द्विगु, 'स नपुंसकम्' से नपुंसक लिङ्ग, नकारलोप,

पञ्चदण्डी—'इगन्त कालकपाल०' से पूर्व पद को प्रकृतिस्वर प्राप्त होता है। नलोप के असिद्ध होने से नहीं हुआ, समासलक्षण अन्तोदात्त स्वर हुआ।

पञ्च ब्रा०—पञ्च ब्राह्मण्यः, दश ब्राह्मण्यः—इन स्थलों पर नलोप के असिद्ध होने से 'ष्णान्ता षट्' से षट् संज्ञा होती है। तब 'न षट्स्वस्रादिभ्यः' से 'टाप्' का निषेध होता है। यह प्रयोजन कैसे होता है ? यदि 'प्रतिकार्यं संज्ञाप्रवृत्तिः' यह मत है। यह जो जस् तथा शस् की लुगर्थ षट् संज्ञा प्रवृत्त है, उसके द्वारा स्त्रीप्रत्यय का निषेध नहीं किया जाता। अतः उसको पुनः प्रवृत्त करना चाहिए।

(ग) संज्ञाविधौ—

(11) पञ्च ब्राह्मण्यः

पञ्चन्—नकारलोप हुआ,

पञ्च—अजाद्यतष्टाप् तथा स्त्रियाम् से 'टाप्',

पञ्च टाप्—नलोप के असिद्ध होने से षट्संज्ञा होकर 'टाप्' का लुक् होता है।

विशेष—यहाँ दो मत हैं—

(क) यावन्ति संज्ञाकार्याणि तत्रैकैव संज्ञा प्रवर्त्तते अर्थात् एक ही संज्ञा से अनेक संज्ञाकार्य हो जाते हैं।

(ख) यावन्ति संज्ञाकार्याणि तावत्य एव संज्ञाः प्रवर्त्तन्ते अर्थात् जितने भी संज्ञाकार्य हैं, उतनी ही संज्ञायें प्रवृत्त होती हैं।

प्रथम मत में इसका प्रयोजन नहीं है। पूर्वप्रवृत्त जिस संज्ञा के द्वारा 'षड्भ्यो लुक्' से जस् व शस् का लुक् रूप कार्य किया है, उसी संज्ञा के द्वारा 'टाप्' का प्रतिषेध होता है।

अतः द्वितीय मत में इसका प्रयोजन है। जिसे जस् व शस् की लुगर्थ जो षट् संज्ञा प्रवृत्त है, उसके द्वारा स्त्रीप्रत्यय का लुक् नहीं होता है। अतः उसकी पुनः प्रवृत्ति करनी चाहिए।

तुग्विधौ०—तुग् विधि में। वृत्रहभ्याम् तथा वृत्रहभिः—इन स्थलों पर 'ह्रस्वस्य पिति०' से प्राप्त तुक् आगम नलोप के असिद्ध होने से नहीं होता है। कुछ विद्वान् कहते हैं—

'सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्य' इस परिभाषा से तुक् के प्रति नलोप के निमित्त न रहने से बहिरङ्गलक्षण के द्वारा विकल्प से असिद्ध होने से 'तुक् विधि' का ग्रहण व्यर्थ है। अतः परिभाषाद्वय की अनित्यता ज्ञापित करने के लिए यह किया जाता है।

(घ) तुग्विधौ—

(12) वृत्रहभ्याम्

वृत्रं हतवान्—'ब्रह्मभ्रूणवृत्रेषु क्विप्' से क्विप् हुआ,

वृत्रहन् क्विप्—सर्वापहारलोप, प्रातिपदिक संज्ञा,

वृत्रहन् भ्याम्—पदसंज्ञा, नलोप,

वृत्रह भ्याम्—'ह्रस्वस्य पिति०' से तुक् आगम प्राप्त हुआ, नलोप के असिद्ध होने से नहीं हुआ।

(13) वृत्रहभिः

पूर्ववत् तुक् नहीं हुआ।

कृतीति०—कृत् परे रहते जो तुक् आगमविधि, उसमें नलोप असिद्ध होता है।

(14) वृत्रहच्छत्रम्

वृत्रहन् छत्र—समास, नलोप,

वृत्रह त् छत्र—'छे च' से 'तुक्' हुआ, यह तुक् कृत् परे रहते नहीं है, अपितु छकार परे रहते हुआ है, अतः नलोप असिद्ध नहीं हुआ।

वृत्रह च् छत्र सु—स्तोः श्चुना श्चुः।

(15) वृत्रहच्छाया (पूर्ववत्)।

अत्र०—यहाँ सर्वत्र 'पूर्वत्राऽसिद्धम्' से नलोप असिद्ध सिद्ध ही था, तब नियमार्थ यह विधान किया गया है। यह नियम करता है कि सूत्रोक्त सुब् आदि विधियों में ही असिद्ध होता है, अन्यत्र नहीं। अतः निम्नलिखित स्थलों पर क्रमशः ईत्व, दीर्घादेश तथा एकादेश होता है—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(16) राजीयति

राजानम् आत्मन इच्छति—सुप् आत्मनः क्यच्,

राजन् क्यच्—नकारलोप,

राजीय—नकारलोप के सिद्ध रहने से 'क्यचि च' से ईत्व हुआ, धातुसंज्ञा,

राजीय शप् ति—अतो गुणे।

(17) राजायते

राजन् क्यङ्—कर्तुः क्यङ् सलोपश्च,

राज य—अनुबन्धलोप, नकारलोप,

राजाय—नलोप के सिद्ध रहने से 'अकृत् सार्वधातु०' से दीर्घादेश हुआ, धातुसंज्ञा,

राजाय शप् त—अतो गुणे, टित आत्मनेपदा०।

(18) राजाऽश्वः

राजन् अश्व—समास, नलोप के सिद्ध रहने से 'अकः सवर्णे दीर्घः' से सवर्णदीर्घ,

राजाऽश्व सु—विभक्तिकार्य।

(3691) न मु ने *3* (439)

मुभावो नाभावे कर्तव्ये नासिद्धो भवति। किं तर्हि? सिद्ध एव। अमुना। मुभावस्यासिद्धत्वाद् घिलक्षणो नाभावो न स्यात्। कृते तु नाभावे सुभावस्यासिद्धत्वात् 'सुपि च' (7.3.102) इति दीर्घत्वं यत्प्राप्नोति, तत् 'सन्निपातलक्षणो विधिरनिमित्तं तद्घिघातस्य' (व्या०प०) इति न भवति। अथ वा–योगद्वयमिदमुभयार्थं तन्त्रेणोच्चारितम्। अथ वा–ने परतो यत्प्राप्नोति तस्मिन्कर्तव्ये मुभावो नासिद्ध इत्येष एवात्र सूत्रार्थः। ने तु कर्तव्ये मुभावस्य यत्सिद्धत्वं तदर्थतः संगृहीतम्। तेनात्र मुभावस्य सिद्धत्वान्नाभावश्च भवति, दीर्घत्वं च न भवति। * एकादेशस्वरोऽन्तरङ्गः सिद्धो वक्तव्यः * (म० भा०)। किं प्रयोजनम्? * अयायावेकादेशशतृस्वरैकाननुदात्तसर्वानुदात्तार्थम् * (म० भा०)। वृक्ष इदम्, प्लक्ष इदम्। अत्र प्रातिपदिकान्तसप्तम्येकवचनयोरुदात्तानुदात्तयोरेकादेशः, स 'एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तः, तस्य सिद्धत्वं वक्तव्यम्। आन्तर्यतः अयादेश उदात्तो यथा स्यात्। आय्-कुमार्या इदम्। कथमिदमुदाहरणम्? यदि 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वे कृते विभक्तेः 'आटश्च' (6.1.90) एकादेशः, तदा भवतीदमुदाहरणम्। अथ तु कृते तत्रैकादेशे 'उदात्तयणो हल्पूर्वात्' (6.1.174) इति स्वरः? तदा नैतदस्य प्रयोजनं भवति। आव्–वृक्षाविंदम्, प्ल्–क्षाविंदम्। एकादेशस्वरः–गाङ्गेऽनूप इति गाङ्गेशब्दे एकारः 'एकादेश उदात्तेनोदात्तः' (8.2.5) इत्युदात्तः, तस्य सिद्धत्वाद् यः पुनः 'एङः पदान्तादति' (6.1.109) इति एकादेशः स 'एकादेश उदात्तेनोदात्तः' (7.2.5) इति, अतः 'स्वरितो वाऽनुदात्ते पदादौ' (8.2.6) इत्येतद्भवति। शतृस्वरः–तुदती। नुदती। 'अनुपदेशात्' (6.1.186) इति लसार्वधातुकानुदात्तत्वे कृते एकादेशः, तदुदात्तस्य सिद्धत्वात् 'शतुरनुमो नद्यजादी' (6.1.173) 'अन्तोदात्तात्' इत्येष स्वरो भवति। 'अनुमः' (6.1.173) इति प्रतिषेधो ज्ञापकः–एकादेशस्वरः शतृस्वरे सिद्ध इति। न हि सनुम्कं शत्रन्तं किञ्चिदेकादेशस्वरमन्तरेणान्तोदात्तमस्ति। एकानुदात्त–तुदन्ति। लिखन्ति। एकादेशस्वरस्य सिद्धत्वात्, तेन 'अनुदात्तं पदमेकवर्जम्' (6.1.158) इति वर्ज्यमानता भवति। सर्वानुदात्तः–ब्राह्मणास्तुदन्ति, ब्राह्मणा लिखन्ति। एकादेशस्वरस्य सिद्धत्वात् कृते तस्मिन् 'तिङ्ङतिङः' (8.1.27) इति निघातो भवति। 'अन्तरङ्गे' इति वचनाद्विरङ्गस्यासिद्धत्वमेव–पचतीतिं, प्रपचतीतिं। * संयोगान्तस्य लोपो रोरुत्वे सिद्धो वक्तव्यः *। किं प्रयोजनम्? 'हरिवो मेदिनं त्वा।' हरिव इति मतुबन्तमेतत्; तत्र 'छन्दसीरः' (8.2.15) इति वत्वे, संयोगान्तस्य लोपे च कृते 'मतुवसो रु सम्बुद्धौ छन्दसि' (8.3.1) इति रुत्वम्, तस्य संयोगान्तस्य लोपस्यासिद्धत्वाद् 'हशि च' (6.1.114) इत्युत्वं न प्राप्नोति। *सिज्लोप एकादेशे सिद्धो वक्तव्यः* (म० भा०)। अलावीत्। अपावीत्। 'इट ईटि' इति सिज्लोपस्य सवर्णदीर्घत्वं भवति। *निष्ठादेशः षत्वस्वरप्रत्ययविधीड्विधिषु सिद्धो वक्तव्यः* (म० भा०)। वृक्णः, वृक्णवान्। निष्ठादेशस्य सिद्धत्वात् झलीति षत्वं न भवति। कुत्वं तु प्रत्यसिद्ध एवेति तद्भवति। स्वरप्रत्ययविधीड्विधिषु क्षीबशब्द उदाहियते। तत्र च निपातनमनेकथा समाश्रीयते–यदा क्षीबेर्निष्ठायामिटि कृते इत्शब्दलोपो निपात्यते, तदा क्षीब इति संज्ञायामित्शब्दलोपस्यासिद्धत्वात् 'निष्ठा च द्व्यजनात्' (6.1.205) इत्येष स्वरो न प्राप्नोति; क्षीबे तरति क्षीबिक इति द्व्यज्लक्षणष्ठञ् प्राप्नोतिः यदा तु तकारलोपो निपात्यते, तदा तस्यासिद्धत्वादिडागमः प्राप्नोति। * प्लुतविकारस्तुग्विधौ छे सिद्धो वक्तव्यः * (म० भा०)। अग्ना3 इच्छत्रम्। पटा3 उच्छत्रम्। प्लुतविकारस्यासिद्धत्वात् 'छे च'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(6.1.73) इति ह्रस्वलक्षणो नित्यस्तुग् न प्राप्नोति। * श्नुत्वं धुटि सिद्धं वक्तव्यम् * (म० भा०)। 'श्नुतिर् क्षरणे' (धा०पा० 41)-इत्ययं धातुः तकारादिः पठ्यते, तस्य श्नुत्वस्यासिद्धत्वाद् अट्श्नोतति, रट्श्नोतति इति 'डः सि धुट्' (8.3.29) इति प्राप्नोति। अटतीत्यड्, रटतीति रड्-क्विबन्तोऽयम्। किमर्थं पुनरयं सकारादिः पठ्यते? इह मधु श्नोततीति मधुश्नुत्-क्विबन्तः, मधुश्नुतमाचष्टे इति णिच्-मधुश्नयति, मधुश्नयतेः पुनः क्विपि कृते संयोगादित्वात् सलोपः, संयोगान्तत्वाद् यलोपः, चकारस्य कुत्वम्-मधुगिति सिद्धम्। शकारादौ पुनरेतस्मिन् संयोगान्तलोपेन यकारचकारयोर्लुप्तयोः शकारस्य षत्वे सति मधुडिति स्यात्। * अभ्यासजश्त्वचर्त्वे एत्वतुकोः सिद्धे वक्तव्ये * (म० भा०)। बभणतुः। बभणुः। अभ्यासजश्त्वस्यासिद्धत्वाद् 'अनादेशादेः' (6.4.120) इत्येत्त्वं प्राप्नोति। छिदेः-बिचिच्छित्सति, उच्छेः-उचिच्छिषतीति अभ्यासादेशस्यासिद्धत्वात् 'छे च' (6.1.73) इति तुग्न प्राप्नोति। * द्विर्वचने परसवर्णत्वं सिद्धं वक्तव्यम् * (म० भा०)। सयँय्यन्ता, सवँव्वत्सुरः, यलँल्लोकम्, तलँल्लोकमिति परसवर्णस्यासिद्धत्वाद् 'यरः' (8.4.47) इति द्विर्वचनं न स्यात्। * पदाधिकारश्चेल्लत्वधत्वढत्वनत्वरुत्वषत्वणत्वानुनासिकछत्वानि सिद्धानि वक्तव्यानि (म० भा०) *। लत्वम्-गलो गलः। गरो गरः। धत्वम्-द्रोग्था, द्रोग्धा। ढत्वम्-द्रोढा, द्रोढा। नत्वम्-नुन्नः। रुत्वम्-अभिनोऽभिनः। अभिनदभिनत्। षत्वम्-मातुष्ष्वसा, मातुष्ष्वसा। मातुःस्वसा, मातुःस्वसा। पितुष्ष्वसा, पितुष्ष्वसा। पितुःस्वसा, पितुःस्वसा। णत्वम्-माषवापाणि, माषवापाणि। माषवापानि, माषवापानि। अनुनासिक-वाङ्नयनम्, वाङ्नयनम्। वाग्नयनम्, वाग्नयनम्। छत्वम्-वाक्छयनम्, वाक्छयनम्। वाक्शयनम्, वाक्शयनम्। लत्वादीनां विकल्पितानामसिद्धत्वात् कृते द्विर्वचने सत्युपरिष्टाद्विकल्पे सति गरोगलः, गलोगरः-इत्येवं रूपमपि द्विरुक्तं स्यात्। तदेतत्सर्वम् 'न मु ने' इति योगविभागेन साध्यते। 'न' इत्येतावदनिष्टे विषये पूर्वत्रासिद्धस्य प्रतिषेधार्थम्। ततः 'मु ने' इति, 'न' इत्येतदनुवर्तते।

अर्थ—मुभाव तथा नाभाव करने में असिद्ध नहीं होता है। तो क्या होता है? सिद्ध ही होता है।

यहाँ मुभाव के असिद्ध होने से घिलक्षण 'ना' (आङो नाऽस्त्रियाम्) आदेश नहीं होता है। 'ना' आदेश करने पर मुभाव के असिद्ध होने से 'सुपि च' से जो दीर्घादेश प्राप्त होता है, वह 'सन्निपातलक्षणो विधिरनिमित्तं०' से नहीं होता है।

उदा० (1) अमुना
अदस् टा—त्यदादीनाम् अः,
अद अ टा—अतो गुणे,
अद आ—अदसोऽसेर्दा०,
अमुना—आङो नाऽस्त्रियाम्।

अथ०—अथवा योगद्वय उभयार्थ पठित है।

अथवा०—अथवा 'न' परे रहते जो प्राप्त होता है, उसके करने में 'मु' आदेश असिद्ध नहीं होता है—यह सूत्रार्थ है। 'न' परे रहते जो कर्त्तव्य है, उसमें 'मु' आदेश का जो सिद्ध होना है, वह अर्थतः संगृहीत है। अतः यहाँ 'मु'भाव के सिद्ध रहने से 'ना' आदेश होता है तथा दीर्घादेश होता है।

अयाया०—अय्, आय्, आव्, एकादेश स्वर, शतृ स्वर, एकाननुदात्त तथा सर्वानुदात्त के लिए यह विधान है।

एकादेश०—एकादेश स्वर अन्तरङ्ग सिद्ध होता है। इसका क्या फल है?

(2) वृक्ष इदम्
वृक्षे इदम्—एचोऽयवायावः' से 'अय्',
वृक्ष इदम्—'लोपः शाकल्यस्य' से यलोप।

(3) प्लक्ष इदम् (पूर्ववत्)।

अत्र०—यहाँ प्रातिपदिकान्त सप्तमी एकवचन उदात्त व अनुदात्त का एकादेश है, वह 'एकादेश उदात्तेनो०' से उदात्त होता है। वह सिद्ध होता है। आन्तरतम्य से अय् आदेश उदात्त हो जाय।

आय्०—कुमार्या इदम्।

यह उदाहरण कैसे है? 'उदात्त यणो०' से यदि उदात्तस्वर करने पर विभक्ति का और आट् का 'आटश्च' से एकादेश होता है तो यह उदाहरण होता है। वहाँ एकादेश करने पर 'उदात्तयणो०' से स्वर होता है। तब इसका प्रयोजन नहीं है।

आव्०—वृक्षाविदम्, प्लक्षाविदम्—'आव्' के उदाहरण हैं।

एकादेश०—गाङ्गेऽनूपः यहाँ 'गाङ्गे' शब्द में एकार 'एकादेश उदात्तेनो०' से उदात्त होता है। उसके सिद्ध होने से जो 'एङः पदान्तादति' से एकादेश होता है, वह 'एकादेश उदात्तेनो०' तथा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'स्वरितो वाऽनुदा०' से होता है।

शतृस्वर०—तुदती, नुदती—यहाँ 'अदुपदेशात्' से लसार्वधातुक अनुदात्त करने पर एकादेश होता है। तब उदात्त के सिद्ध होने से 'शतुरनुमो०' तथा 'अन्तोदात्तात्' इससे स्वर होता है। 'अनुमः' यह प्रतिषेध यहाँ ज्ञापक है कि एकादेश स्वर शतृ स्वर में सिद्ध होता है। नुम् सहित शतृ प्रत्ययान्त एकादेश स्वर के विषय में अन्तोदात्त नहीं होता है।

एकाननु०—तुदन्ति, लिखन्ति—एकादेश स्वर के सिद्ध होने से। उससे 'अनुदात्तं पदमेक०' से वर्ज्यमानता होती है।

सर्वानु०—ब्राह्मणास्तुदन्ति, ब्राह्मणा लिखन्ति—एकादेश स्वर के सिद्ध होने से उसके करने पर 'तिङ्ङतिङः' से निघात होता है। 'अन्तरङ्गे' इस प्रकार पाठ से बहिरङ्ग असिद्ध ही होता है। यथा—पचति, प्रपचति।

संयोग—संयोगान्त का लोप 'रु' को 'उ' आदेश करने में सिद्ध होता है। इसका क्या फल है ? 'हरिवः' यह मतुप् प्रत्ययान्त है। यहाँ 'छन्दसीरः' से वकार आदेश करने पर तथा संयोगान्त का लोप करने पर 'मतुवसो०' से रुत्व होता है। तब उस संयोगान्त लोप के असिद्ध होने से 'हशि च' से प्राप्त उत्व नहीं होता है (यह उत्व करना ही प्रयोजन है)।

(4) हरिवः
हरि मतुप्—अनुबन्धलोप,
हरि वत्—छन्दसीरः,
हरि वन् त् सु—सु, नुम्,
हरिवन्त्—हल्ङ्याब्भ्यो०,
हरिवन्—संयोगान्तस्य लोपः,
हरि व रु—वन उपसङ्ख्यानम्, उत्व, हशि च,
हरि व उ—आद् गुणः।

सिज्लोप०—एकादेश करने में सिच् का लोप सिद्ध होता है।

अलावीत्, अपावीत्—यहाँ 'इट ईटि' से सिच् का लोप होकर उसके सिद्ध रहते 'अकः सवर्णे दीर्घः' से दीर्घ होता है।

(5) अलावीत्
लू तिप्—लुङ्, 'इतश्च' से इकारलोप,
लू स् त्—च्लि लुङि, च्लेः सिच्, अनुबन्धलोप,
लू इ स् ई त्—आर्धधातुकस्येड्०, अस्तिसिचो०,
लाव् इ ई त्—वृद्धि, इट ईटि,
अलावीत्—अकः सवर्णे दीर्घः, अट्।

(6) अपावीत् (पूर्ववत्)।

निष्ठादेश०—षत्व, स्वर, प्रत्यय विधि तथा इड् विधि—इनमें निष्ठा आदेश सिद्ध होता है।

वृक्णः, वृक्णवान्—यहाँ निष्ठादेश के सिद्ध रहने से 'झलि' से षत्व नहीं होता है। कुत्व तो प्रत्यसिद्ध होता ही है। अतः वह हो जाता है।

स्वर, प्रत्यय विधि तथा इड् विधि में 'क्षीब' शब्द का उदाहरण दिया जाता है। यहाँ अनेक प्रकार से निपातन का आश्रय किया जाता है। जब क्षीब् से निष्ठा करने पर इट् करने पर इत् शब्द-लोप का निपातन किया जाता है, तब 'क्षीब' इस प्रकार संज्ञा में इत् शब्दलोप के असिद्ध होने से 'निष्ठा च द्व्य०' से स्वर प्राप्त नहीं होता है।

क्षीबे तरति—क्षीबिकः। यहाँ द्व्यज् लक्षण ठन् प्राप्त नहीं होता है। जब तकारलोप का निपातन किया जाता है, तब उसके असिद्ध रहने से इट् का आगम प्राप्त होता है।

(7) वृक्णः
व्रश्च् क्त—'ग्रहिज्यावयि०' से सम्प्रसारण,
वृश्च् त—चोः कुः,
वृक् न—ओदितश्च,
वृक् ण सु—अट्कुप्वा०।

(8) वृक्णवान्
व्रश्च् क्तवतु—पूर्ववत्।

प्लुत०—'छ' परे रहते तुक् विधि में प्लुतविकार सिद्ध होता है।

निम्नलिखित स्थलों पर प्लुतविकार के असिद्ध होने से 'छे च' से ह्रस्वलक्षण नित्य तुक् प्राप्त नहीं होता है—

(9) अग्ना3 इच्छत्रम्
अग्नि सु—ह्रस्वस्य गुणः, एङ् ह्रस्वात्०,
अग्ने३—'एचोऽप्रगृह्यस्यादूराद्०' से पूर्वार्ध को अकार आदेश हुआ, 'पदान्ताद् वा' से विकल्प से प्राप्त होता है, नित्य 'तुक्' नहीं होता है।

(10) पटा3 उच्छत्रम्—पूर्ववत्।

श्चुत्वं०—धुट् में श्चुत्व सिद्ध होता है। श्च्युतिर् यह सकारादि धातु पठित है। इसके श्चुत्व के असिद्ध होने से 'अट्श्च्योतति' तथा 'रट्श्च्योतति' यहाँ 'डः सि धुट्' से 'धुट्' प्राप्त होता है। अटतीति अट् तथा रटतीति रट्—यहाँ क्विप् प्रत्यय हुआ है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

किमर्थं०—सकारादि पाठ किसलिए किया गया है ? ताकि 'मधुश्च्यति' में क्यप् करने पर संयोगादि होने से सकार का लोप होता है तथा संयोगान्त होने से यलोप होता है। चकार को कुत्व होकर 'मधुड्' सिद्ध होता है।

शकारादि में पुनः संयोगान्त लोप के द्वारा यकार व चकार का लोप होने पर शकार के स्थान पर षकार होने पर 'मधुड्' होता है।

(11) अट्श्योतति
अटतीति—इस अर्थ में 'क्विप्' हुआ,
अट् क्विप्—सर्वापहारलोप,
अट् सु—विभक्तिकार्य,
अट्श्योतति—चूँकि 'श्च्युतिर्' धातु सकारादि पठित है, इसे श्चुत्व हुआ है, अब 'ङ सि धुट्' से 'धुट्' आगम प्राप्त हुआ, परन्तु श्चुत्व के सिद्ध रहने से सकारादि के न रहने से 'धुट्' नहीं हुआ।

(12) रट्श्योतति
रटतीति—रट्, शेष कार्य पूर्ववत्।

(13) मधुश्च्युत्
मधु श्योतति—इस अर्थ में, क्विप्, सर्वापहारलोप,
मधुश्च्युत् सु—हल्ङ्यादि लोप।

(14) मधुग्
मधुश्च्युतम् आचष्टे—'तत्करोति तदाचष्टे' से 'णिच्',
मधुश्च्युत् णिच्—'णाविष्ठवत् प्रातिपदिकस्य' से णिलोप,
मधुश्च्युत्—टिलोप, श्चुत्व के असिद्ध होने से 'स्कोः संयोगाद्योः०' से संयोगादि सकार का लोप, 'संयोगान्तस्य लोपः' से यकारलोप,
मधुश्च् → मधुच्—'चोः कुः' से कुत्व,
मधुग्—वाऽवसाने।

(15) मधुड्
मधुश्च्—पूर्ववत् सभी कार्य,
मधुश्—'संयोगान्तस्य लोपः' से यकारलोप, यकार का लोप होने पर चकार संयोगान्त हुआ, चकार का संयोगान्त लोप हुआ,
मधुष्—'व्रश्चभ्रस्ज०' से षत्व,
मधुड्—'झलां जशोऽन्ते' से डकार।

अभ्यास०—एत्व तथा तुक् करने में अभ्यास को आदेशभूत जश्त्व तथा चर्त्व सिद्ध होते हैं।

'बभणतुः' तथा बभणुः—इन स्थलों पर अभ्यास के स्थान पर 'अभ्यासे चर्च' से आदेशभूत जश्त्व (बकार) के असिद्ध होने से 'अनादेशाऽऽदेः' से एत्त्व प्राप्त होता है।

विचिच्छित्सति तथा उचिच्छिषति—इन स्थलों पर अभ्यास के स्थान पर आदेशभूत चर्त्व के असिद्ध होने से 'छे च' से 'तुक्' प्राप्त नहीं होता है।

(16) बभणतुः
भण् अतुस्—लिट्, तस्, अतुस् आदेश,
ब भण् अतुस्—द्वित्व, हलादिः शेषः, अभ्यासे चर्च, बकार के असिद्ध होने से 'अत एकहल्मध्ये' से अभ्यासलोप तथा एत्व प्राप्त हुआ, प्रकृत वार्त्तिक से बकार के सिद्ध होने से एत्व नहीं हुआ।

(17) बभणुः
भण् उस्—लिट्, झि, 'उस्' आदेश, शेष पूर्ववत्।

(18) विचिच्छित्सति
छिद् सन्—धातोः कर्मणः समान०,
छि छिद् स—द्वित्व, हलादिः शेषः,
चि छिद् स—अभ्यासे चर्च, खरि च,
वि चि छित्स—'छे च' से 'तुक्', स्तोः श्चुना श्चुः,
वि चिच्छित्स—अभ्यास के स्थान पर चर्त्व (च) के असिद्ध रहने से उसके परे रहते 'छे च' से 'तुक्' प्राप्त हुआ, परन्तु प्रकृत वार्त्तिक से तुक् नहीं हुआ,
विचिच्छित्सति—धातुसंज्ञा, शप्, अतो गुणे।

(19) उचिच्छिषति
उछ् इ सन्—अन्तरङ्ग होने से प्रथम 'तुक्', इट् आगम,
उ त्छि च्छि स—अजादेर्द्वितीयस्य,
उ चि च्छि स—'शपूर्वाः खयः' से छकार शेष रहा, 'अभ्यासे चर्च' से चर्त्व,
उचिच्छिष—चर्त्व के असिद्ध रहने से अभ्यास के परे रहते 'छे च' से 'तुक्' प्राप्त हुआ, प्रकृत वार्त्तिक से चर्त्व के सिद्ध रहते 'तुक्' नहीं हुआ, षत्व, धातुसंज्ञा, शेष पूर्ववत्।

द्विर्वच०—द्वित्व करने में परसवर्ण सिद्ध होता है। निम्नलिखित स्थलों पर परसवर्ण के असिद्ध होने से 'यरः' से द्विर्वचन नहीं होता है।

(20) सयँय्यन्ता
सम् यन्ता—मोऽनुस्वारः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संयन्ता—'अनुस्वारस्य ययि परसवर्णः' से परसवर्ण प्राप्त हुआ, आन्तरतम्य से सानुनासिक हुआ,

सयँ् यन्ता—'अनचि च' से द्वित्व प्राप्त नहीं हुआ, परन्तु प्रकृत वार्त्तिक से परसवर्ण के सिद्ध होने पर द्वित्व हुआ,

सयँ् य्यन्ता—पक्ष में द्वित्व नहीं हुआ।

(21) सवँ्व्वत्सरः
सम् वत्सरः—सभी कार्य पूर्ववत्।

(22) यलँ्ल्लोकम्
यम् लोकम्—पूर्ववत्।

(23) तलँ्ल्लोकम्
तम् लोकम्—पूर्ववत्।

पदाधि०—यदि पदाधिकार हो तो लत्व, घत्व, ढत्व, नत्व, रुत्व, षत्व, णत्व, अनुनासिक तथा छत्व—ये सिद्ध होते हैं।

(24) गलो गलः
यहाँ लत्व हुआ है। यह सिद्ध है।

(25) द्रोग्धा द्रोग्धा
द्रुह् तृ—'दाऽऽदेर्धातोर्धः' से 'घ' आदेश,
द्रोघ् तृ—लघूपध गुण,
द्रोग् धृ—झषस्तथो०, झलां जश् झशि, सु।

(26) नुन्नः नुन्नः
नुद् क्त—'नुदविद०' से नकार।

(27) अभिनोऽभिनः
भिद् सिप्—लङ्, 'रुधादिभ्यः श्नम्' से 'श्नम्',
भि न द् स्—अनुबन्धलोप 'इतश्च' से इकारलोप,
भिनद्—हल्ङ्याब्भ्यो०,
अ भिनर्—'दश्च' से 'रु',
अभिनोऽभिनः—अतो रोरप्लुताद०, आद् गुणः।

(28) अभिनद् अभिनत्
पक्ष में 'रु' नहीं हुआ।

(29) मातुष्ष्वसा, मातुःस्वसा
मातुः स्वसा—'मातःपितुर्भ्याम् अन्य०' से विकल्प से षत्व।

(30) पितुष्ष्वसा, पितुःस्वसा (पूर्ववत्)।

(31) माषवापाणि माषवापानि
माषवापानि—'प्रातिपदिकान्तनुम्विभक्तिषु' से पाक्षिक णत्व।

(32) वाङ्नयनम्, वाग्नयनम्
वाच् नयन—समास, कुत्व,
वाक् नयन—यरोऽनुनसिकेऽनुनासि०।

(33) वाक्छयनम् वाक्शयनम्
'शश्छोऽटि' से पाक्षिक छत्व हुआ।

लत्वादी०—विकल्पित लत्व आदि के असिद्ध होने से द्विर्वचन करने पर पुनः विकल्प होने पर गरो गलः, गलो गरः—इस प्रकार रूप को द्वित्व होता है। यह सब 'न मु ने' का योगविभाग से सिद्ध हो जाता है। 'न' अनिष्ट विषय में यह पूर्वत्राऽसिद्ध के निषेध के लिए है। द्वितीय योग 'मु ने' ऐसा है। यहाँ 'न' का अनुवर्त्तन है।

(3692) उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य *4* (3657)

उदात्तयणः स्वरितयणश्च परस्यानुदात्तस्य स्वरित आदेशो भवति। उदात्तयणः—कुमार्यौ, कुमार्यः। उदात्तनिवृत्तिस्वरेणायमीकार उदात्तः, तस्य स्थाने यणादेशः स उदात्तयण्, तस्मात् परस्यानुदात्तस्य स्वरित आदेशो भवति। स्वरितयणः—सकृल्ल्व्यांशा। खलप्व्यांशा। सकृल्लू, खलपू—इति कृत्स्वरेणान्तोदात्तौ, तयोः 'ओः सुपि' (8.3.16) इति यणादेशः स उदात्तयण्, ततः परस्य सप्तम्येकवचनस्य स्वरितत्वम्, तस्य यणादेशः स्वरितयण्, तस्मात्स्वरितयणः परस्य आशाशब्दाकारस्यानुदात्तस्य स्वरितो भवति। ननु च सप्तम्येकवचनस्य यदुदात्तयण इति स्वरितत्वम्, तदसिद्धं यणादेशे, तत्कथमयं स्वरितयण् भवति? आश्रयात् सिद्धत्वं भविष्यति। यद्येवम्, 'उदात्तादनुदात्तस्य स्वरितः' (8.4.66) इति एतस्याप्याश्रयात्सिद्धत्वं प्राप्नोति, ततश्च दध्याशेत्यत्रापि स्वरितः स्यात्? तस्मादयमेव यण्स्वरो यणादेशे सिद्धो वक्तव्यः। केचित्तु ब्रुवते—उदात्तात्स्वरितयणोऽपि परस्यानुदात्तस्य स्वरितत्वं दृश्यते। तथा च तैत्तिरीयके शाखान्तरे पठ्यते—'यास्ते विश्वाः समिधः सन्त्यग्ने (तै० 3.5.5.3) इति। 'अग्ने' इत्ययमकारः स्वरितः पठ्यते। तथा ब्राह्मणेऽपि—'दध्याशयती'(तै०ब्रा० 1.7.6.5)'त्याकारः स्वरितः पठ्यते' इति। यथा तु वात्तिकं भाष्यं च, तथा उदात्तात्स्वरितयणः परस्यानुदात्तस्यानेन स्वरितत्वं न भवतीति स्थितम्। तथा च भाष्ये स्वरितयण्ग्रहणमिदं प्रत्याख्यायते। 'सकृल्ल्व्यांशे'-त्येवादावुदात्तयण इत्येव स्वरितस्य सिद्धत्वात्। स्वरितयण्व्यवधानमव्यवधानमेव, 'स्वरविधौ व्यञ्जनमविद्यमानवत्'

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(व्या०प०) इति। तत्तु क्रियते–पूर्वस्मादपि विधौ स्थानिवद्भावाद् व्यवधानमस्ति, स्वरदीर्घयलोपेषु च लोपाजादेशस्य स्थानिवद्भावः प्रतिषिध्यते इति। उदात्तस्वरितयोरिति किम्? बैदी आशा बैद्याशा। शार्ङ्गरव्याशा। अनुदात्तयणादेशोऽयम्। अनुदात्तस्येति किम्? कुमार्यर्त्रं। किं शो शोर्यत्रं। अत्रेत्ययमाद्युदात्तो लित्स्वरेण।

अर्थ—उदात्त यण् तथ स्वरित यण् से उत्तर अनुदात्त के स्थान पर स्वरित आदेश होते हैं।

उदा० (क) उदात्तयणः—

(1) कुमार्यौ

कुमारी औ—यण् होकर रूप बनता है, उदात्तनिवृत्तिस्वर से ईकार उदात्त है, उसके स्थान पर यण् आदेश हुआ है, वह उदात्तयण् है, उससे पर अनुदात्त के स्थान पर स्वरित आदेश होता है।

(ख) स्वरितयणः—

(2) सकृल्ल्व्याशा

सकृल्लू आशा—यण् हुआ, 'सकृल्लू' यह कृत् स्वर से अन्तोदात्त है, इसे 'रोः सुपि' से यण् हुआ, यह उदात्तयण् हुआ, इससे पर सप्तमी एकवचन को स्वरित स्वर होता है। उसके स्थान पर जो यण् होता है, वह स्वरितयण् हुआ, उस स्वरित यण् से उत्तर 'आशा' शब्द के आकार अनुदात्त के स्थान पर स्वरित हुआ।

(3) खलप्वाशा

खलपू आशा—पूर्ववत्।

ननु च०—'सप्तमी एकवचन के स्थान पर जो उदात्त यण् से उत्तर'—उसके स्थान पर स्वरित होता है। तब यणादेश होने पर यह स्वरितयण् किस प्रकार होता है? आश्रय से सिद्धभाव होता है।

यद्येव०—यदि ऐसा है तो 'उदात्तादनुदात्तस्य स्वरितः' से इसके आश्रय से सिद्धभाव प्राप्त होता है। तब 'दध्याशा' यहाँ भी स्वरित होता है। इसलिए यह यण् स्वर यणादेश में सिद्ध होता है।

केचित्तु०—कुछ विद्वान् कहते हैं कि उदात्त स्वरितयण् से भी उत्तर अनुदात्त के स्थान पर स्वरित होता है। तैत्तिरीय शाखा में पाठ प्राप्त होता है—

यास्ते विश्वाः समिधः सन्त्यग्ने।

'अग्ने' यह अकार स्वरित पठित है। इसी प्रकार तैत्तिरीय ब्राह्मण ग्रन्थ में भी प्राप्त होता है—

दध्याशयतोत्याकारः स्वरितः पठ्यते।

यथा तु०—जिस प्रकार वार्त्तिक और भाष्य है, उसी प्रकार उदात्त स्वरित यण् से उत्तर अनुदात्त के स्थान पर स्वरित नहीं होता है। भाष्य में 'स्वरित यण्' ग्रहण का प्रत्याख्यान किया जाता है। कारण कि 'सकृल्ल्व्याशा' इत्यादि स्थलों पर 'उदात्तयण् से उत्तर' इस प्रकार स्वरित के स्थान पर सिद्ध है। स्वरित यण् व्यवधान और अव्यवधान—दोनों दशाओं में 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इस प्रकार।

तत्तु०—यह किया जाता है। पूर्व से भी विधि में स्थानिवद्भाव से व्यवधान होता है। स्वर, दीर्घ तथा यलोप—इनमें लोप अजादेश के स्थानिवद्भाव का निषेध किया जाता है।

उदात्त०—उदात्त यण् तथा स्वरित यण् से पर को ही स्वरित होता है।

बैदी आशा—बैद्याशा। शार्ङ्गरव्याशा—यहाँ अनुदात्तयण् आदेश है। अतः स्वरित नहीं हुआ।

अनुदा०—अनुदात्त के स्थान पर स्वरित होता है।

कुमार्यर्त्र, किशोर्यत्र—यहँ लित् स्वर से आद्युदात्त है। अतः स्वरित नहीं हुआ।

(3693) एकादेश उदात्तेनोदात्तः *5* (3658)

उदात्तेन सहानुदात्तस्य य एकादेशः स उदात्तो भवति। 'अनुदात्तस्य' इति वर्तते। अग्नी। वायू। वृक्षैः। प्लक्षैः। उदात्तेनेति किम्? पचन्ति। यजन्ति। लसार्वधातुकानुदात्तत्वे कृते द्वयोरनुदात्तयोरयमेकादेशः, पररूपे कर्तव्ये स्वरितस्यासिद्धत्वात्।

अर्थ—उदात्त के साथ अनुदात्त का जो एकादेश होता है, वह उदात्त होता है। 'अनुदात्तस्य' का अधिकार है।

उदा० (1) अग्नी

अग्नि औ—पूर्वसवर्ण हुआ है। 'औ' अनुदात्त है। 'अग्नि' अन्तोदात्त है। उदात्त के साथ अनुदात्त का एकादेश उदात्त हुआ।

(2) वायू

वायु औ—पूर्ववत्।

(3) वृक्षैः

वृक्ष भिस्—'अतो भिस ऐस्' से 'ऐस्' आदेश, 'वृद्धिरेचि' से एकादेश, यह उदात्त हुआ।

(4) प्लक्षैः

प्लक्ष भिस्—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदात्ते०—उदात्त के साथ अनुदात्त का जो एकादेश, वह उदात्त होता है।

(5) पचन्ति

पच् शप् अन्ति—'झि' को 'झोऽन्तः' से 'अन्त' आदेश, अतो 'गुणे' से पररूप,

पच् अन्ति—यहाँ उदात्त के साथ एकादेश न होने से एकादेश उदात्त नहीं हुआ।

(6) यजन्ति (पूर्ववत्)।

लसार्व०—यहाँ लसार्वधातुक अनुदात्त करने पर दोनों अनुदात्तों का यह एकादेश है। पररूप करने में स्वरित के असिद्ध होने से।

(3694) स्वरितो वाऽनुदात्ते पदादौ *6* (3659)

अनुदात्ते पदादौ उदात्तेन सह य एकादेशः स स्वरितो वा भवत्युदात्तो वा। सु + उत्थितः = सूत्थितः सूत्थितः। वि + ईक्षते = वीक्षते वीक्षते। वसुकः + असि = वसुकोऽसि वसुकोऽसि। सूत्थित इति-सुशब्दः 'सुः पूजायाम्' (1.4.94) इति कर्मप्रवचनीयः, तस्य प्रादित्वात्समासे सति अव्ययपूर्वपदप्रकृतिस्वरत्वेनाद्युदात्तः; शेषमनुदात्तमिति चानुदात्ते पदादावेकादेशो भवति। वीक्षते, वसुकोऽसीति-अत्रापि 'तिङ्ङतिङः' (8.1.27) इति निघाते कृतेऽनुदात्ते पदादावेकादेशः। स्वरितग्रहणं विस्पष्टार्थम्। उदात्ते हि विकल्पिते तस्मिन्नसत्यान्तर्यत एव स्वरितो भविष्यतीति। अनुदात्त इति किम्? देवदत्तोऽत्र। पदादाविति किम्? वृक्षौ। वृक्षाः।

अर्थ—पदादि अनुदात्त परे रहते उदात्त के साथ जो एकादेश, वह विकल्प से स्वरित अथवा उदात्त होता है।

उदा० (1) सूत्थितः

सु उत्थितः—'अकः सवर्णे दीर्घः' से एकादेश।

सूत्थित०—सु शब्द की 'सुः पूजायाम्' से कर्मप्रवचनीयसंज्ञा है। उसके प्रादि होने से समास होने पर अव्यय पूर्वपद प्रकृतिस्वर होने से आद्युदात्त होता है। शेष अनुदात्त है। इस प्रकार पदादि अनुदात्त के परे रहते एकादेश होता है।

वीक्षते०—वि ईक्षते तथा वसुकः असीति—यहाँ पर भी 'तिङ्ङतिङः' से निघात कर देने पर पदादि अनुदात्त के परे रहते एकादेश होता है।

स्वरित०—'स्वरित' का ग्रहण स्पष्टता के लिए है। उदात्त का विकल्प कर देने पर उसके न होने पर आन्तर्यतया स्वरित ही होता है।

अनुदात्त०—अनुदात्त परे रहते ही सूत्रोक्त कार्य होता है।

देवदत्तोऽत्र—यहाँ नहीं हुआ। 'अत्र' शब्द त्रल् प्रत्ययान्त है। लित् स्वर से आद्युदात्त हुआ।

पदादा०—पदादि अनुदात्त परे रहते ही एकादेश विकल्प से उदात्त होता है।

वृक्षौ—वृक्ष औ—यहाँ अनुदात्त परे है, परन्तु वह पदादि नहीं है।

वृक्षाः—वृक्ष अस्—पूर्ववत्।

(3695) नलोपः प्रातिपदिकान्तस्य *7* (353)

'पदस्य' इति वर्तते। प्रातिपदिकस्य पदस्य योऽन्त्यो नकारस्तस्य लोपो भवति। राजा। राजभ्याम्। राजभिः। राजता। राजतरः। राजतमः। प्रातिपदिकग्रहणं किम्? अहन्नहिम्। अन्तग्रहणं किम्? राजानौ, राजनः। प्रातिपदिकग्रहणमसमस्तमेव 'सुपां सुलुक्' (7.1.38) इति षष्ठ्या लुका निर्दिष्टम्। * अह्नो नलोपप्रतिषेधो वक्तव्यः * (म० भा०)। अहः। अहोभ्याम्। अहोभिः। 'रोऽसुपि' (8.2.69), 'अहन्' (8.2.66)-इति रेफरुत्वयोरसिद्धत्वात् नलोपः प्राप्नोति, सावकाशं तदुभयं सम्बुद्धौ-हेऽहः, हे दीर्घाहो निदाघेति? तत्र समाधिमाहुः-अहन्निति रुविधो यदुपादीयते प्रथमैकवचनान्तमकृतकलोपं तदावर्त्ययते, तत्रैकयाऽऽवृत्त्या तदेव रूपं नलोपाभावार्थमन्वाख्यायते, द्वितीययापि तस्य रुर्विधीयते।

अर्थ—'पदस्य' का अनुवर्त्तन है।

उदा० (1) राजा

राजन् सु—उपधादीर्घ,

राजान् स्—हल्ङ्याब्भ्यो० से लोप,

राजा—नकारलोप।

(2) राजभ्याम्

राजन् भ्याम्—पदसंज्ञा, नकारलोप।

(3) राजभिः

राजन् भिस्—नकारलोप।

(4) राजता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

राजन् तल्—नकारलोप, टाप्,
राजता—सु।

(5) राजतरः
राजन् तरप्—हलन्त्यम्,
राजतर सु—नलोप।

(6) राजतमः (पूर्ववत्)।

प्रातिप०—प्रातिपदिक के नकार का लोप होता है।

(7) अहन्नहिम्
हन् तिप्—लङ्, 'इतश्च' से इकारलोप, शप् का लुक्,
ह न् त्—हल्ङ्याब्भ्यो०,
अ हन्—अट्, 'सुप्तिङन्तं पदम्' से पदसंज्ञा है, परन्तु प्रातिपदिक न होने से नकारलोप नहीं हुआ।

अन्तग्र०—प्रातिपदिक के अन्त में जो नकार, उसका लोप होता है।

(8) राजानौ
राजन् औ—उपधादीर्घ,
राजान् औ—पदसंज्ञा है, 'राजन्' प्रातिपदिक है; परन्तु नकार अन्त में न होने से इसका लोप नहीं हुआ।

(9) राजानः
राजन् जस्—पूर्ववत्।

प्राति०—उसका 'पदस्य' ऐसा सामानाधिकरण विशेषण है। यदि असमस्त ही प्रातिपदिक ग्रहण है तो षष्ठी के द्वारा श्रवण प्राप्त होता है। 'सुपां सुलुक्०' इसके द्वारा जो षष्ठी के द्वारा लुक् है, उस लुक् के द्वारा प्रातिपदिक ग्रहण निर्दिष्ट है। अतः षष्ठी का प्रसङ्ग नहीं होता है।

अह्नो०—अहन् के नलोप का निषेध होता है।

(10) अहः
अहन् सु—स्वमोर्नपुंस०, नकारलोप का निषेध,
अ ह र्—'रोऽसुपि' से रेफ, विसर्जनीय।

(11) अहोभ्याम्
अहन् भ्याम्—पदसंज्ञा, नलोपनिषेध,
अह उ भ्याम्—'अहन्' से 'रु', 'हशि च' से उत्व,
अहोभ्याम्—आद् गुणः।

(12) अहोभिः
अहन् भिस्—पूर्ववत्।

रोऽसु०—अब शङ्का होती है कि प्राप्तिपूर्वक निषेध हुआ करता है; यहाँ पर तो रेफ तथा रुत्व कर देने पर नकार अभाव से नलोप की प्राप्ति ही नहीं है। तब निषेध कैसा ? रेफ और रुत्व दोनों सावकाश हैं। अतः लोप नहीं होता; अन्यथा इनका विधान व्यर्थ हो जाता है।

'रोऽसुपि' के द्वारा विहित रेफ तथा 'अहन्' के द्वारा विहित 'रु' के असिद्ध होने से नकार प्राप्त होता है। सम्बुद्धि में दोनों सावकाश हैं। यथा—हेऽहः, हे दीर्घाहो निदाघ।

सम्बुद्धि में 'न ङिसम्बुद्ध्योः' से नलोप का निषेध किया जाता है। 'वा नपुंसकानाम्' से पक्ष में नलोप-निषेध होता है। अतः यहाँ रेफादेश सावकाश है। 'हे दीर्घाऽहो निदाघ' यहाँ पुंल्लिङ्ग अन्य पदार्थ में बहुव्रीहि हुआ है। सम्बुद्धि का हल्ङ्यादि लोप हुआ है। लोप होने पर प्रत्ययलक्षण से सुप्परता नहीं है। अतः 'रोऽसुपि' लक्षण प्रवृत्त नहीं होता है। 'अहन्' से रुत्व ही होता है।

तत्र०—'अहन्' इस प्रकार रुत्वविधि में जिसका ग्रहण किया जाता है, उसी का आवर्त्तन होता है—ऐसा कहने में 'अहन्' इस सूत्र के द्वारा केवल रुत्व आदेश का ही विधान नहीं किया जाता; अपितु आवृत्तिन्याय से 'अहन्' इस शब्दस्वरूप का अन्वाख्यान किया जाता है।

'अहन्' इस प्रकार रुत्वविधि में जो प्रथमैकवचनान्त तथा अकृतलोप का ग्रहण किया जाता है, तब उसी का आवर्त्तन होता है। तब एक आवृत्ति के उसी रूप का अन्वाख्यान नलोप के अभाव के लिए किया जाता है। द्वितीय आवृत्ति के द्वारा उसके स्थान पर 'रु' आदेश का विधान किया जाता है।

भाव यह है कि यदि यहाँ 'अहन्' इसके द्वारा आदेशमात्र का विधान किया जाता है तो आदेश सम्बन्ध में षष्ठी होनी चाहिए; प्रथमा नहीं। प्रथमा के द्वारा ग्रहण किया जाता हुआ कृत नकार-लोप का ग्रहण किया जाय, नकारलोप लक्षण के भाव से। ऐसा नहीं किया गया है। अतः प्रथमान्त अकृत नकारलोप का ग्रहण समाप्त होता है। तब 'अहन्' इस स्वरूप का नलोप के अभाव के लिए अन्वाख्यान किया जाता है। ताकि 'नलोपः प्राति०' से नलोप न हो।

(3696) न ङिसम्बुद्ध्योः *8* (352)

ङौ परतः सम्बुद्धौ च नकारलोपो न भवति। आर्द्रे चर्मन् (तै० 7.5.93)। लोहिते चर्मन् (तै० 24.2)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'सुपां सुलुक्' (7.1.39) इति ङेर्लुक्। सम्बुद्धौ–हे राजन्। हे तक्षन्। एतस्मादेव नलोपप्रतिषेधवचनाद् 'अप्रत्ययः' (1.2.45) इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञा न प्रतिषिध्यते–इति ज्ञाप्यते; भसंज्ञा च न भवतीति। तथा च–राज्ञः पुरुषो राजपुरुष इत्यत्र नलोपश्च भवति, अल्लोपश्च न भवति। *ङावुत्तरपदे प्रतिषेधस्य प्रतिषेधो वक्तव्यः* (म० भा०)। चर्मणि तिला अस्य चर्मतिलः। हे राजन् वृन्दारक–इत्यत्र समुदायार्थसम्बोधनम्, न पूर्वपदार्थसम्बोधनं प्रतीयत इति सम्बुद्ध्यन्तं पूर्वपदं नैव समस्यते। *वा नपुंसकानामिति वक्तव्यम्* (म० भा०)। हे चर्मन्, हे चर्म।

अर्थ—ङि तथा सम्बुद्धि के परे रहते नकारलोप नहीं होता है।

उदा० (1) चर्मन्

चर्मन् ङि—'सुपां सुलुक्०' से 'ङि' का लुक्,

चर्मन्—'नलोपः प्राति०' से नलोप प्राप्त, निषेध हुआ।

इसी प्रकार—लोहिते चर्मन्।

(2) हे राजन्

हे राजन् सु—'हल्ङ्याब्भ्यो०' से 'सु' का लोप,

हे राजन्—नलोप प्राप्त हुआ, तब निषेध।

एतस्मा०—इस नलोप-निषेधवचन से 'अप्रत्ययः' इस प्रकार प्रत्ययलक्षण से प्रातिपदिक संज्ञा का निषेध नहीं होता है—ऐसा ज्ञापित होता है तथा भसंज्ञा भी नहीं होती। यथा—

राज्ञः पुरुषः—राजपुरुषः। यहाँ नलोप होता है तथा अकार लोप नहीं होता। प्रातिपदिक संज्ञा होने से नकारलोप होता है तथा भसंज्ञा न होने से 'अल्लोपोऽनः' की प्रवृत्ति नहीं होती।

भाव यह है कि यदि प्रत्ययलक्षण से प्रातिपदिक संज्ञा का निषेध होता तो 'न ङिसम्बु०' से नलोप के निषेध की क्या आवश्यकता है? अतः प्रकृत सूत्र के द्वारा विहित नलोप-निषेध व्यर्थ होकर ज्ञापित करता है कि प्रत्ययलक्षण के द्वारा प्रातिपदिक संज्ञा का निषेध नहीं होता है।

इस प्रतिषेध-वचन से दूसरा ज्ञापक सिद्ध होता है कि भसंज्ञा भी नहीं होती है।

ङावुत्तर०—उत्तरपद में 'ङि' परे रहते नलोप-निषेध का निषेध होता है। यथा—

चर्मणि तिला अस्य—चर्मतिलः।

हे राजवृन्दारक—यहाँ समुदायार्थ सम्बोधन है। पूर्वपदार्थ सम्बोधन प्रतीत नहीं होता है। अतः सम्बुद्ध्यन्त पूर्व पद का समास नहीं होता। यहाँ 'हे राजन् हे वृन्दारक' इस प्रकार विग्रह की दशा में 'वृन्दारकनागकुञ्जरैः' से समास करने पर नलोप प्राप्त नहीं था।

वा नपुं०—ङि तथा सम्बुद्धि परे रहते नपुंसक लिङ्गों के नकार का लोप विकल्प से होता है।

(3) हे चर्मन्

हे चर्मन् सु—'चर्मन्' नपुंसक लिङ्ग है,

हे चर्मन्—नलोप नहीं हुआ।

(4) हे चर्म

पक्ष में नलोप हुआ।

(3697) मादुपधायाश्च मतोर्वोऽयवादिभ्यः *9* (1897)

मतोरिह कार्यित्वेनोपादानात् सामर्थ्यलब्धं प्रातिपदिकं तत् 'मात्' इति मकारावर्णाभ्यां विशिष्यते। मकारावर्णविशिष्टया चोपधया–इत्ययमर्थो भवति। मकारान्ताद् मकारोपधादवर्णान्तादवर्णोपधाच्चोत्तरस्य मतोः 'व' इत्ययमादेशो भवति, यवादिभ्यस्तु परतो न भवति। मकारान्तात्–किंवान्। शंवान्। मकारोपधात्–शमीवान्। दाडिमीवान्। अवर्णान्तात्–वृक्षवान्। प्लक्षवान्। खट्वावान्। मालावान्। अवर्णोपधात्–पयस्वान्। यशस्वान्। भास्वान्। मादुपधायाश्चेति किम्? अग्निमान्। वायुमान्। अयवादिभ्य इति किम्? यवमान्। दल्मिमान्। ऊर्मिमान्। यव, दल्मि, ऊर्मि, भूमि, कृमि, क्रुञ्च, वशा, दाक्षा–एतेषां 'मादुपधायाश्च' (8.2.9) इति प्राप्नोति। ध्रजि, ध्वजि, सञ्जि–इत्येतेषां 'छन्दसीरः' (8.2.15) इति। हरित्, ककुत्, गरुत्–इत्येतेषां 'झयः' (8.2.10) इति। इक्षु, मधु, द्रुम, मण्ड, धूम–इत्येतेषां 'संज्ञायाम्' (8.2.11) इति। आकृतिगणश्च यवादिः। अकृतवत्वो मतुब् यवादिषु द्रष्टव्यः। यस्य सति निमित्ते मतुपो वत्वं न दृश्यते स यवादिषु द्रष्टव्यः। इह नृमत इदं नार्मतमिति बहिरङ्गलक्षणत्वादवर्णोपधस्य मतुपो वत्वं न भवति।

अर्थ—यहाँ 'मतुप्' का कार्यी के रूप में ग्रहण है। इसके ग्रहण से सामर्थ्यलब्ध प्रातिपदिक 'मात्' (अर्थात् मकार व अकार) से विशेषित होता है। 'मकार तथा अकारविशिष्ट उपधा से' ऐसा अर्थ होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मकारान्त से, मकारोपध से, अवर्णान्त से तथा अवर्णोपध से उत्तर 'मतुप्' के स्थान पर 'व्' आदेश होता है, परन्तु 'यव' आदि से उत्तर को यह आदेश नहीं होता होता है।

मकार व अकारविशिष्ट उपधा के स्थान पर 'व्' आदेश कहा गया है। अतः 'उपधायाश्च' यहाँ न हो। भाव यह है कि उपधासंज्ञक मकार तथा अकार के स्थान पर ही यह आदेश होता है।

उदा० (क) मकारान्तात्—

(1) किंवान्

किमस्याऽस्तीति—इस अर्थ में,

किम् मतुप्—मकारान्त प्रातिपदिक 'किम्' से उत्तर 'मतुप्' के मकार के स्थान पर वकार,

किम् वत्—अनुबन्धलोप,

किंवत् सु—अनुस्वार,

किंवान्—'उगिदचां०' से 'नुम्', हल्ङ्याब्भ्यो०, संयोगान्तस्य लोपः, अत्वसन्तस्य०।

(2) शंवान्

शम् मतुप्—पूर्ववत्।

(ख) मकारोपधात्—

(3) शमीवान्

शमी मतुप्—उपधा में मकार है, वकार आदेश,

शमीवत् सु—विभक्तिकार्य।

(4) दाडिमीवान् (पूर्ववत्)।

(ग) अवर्णान्तात्—

(5) वृक्षवान्

वृक्ष मतुप्—'वृक्ष' प्रातिपदिक के अन्त में अकार है, 'मतुप्' के मकार को वकार हुआ,

वृक्ष वत्—सु।

(6) प्लक्षवान्

प्लक्ष मतुप्—पूर्ववत्।

(7) खट्वावान्

खट्वा मतुप्—प्रातिपदिक 'खट्वा' के अन्त में दीर्घ अवर्ण है, शेष पूर्ववत्।

(8) मालावान्

माला मतुप्—पूर्ववत्।

(घ) अवर्णोपधात्—

(9) पयस्वान्

पयस् मतुप्—अवर्ण उपधा में है, 'मतुप्' के मकार के स्थान पर अकार हुआ।

पयस्वत् सु—पूर्ववत्।

(10) यशस्वान्

यशस् मतुप्—पूर्ववत्।

(11) भास्वान्

भास् मतुप्—उपधा में दीर्घ अवर्ण है, वकार हुआ,

भास् वत् सु—पूर्ववत्।

मादुपधा०—मकारान्त, अकारान्त, मोपध, अवर्णोपध— इनसे उत्तर 'मतुप्' के मकार के स्थान पर वकार होता है।

(12) अग्निमान्

अग्नि मतुप्—'अग्नि' प्रातिपदिक के न तो अन्त में मकार या अवर्ण है; न ही इसकी उपधा में मकार या अवर्ण है। अतः 'मतुप्' के मकार को वकार आदेश नहीं हुआ,

अग्नि मत् सु—अनुबन्ध लोप, विभक्तिकार्य।

(13) वायुमान्

वायु मतुप्—पूर्ववत्।

अयवा०—यव आदि प्रातिपदिकों से उत्तर 'मतुप्' के मकार को वकार नहीं होता है।

(14) यवमान्

यव मतुप्—'यव' अवर्णान्त है, इससे उत्तर 'मतुप्' के मकार को वकार प्राप्त था।

(15) दल्मिमान्

दल्मि मतुप्—उपधा में मकार होने से वकार आदेश प्राप्त था।

(16) ऊर्मिमान्

'दल्मिमान्' की तरह।

यवादि गण मूल में देखें।

यव०—यव, दल्मि, ऊर्मि, भूमि, कृमि, क्रुञ्च वशा तथा द्राक्षा—इन शब्दों को 'मादुपधायाश्च' से वकार प्राप्त था। ध्रजि, ध्वजि, सञ्जि—इन्हें 'छन्दसीरः' से प्राप्त था। हरित्, ककुत् तथा गरुत्—इन शब्दों को 'झयः' से वकार प्राप्त था। इक्षु, मधु, द्रुम्, मण्ड तथा धूम—इन शब्दों को 'संज्ञायाम्' से वकार प्राप्त था। यवादिगण एक आकृतिगण है।

अकृत०—(आकृतिगण कथन का भाव यह है कि) जिस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शब्द से उत्तर 'मतुप्' को मकार को वकार नहीं किया गया है, उसे यवादि गण में जानना चाहिए। जिस शब्द में 'मतुप्' के मकार को वकार आदेश का निमित्त होने पर भी वत्व दृष्टिगोचर नहीं होता है, उसे यवादिगण में जानना चाहिए।

इह०—नृमत इदम्—नार्मतम्—यहाँ बहिरङ्गलक्षण होने से अवर्णोपध के मतुप् को वत्व नहीं होता है।

(17) नार्मतम्
नरोऽस्य सन्ति—इस अर्थ में,
नृमत्—मतुप्,
नृमत् अण्—तस्येदम्,
नार्मत् अ—आदिवृद्धि।

(3698) झयः *10* (1898)

झयन्तादुत्तरस्य मतोः 'व' इत्ययमादेशो भवति। अग्निचित्वान् ग्रामः। उदश्वित्वान्योषः। विद्युत्त्वान्बलाहकः। इन्द्रो मरुत्वान् (आ०श्रौ० 8.16.1)। दृषद्वान् देशः।

अर्थ—झयन्त प्रातिपदिक से उत्तर 'मतुप्' के मकार को वकार होता है।

उदा० (1) अग्निचित्वान्
अग्निचित् मतुप्—अन्त में झय् वर्ण (तकार) है, 'मतुप्' के मकार को वकार हुआ,
अग्निचित्वत् सु—विभक्तिकार्य।

(2) उदश्वित्वान्
पूर्ववत् वत्व।

(3) विद्युत्वान्
विद्युत् मतुप्—पूर्ववत्।

(4) मरुत्वान् (पूर्ववत्)।

(5) दृषद्वान् (पूर्ववत्)।

(3699) संज्ञायाम् *11* (1899)

संज्ञायां विषये मतोः 'व' इत्ययमादेशो भवति। अहीवती। कपीवती। ऋषीवती। मुनीवती।

अर्थ—संज्ञा गम्यमान हो तो 'मतुप्' के मकार के स्थान पर वकार आदेश होता है।

उदा० (1) अहीवती
अहि मतुप्—'नद्यां मतुप्' से 'मतुप्' हुआ तथा 'शरादीनाञ्च' से दीर्घ।

(2) कपीवती
कपि मतुप्—पूर्ववत्।

(3) ऋषीवती
ऋषि मतुप्—पूर्ववत्।

(4) मुनीवती
मुनि मतुप्—पूर्ववत्।

(3700) आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती *12* (1900)

आसन्दीवद्, अष्ठीवत्, चक्रीवत्, कक्षीवत्, रुमण्वत्, चर्मण्वती—इत्येतानि संज्ञायां निपात्यन्ते। षत्वं पूर्वेणैव सिद्धम्, आदेशार्थानि निपातनानि। आसन्दीवदिति—आसनशब्दस्यासन्दीभावो निपात्यते। आसन्दीवान् ग्रामः। आसन्दीवदहिस्थलम्। आसनवानित्येवान्यत्र। अपरे त्वाहुः—आसन्दीशब्दोऽपि प्रकृत्यन्तरमेवास्ति। तथा चोक्तम्—अदुम्बरी राजासन्दी भवतीति, तस्य 'संज्ञायाम्' (8.2.11) इति वत्वेन सिद्धम्, आसन्दीवदित्येतत्प्रपञ्चार्थमिह पठ्यते। अष्ठीवदिति—अस्थ्नोऽष्ठीभावः। अष्ठीवानिति शरीरैकदेशसंज्ञा। अस्थिमानित्येवान्यत्र। चक्रीवदिति—चक्रशब्दस्य चक्रीभावो निपात्यते। चक्रीवान् राजा। चक्रवानित्येवान्यत्र। 'चक्रीवन्ति सदोहविर्धानानि भवन्ति'—(कात्या० श्रौ० सू० 24.3.26) इत्येतत्तु छान्दसत्वाद् अनुगन्तव्यम्। कक्षीवदिति—कक्ष्यायाः सम्प्रसारणं निपात्यते। कक्षीवान्नाम ऋषिः। कक्ष्यावानित्येवान्यत्र। रुमण्वदिति—लवणशब्दस्य रुमण्भावो निपात्यते। लवणवानित्येवान्यत्र। अपरे त्वाहुः—रुमन्निति प्रकृत्यन्तरमस्ति, तस्यैतन्निपातनं नलोपाभावार्थम्, णत्वार्थं च। मतोर्वा नुडर्थमिति। चर्मण्वतीति—चर्मणो नलोपाभावः, णत्वं च निपात्यते। मतोर्वा नुडर्थम्। चर्मण्वती नाम नदी। चर्मवतीत्येवान्यत्र।

अर्थ—संज्ञा के विषय में आसन्दीवत्, अष्ठीवत्, चक्रीवत्, कक्षीवत्, रुमण्वत् तथा चर्मण्वती—ये शब्द निपातनसिद्ध हैं।

वत्व तो पूर्व सूत्र से ही सिद्ध है। निपातन आदेश के लिए किया है।

आस०—आसन्दीवत्—'आसन' शब्द को 'आसन्दी' आदेश निपातन से होता है। अन्यत्र 'आसनवान्' होता है।

अपरे०—दूसरे विद्वान् कहते हैं कि 'आसन्दी' अन्य प्रकृति है। उसको वकार आदेश संज्ञा में सिद्ध ही है। कुछ 'आसन्दीवत्' का पाठ प्रपञ्च के लिए स्वीकार करते हैं।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्ठी०—अष्ठीवत्—अस्थि शब्द के स्थान पर 'अष्ठी' आदेश होता है। 'अष्ठीवान्' यह शरीर के एक भाग की संज्ञा है।

चक्री०—चक्रीवत्—'चक्र' शब्द के स्थान पर 'चक्री' आदेश होता है; अन्यत्र 'चक्रवान्' होता है। 'चक्रीवन्ति' इत्यादि प्रयोग छान्दस होने से साधु हैं।

कक्षी०—कक्षीवत्—'कक्ष्या' शब्द को निपातन से सम्प्रसारण होता है; अन्यत्र 'कक्ष्यावान्' बनता है।

रुमण्वत्—'लवण' शब्द के स्थान पर 'रुमण्' आदेश होता है।

संज्ञा से अतिरिक्त 'लवणवान्' होता है।

अपरे०—अन्य विद्वान् कहते हैं कि 'रुमन्' एक प्रकृति है। उसे निपातन से नलोप नहीं होता है तथ णत्व होता है। यहाँ 'पदान्तस्य' से णत्व-निषेध प्राप्त था।

मतोर्वा०—यहाँ एक अन्य मत भी प्रदर्शित किया है। इसके अनुसार 'रुमन्' प्रकृति को न तो नलोप अभाव की आवश्यकता है; न ही णत्व की। अपितु निपातन से 'मतुप्' को 'नुट्' आगम होता है। टित् होने से यह 'मतुप्' का आदि अवयव होता है। तब 'रुमन्' न् मत्' इस दशा में 'नलोपः प्राति०' से प्रथम नकार का लोप हुआ, तब द्वितीय नकार के पदान्त में न रहने से इसे णत्व निर्बाध हो जाता है।

चर्मण्व०—चर्मण्वती—यहाँ नलोप का निषेध तथा णत्व—ये दो कार्य निपातन से होते हैं अथवा पूर्ववत् 'मतुप्' को 'नुट्' आगम होता है। संज्ञा से अन्यत्र 'चर्मवती' होता है।

उदा० (1) आसन्दीवान्, (2) आसनवान्। (3) अष्टीवान्, (4) अस्थिमान्। (5) चक्रीवान्, (6) चक्रवान्। (7) कक्षीवान्, (8) कक्ष्यावान्। (9) रुमण्वान्, (10) लवणवान्। (11) चर्मण्वती, (12) चर्मवती।

(3701) उदन्वानुदधौ च *13* (1901)

'उदन्वान्' इत्युदकशब्दस्य मतावुदन्भावो निपात्यते उदधावर्थे संज्ञायां च विषये। उदन्वान्नाम ऋषिः, यस्यौदन्वतः पुत्रः। उदधौ–उदन्वान्। यस्मिन्नुदकं धीयते स एवमुच्यते। उदधाविति किम्? उदकवान् घट इत्यत्र तु दधात्यर्थो न विवक्ष्यते, किं तर्हि? उदकसत्तासम्बन्धसामान्यम्।

अर्थ—संज्ञा के विषय में 'उदधि' अर्थ गम्यमान रहते 'उदन्वान्' शब्द निपातनसिद्ध है। 'मतुप' परे रहते 'उदक' शब्द को 'उदन्' आदेश होता है।

उदन्वान् नाम ऋषि था। उसका पुत्र 'औदन्वत' था।

उदा० (1) उदन्वान्
उदकं धीयतेऽस्मिन्—अधिकरण अर्थ,
उदक मतुप्—'उदन्' आदेश, वत्व।

(2) औदन्वतः
उदन्वतोऽपत्यम्—'तस्याऽपत्यम्' से 'अण्',
औदन्वत् अ—आदिवृद्धि, सु।

उदधा०—उदधि अर्थ में ही 'उदन्वान्' होता है।

(3) उदकवान् घटः
यहाँ 'उदधि' अर्थ नहीं है। 'उदन्' आदेश नहीं हुआ।

(3702) राजन्वान्सौराज्ये *14* (1902)

'राजन्वान्' इति निपात्यते सौराज्ये गम्यमाने। शोभनो राजा यस्मिन्निति स राजन्वान् देशः। राजवन्ती पृथ्वी। राजवानित्येवान्यत्र।

अर्थ—'सौराज्य' गम्यमान रहते 'राजन्वान्' शब्द निपातनसिद्ध है।

उदा० (1) राजन्वान्
शोभनो राजा यस्मिन्—नकारलोप का अभाव निपातन से हुआ,
राजन् वत् सु—वत्व, विभक्तिकार्य।

(2) राजन्वती पृथिवी
राजन्वत्—पूर्ववत्,
राजन्वत् ङीप्—'उगितश्च' से 'ङीप्'।

(3703) छन्दसीरः *15* (3600)

छन्दसि विषये इवर्णान्ताद्रेफान्ताच्चोत्तरस्य मतोर्वत्वं भवति। (काठ० 11.1) इवर्णान्तात्तावत्–'त्रिवती याज्यानुवाक्या भवति'। 'हरिवो मे॒दिं॑नं त्वा।' (तै०सं० 4.7.14.4) 'अधिपतिवती जुहोति।' 'चरुरग्निवानिव।' आरेवानेतु मा विशत्। 'रयेर्मतौ' (का०वास०) इति सम्प्रसारणम्। 'सर॒स्वती॒वान् भा॑रती॒वान्' (मै० 3.10.6) दधीवाँश्चरुः। 'छन्दसि सर्वे विधयो विकल्प्यन्ते' (पु०प० 35) इतीह न भवति–सप्तर्षिमन्तम्, ऋषिमान्, ऋतीमान्, सूर्यं ते द्यावापृथिवीमन्तमिति। रेफान्तात्–गोर्वान्। धूर्वान्। आशीर्वान्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—वेद के विषय में इवर्णान्त तथा रेफान्त प्रातिपदिक से उत्तर 'मतुप्' के मकार के स्थान पर वकार होता है।

उदा० (क) इवर्णान्तात्—

(1) त्रिवती
त्रि मतुप्—वत्व हुआ,
त्रिवत् ङीप् सु—विभक्तिकार्य।

(2) हरिवः
'न मु ने' सूत्र पर सिद्धि देखें।

(3) अधिपतिवतः
अधिपति मतुप्—वकार आदेश।

(4) अग्निवान्
अग्नि मतुप्—पूर्ववत्।

(5) रेवान्
रयि मतुप्—'रयेर्मतौ बहुलम्' से सम्प्रसारण,
र इ इ मत्—सम्प्रसारणाच्च,
रे मत्—आद् गुणः, वत्व, विभक्तिकार्य।

(6) सरस्वतीवान्
पूर्ववत् वकार।

(7) भारतीवान् (पूर्ववत्)।

(8) दधीवान् (पूर्ववत्)।

छन्दसि०—वेद में सभी विधियाँ विकल्प से प्रवृत्त होती हैं। अतः निम्नलिखित स्थलों पर वत्व नहीं होता है—

(9) सप्तर्षिमन्तम्, (10) ऋषिमान्, (11) ऋतीमान्, (12) द्यावापृथिवीमन्तम्।

(ख) रेफान्तात्—

(13) गीर्वान्
गृ क्विप्—
गिर्—सर्वापहारलोप, 'ऋत इद्धातोः' से इकार, 'उरण् रपरः' से रपर,
गिर् मतुप्—वत्व, दीर्घ,
गीर् वत्—सु।

(14) धूर्वान्
धुर्व् क्विप्—पूर्ववत्, 'क्विप्' का सर्वापहारलोप,
धुर्—'राल्लोपः' से वकारलोप,
धुर् मतुप्—पूर्ववत् वत्व, दीर्घ।

(15) आशीर्वान्
आ शास् क्विप्—सर्वापहारलोप,
आ शिस्—शास इदङ्हलोः, आशासः क्वावुपसङ्ख्यानम् (वा०),
आशिस् मतुप्—ससजुषो रु, वत्व,
आशीर् वत् सु—दीर्घादेश।

(3704) अनो नुट् *16* (3601)

'छन्दसि' इति वर्तते। अनन्तादुत्तरस्य मतोर्नुडागमो भवति छन्दसि विषये। 'अक्षण्वन्तः कर्णवन्तः सखायः।' (ऋ० 10.71.7) 'अस्थन्वन्तं यदनस्था बिभर्ति।' (ऋ० 1.164.4) अक्षण्वता लाङ्गलेन। शीर्षण्वती (अ०वे० 10.1.2)। मूर्धन्वती (तै० 2.6.2.2)। नुटोऽसिद्धत्वात्तस्य च वत्वं न भवति, ततः परस्य च भवति।

अर्थ—'छन्दसि' की अनुवृत्ति है। वेद के विषय में 'अन्' अन्त वाले प्रातिपदिक से उत्तर 'मतुप्' प्रत्यय को 'नुट्' आगम होता है।

उदा० (1) अक्षण्वन्तः
अक्षन् मतुप्—'छन्दस्यपि दृश्यते' से 'अनङ्',
अक्ष न् मत्—'नलोपः प्राति०' से नलोप, नुट् आगम,
अक्षण् वत्—णत्व, वत्व, जस्।

(2) अस्थन्वन्तम्
अस्थि—पूर्ववत् 'अनङ्' आदेश,
अस्थन् मतुप्—णत्व को छोड़कर शेष सभी कार्य पूर्ववत्।

(3) शीर्षण्वती
शीर्षन् नुट् मतुप्—'शीर्षश्छन्दसि' से निपातन, नुट्, णत्व आदि, शेष कार्य पूर्ववत्।

(4) मूर्धन्वती (पूर्ववत्)।

नुटो०—'अक्षन् न् मतुप्' इत्यादि स्थलों पर प्रथम नकार का लोप होकर 'अक्ष नमत्' यह स्थिति बनती है। अब शङ्का होती है कि 'मादुपधायाश्च०' सूत्र से विहित वत्व आदेश अव्यवहित नकार के स्थान पर होना चाहिए, न कि मकार के स्थान पर।

(समा०) 'अनो नुट्' (8.2.16) से विहित 'नुट्' आगम 'मादुपधायाश्च०' (8.2.9) की दृष्टि में असिद्ध है। अतः वकार आदेश मकार के स्थान पर ही होता है।

(3705) नाद् घस्य *17* (3602)

नकारान्तादुत्तरस्य घसञ्ज्ञकस्य नुडागमो भवति छन्दसि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषये। सुपथिन्तरः। दस्युहन्तमः। * भूरिदाव्नस्तुड् वक्तव्यः * (म० भा०)। * भूरिदावत्तरः * (ऋ० 8.5.39)। * ईद्रथिनः * (म० भा०)। रथिन ईकारान्तादेशो घ परतः। रथीतरः (ऋ० 1.84.5)। रथशब्दादेव वा मत्वर्थीयोऽयमीकारः 'छन्दसीवनिपौ' इति।

अर्थ—नकारान्त प्रातिपदिक से उत्तर जो घसंज्ञक प्रत्यय, उसे 'नुट्' आगम होता है, वेद के विषय में।

'तरप्तमपौ घः' से घसंज्ञा होती है।

उदा० (1) सुपथिन्तरः

शोभनः पन्थाः—प्रादि समास, 'न पूजनात्०' से निषेध होने से 'ऋक्पूरब्धूः०' से समासान्त भी नहीं होता है,

सुपथिन् तरप्—'नुट्' हुआ,

सुपथिन् तरप्—प्रथम नकार का लोप, सु।

(2) दस्युहन्तमः

दस्युं हतवान्—इस अर्थ में 'क्विप्' हुआ,

दस्युहन् तमप्—पूर्ववत्।

भूरिदा०—भूरिदावन् शब्द से उत्तर घसंज्ञक प्रत्यय को 'तुट्' आगम होता है।

(3) भूरिदावत्तरः

भूरिदावन् तरप्—'तुट्', नकारलोप,

भूरिदाव त् तर सु—विभक्तिकार्य।

ईद्रथिन०—घसंज्ञक प्रत्यय परे रहते 'रथिन्' शब्द को ईकार आदेश होता है।

(4) रथीतरः

रथिन् तरप् → रथि ई तर सु।

रथश०—अथवा यह 'रथ' शब्द से 'छन्दसी वनिपौ' से मत्वर्थीय ईकार हुआ है।

(3706) कृपो रो लः *18* (2350)

कृपेर्धातो रेफस्य लकारादेशो भवति। 'रः' इति श्रुतिसामान्यमुपादीयते। तेन यः केवलो रेफो यश्च ऋकारः, तयोर्द्वयोरपि ग्रहणम्। 'लः' इत्यपि सामान्यमेव; ततोऽयं केवलस्य रेफस्य स्थाने लकारादेशो विधीयते। ऋकारस्याप्येकदेशविकारद्वारेण लृकारः। एवं च 'लुटि च क्लृपः' (1.3.93) इत्येवमादयो निर्देशा उपपद्यन्ते। कल्प्ता, कल्प्तारौ, कल्प्तारः। क्लृप्तः। क्लृप्तवान्। कृपा इत्येतत् 'क्रपेः सम्प्रसारणं च' (ग०सू०36) इति भिदादिषु पाठाद्भवति, तस्य हि कृतसम्प्रसारणस्य लाक्षणिकत्वात् इह कृप इति ग्रहणं नास्ति। कृपण-कृपीटकर्पूरादयोऽपि क्रपेरेव द्रष्टव्याः। 'उणादयो बहुलम्' (3.3.1) इति वा कृपेरेव लत्वाभावः। * बालमूल-लघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम् * (म० भा०)। बालुः बारः। मूलम्, मूरम्। लघु, रघु। असुरः, असुलः। अलम्, अरम्। अङ्गुलिः, अङ्गुरिः। * कपिलकादीनां संज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम् * (म० भा०)। कपिरकः, कपिलकः। तिल्पिलीकम्, तिर्पिरीकम्। लोमानि, रोमाणि। पांशुरम्, पांशुलम्। कर्म, कल्म। शुक्रः, शुक्लः। रलयोरेकत्वस्मरणमिति केचित्। किमिदमेकत्वस्मरणमिति? समानविषयत्वमेव तयोः स्मर्यत इत्यर्थः।

अर्थ—'कृप्' धातु के रेफ के स्थान पर लकार आदेश होता है। 'र' यह श्रुतिसामान्य गृहीत है। अतः जो केवल रेफ तथा जो ऋकार, उन दोनों का यहाँ ग्रहण होता है। 'ल' यह भी सामान्य रूप से गृहीत है। तब यह केवल रेफ के स्थान पर लकार आदेश का विधान किया जाता है।

ऋकार०—ऋकार के स्थान पर भी एकदेश विकार के द्वारा लृकार होता है। इस प्रकार 'लुटि च क्लृपः' इत्यादि निर्देश उपपन्न होते हैं।

उदा० (1) कल्प्ता

कृप् तिप्—लुट्,

कृप् तास् डा—लुटः प्रथमस्य०, स्यतासी०,

कल्प् त् आ—टिलोप, गुण, लत्व।

यह रूप 'तृच्' प्रत्यय में भी बनता है।

(2) कल्प्तारौ

कृप् तस्—'रौ' आदेश, शेष पूर्ववत्।

(3) कल्प्तारः

कृप् झि—'रस्' आदेश, शेष पूर्ववत्।

(4) क्लृप्तः

कृप् क्त सु—लत्व।

(5) क्लृप्तवान्

क्तवतु में रूप बनता है।

कृपा०—'कृपा' यहाँ 'क्रपेः सम्प्रसारणं च' से भिदादिगण

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

में पाठ होने से होता है। सम्प्रसारण कर देने पर उसके लाक्षणिक होने से यहाँ उस 'कृप्' का ग्रहण नहीं होता।

कृपण०—कृपण, कृपीट, कर्पूर आदि शब्द 'क्रप्' से ही निष्पन्न हैं अथवा 'उणादयो बहुलम्' से 'कृप्' को लत्व का अभाव हुआ है। यथा—

(6) कृपणः
कृप् क्वुन्—बहुलवचनात् लत्वाऽभाव।
कृपण सु—णत्व।

(7) कृपीटः
कृप् कीटन्—'कृतृकृपिभ्यः कीटन्' से 'कीटन्',
कृप् ईट सु—अनुबन्धलोप।

(8) कर्पूरः
कृप् ऊर—खर्जिपिञ्जादिभ्य ऊरोलचौ,
कर्प् ऊर सु—गुण।

बाल०—बाल, मूल, लघु, असुर, अलम् तथा अङ्गुलि—इन शब्दों के रेफ के स्थान पर विकल्प से लत्व होता है।

(9) बालः (लत्व पक्ष)।
(10) बारः (लत्व अभाव पक्ष)।
(11) मूलम् (लत्व)।
(12) मूरम् (लत्व अभाव)।
(13) लघु (लत्व)।
(14) रघु (लत्व अभाव)।
(15) असुरः (लत्व अभाव)।
(16) असुलः (लत्व)।
(17) अलम् (लत्व)।
(18) अरम् (लत्व अभाव)।
(19) अङ्गुलिः (लत्व)।
(20) अङ्गुरिः (लत्व अभाव)।

कपिलका०—संज्ञा तथा वेद के विषय में कपिलक आदि शब्दों के रेफ के स्थान पर विकल्प से लत्व होता है।

(21) कपिरकः (लत्व अभाव)
(22) कपिलकः (लत्व)।
(23) तिल्पिलीकम् (लत्व)।
(24) तिर्पिलीकम् (लत्व अभाव)।
(25) लोमानि (लत्व)।
(26) रोमाणि (लत्व अभाव)।
(27) पांशुरम् (लत्व अभाव)।
(28) पांशुलम् (लत्व)।
(29) कर्म (लत्व अभाव)।
(30) कल्म (लत्व)।
(31) शुक्रः (लत्व अभाव)।
(32) शुक्लः (लत्व)।

रलयो०—कुछ विद्वान् इसे रेफ व लकार का अभेद स्वीकार करते हैं। यह अभेद क्या है ? रेफ और लकार का समान विषय होना अभेद है।

(3707) उपसर्गस्यायतौ *19* (2326)

अयतौ परत उपसर्गस्य यो रेफस्तस्य लकार आदेशो भवति। प्लायते। पलायते। अत्र योऽयमेकादेशः, तस्य स्थानिवद्भावादयतेः, उपसर्गस्य च विभागे सति यद्ययतिग्रहणं रेफस्य विशेषणम्, तदा 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या०प०) इति एकेन वर्णेन व्यवधानेऽपि सति लत्वं भवति। तथा च पल्ययते इत्यत्रापि भवति। उपसर्गविशेषणे त्वयतिग्रहणे सिद्धमेवैतत्सर्वं प्रतेरपि तु व्यवहितेऽपि प्राप्नोति। तत्र केषाञ्चिद्दर्शनं भवितव्यमेव प्लत्ययत इति। प्रथमपक्षदर्शनाभिनिविष्टास्तु प्रत्ययत इत्येव भवतीति मन्यन्ते। अपरे तु प्रतिशब्दोपसृष्टस्यायतेः प्रयोगमेव नेच्छन्ति। निस्, दुस्-इत्येतयोस्तु रुत्वस्यासिद्धत्वाल्लत्वेन नैव भवितव्यम्। निरयणम्। दुरयणम्।

अर्थ—अय् धातु के परे रहते उपसर्ग का जो रेफ, उसके स्थान पर लकार होता है।

उदा० (1) प्लायते
प्र अयते—इस दशा में लत्व, सवर्णदीर्घ।

(2) पलायते
परा अयते—पूर्ववत्।

अत्र०—यहाँ दो पक्ष सम्भव हैं—

(क) प्रथम पक्ष—अयति ग्रहण रेफ का विशेषण होता है,

(ख) द्वितीय पक्ष—अयति ग्रहण उपसर्ग का विशेषण होता है।

प्रथम पक्ष के अनुसार सूत्रार्थ इस प्रकार होता है—

अय् धातु के परे रहते जो रेफ उपसर्ग में स्थित, उसके स्थान पर लकार आदेश होता है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वितीय पक्ष के अनुसार सूत्रार्थ इस प्रकार होता है—

अय् धातु के परे रहते जो उपसर्ग, उस उपसर्ग का जो रेफ, उसके स्थान पर लकार आदेश होता है।

(शङ्का) प्रथम पक्ष के अनुसार प्लायते तथा परायते—इन स्थलों पर लत्व नहीं हो सकेगा। उसके करने में 'अचः परस्मिन् पूर्वविधौ' से स्थानिवद्भाव होना चाहिए। तब प्रकृति तथा उपसर्ग का विभाग होने पर अवर्ण का व्यवधान होने से रेफ से अय् धातु की परता सम्भव नहीं है।

(समा०) यहाँ पर जो एकादेश है, उसके स्थानिवद्भाव से अय् धातु तथा उपसर्ग का विभाग होने पर जब अय् धातु को रेफ का विशेषण स्वीकार करते हैं, तब जिसके द्वारा अव्यवधान नहीं है, उसके द्वारा व्यवधान होने पर भी वचनप्रामाण्य से एक वर्ण का व्यवधान होने पर भी लकार आदेश होता है। तब निम्नलिखित में लत्व होता है—

(3) पल्ययते
परि अयते—यण्, लत्व।

उपसर्ग०—उपसर्ग विशेषण पक्ष में यह सब सिद्ध ही है। तब 'प्रति' के रेफ को व्यवधान होने पर भी लकार प्राप्त होता है। यहाँ कुछ विद्वानों का मत होना चाहिए। यथा—

(4) प्लत्ययते
प्रति अयते—यण्, लत्व।

प्रथम०—प्रथम पक्ष के समर्थक विद्वान् यहाँ लत्व आदेश, स्वीकार नहीं करते। वे 'प्रत्ययते ही होता है' ऐसा मानते हैं।

निस्०—निस् तथा दुस्—इनके सकार के स्थान पर 'ससजुषो रुः' से 'रु' होता है। इस 'रु' आदेश के असिद्ध होने से लत्व नहीं होना चाहिए। यथा—

(5) निरयणम्
निस् अयन → निर् अयन सु—णत्व।

(6) दुरयणम्
दुस् अयन्—पूर्ववत्।

(3708) ग्रो यङि *20* (2639)

'गृ' इत्येतस्य धातो रेफस्य लकार आदेशो भवति यङि परतः। निजेगिल्यते, निजेगिल्येते, निजेगिल्यन्ते। भावगर्हायां ग्रो यङ्विहितः। केचित्–'ग्रः' इति गिरतेर्गृणातेश्च सामान्येन ग्रहणमिच्छन्ति। अपरे तु गिरतेरेव न गृणातेः। गृणातेर्हि यङेव नास्ति; अनभिधानादिति। यङीति किम्? निगीर्यते।

अर्थ—'गृ' इस धातु के रेफ के स्थान पर लकार होता है, यङ् परे रहते।

उदा० (1) निजेगिल्यते
गृ यङ्—'ऋत इद्धातोः' से इत्त्व, उरण् रपरः,
गिर् य—सन्यङोः,
गिर् गिर् य—हलादिः शेषः,
गि गिर् य—कुहोश्चुः,
जे गिर् य—गुणो यङ्लुकोः,
निजेगिल्यते—लत्व, धातुसंज्ञा, शप्, अतो गुणे।

(2) निजेगिल्येते
'आताम्' में रूप बनता है।

(3) निजगिल्यन्ते
'झ' में रूप बनता है।

भावगर्हा०—भावगर्हा अर्थ में गृ धातु से 'यङ्' विहित है।

केचित्०—कुछ विद्वान् 'ग्र' पद के द्वारा तौदादिक गृ तथा क्रैयादिक गृ दोनों का ग्रहण चाहते हैं। अन्य विद्वान् तौदादिक गृ धातु का ग्रहण स्वीकार करते हैं तथा क्रैयादिक धातु का नहीं। अभिधान न होने से क्रैयादिक 'गृ' धातु से यङ् होता ही नहीं है।

यङी०—यङ् परे रहते ही 'गृ' धातु के रेफ को लकार होता है।

(4) निगीर्यते
गृ यक् त—कर्मवाच्य, 'त', सार्वधातुके यक्,
गिर् यत—इकार, रपरत्व,
निगीर्यते—दीर्घ, लत्व नहीं हुआ।

(3709) अचि विभाषा *21* (2541)

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा लकारादेशो भवति। निगिरति, निगिलति। निगरणम्, निगलनम्। निगारकः, निगालकः। इयं तु व्यवस्थितविभाषा। तेन 'गल' इति प्राण्यङ्गे नित्यं लत्वं भवति; 'गर' इति विषे नित्यं न भवति। निगार्यते, निगाल्यत इति। णिलोपस्य स्थानिवद्भावाद् 'अचि विभाषा' इति लत्वविकल्पः। 'पूर्वत्रासिद्धे न स्थानिवत्' (पु०वृ० 112) इति एतदपि सापवादमेव; 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' (म०

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भा०) इति। अन्तरङ्गत्वाद्वा कृते लत्वविकल्पे णिलोपो भविष्यति। गिरौ, गिर इत्यत्र 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति लत्वं न भवति। गिरतिर्वा लत्वविधावधिकृतः; गृणातेरेतद्रूपम्।

अर्थ—गृ धातु के रेफ के स्थान पर लकार आदेश विकल्प से होता है, अजादि प्रत्यय परे रहते।

उदा० (1) निगिलति
नि गिरति—लत्व हुआ।

(2) निगिरति
लत्व का अभाव।

(3) निगलनम्
नि गृ ल्युट्—युवोरनाकौ,
नि गर् अन—लत्व, णत्व, सु।

(4) निगरणम्
लत्व का अभाव।

(5) निगालकः
नि गृ ण्वुल्—चुटू, हलन्त्यम्, युवोरनाकौ,
नि गृ अक—अचो ञ्णिति, उरण् रपरः,
नि गार् अक—लत्व, सु।

(6) निगारकः
लत्व का अभाव।

इयं तु०—यह व्यवस्थित विभाषा है। अतः 'प्राणी का अङ्ग' अर्थ में 'गल' में नित्य लत्व होता है तथा विष अर्थ में 'गर' में नित्य लत्व का अभाव होता है। निम्नलिखित में णिलोप का स्थानिवद्भाव होने से 'अचि विभाषा' से लत्व का विकल्प होता है।

(7) निगाल्यते
नि गृ णिच्—हेतुमति च, अनुबन्धलोप,
नि गार् इ—वृद्धि, धातुसंज्ञा,
निगार् य त—कर्मवाच्य, सार्वधातुके यक्, णिलोप, अब अजादि (णि) का स्थानिवद्भाव हुआ, प्रकृत सूत्र से लत्व हुआ,
निगाल् य ते—टित आत्मनेपदानां०।

(8) निगार्यते
पक्ष में लत्व नहीं हुआ।

(9) गलः
व्यवस्थित विभाषा होने से प्राण्यङ्ग अर्थ में नित्य लत्व।

(10) गरः
विष अर्थ में नित्य लत्व अभाव।

पूर्वत्रा०—'पूर्वत्राऽसिद्धे न स्थानिवत्' से यह भी सापवाद ही होता है 'तस्य दोषः संयोगादिलोपलत्वणत्वेषु' से। अथवा अन्तरङ्ग होने से लत्व का विकल्प करने पर णिलोप हो जायेगा। गिरौ तथा गिरः—इन स्थलों पर 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' से लत्व नहीं होता है। अथवा 'गिरति' यह लत्व विधि में अधिक है। यह क्रैयादिक 'गृ' का रूप है।

(3710) परेश्च घाङ्कयोः *22* (3262)

परि इत्येतस्य यो रेफस्तस्य घशब्देऽङ्कशब्दे च परतो विभाषा लकार आदेशो भवति। परिघः, पलिघः। पर्यङ्कः, पल्यङ्कः। घ इति स्वरूपग्रहणमत्रेष्यते, न तरप्तमपौ इति। * योगे चेति वक्तव्यम् * (म०भा०)। परियोगः, पलियोगः।

अर्थ—'परि' इस शब्द का जो रेफ, उसके स्थान पर लकार आदेश विकल्प से होता है, घशब्द तथा अङ्क शब्द परे रहते।

उदा० (1) परिघः
परि हन् अप्—हकारलोप, घकार-निपातन से;
परि घ् अ—सु, लत्व अभाव पक्ष।

(2) पलिघः
लत्व पक्ष।

(3) पर्यङ्कः
परि अङ्क् अच्—पचादिलक्षण अच् अथवा 'हलश्च' से 'घञ्', पर्यङ्क सु—यण्, लत्व अभाव पक्ष।

(4) पल्यङ्कः
लत्व पक्ष।

घ इति०—'तरप्तमपौ घः' से तरप् तथा तमप् की भी घसंज्ञा होती है। 'स्वं रूपं शब्दस्य०' से स्वरूपग्रहण का निषेध होता है। अतः घरूप में ही लत्व का उदाहरण क्यों दिया जा रहा है। ऐसा माना जाता है कि 'अङ्क' इससे असंज्ञा शब्द के साहचर्य से 'घ' इस असंज्ञा शब्द का ही ग्रहण होता है। अतः 'घ' के द्वारा यहाँ स्वरूप का ग्रहण होता है; तरप् व तमप् का नहीं।

योगे०—'योग' शब्द परे रहते 'परि' के रेफ का विकल्प से लत्व होता है।

(5) परियोगः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लत्व का अभाव।

(6) पलियोगः

लत्व।

(3711) संयोगान्तस्य लोपः *23* (54)

संयोगान्तस्य पदस्य लोपो भवति। गोमान्। यवमान्। कृतवान्। हृतवान्। इह श्रेयान्, भूयान्—इति रुत्वं परमप्यसिद्धत्वात् संयोगान्तस्य लोपं न बाधते। जश्त्वे तु नाप्राप्ते तदारभ्यत इति तस्य बाधकं भवति–यशः, पय इति। दध्यत्र, मध्वत्र–इत्यत्र तु यणादेशस्य बहिरङ्ग-लक्षणस्यासिद्धत्वात् संयोगान्तलोपो न भवति।

अर्थ—संयोगान्त पद का लोप होता है।

अलोऽन्त्य परिभाषा से संयोगसंज्ञक के अन्त्य अल् का लोप होता है।

उदा० (1) गोमान्

गो मतुप्—अनुबन्धलोप,

गोमन् त् सु—नुम्, हल्ङ्यादि लोप, संयोगान्तलोप,

गोमान् त्—'अत्वसन्तस्य०' से उपधादीर्घ।

(2) यवमान्

यव मतुप्—पूर्ववत्।

(3) कृतवान्

कृतवत्—पूर्ववत्।

(4) हृतवान्

हृ क्तवतु—पूर्ववत्।

श्रेयान्०—श्रेयान् तथा भूयान्—इन स्थलों पर रुत्व परकार्य है; परन्तु उसके असिद्ध होने से यह संयोगान्त लोप का बाध नहीं करता है।

(5) श्रेयान्

प्रशस्य ईयसुन्—प्रशस्यस्य श्रः,

श्र ईयस्—अनुबन्धलोप, आद्गुणः,

श्रेयस् सु—हल्ङ्यादिलोप,

श्रेयन् स्—नुम्, 'ससजुषो रुः' (8.2.66) से रुत्व तथा 'संयोगान्तस्य लोपः' (8.2.23) से संयोगान्त लोप युगपत् प्राप्त होते हैं। परकार्य होने से रुत्व प्रथम प्राप्त होता है, परन्तु इसके असिद्ध होने से संयोगान्त लोप होता है,

श्रेयान्—उपधादीर्घ।

(6) भूयान्

बहु ईयसुन्—बहोर्लोपो भू च बहोः,

भू यस्—ईकारलोप, 'भू' आदेश,

भूयस् सु—पूर्ववत्।

जश्त्वे०—जश्त्व में अप्राप्त न रहने पर यह विधान है। अतः रुत्व जश्त्व का बाधक होता है। भाव यह है कि पर रुत्व के असिद्ध होने से यदि रुत्व संयोगान्त लोप का बाधक नहीं होता तो यह जश्त्व का भी बाधक नहीं होना चाहिए। तब 'यशः' आदि स्थलों पर जश्त्व ही होना चाहिए; रुत्व नहीं। वस्तुतः संयोगान्त लोप के प्राप्त होने पर तथा अप्राप्त होने पर रुत्व का विधान है। यह लोप 'श्रेयान्' इत्यादि स्थलों पर प्राप्त है तथा 'यशः' आदि स्थलों पर अप्राप्त है। अतः रुत्व इसका बाध नहीं करता है। जश्त्व में सर्वत्र प्राप्त होने पर ही विधान है। अतः बाधक लक्षण योग से रुत्व जश्त्व का बाध कर लेता है।

(7) यशः

यशस् सु—हल्ङ्याब्भ्यो०,

यशः—रुत्व तथा जश्त्व युगपत् प्राप्त होते हैं। रुत्व जश्त्व का बाध कर लेता है।

(8) पयः

पयस् सु—पूर्ववत्।

दध्यत्र०—दध्यत्र आदि स्थलों पर बहिरङ्ग लक्षण यण् आदेश के असिद्ध होने से संयोगान्त लोप नहीं होता है। यहाँ यणादेश दो पदों पर आश्रित होने से बहिरङ्ग है तथा संयोगान्तलोप एक-पदाश्रित है; अतः अन्तरङ्ग है।

(9) दध्यत्र

दधि अत्र—इको यणचि,

दध्य् अत्र—संयोगान्त लोप नहीं हुआ।

(10) मध्वत्र (पूर्ववत्)।

पदस्य के अधिकार का फल यह है कि गोमन्तौ, गोमन्तः इत्यादि स्थलों पर संयोगान्त लोप न हो।[1]

(3712) रात्सस्य *24* (280)

संयोगान्तपदस्य यो रेफस्तस्मादुत्तरस्यान्तस्य सकारस्य लोपो भवति। गोभिरक्षाः। प्रत्यङ्ङंमत्साः (ऋ० 10.28.4)। क्षरतेः, त्सरतेश्च लुङि सिचश्छान्दसत्वादीडभावः; 'बहुलं छन्दसि' (7.3.97) इति वचनात्। दीर्घे सति रूपमेतत्। मातुः; पितुरिति–'ऋत उत्' (6.1.111) इति

1. न्यास।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्त्वे कृते रपरत्वे च सति 'रात्सस्य' इति सलोपः। सिद्धे सत्यारम्भो नियमार्थः–रात्सस्यैव लोपो भवति, नान्यस्येति। ऊर्जेः—क्विप्, ऊर्क्। मृजेर्लङि–अमार्ट् (न्यर्माट्)।

अर्थ—संयोगान्त पद का जो रेफ, उससे उत्तर सकार का लोप होता है। 'संयोगान्त पद' यह रेफ का विशेषण है तथा रेफ सकार का विशेषण है। भाव यह है कि संयोगान्त पद का अवयव जो रेफ, उससे उत्तर जो सकार, उस अलोऽन्त्य का लोप होता है।

उदा० (1) अक्षाः
क्षर् ति—लुङ्, इतश्च,
क्षर् स् त्—सिच्, 'अतो ल्रान्तस्य' से वृद्धि,
क्षार् स् त्—'बहुलं छन्दसि' से ईट् का अभाव,
क्षार् स्—हल्ङ्याब्भ्यो०,
अक्षाः—रात्सस्य, विजर्सनीय।

(2) अत्साः
त्सर् तिप्—पूर्ववत् सभी कार्य।

क्षरतेः०—क्षर् तथा त्सर् धातुओं से लुङ् हुआ। छान्दस होने से 'बहुलं छन्दसि' से 'सिच्' को ईट् का अभाव, दीर्घ होकर रूप बनता है।

मातुः०—मातुः, पितुः—इन स्थलों पर 'ऋत् उत्' से उत्त्व करने पर 'रात्सस्य' से सकारलोप होता है।

(3) पितुः
पितृ ङस्—ऋत उत्, उरण् रपरः,
पितुर् स्—रात्सस्य।

(4) मातुः (पूर्ववत्)।

सिद्धे०—पूर्वसूत्र (संयोगान्तस्य लोपः) से सिद्ध होना ही है। अतः यह नियमार्थ विधान है। यह नियम करता है कि रेफ से उत्तर सकार का ही लोप होता है; अन्य वर्ण का नहीं। यथा—

(5) ऊर्क
ऊर्ज् क्विप्—'भ्राजभ्रास०' से 'क्विप्',
ऊर्ज्—हलन्त्यम्, उपदेशेऽजनु०, लशक्वतद्धिते, तस्य लोपः, वेरपृक्तस्य आदि लगकर सर्वापहारलोप,
ऊर्ज् सु—प्रातिपदिक संज्ञा, सु, हल्ङ्यादिलोप,
ऊर्ज्—संयोगान्तलोप प्राप्त, प्रकृत सूत्र से जकार का लोप नहीं हुआ,
ऊर्क्—'चोः कुः' से गकार, 'वाऽवसाने' से चर्त्व।

(6) अमार्ट्
मृज् तिप्—लङ्, कर्त्तरि शप्, अदिप्रभृतिभ्यः शपः,
अधस्, शिरस्–इत्येतयोर्विसर्जनीयस्य समासेऽनुत्तरपदस्थस्य सकार आदेशो भवति पदशब्दे परतः। अधस्पदम्। शिरस्पदम्। अधस्पदी। शिरस्पदी। 'समासे' इत्येव–अधःपदम्। 'अनुत्तरपदस्थस्य' इत्येव–परमशिरःपदम्। अधस्पदमिति मयूरव्यंसकादित्वात् (2.1.72) समासः।

अर्थ—समास में अधस् तथा शिरस्—इन शब्दों के विसर्जनीय को सकार होता है, 'पद' परे रहते, यदि विसर्जनीय उत्तर पद में न हो।

उदा० (1) अधस्पदम्

अधस् पद—समास, रुत्व, विसर्जनीय,

अधस् पद—सकार, सु।

(2) शिरस्पदम् (पूर्ववत्)।

(3) अधस्पदी

स्त्रीत्व में।

(4) शिरस्पदी (पूर्ववत्)।

समासे०—समास में ही विसर्जनीय को सकार होता है।

(5) अधःपदम्

समास न होने से सकार नहीं हुआ।

अनुत्तर०—उत्तर पद में स्थित विसर्जनीय को सकार नहीं होता है।

(6) परमशिरःपदम्

'शिरस्' शब्द उत्तर पद में स्थित है। इसके विसर्जनीय को सकार नहीं हुआ।

'अधस्पदम्' में मयूरव्यंसकादि से समास होता है।

(3844) कस्कादिषु च *48* (144)

'कस्क'–इत्येवमादिषु च विसर्जनीयस्य सकारः, षकारो वा यथायोगमादेशो भवति कुप्वोः परतः। कस्कः। कौतस्कुतः 'कुत आगतः' (4.3.74) इत्यण्। भ्रातुष्पुत्रः। शुनस्कर्णः। सद्यस्कालः। सद्यस्क्रीः। क्रीणातेरयं सम्पदादित्वात् (का०वा०) क्विप्प्रत्ययः, तत्र भवः क्रतुः–साद्यस्क्रः। कांस्कान्–'कानाम्रेडिते' (8.3.12) इति रुत्वमत्र। सर्पिष्कुण्डिका, धनुष्कपालम्, बर्हिष्पूलम्, यजुष्पात्रमित्येषां पाठः–उत्तरपदस्थस्यापि षत्वं यथा स्यादिति। परमसर्पिःफलमित्येवमादिप्रत्युदाहरणादिति पारायणिका आहुः। भाष्ये, वृत्तौ 'नित्यं समासेऽनुत्तरपदस्थस्य' (8.3.45) इत्यत्र परमसर्पिः कुण्डिकेत्येतदेव प्रत्युदाहरणम्। अयस्काण्डः। मेदस्पिण्डः। अविहितलक्षणोपचारः कस्कादिषु द्रष्टव्यः।

अर्थ—'कस्क' आदि शब्दों में विसर्जनीय के स्थान पर यथायोग सकार तथा षकार आदेश होता है, कवर्ग तथा पवर्ग परे रहते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उदा० (1) कस्कः
किम् सु—किमः कः,
कस् कस्—वीप्सा अर्थ में द्विर्वचन,
कः कस्—विसर्जनीय, सकार।

(2) कौतस्कुतः
किम् तसिल्—पञ्चम्यास्तसिल्,
कु तस्—हलन्त्यम्, उपदेशेऽजनु०, 'कु तिहोः' से 'कु' आदेश,
कुतस् कुतस्—वीप्सा अर्थ में द्विर्वचन,
कुतस् कुतस् अण्—'तत आगतः' अर्थ में अण्, आदिवृद्धि,
कौतस् कुत् अ—'अव्ययानां भमात्रे०' से टिलोप,
कौतः कुत—विसर्जनीय, सकार,
कौतस्कुतः—प्रातिपदिक संज्ञा, सु।

(3) भ्रातुष्पुत्रः
भ्रातुस् पुत्र—समास, 'ऋतो विद्यायोनि०' से अलुक्,
भ्रातुष् पुत्र—विसर्जनीय, षकार, सु।

(4) शुनस्कर्णः
शुनस् कर्ण—संज्ञा अर्थ में 'षष्ठ्या आक्रोशे' से अलुक्,
शुनः कर्ण—विसर्जनीय, सकार, सु।

(5) सद्यस्कालः
पूर्ववत् सकार।

(6) सद्यस्क्रीः (पूर्ववत्)।
सम्पदादि होने से क्री धातु से क्विप् प्रत्यय होता है।

(7) साद्यस्क्रः
सद्यस्क्री—'तत्र भवः' अर्थ में प्रत्यय हुआ।

(8) कांस्कान्
'कानाम्रेडिते' से यहाँ रुत्व होता है।

(9) सर्पिष्कुण्डिका। (10) धनुष्कपालम्। (11) बर्हिष्पूलम्। (12) यजुष्पात्रम्—इन शब्दों का पाठ है, ताकि उत्तर पदस्थ विसर्जनीय के स्थान पर भी सकार हो जाय।

(13) परमसर्पिःफलम्
यह प्रत्युदाहरण है। सकार नहीं हुआ।

भाष्य तथा वृत्ति में 'नित्यं समासेऽनुत्तर०' इसका प्रत्युदाहरण 'परमसर्पिःकुण्डिका' दिखाया है।

(14) अयस्काण्डः। (15) मेदस्पिण्डः।
कस्कादि गण के आकृतिगण होने से यहाँ सकार होता है।

(3845) छन्दसि वाऽप्राम्रेडितयोः *49*
(3634)

छन्दसि विषये विसर्जनीयस्य वा सकारादेशो भवति कुप्वोः परतः, प्रशब्दमाम्रेडितं च वर्जयित्वा। अयःपात्रम्, अयस्पात्रम्। विश्वतः पात्रम्, विश्वतस्पात्रम्। उरुणःकारः, उरुणस्कारः। अप्राम्रेडितयोरिति किम्? 'अग्निः प्रविद्वान्' (अथ० 5.26.1)। 'पुरुषः पुरुषस्परि' (मै० 2.7.15.214)। 'सूर्यरश्मिर्हरिकेशः पुरस्तात्' (ऋ० 10.139.1)। 'स नः पावकः'–(ऋ० 1.12.10) इत्येवमादिषु 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (पु०प०) इति सत्वं न भवति।

अर्थ—वेद के विषय में विसर्जनीय के स्थान पर सकार आदेश विकल्प से होता है, कवर्ग तथा पवर्ग परे रहते; परन्तु 'प्र' शब्द तथा आम्रेडित संज्ञक शब्द के परे रहते नहीं होता है।

उदा० (1) अयस्पात्रम्
सकार हुआ।

(2) अयः पात्रम्
पक्ष में सकार नहीं हुआ।

(3) विश्वतस्पात्रम्
सकार आदेश।

(4) विश्वतः पात्रम्
सकार अभाव।

(5) उरुणस्कारः
सकार हुआ।

(6) उरुणः सकारः
सकार नहीं हुआ।

अप्राम्रे०—'प्र' शब्द तथा आम्रेडितसंज्ञक के परे रहते सकार नहीं होता है।

(7) अग्निः प्रविद्वान्
सकार नहीं हुआ।

(8) पुरुषः पुरुषः परि
द्वितीय 'पुरुष' शब्द की 'तस्य परमाम्रेडितम्' से आम्रेडित संज्ञा हुई, इसके परे रहते सकार नहीं हुआ।

सूर्य०—'सर्वे विधयश्छन्दसि विकल्प्यन्ते' से निम्नलिखित स्थलों पर सकार नहीं होता है।

सूर्यरश्मिहरिकेशः पुरस्तात्। स नः पावकः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3846) कः करत्करतिकृधिकृतेष्वनदितेः *50* (3635)

कः, करत्, करति, कृधि, कृत-इत्येतेषु परतः अनदितेर्विसर्जनीयस्य सकारादेशो भवति छन्दसि विषये। कः-विश्वतस्कः। करत्-विश्वतस्करत्। करति-पयस्करति। कृधि-'उरुणस्कृधि' (ऋ० 8.75.11)। कृत-सदस्कृतम्। अनदितेरिति किम्? 'यथा नो अदितिः करत्' (ऋ० 1.43.2)।

अर्थ—वेद में यदि अदिति शब्द का विसर्जनीय न हो तो उसके स्थान पर सकार आदेश होता है, कः, करत्, करति, कृधि तथा कृत शब्दों के परे रहते।

उदा० (1) विश्वतस्कः
विश्वतस् क—विसर्जनीय, सकार।

(2) विश्वतस्करत्
विश्वतः करत्—विसर्जनीय।

(3) पयस्कारः
पयः कारः—पूर्ववत्।

(4) उरुणस्कृधि
उरुणः कृधि—विसर्जनीय।

(5) सदस्कृतम्
सदः कृतम्—पूर्ववत्।

अनदिते०—अदिति शब्द के विसर्जनीय को सकार नहीं होता है।

(6) अदितिःकरत्
विसर्जनीय नहीं हुआ।

(3847) पञ्चम्याः परावध्यर्थे *51* (3636)

'छन्दसि' इत्येव। पञ्चमीविसर्जनीयस्य सकारादेशो भवति परौ परतः अध्यर्थे। 'दिवस्परि प्रथमं जज्ञे' (ऋ० 10.45.1)। 'अग्निर्हिमवतस्परि' (अथ० 4.9.9)। 'दिवस्परि' (ऋ० 1.121.10)। महस्परि। पञ्चम्या इति किम्? 'अहिरिव भोगैः पर्येति बाहुम्' (ऋ० 6.75.14)। पराविति किम्? 'एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत्।' अध्यर्थ इति किम्? 'दिवः स्पृथिव्याः पर्योज उद्भृतम्' (ऋ० 6.47.27)। अत्र परिः सर्वतोभावे, अध्यर्थः उपरिभावः।

अर्थ—वेद के विषय में 'अधि' के अर्थ में वर्त्तमान जो 'परि' शब्द, उसके परे रहते पञ्चमी के विसर्ग को सकार होता है।

उदा० (1) दिवस्परि (ऋ० 10.45.1)
दिवः परि—'दिवः' पञ्चम्यन्त पद है। 'परि' अधि के अर्थ में है। सकार हो गया है।

(2) हिमवतस्परि (अथ० 4.9.9)
पूर्ववत्।

पञ्चम्या०—पञ्चमी के विसर्ग को ही सकार होता है।

(3) भोगैः पर्येति (ऋ० 6.75.14)
यहाँ विसर्ग को सकार नहीं हुआ।

पराविति० परि शब्द परे रहते सकार होता है।

(4) एभ्यो वा एतल्लोकेभ्यः प्रजापतिः समैरयत्
यहाँ नहीं हुआ।

अध्यर्थे—अधि अर्थ में जो 'परि' शब्द, उसके परे रहते सकार होता है।

(5) दिवः पृथिव्याः पर्योज (ऋ० 6.47.27)
'पृथिव्याः' पञ्चम्यन्त है। इससे परे 'परि' शब्द है। परन्तु 'परि' शब्द सर्वतोभाव अर्थ में है। विसर्जनीय को सकार नहीं हुआ।

(3848) पातौ च बहुलम् *52* (3637)

पातौ च धातौ परतः पञ्चमीविसर्जनीयस्य बहुलं सकार आदेशो भवति छन्दसि विषये। 'दिवस्पातु' (ऋ० 10.158.1)। राज्ञस्पातु। न च भवति-परिषदः पातुः।

अर्थ—वेद के विषय में संहिता में 'पा' धातु के परे रहते पञ्चमी के विसर्ग को बहुलता से सकार होता है।

उदा० (1) दिवस्पातु
सकार हुआ।

(2) राज्ञस्पातु
सकार हुआ।

(3) परिषदः पातु
सकार नहीं हुआ।

(3849) षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु *53* (3638)

षष्ठीविसर्जनीयस्य सकारादेशो भवति पति, पुत्र, पृष्ठ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पार, पद, पयस्, पोष-इत्येतेषु परतः छन्दसि विषये। 'वाचस्पतिं विश्वकर्माणमूतये' (ऋ० 10.81.7)। 'पुत्र-दिवस्पुत्राय सूर्याय' (ऋ० 10.37.1)। पृष्ठ-दिवस्पृष्ठे धावमानं सुपर्णम् (अथ० 13.2.37)। पार-'अगन्म तमसस्पारम्' (वा०सं० 12.73)। पद-इलस्पदे समिध्यसे (ऋ० 10.191.1)। पयस्-'सूर्यं चक्षुर्दिवस्पयः'। पोष-'रायस्पोषं यजमानेषु धत्तम्' (ऋ० 10.122.8)। षष्ठ्या इति किम्? मनुः पुत्रेभ्यो दायं व्यभजत्।

अर्थ—वेद के विषय में पति, पुत्र, पृष्ठ, पार, पद, पयस् और पोष शब्दों के परे रहते षष्ठी के विसर्ग को सकार होता है।

उदा० (1) वाचस्पतिम् (ऋ० 10.81.7)
सकार हुआ।

(2) दिवस्पुत्राय (ऋ० 10.37.1)
दिवः पुत्राय।

(3) दिवस्पृष्ठे (शौ०सं० 13.2.37)
दिवः पृष्ठे।

(4) तलसस्पारम् (भा०सं० 12.73)
तलसः पारम्।

(5) इडस्पदे (ऋ० 10.191.1)
इडः पदे।

(6) दिवस्पयः
दिवः पयः।

(7) रायस्पोषम् (ऋ० 8.59.7)
रायः पोषम्।

षष्ठी के विसर्ग को ही सकार होता है।
मनुः पुत्रेभ्यः—सकार नहीं हुआ।

(3850) इडाया वा *54* (3639)

इडायाः षष्ठीविसर्जनीयस्य वा सकार आदेशो भवति पत्यादिषु परतश्छन्दसि विषये। इडायास्पतिः, इडायाः पति। 'इडायास्पुत्रः' (ऋ० 3.29.3), इडायाः पुत्रः। इडायास्पृष्ठम्, इडायाः पृष्ठम्। इडायास्पारम्, इडायाः पारम्। 'इडायास्पदम्' (वा०सं० 4.22), इडायाः पदम् (तै०सं० 1.2.51)। इडायास्पयः, इडायाः पयः। इडायास्पोषम्, इडायाः पोषम्।

अर्थ—वेद के विषय में पति, पुत्र, पृष्ठ, पार, पद, पयस् और पोष शब्द परे रहते 'इडा' के षष्ठी विभक्ति के विसर्ग को विकल्प से सकार होता है।

उदा० (1) इडायास्पतिः
सकार हुआ।

(2) इडायाः पतिः
पक्ष में सकार अभाव।

(3) इडायास्पुत्रः
सकार।

(4) इडायास्पुत्रः
सकार अभाव।

(5) इडायास्पृष्ठम्
सकार आदेश।

(6) इडायाः पृष्ठम्
सकार आदेश अभाव।

(7) इडायास्पारम्
सकार आदेश।

(8) इडायाः पारम्
सकार अभाव।

(9) इडायास्पदम्
सकार हुआ।

(10) इडायाः पदम्
सकार अभाव।

(11) इडायास्पदः
सकार हुआ।

(12) इडायाः पदः
सकार अभाव।

(13) इडायास्पोषम्
सकार आदेश।

(14) इडायाः पोषम्
सकार अभाव।

(3851) अपदान्तस्य मूर्धन्यः *55* (210)

पदाधिकारो निवृत्तः। 'अपदान्तस्य' इति, 'मूर्धन्यः' इति चैतदधिकृतं वेदितव्यमापादपरिसमाप्तेः। वक्ष्यति-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

'आदेशप्रत्यययोः' (8.3.59)। सिषेव। सुष्वाप। अग्निषु। वायुषु। अपदान्तस्येति किम्? अग्निस्तत्र, वायुस्तत्र। 'ष' इत्येव सिद्धे मूर्धन्यग्रहणं ढकारार्थम्-अकृढ्वम्, चकृढ्वे।

अर्थ—पदाधिकार की निवृत्ति हो गई है। जो पदान्त में नहीं है, उसके स्थान पर मूर्धन्य आदेश होता है—यह अधिकार जानना चाहिए। यह अधिकार पाद की समाप्ति (पा० 8.3.119) पर्यन्त चलता है। आगे कहा जायेगा—आदेशप्रत्यययोः।

उदा० (1) सिषेव
सेव् णल्—लिट्, तिप्, णल् आदेश,
से सेव् अ—द्वित्व, हलादिः शेषः,
सि सेव् अ—ह्रस्वः, मूर्धन्य हुआ।

(2) सुष्वाप
ष्वप् → स्वप्,
स्वप् णल्—द्वित्व,
सु स्वाप् अ—सम्प्रसारण, अत उपधायाः,
सु ष्वाप् अ—मूर्धन्य आदेश।

(3) अग्निषु
अग्नि सुप्—मूर्धन्य।

(4) वायुषु (पूर्ववत्)।

अपदान्त०—जो पदान्त में नहीं है, उसे मूर्धन्य आदेश होता है।

(5) अग्निस्तत्र
पदान्त में विसर्जनीय है। इसके सकार को मूर्धन्य नहीं हुआ।

(6) वायुस्तत्र (पूर्ववत्)।

ष इत्ये०—'षः' के द्वारा ही सिद्ध होने पर भी 'मूर्धन्य' का ग्रहण उत्तर शास्त्र के लिए है। यथा—

अकृढ्वम्, चकृढ्वे।

(3852) सहेः साडः सः *56* (335)

सहेर्धातोः साड्रूपस्य यः सकारस्तस्य मूर्धन्य आदेशो भवति। जलाषाट्। तुराषाट्। पृतनाषाट्। सहेरिति किम्? सह डेन वर्तते सडः, तस्यापत्यं साडिः। साड्ग्रहणं किम्? यत्रास्यैतद्रूपं तत्र यथा स्यात्, इ मा भूत्-जलासाहम्। तुरासाहम्। स इति किम्? आकारस्य मा भूत्।

अर्थ—सह् धातु का जो साड्रूप, उसके सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) जलाषाट्
जलं सहते—भजो ण्विः, छन्दसि सहः,
जल सह् ण्वि—चुटू, उपदेशेऽजनु०, अपृक्त एकाल्०, वेरपृक्तस्य,
जल साह्—'अत उपधायाः' से उपधावृद्धि,
जलासाड्—'अन्येषामपि दृश्यते' से दीर्घ, सु, हल्ङ्याब्भ्यो०, पदसंज्ञा, हो ढः, झलां जशोऽन्ते,
जलाषाट्—मूर्धन्य, वाऽवसाने।

(2) तुराषाट्
तुर सह् ण्वि—पूर्ववत् सर्वापहार लोप,
तुराषाढ्—सभी कार्य पूर्ववत्।

(3) पृतनाषाट्
पृतना सह्—पूर्ववत् मूर्धन्य आदि।

सहेरि०—सह् धातु का जो साड् रूप, उसके सकार को मूर्धन्य आदेश होता है।

(4) साडिः
सह डेन वर्त्तते—समास, प्रातिपदिक संज्ञा,
सड सु—विसर्जनीय।
सडस्याऽपत्यम्—तस्याऽपत्यम्, 'अत इञ्' से 'इञ्' प्रत्यय,
सड इञ्—हलन्त्यम्, आदिवृद्धि,
साडि सु—'साड्' यह साड्रूप है; परन्तु सह धातु का नहीं है, अतः इसके सकार को मूर्धन्य नहीं होता है।

साड् ग्र०—सह् धातु का जो साड् रूप, उसके सकार को षकार होता है। जहाँ पर इस धातु का 'साड्' ऐसा रूप होता है, वहाँ पर ही मूर्धन्य आदेश होता है। अतः निम्नलिखित में मूर्धन्य नहीं होता है—

(5) जलासाहम्
जल सह्—पूर्ववत् ण्वि, सर्वापहार लोप,
जलासाह्—पूर्व पद का दीर्घत्व, 'अत उपधायाः' से उपधा-वृद्धि,
जलासाह् अम्—प्रातिपदिक संज्ञा, 'साड्' यह सह् धातु का है, परन्तु 'साड्' रूप नहीं है। अतः इसके सकार को षकार नहीं होता है।

(6) तुरासाहम्
पूर्ववत् षकार नहीं हुआ है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स इति०—सकार के स्थान पर मूर्धन्यादेश होता है, ताकि 'साड्' के आकार के स्थान पर मूर्धन्य न हो।

(3853) इण्कोः *57* (335)

'इण्कोः' इत्येतदधिकृतं वेदितव्यम्। इत उत्तरं यद्वक्ष्यामः, इणः कवर्गाच्चेत्येवं तद्वेदितव्यम्। वक्ष्यति-'आदेशप्रत्यययोः' (8.3.59)। सिषेव। सुष्वाप। अग्निषु। वायुषु। कर्तृषु। गीर्षु। धूर्षु। वाक्षु। त्वक्षु। इण्कोरिति किम्? दास्यति। असौ।

अर्थ—'इण्कोः' इस पद का अधिकार जानना चाहिए। इससे आगे जो भी कहा जायेगा वह इण् वर्ण से उत्तर तथा कवर्ग से उत्तर होता है—ऐसा जानना चाहिए। आगे कहा जायेगा—आदेशप्रत्यययोः।

उदा० (1) सिषेव। (2) सुष्वाप। (3) अग्निषु। (4) वायुषु। (5) कर्तृषु।

इनकी सिद्धि पा० 8.3.59 पर देखें।

(6) गीर्षु

गिर् सुप्—दीर्घ, इण् वर्ण (रेफ) से उत्तर प्रत्यय के सकार को मूर्धन्य आदेश हुआ।

(7) धूर्षु

धुर् सुप्—पूर्ववत्।

(8) वाक्षु

वाच् सुप्—हलन्त्यम्,
वाक् सु—चोः कुः,
वाक् षु—मूर्धन्य।

(9) त्वक्षु

त्वच् सुप्—पूर्ववत्।

इण्को०—इण् वर्ण तथा कवर्ग से उत्तर (आदेश तथा प्रत्यय के) सकार को मूर्धन्य आदेश होता है।

(10) दास्यति

दा ति—ऌट् शेषे च,
दा स्यति—स्यतासी ऌलुटोः, 'स्य' प्रत्यय है, यह आकार से उत्तर है जो इण् वर्ण नहीं है। अतः सकार को षकार नहीं हुआ।

(11) असौ

अदस् सु—'अदस औ सुलोपश्च' से प्रत्यय (सु) का लोप तथा आकार अन्तादेश, 'तदोः सः साव०' से सकार, अस औ—'स' आदेशस्वरूप है, यह आकार से उत्तर है, जो इण् वर्ण नहीं है। मूर्धन्य नहीं हुआ।

(3854) नुम्विसर्जनीयशर्व्यवायेऽपि *58* (434)

नुम्व्यवायेऽपि, विसर्जनीयव्यवायेऽपि, शर्व्यवायेऽपि इण्कोरुत्तरस्य सकारस्य मूर्धन्यादेशो भवति। व्यवायशब्दः प्रत्येकमभिसम्बद्ध्यते। नुम्व्यवाये तावत्-सर्पींषि, यजूंषि, हवींषि। विसर्जनीयव्यवाये-सर्पिःषु, यजुःषु, हविःषु। शर्व्यवाये-सर्पिष्षु, यजुष्षु, हविष्षु। नुमादिभिः प्रत्येकं व्यवाये षत्वमिष्यते, न समस्तैः। तेनेह न भवति-निंस्से, निंस्स्व इति। 'णिसि चुम्बने' (धा०पा० 1026)-इत्येतस्यैतद्रूपम्। अत्र हि नुमा, सकारेण, शरा च व्यवधानम्।

अर्थ—नुम् का व्यवधान होने पर भी, विसर्जनीय का व्यवधान होने पर भी तथा शर् वर्ण का व्यवधान होने पर भी इण् तथा कवर्ग से उत्तर सकार को मूर्धन्य आदेश होता है। 'व्यवाय' शब्द का प्रत्येक के साथ सम्बन्ध है।

उदा० (क) नुम्व्यवाये—

(1) सर्पींषि

सर्पिस् जस्—जश्शसोः शि, शि सर्वनामस्थानम्,
सर्पिस् इ—लशक्वतद्धिते,
सर्पिन् स् इ—'नपुंसकस्य झलचः' से 'नुम्', 'सान्तमहतः' से दीर्घ,
सर्पीन् स् इ—'नश्चाऽपदान्तस्य झलि' से अनुस्वार, इण् वर्ण (ईकार) से उत्तर सकार को नुम् स्थानिक अनुस्वार का व्यवधान होने पर भी मूर्धन्य आदेश हो गया।

(2) हवींषि

हविस् शि—पूर्ववत् नुम्,
हवीन् स् इ—नुम्, दीर्घ, अनुस्वार,
हवींषि—षकार।

(3) यजूंषि

यजुस् जस्—सभी कार्य पूर्ववत्।

(ख) विसर्जनीयव्यवाये—

(4) सर्पिःषु

सर्पिस् सुप्—हलन्त्यम्, ससजुषो रुः, खरवसान०,
सर्पिर् सु—वा शरि,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्पिः सु—विसर्जनीय का व्यवधान होने पर भी मूर्धन्य आदेश हुआ।

(5) हविःषु
हविस् सुप्—पूर्ववत्।

(6) यजुःषु
यजुस् सुप्—पूर्ववत्।

(ग) शर्व्यवाये—

(7) सर्पिष्षु
सर्पिस् सुप्—पूर्ववत् 'वा शरि' से विकल्प से विसर्जनीय,
सर्पिस् षु—विसर्जनीय अभाव पक्ष में, मूर्धन्य, ष्टुत्व।

(8) हविष्षु
हविस् सुप्—पूर्ववत्।

(9) यजुष्षु (पूर्ववत्)।

नुमादि०—द्ध सूत्रपठित नुम् आदि का प्रत्येक का व्यवधान होने पर ही सकार को मूर्धन्य आदेश होता है। अनेक का व्यवधान होने पर मूर्धन्य आदेश नहीं होता। अतः निम्नलिखित में नहीं होता है—

(10) निंस्से
णिसि → निस्—'णो नः' से नकार, इकार की इत्संज्ञा,
नि न् स्—इदितो नुम् धातोः,
निंस् थास्—नश्चाऽपदा०, थासः से,
निंस् से—'से' आदेश है, यह इण् वर्ण (इकार) से उत्तर है, परन्तु नुम् (अनुस्वार) तथा शर् (सकार)—इन दो वर्णों का व्यवधान होने से सकार को षकार नहीं हुआ।

(11) निंस्स्व
णिसि → निंस्—पूर्ववत्,
निंस् स्व—टित आत्मनेपदा०, सवाभ्यां वाऽमौ, पूर्ववत् मूर्धन्य आदेश का अभाव।

(3855) आदेशप्रत्यययोः *59* (221)

'मूर्धन्यः' इति वर्तते, 'स' इति च। 'आदेशप्रत्यययोः' इति षष्ठी भेदेन सम्बद्ध्यते। आदेशो यः सकारः, प्रत्ययस्य च यः सकारः इण्कोरुत्तरः, तस्य मूर्धन्यो भवति आदेशः। आदेशस्य तावत्-सिषेव। सुष्वाप। प्रत्ययस्य-अग्निषु। वायुषु। कर्तृषु। हर्तृषु। इन्द्रो मा वक्षत्, देवान्यंक्षदिति (अथ० 3.4.6) व्यपदेशिवद्भावात् प्रत्ययस्येति षत्वं भवति। यजतेर्वहतेश्च पञ्चमलकारे परस्मैपदप्रथमैकवचने इकारलोपः, 'लेटोऽडाटौ' (3.4.94) इत्यट् 'सिब्बहुलं लेटि' इति सिप्, ततः सिद्धम्—यक्षत्, वक्षत् इति।

अर्थ—मूर्धन्यः, सः—इन पदों का अनुवर्त्तन है। 'आदेश-प्रत्यययोः' पद में भेद से षष्ठी का सम्बन्ध है। इण् वर्ण तथा कवर्ग से उत्तर आदेश का जो सकार तथा प्रत्यय का जो सकार, उसके स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) सिषेव
षिव् → सिव्—'धात्वादेः षः सः' से सकार आदेश,
सिव् णल्—लिट्, तिप्, परस्मैपदानां णलतुसु०,
सि सिव् अ—अनुबन्धलोप, द्वित्व, हलादिः शेषः,
सि षेव् अ—लघूपधगुण, इण् से पर आदेश।

(2) सुष्वाप
ष्वप् → स्वप्—'धात्वादेः षः सः' से सकार आदेश,
स्वाप् अ—अत उपधायाः,
सु स्वाप् अ—सम्प्रसारण, मूर्धन्य आदेश।

(3) अग्निषु
अग्नि सुप्—हलन्त्यम्,
अग्नि सु—इण् वर्ण से उत्तर प्रत्यय 'सुप्' का सकार है, इसे मूर्धन्य आदेश हो गया।

(4) वायुषु
वायु सुप्—सप्तमी बहुवचन,
वायुषु—अनुबन्ध लोप, पूर्ववत् मूर्धन्य आदेश।

(5) कर्तृषु
कर्तृ सुप्—इण् वर्ण (ऋकार) से उत्तर सुप् प्रत्यय का सकार है, इस सकार को मूर्धन्य आदेश हुआ।

(6) हर्तृषु
हर्तृ सुप्—पूर्ववत्।

इन्द्रो०—वक्षत् तथा यक्षत्—इन स्थलों पर व्यपदेशिवद् भाव से प्रत्यय के सकार को षकार होता है। ये रूप क्रमशः वह् तथा यज् धातुओं से लट् लकार प्रथम पुरुष एकवचन में बनते हैं। 'इतश्च' से इकारलोप, 'लेटोऽडाटौ' से अट् आगम तथा 'सिब्बहुलं लेटि' से 'सिप्' होता है। यथा—

(7) वक्षत्
वह् स् अट् त्—तिप्, इकारलोप, अट्, सिप्,
वढ् स त्—'हो ढः' से ढकार,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वक् ष त्—'षढोः कः सि' से ककार, प्रत्यय 'सिप्' के सकार को मूर्धन्य आदेश हुआ।

(8) यक्षत्
यज् स् अ त्—सभी पूर्ववत्,
यक् स् अ त्—चोः कुः, खरि च, मूर्धन्य आदेश।

(3856) शासिवसिघसीनां च *60* (2410)

शासि, वसि, घसि-इत्येतेषां च इण्कोरुत्तरस्य सकारस्य मूर्धन्यो भवति। अन्वशिषत्, अन्वशिषताम्, अन्वशिषन्। शिष्टः, शिष्टवान्। वसि-उषितः, उषितवान्। उषित्वा। घसि-जक्षतुः, जक्षुः। 'घसिभसोः' (6.4.100) इत्युपधालोपः। 'अक्षन् पितरोऽमीमदन्त पितरः' (वा०सं० 19.36)। अनादेशार्थं वचनम्। घसिर्यद्यप्यादेशः, सकार-स्त्वादेशो न भवति। 'इण्कोः' इत्येव-शास्ति। वसति। जघास।

अर्थ—इण् तथा कवर्ग से उत्तर शास्, वस् तथा घस् के सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) अन्वशिषत्
शास् त्—लुङ्, इतश्च,
शास् अङ् त्—च्लि लुङि, 'सर्तिशास्त्यर्ति०' से 'अङ्',
शिस् अत्—'शास इदङ्हलोः' से इत्त्व,
अनु अ शिषत्—मूर्धन्य आदेश, अट्, यण्।

(2) अन्वशिषताम्
शास् अ ताम्—तस् को 'ताम्' आदेश,
शिस् अ ताम्—इत्त्व, मूर्धन्य आदेश,
अनु अ शिष् अ ताम्—अट्, यण्।

(3) अन्वशिषन्
शास् अ झि—पूर्ववत् अङ्, झोऽन्तः, इतश्च, संयोगान्त लोप,
अनु अ शिषन्—इत्त्व, मूर्धन्य आदेश, अट् आदि।

(4) शिष्टः
शास् त—क्त, लशक्वतद्धिते,
शिस् त—इत्त्व,
शिष् त—मूर्धन्य आदेश, ष्टुना ष्टुः, सु।

(5) शिष्टवान्
शास् क्तवतु—पूर्ववत्।

(6) उषितः
वस् क्त—'वचिस्वपियजादी०' से सम्प्रसारण,
उस् त—इट्,
उष् इत सु—मूर्धन्य आदेश, विभक्तिकार्य।

(7) उषितवान्
वस् क्तवतु—पूर्ववत्।

(8) उषित्वा
वस् क्त्वा—लशक्वत०, सम्प्रसारण,
उस् इट् त्वा—इट्,
उष् इ त्वा—मूर्धन्य आदेश।

(9) जक्षतुः
अद् → घस् अतुस्—लिट्, लिट्यन्यतर०, तस्, 'अतुस्' आदेश, 'गमहन०' से उपधालोप,
जघ् स् अतुस्—द्वित्व, द्विर्वचनेऽचि, कुहोश्चुः, अभ्यासे चर्च,
ज क् ष् अतुस्—खरि च, मूर्धन्य आदेश।

(10) जक्षुः
घस् झि—पूर्ववत् द्वित्व, मूर्धन्य आदेश।

(11) अक्षन्
अद् लुङ्—'बहुलं छन्दसि' से 'घस्' आदेश,
घस् झि—झोऽन्तः, इतश्च,
घस् अन्—संयोगान्तस्य लोपः,
घस् च्लि अन्—'मन्त्रे घसह्वर०' से 'च्लि' का लुक्,
घ् स् अन्—'घसिभसोर्हलि' से उपधालोप,
क् स् अन्—खरि च, मूर्धन्य आदेश, अट्।

अनादे०—आदेशभिन्न स्थल के लिए यह विधान है। यद्यपि 'घस्' आदेश है, तथापि सकार आदेश नहीं है।

इण्को०—इण् तथा कवर्ग से उत्तर सकार को ही मूर्धन्य आदेश होता है।

(12) शास्ति
शास् ति—लट्, शप्, शप् का लुक्,
शास्ति—शास् का सकार है जो इण् से उत्तर नहीं है; अतः मूर्धन्य आदेश नहीं हुआ।

(13) वसति
वस् शप् ति—पूर्ववत् मूर्धन्य आदेश अभाव।

(14) जघास
घस् णल्—लिट्, णल् आदेश,
ज घास् अ—अत उपधायाः, द्वित्व, अभ्यासकार्य, पूर्ववत् मूर्धन्य आदेश का अभाव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3857) स्तौतिण्योरेव षण्यभ्यासात् *61* (2627)

स्तौतेर्ण्यन्तानां च षभूते सनि परतः अभ्यासादिण उत्तरस्य आदेशसकारस्य मूर्धन्यादेशो भवति। तुष्टूषति। ण्यन्तानाम्-सिषेवयिषति। सिषञ्जयिषति। सुष्वापयिषति। 'सिद्धे सत्यारम्भो नियमार्थः' (का०प०)-स्तौतिण्योरेव षण्यभ्यासाद्यथा स्यात्, अन्यस्य मा भूत्-सिसिक्षति। सुसूषति। एवकारकरणमिष्टतोऽवधारणार्थम्। स्तौतिण्योः षण्येव-इति हि विज्ञायमाने तुष्टावेत्यत्र न स्यात्। इह च स्यादेव-सिसिक्षतीति। षणीति किम्? अन्यत्र नियमो मा भूत्-सिषेच। को विनतेऽनुरोधः? अविनते नियमो मा भूत्-सुषुप्सति। तिष्ठासति। कः सानुबन्धेऽनुरोधेः? षशब्दमात्रे नियमो मा भूत्-सुषुपिष इन्द्रम्। अभ्यासादिति किम्? अभ्यासाद् या प्राप्तिस्तस्या नियमो यथा स्यात्, धातोर्या प्राप्तिस्तस्या नियमो मा भूत्-प्रतीषिषति। अधीषिषति।

अर्थ—षकारभूत 'सन्' प्रत्यय के परे रहते स्तु धातु के तथा ण्यन्त धातु के अभ्यास में जो इण् वर्ण तथा कवर्ग, उनसे उत्तर सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) तुष्टूषति

ष्टु → स्तु—'धात्वादेः षः सः' से षकार के स्थान पर सकार आदेश, निमित्त (षकार) के हट जाने पर नैमित्तिक (टकार) की भी निवृत्ति हो गई,

स्तु सन्—'इको झल्' से 'सन्' किद्वत् हुआ, 'अज्झनगमां०' से दीर्घ आदेश,

स्तू सन्—'सन्यङोः' से द्वित्व,

तु स्तू ष—शर्पूर्वाः खयः, षत्व, इण् (उकार) से उत्तर सकार है, इस स्थान पर मूर्धन्य आदेश हुआ,

तुष् तू ष—ष्टुना ष्टु, धातुसंज्ञा,

तुष्टूष शप् ति—अतो गुणे।

(2) सिषेवयिषति

सेव् णिच्—अनुबन्धलोप,

सेवि इ सन्—धातोः कर्मणः समा०, इट्, षत्व,

सि सेवयि ष—सन्यङोः, गुण, अय् आदेश, 'णौ कृतं स्थानिवद् भवति' से रूपातिदेश, ह्रस्वः,

सिषेवयिष—अभ्यास में इण् (इकार), इससे उत्तर सकार को षकार, सनाद्यन्ता धातवः,

सिषेवयिष शप् ति—शप्, अतो गुणे।

(3) सिषञ्जयिषति

सञ्ज् णिच् सन्—पूर्ववत्, इट् आदि,

स सञ्ज् इ इ सन्—द्वित्व, रूपातिदेश, हलादिः शेषः,

सिसञ्जयिष—सन्यतः, आदेशप्रत्यययोः, सनाद्यन्ता धातवः,

सिषञ्जयिष—पूर्ववत् सकार को मूर्धन्य आदेश,

सिषञ्जयिष शप् तिप्—पूर्ववत्।

(4) सुष्वापयिषति

ष्वप् → स्वप्—धात्वादेः षः सः,

स्वप् णिच्—अत उपधायाः, सन्, इट्, गुण, अय्,

स्वापयि सन्—आदेशप्रत्यययोः,

स्वप् स्वापयिष—द्वित्व, रूपातिदेश,

सुस्वापयिष—'द्युतिस्वाप्योः०' से अभ्यास को सम्प्रसारण,

सुष्वापयिष शप् तिप्—सकार को षकार, अतो गुणे।

सिद्धे०—प्रकृत सूत्र के द्वारा कहा गया मूर्धन्य आदेश सिद्ध ही है। तब यह नियम के लिए विधान है। स्तु धातु के तथा ण्यन्त धातु के सकार को ही मूर्धन्य आदेश होता है, यदि वह अभ्यास के इण् तथा कवर्ग से उत्तर हो। इस प्रकार अन्य सकार को मूर्धन्य नहीं होता है।

(5) सिसिक्षति

सिच् सन्—'हलन्ताच्च' से सन् किद्वत्, लघूपधगुण, गुण का निषेध,

सि सिच् स—द्वित्व, हलादिः शेषः,

सि सिक् स—चोः कुः, अभ्यास के इण् वर्ण (इकार) से उत्तर सकार को मूर्धन्य आदेश नहीं हुआ,

सिसिक्ष—आदेशप्रत्यययोः, धातुसंज्ञा,

सि सिक्ष शप् ति—अतो गुणे।

(6) सुषूषते

षूङ् → सू—धात्वादेः षः सः, हलन्त्यम्,

सू सन्—सन्यङोः,

सु सूस—ह्रस्वः, आदेशप्रत्यययोः, धातुसंज्ञा, पूर्ववत् सनः,

सुसूष शप् त—टित आत्मनेपदानां०।

एवकार०—इष्ट के अवधारण के लिए 'एव' का ग्रहण है। 'स्तु' धातु के तथा ण्यन्त धातु के सकार को षकारभूत सन् के परे रहते ही मूर्धन्य आदेश होता है। ऐसा विज्ञायमान होने पर 'तुष्टाव' इस स्थल पर मूर्धन्य आदेश न हो तथा 'सिसिक्षति' में यह प्राप्त हो जायेगा।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षणीति०—षकारभूत सन् के परे रहते ही सकार को मूर्धन्य आदेश होता है, ताकि अन्यत्र नियम न हो।

(7) सिषेच
षिच् णल्—सकार, लिट्, णल् आदेश,
सि सिच् अ—द्वित्व, हलादिः शेषः, लघूपधगुण,
सिसेच—मूर्धन्य आदेश।

को०—विनत परे रहते अनुरोध क्या है ? विनत पूर्व आचार्यों की संज्ञा है, जो षत्व तथा णत्व के लिए प्रयुक्त होती थी। 'विनत' में यह प्रयोजन है कि निम्नलिखित में यह नियम न हो। यथा—

(8) सुषुप्सति
स्वप् सन्—'हलन्ताच्च' से किद्वत्,
सुप् स—सम्प्रसारण,
सु सुप् स—द्वित्व, हलादिः शेषः,
सु षुप् स—मूर्धन्य आदेश, धातुसंज्ञा, शप् आदि।

(9) तिष्ठासति
ष्ठा → स्था—धात्वादेः षः सः,
स्था स्था सन्—सन्यङोः, शर्पूर्वाः खयः,
त स्था स—ह्रस्वः,
ति स्था स—सन्यतः, मूर्धन्य आदेश,
ति ष् था स—ष्टुना ष्टुः, धातुसंज्ञा,
तिष्ठास शप् ति—अतो गुणे।

कः सा०—अनुबन्धसहित में क्या प्रयोजन है ? इसका प्रयोजन यह है कि षशब्दमात्र में ही नियम न हो।

(10) सुषुपिष इन्द्रम्
स्वप् लिट्—व्यत्यय से आत्मनेपद,
स्वप् थास्—थासः से,
स्वप् इट् से—आर्धधातुकस्येड् वलादेः 'एकाच उपदेशेऽनु०' से निषेध, क्रादि नियम से इट्, असंयोगाल्लिट्० से लिट् प्रत्यय किद्वत्,
सुप् इ से—वचिस्वपियजा० से सम्प्रसारण,
सु सुप् इ से—द्वित्व, हलादिः शेषः,
सु षु पिसे—मूर्धन्य आदेश,
सुषुपिषे—आदेशप्रत्यययोः,
सुषुपिषय् इन्द्रम्—अय्, लोपः शाकल्यस्य।

यहाँ निरनुबन्धक में नियम का अभाव होने से अभ्यास से उत्तर सकार को मूर्धन्य होता ही है।

अभ्यासा०—अभ्यास में स्थित जो इण् वर्ण तथा कवर्ग, उससे उत्तर सकार को मूर्धन्य आदेश होता है। अभ्यास से उत्तर जो प्राप्ति होती है, ताकि उसको नियम हो जाय तथा धातु से जो प्राप्ति हो, उसको नियम न हो।

(11) प्रतीषिषति
प्रति इण् सन्—सन्यङोः,
प्रति षिष—द्वित्व, अजादेर्द्वितीयस्य, धातुसंज्ञा।

(12) अधीषिषति
अधि इक् सन्—पूर्ववत् द्वितीय एकाच् को द्वित्व आदि कार्य होकर रूप बनता है।

(3858) स स्विदिस्वदिसहीनां च *62*

(2628)

स्विदि, स्वदि, सहि-इत्येतेषां ण्यन्तानां सनि षभूते परतोऽभ्यासादुत्तरस्य सकारस्य सकारादेशो भवति। स्विदि-सिस्वेदयिषति। स्वदि-सिस्वादयिषति। सहि-सिसाहयिषति। सकारस्य सकारवचनं मूर्धन्यनिवृत्त्यर्थम्।

अर्थ—षभूत सन् प्रत्यय परे रहते णिच् प्रत्ययान्त स्विद्, स्वद् तथा सह् धातु के अभ्यास से उत्तर सकार को सकार होता है।

उदा० (1) सिस्वेदयिषति
ष्विद् → स्विद् णिच्—लघूपधगुण,
स्वेद् इ सन्—इट्,
स्वेदयिष—गुण, अय्, आदेशप्रत्यययोः,
सि स्वेदयिष—द्वित्व, रूपातिदेश, शर्पूर्वाः खयः, धातुसंज्ञा,
सिस्वेदयिष शप् ति—'स्तौतिण्योरेव०' से प्राप्त मूर्धन्य आदेश का बाध, अतो गुणे।

(2) सिस्वादयिषति
ष्वद् → स्वद् णिच्—धात्वादेः षः सः, अत उपधायाः,
सिस्वादयिष—इट्, आदेशप्रत्यययोः, सन्यतः, पूर्ववत् सकार के स्थान पर सकार।
सिस्वादयिष शप् ति—अतो गुणे।

(3) सिसाहयिषति
सह् णिच्—अत उपधायाः,
साहयिष—पूर्ववत्, द्वित्व, सन्यतः,
सिसाहयिष शप् ति—सकार को सकार।

सकारस्य० सकार के स्थान पर सकार का विधान मूर्धन्य आदेश की निवृत्ति के लिए है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3859) प्राक्सितादड्व्यवायेऽपि *63* (2276)

'सेवसित' (8.3.70) इति वक्ष्यति। प्राक्सितसंशब्दनाद्यानित ऊर्ध्वमनुक्रमिष्यामस्तत्राड्व्यवायेऽपि मूर्धन्यो भवतीत्येवं तद्वेदितव्यम्, अपिशब्दादनड्व्यवायेऽपि। वक्ष्यति-'उपसर्गात्सुनोतिसुवति' (8.3.65) इति षत्वम्। अभिषुणोति। परिषुणोति। विषुणोति। निषुणोति। अभ्यषुणोत्। पर्यषुणोत्। व्यषुणोत्। न्यषुणोत्।

अर्थ—आगे 'परिनिविभ्यः सेवसितय' का पाठ किया जायेगा। इससे पहले-पहले तथा यहाँ से उत्तर जो कहा जायेगा, वहाँ अट् का व्यवधान होने पर भी मूर्धन्य आदेश होता है—ऐसा जानना चाहिए। 'अपि' का ग्रहण होने से अट् का व्यवधान न होने पर भी मूर्धन्य आदेश होता है।

आगे कहा जायेगा—'उपसर्गात्सुनोति०' आदि। मूर्धन्य आदेश षकार होता है।

उदा० (1) अभिषुणोति। (2) परिषुणोति। (3) विषुणोति। (4) निषुणोति। (5) अभ्यषुणोत्। (6) पर्यषुणोत्। (7) व्यषुणोत्। (8) न्यषुणोत्।

सर्वत्र मूर्धन्य आदेश हुआ है।

(3860) स्थादिष्वभ्यासेन चाभ्यासस्य *64* (2277)

'प्राक् सितात्' इति वर्तते। 'उपसर्गात्सुनोति' (8.3.65) इत्यत्र 'स्थासेनयसेध' इति स्थादयः, तेषु स्थादिषु प्राक् सितसंशब्दनाद् अभ्यासेन व्यवाये मूर्धन्यो भवति, अभ्याससकारस्य च भवतीत्येवं वेदितव्यम्। अभ्यासेन व्यवाये अषोपदेशार्थं च-अभिषिषेणयिषति, परिषिषेणयिषति। अवर्णान्ताभ्यासार्थं च-अभितष्ठौ। परितष्ठौ। अषोपदेशार्थं च-अभिषिषेणयिषति, परिषिषेणयिषति। षणि प्रतिषेधार्थं च-अभिषिषिक्षति, परिषिषिक्षति। 'अभ्यासस्य' इति वचनं नियमार्थम्-स्थादिष्वेवाभ्याससकारस्य मूर्धन्यो भवति, नान्यत्र। अभिसुसूषति, अभिसिषासति।

अर्थ—'प्राक् सितात्' का अनुवर्त्तन है। 'उपसर्गात्सुनोति०' से पूर्व-पूर्व 'उपसर्गात्सुनोति०' में 'स्थासेनयसेध' यहाँ जो 'स्था' आदि हैं, उन 'स्था' आदि में अभ्यास के सकार के स्थान पर मूर्धन्य आदेश होता है; अभ्यास के द्वारा व्यवहित होने पर भी।

उदा० (1) परितष्ठौ

परि स्था णल्—लिट्, णल् आदेश, आत औ णलः,

परि स्था स्था औ—द्वित्व,

परि त स्था औ—ह्रस्वः, शर्पूर्वाः खयः,

परितस्थौ—वृद्धिरेचि, अभ्यास का व्यवधान होने पर भी मूर्धन्य हो गया,

परि तष् थौ—ष्टुना ष्टुः।

अषोप०—जो षकारोपदेश नहीं हैं, ऐसे धातुओं के लिए यह विधान है। यथा—

(2) अभिषिषेणयिषति

सेनयाऽभ्रियाति—सत्यापपाश० से 'णिच्',

सेनय् इ सन्—सन्, इट्,

सिसेनयिष—द्वित्व, ह्रस्वः, धातुसंज्ञा,

अभिषिषेणयिषति—मूर्धन्य आदेश, णत्व।

(3) परिषिषेणयिषति

परि सेनयिस—पूर्ववत्।

अवर्ण०—अवर्णान्त अभ्यास के लिए है।

(4) अभितष्ठौ

सिद्धि पीछे देखें।

षणि०—षकारभूत सन् के परे रहते निषेध के लिए है।

(5) अभिषिषिक्षति

सिच् सन्—द्वित्व, अभ्यास कार्य,

अभि सि सिक् स—चोः कुः, आदेशप्रत्यययोः,

अभिषिषिक्ष—सकार को मूर्धन्य, धातुसंज्ञा, शप् आदि।

(6) परिषिषिक्षति (पूर्ववत्)।

अभ्यास०—'अभ्यासस्य' यह वचन नियम के लिए है। स्था आदियों में ही अभ्यास के सकार को मूर्धन्य आदेश होता है, अन्यत्र नहीं।

(7) अभिसुसूषति

षूङ् → सू सन्—धात्वादेः षः सः,

अभि सु सू स—द्वित्व, ह्रस्वः,

अभि सु सूष—आदेशप्रत्यययोः, धातुसंज्ञा,

अभि सु सूष शप् तिप्—अतो गुणे।

(8) अभिसिषासति

षो → सो—धात्वादेः षः सः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभि सा सन्—आत्व,
अभि स सा स—द्वित्व, ह्रस्वः, सन्यतः,
अभि सि सा स—अभ्यास से उत्तर सकार को मूर्धन्य,
अभिसिषास—धातुसंज्ञा, शप् आदि।

(3861) उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् *65* (2270)

'मूर्धन्यः' इति वर्तते, 'स' इति च। उसर्गस्थान्निमित्तादुत्तरस्य सुनोति, सुवति, स्यति, स्तौति, स्तोभति, स्था, सेनय, सेध, सिच, सञ्ज, स्वञ्ज–इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। सुनोति–अभिषुणोति, परिषुणोति। अभ्यषुणोत्, पर्यषुणोत्। सुवति–अभि-षुवति, परिषुवति। अभ्यषुवत्, पर्यषुवत्। स्यति–अभिष्यति, परिष्यति। अभ्यष्यत्, पर्यष्यत्। स्तौति–अभिष्टौति, परिष्टौति। अभ्यष्टौत्, पर्यष्टौत्। स्तोभति–अभिष्टोभते, परिष्टोभते। अभ्यष्टोभत्, पर्यष्टोभत्। स्था–अभिष्ठास्यति, परिष्ठास्यति। अभ्यष्ठात्, पर्यष्ठात्। अभितष्ठौ, परितष्ठौ। सेनय–अभिषेणयति, परिषेणयति। अभ्यषेणयत्, पर्यषेणयत्। अभिषिषेणयिषति, परिषिषेणयिषति। सेध–अभिषेधति, परिषेधति। अभ्यषेधत्, पर्यषेधत्। सिच–अभिषिञ्चति, परिषिञ्चति। अभ्यषिञ्चत्, पर्यषिञ्चत्। अभिषिषिक्षति, परिषिषिक्षति। सञ्ज–अभिषजति, परिषजति। अभ्यषजत्, पर्यषजत्। अभिषि-षङ्क्षति, परिषिषङ्क्षति। स्वञ्ज–अभिष्वजते, परिष्वजते। अभ्यष्वजत, पर्यष्वजत। अभिषिष्वङ्क्षते, परिषिष्वङ्क्षते। 'सेध' इति शाब्विकरणनिर्देशः सिध्यतिनिवृत्त्यर्थः। उपसर्गादिति किम्? दधि सिञ्चति। मधु सिञ्चति। निर्गताः सेचका अस्माद् देशात् निःसेचको देश इति नायं सिचेरुपसर्गः। अभिसावकीयतीत्यत्रापि न सुनोतिं प्रति क्रियायोगः, किं तर्हि? सावकीयं प्रति। अभिषावयतीत्यत्र तु सुनोतिमेव प्रति क्रियायोगः, न सावयतिमिति षत्वं भवति।

अर्थ—मूर्धन्यः, सः—इनका अनुवर्त्तन है। उपसर्ग में स्थित निमित्त से उत्तर षू अभिषवे, षू प्रेरणे, षो अन्तकर्मणि, ष्टुञ् स्तुतौ, ष्टुभ स्तम्भे, ष्ठा गतिनिवृत्तौ, सेनय, षिध, षिधृ, षिच, सन्ज तथा स्वन्ज—इन धातुओं के सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (क) सुनोतेः—

(1) अभिषुणोति
अभि सु श्नु ति—लट्, स्वादिभ्यः श्नुः,
अभि षु नु ति—लशक्वतद्धिते, सकार को 'आदेशप्रत्यययोः' से आदेश प्राप्त, 'सात्पदाद्योः' से निषेध, पुनः मूर्धन्य आदेश,
अभि षु णु ति—णत्व, सार्वधातुकार्धधा० से गुण।

(2) परिषुणोति
पूर्ववत् श्नु, मूर्धन्य, गुण।

(3) अभ्यषुणोत्
सु श्नु त्—लङ्, इतश्च, श्नु,
अभि अ सु श्नु त्—अट्, लशक्वत० 'प्राक्सितादड्०' से मूर्धन्य आदेश,
अभ्यषुणोत्—णत्व, गुण।

(4) पर्यषुणोत् (पूर्ववत्)।

(ख) सुवतेः—

(5) अभिषुवति
अभि सू त—शप्, 'अचिश्नु धातु०' से उवङ् आदेश।

(6) परिषुवति (पूर्ववत्)।

(7) अभ्यषुवत्
पूर्ववत् मूर्धन्य।

(8) पर्यषुवत् (पूर्ववत्)।

(ग) स्यतेः—

(9) अभिष्यति
षो → अभि सो—धात्वादेः षः सः,
अभि स् श्यन् ति—'ओतः श्यनि' से ओकारलोप,
अभि ष्यति—मूर्धन्य आदेश।

(10) परिष्यति (पूर्ववत्)।

(11) अभ्यष्यत्
सो त्—लङ्, इतश्च,
स् श्यन् त्—ओकारलोप,
अभि अ ष्यत्—अट्, मूर्धन्य, यण्।

(12) पर्यष्यत् (पूर्ववत्)।

(घ) स्तौतेः—

(13) अभिष्टौति
ष्टु → स्तु—धात्वादेः षः सः,
अभि स्तु ति—शप्, शप् का लुक्, वृद्धि,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अभि ष् तौ ति—मूर्धन्य आदेश, ष्टुना ष्टुः।

(14) परिष्टौति (पूर्ववत्)।

(15) अभ्यष्टौत्
अभि स्तु त्—लङ्, इतश्च, शप् का लुक्,
अभि अ ष् तौ त्—वृद्धि, मूर्धन्य, ष्टुना ष्टुः।

(16) पर्यष्टौत्
परि स्तु त्—लङ्, इतश्च, शप् का लुक्,
परि स्तौ त्—वृद्धि,
परि अ ष् तौ त्—मूर्धन्य, ष्टुना ष्टुः।

(ङ) स्तोभतेः—

(17) अभिष्टोभते
अभि स्तुभ् त—शप्, लघूपधगुण,
अभि ष् तोभ् अत—मूर्धन्य आदेश, ष्टुना ष्टुः।

(18) परिष्टोभते (पूर्ववत्)।

(19) अभ्यष्टोभत
स्तुभ् त—लङ्, शप्,
स्तोभ् शप् त—लघूपध, अनुबन्धलोप,
अभि अ ष् तोभ् अ त—मूर्धन्य, ष्टुना ष्टुः, अट्।

(20) पर्यष्टोभत (पूर्ववत्)।

(च) तिष्ठतेः—

(21) अभिष्ठास्यति
स्था स्य ति—ऌट् शेषे च, स्यतासी०,
अभि ष् था स्य ति—मूर्धन्य, ष्टुना ष्टुः।

(22) परिष्ठास्यति (पूर्ववत्)।

(23) अभ्यष्ठात्
लङ्, इतश्च, शेष पूर्ववत्।

(24) पर्यष्ठात् (पूर्ववत्)।

(25) अभितष्ठौ
अभि स्था णल्—लिट्, णल्, आत औ णलः,
अभि स्था औ—द्वित्व,
अभि त स्था औ—शर्पूर्वाः खयः, ह्रस्वः, अभ्यासे चर्च,
अभि त ष् थौ—वृद्धिरेचि, मूर्धन्य आदेश, ष्टुत्व।

(26) परितष्ठौ (पूर्ववत्)।

(छ) सेनयतेः—

(27) अभिषेणयति
पूर्ववत् मूर्धन्य आदेश।

(28) परिषेणयति (पूर्ववत्)।

(29) अभ्यषेणयत्
लङ्, पूर्ववत् मूर्धन्य आदेश।

(30) पर्यषेणयत् (पूर्ववत्)।

(31) अभिषिषेणयिषति
सेनय सन्—धातोः कर्मणः समान०,
सेनय इ स—इट्, द्वित्व,
सिसेनयिस—हलादिः शेषः, ह्रस्वः,
अभिषिषेणयिष—मूर्धन्य आदेश, धातुसंज्ञा,
अभिषिषेणयिष शप् तिप्—अतो गुणे।

(32) परिषिषेणयिषति (पूर्ववत्)।

(ज) सेधतेः—

(33) अभिषेधति
सिध् तिप्—शप्, लघूपध गुण,
अभि सेध् अ ति—मूर्धन्य आदेश।

(34) परिषेधति (पूर्ववत्)।

(35) अभ्यषेधत्
सिध् शप् तिप्—इतश्च, अनुबन्धलोप,
अभि अ सेधत्—लघूपधगुण, मूर्धन्य आदेश।

(36) पर्यषेधत्
पूर्ववत् मूर्धन्य आदेश।

(झ) सिञ्चतेः—

(37) अभिषिञ्चति
षिञ्च् → सिञ्च्—धात्वादेः षः सः,
अभि सिञ्च् अ ति—मूर्धन्य आदेश।

(38) परिषिञ्चति (पूर्ववत्)।

(39) अभ्यषिञ्चत्
अभि अ सिञ्च् अ त्—लङ्, इतश्च, शेष पूर्ववत्।

(40) पर्यषिञ्चत् (पूर्ववत्)।

(41) अभिषिषिक्षति
सिच् सन्—इट् निषेध, 'चोः कुः' से कुत्व,
सि सिक् स—द्वित्व, हलादिः शेषः, आदेशप्रत्यययोः,
अभि सि सिक्ष—मूर्धन्य आदेश, धातुसंज्ञा,
अभि षि षिक्ष शप् तिप्—अतो गुणे।

(42) परिषिषिक्षति (पूर्ववत्)।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(ञ) सजतेः—

(43) अभिषजति

षन्ज् → सन्ज्—धात्वादेः षः सः,

सन्ज् शप् तिप्—अनुबन्ध लोप, 'दन्ससञ्जस्वञ्जां' से नकार-लोप,

अभिषजति—मूर्धन्य आदेश।

(44) परिषजति (पूर्ववत्)।

(45) अभ्यषजत्

लङ्, नकारलोप, मूर्धन्य आदेश।

(46) पर्यषजत् (पूर्ववत्)।

(47) अभिषिषङ्क्षति

सन्ज् सन्—द्वित्व, हलादिः शेषः,

स सन्ज् स—कुत्व, परसवर्ण,

स सङ् क् स—आदेशप्रत्यययोः,

सि सङ् क्ष—सन्यतः, धातुसंज्ञा,

अभिषिषङ्क्ष शप् ति—लकारकार्य, मूर्धन्य आदेश।

(48) परिषिषङ्क्षति (पूर्ववत्)।

(ट) स्वन्ज् धातोः—

(49) अभिष्वजते

'अभिषजति' की तरह।

(50) परिष्वजते (पूर्ववत्)।

(51) अभ्यष्वजत

'अभ्यषजत्' की तरह।

(52) पर्यष्वजत (पूर्ववत्)।

(53) अभिषिष्वङ्क्षते

ष्वञ् → स्वन्ज्—धात्वादेः षः सः,

स स्वन्ज् सन्—'अभिषिषङ्क्षति' की तरह सभी कार्य।

(54) परिषिष्वङ्क्षते (पूर्ववत्)।

सेध०—'सेध' में शप् विकरण के निर्देश से 'सिध्यति' धातु की निवृत्ति हो जाती है।

उपसर्गा०—उपसर्ग से उत्तर सकार को मूर्धन्य आदेश होता है।

(55) दधि सिञ्चति

यहाँ उपसर्ग से उत्तर सकार नहीं है। अतः मूर्धन्य आदेश नहीं हुआ। 'सात्पदाद्यो०' से निषेध।

(56) मधु सिञ्चति (पूर्ववत्)।

निःसेचको देशः।

निर्गताः—यहाँ सिच् धातु का उपसर्ग नहीं है। यहाँ गमि क्रिया के साथ निस् शब्द का योग है। निस् का न तो गम् क्रिया के साथ तथा न ही सिच् धातु के प्रति उपसर्ग संज्ञात्व है। विग्रह इस प्रकार है—

निर्गताः सेचका अस्माद् देशाद् इति।

अभिसा०—'अभिसावकीयति' इस स्थल पर 'सु' धातु के प्रति क्रियायोग नहीं है। तो क्या है ? 'सावकीय' के प्रति क्रिया-योग है। 'अभिषावयति' में 'सु' धातु के प्रति क्रियायोग है; 'सावयति' के प्रति नहीं है। अतः षत्व होता है। यथा—

(57) अभिसावकीयति

षु ण्वुल्—धात्वादेः षः सः, युवोरनाकौ,

सावकम् इच्छति—सुप आत्मनः क्यच्,

सावकीय—क्यच्, क्यचि च,

अभिसावकीय शप् तिप्—अतो गुणे।

(3862) सदिरप्रतेः *66* (2271)

सदेः सकारस्य उपसर्गस्थान्निमित्तादप्रतेरुत्तरस्य मूर्धन्य आदेशो भवति। निषीदति, विषीदति। न्यषीदत्, व्यषीदत्। निषसाद, विषसाद। अप्रतेरिति किम्? प्रतिसीदति।

अर्थ—उपसर्ग में स्थित निमित्त से उत्तर सद् के सकार के स्थान पर मूर्धन्य आदेश होता है, परन्तु प्रति से उत्तर को नहीं होता है।

उदा० (1) निषीदति

नि सद् तिप्—कर्त्तरि शप्, अनुबन्धलोप,

नि सीद् अ ति—'पाघ्राध्मा०' से 'सीद्' आदेश,

निषीदति—मूर्धन्य आदेश।

(2) विषीदति

वि सद् अ ति—पूर्ववत् शप्, सीद् आदेश, सकार के स्थान पर मूर्धन्य आदेश।

(3) न्यषीदत्

नि सद् अ त्—लङ्, इतश्च, सीद्, मूर्धन्य आदेश।

(4) व्यषीदत्

वि सद् अत्—पूर्ववत्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(5) निषसाद
सद् णल्—लिट्, अत उपधायाः, द्वित्व,
स साद् अ—अभ्यासकार्य,
नि ष साद् अ—मूर्धन्य आदेश।

(6) विषसाद (पूर्ववत्)।

अप्रते०—प्रति शब्द से उत्तर सकार को मूर्धन्य नहीं होता है।

(7) प्रतिसीदति
प्रति सद् शप् तिप्—'सीद्' आदेश, सकार को मूर्धन्य आदेश नहीं हुआ।

(3863) स्तम्भेः *67* (2272)

'उपसर्गात्' इति वर्तते। स्तम्भेः सकारस्य उपसर्ग-स्थान्निमित्तादुत्तरस्य मूर्धन्य आदेशो भवति। अभिष्टभ्नाति, परिष्टभ्नाति। अभ्यष्टभ्नात्, पर्यष्टभ्नात्। अभितष्टम्भ, परितष्टम्भ। 'अप्रतेः' इत्येतदिह नानुवर्तते, तेनैतदपि भवति–प्रतिष्टभ्नाति, प्रत्यष्टभ्नात्, प्रतितष्टम्भ।

अर्थ—'उपसर्गात्' का अनुवर्त्तन है। उपसर्ग में स्थित निमित्त से उत्तर स्तम्भ् धातु के सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) अभिष्टभ्नाति
स्तम्भ् तिप्—शप् को बाध कर 'क्र्यादिभ्यः श्ना' से 'श्ना',
स्तम्भ् ना ति—लशक्वतद्धिते, सार्वधातुकमपित्,
स्तभ् ना ति—अनुनासिकलोप,
अभि ष् तभ् ना ति—मूर्धन्य आदेश, ष्टुना ष्टुः।

(2) परिष्टभ्नाति (पूर्ववत्)।

(3) अभ्यष्टभ्नात्
स्तम्भ् श्ना त्—लङ्, इतश्च, श्ना,
स्तभ् ना त्—अनुनासिकलोप,
अभि अ ष् टभ् नात्—अट्, मूर्धन्य आदेश, ष्टुत्व।

(4) पर्यष्टभ्नात् (पूर्ववत्)।

(5) अभितष्टम्भ
स्तम्भ् णल्—लिट्,
त स्तम्भ् अ—चुटू, हलन्त्यम्, द्वित्व, शर्पूर्वाः खयः,
अभि त ष् तम्भ् अ—मूर्धन्य आदेश,
अभि तष्टम्भ् अ—ष्टुना ष्टुः।

(6) परितष्टम्भ (पूर्ववत्)।

अप्रते०—'अप्रतेः' का यहाँ अनुवर्त्तन नहीं है। अतः निम्नलिखित में भी होता है—

(7) प्रतिष्टभ्नाति।
(8) प्रत्यष्टभ्नात्। (9) प्रतितष्टम्भ।

(3864) अवाच्चालम्बनाविदूर्ययोः *68* (2273)

अवशब्दादुपसर्गादुत्तरस्य स्तम्भेः सकारस्य मूर्धन्यादेशो भवति आलम्बनेऽर्थे, आविदूर्ये च। आलम्बनम् आश्रय-णम्। अविदूरस्य भाव आविदूर्यम्। आलम्बने तावत्–अवष्टभ्यास्ते। अवष्टभ्य तिष्ठति। आविदूर्ये–अवष्टब्धा सेना। अवष्टब्धा शरत्। आलम्बनाविदूर्ययोरिति किम्? अवस्तब्धो वृषलः शीतेन। अनिगर्थ आरम्भः।

अर्थ—आलम्बन तथा आविदूर्य अर्थों में 'अव' उपसर्ग से उत्तर स्तम्भ धातु के सकार के स्थान पर मूर्धन्य आदेश होता है।

'आलम्बन' का अर्थ है—आश्रयण। अविदूर का भाव 'आविदूर्य' कहलाता है।

उदा० (1) अवष्टभ्यास्ते
अव स्तम्भ् त्वा—'समासेऽनञ्पूर्वे०' से ल्यप्,
अव स्तम्भ् य—लाक्वतद्धिते, हलन्त्यम्, अनुनासिकलोप,
अव ष् तभ् य—मूर्धन्य आदेश,
अवष्टभ्य सु—ष्टुना ष्टुः, सुलोप।

(2) अवष्टब्धा सेना
अव स्तम्भ् क्त—लशक्वतद्धिते, अनुनासिकलोप,
अव स्तभ् त—झषस्तथो०,
अवस्तभ् ध—झलां जश् झशि,
अव स्तब् ध टाप्—चुटू, हलन्त्यम्,
अव ष् ट ब् ध आ—सवर्णदीर्घ, सु, सुलुक्।

आलम्बना०—आलम्बन तथा आविदूर्य अर्थों में ही मूर्धन्य आदेश होता है।

(3) अवस्तब्धो वृषलः शीतेन
यहाँ मूर्धन्य आदेश नहीं हुआ।

यह इक् भिन्न के लिए विधान है।

(3865) वेश्च स्वनो भोजने *69* (2274)

वेरुपसर्गादवाच्चोत्तरस्य भोजनार्थे स्वनतेः सकारस्य

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मूर्धन्यादेशो भवति। विष्वणति, व्यष्वणत्, विषष्वाण। अवष्वणति अवाष्वणत्, अवषष्वाण। अभ्यवहारक्रिया-विशेषोऽभिधीयते, यत्र स्वननमस्ति। भोजन इति किम्? विस्वनति मृदङ्गः।

अर्थ—'वि' उपसर्ग से उत्तर भोजन अर्थ में वर्त्तमान स्वन् धातु के सकार को मूर्धन्य आदेश होता है।

उदा० (1) विष्वणति
वि स्वन् अ तिप्—लट्,
वि ष् व न ति—मूर्धन्य आदेश, णत्व।

(2) व्यष्वणत्
वि स्वन् अ त्—लङ्, इतश्च,
विष् व ण् अत्—पूर्ववत्।

(3) विषष्वाण
वि स्वन् णल्—लिट्, अत उपधायाः, द्वित्व,
वि स स्वान् अ—हलादिः शेषः,
विष ष् वाण् अ—मूर्धन्य आदेश।

चकार से 'अव' का अनुकर्षण होता है।[1]

(4) अवष्वणति (पूर्ववत्)।

(5) अवाष्वणत्
अव स्वन् अ त्—लङ्, शेष पूर्ववत्।

(6) अवषष्वाण
लिट्, द्वित्व, अभ्यासकार्य।

जहाँ स्वनन है, वहाँ अभ्यवहार (= भक्षण) क्रियाविशेष है।

भोजन०—भोजन अर्थ में वर्त्तमान स्वन् के सकार को मूर्धन्य आदेश होता है।

(7) विस्वनति मृदङ्गः
यहाँ भोजन अर्थ नहीं है। अतः मूर्धन्य आदेश नहीं हुआ।

(3866) परिनिविभ्यः सेवसितसयसिवुसहसुट्-स्तुस्वञ्जाम् *70* (2275)

परि, नि, वि-इत्येतेभ्य उपसर्गेभ्य उत्तरेषां सेव, सित, सय, सिवु, सह, सुट्, स्तु, स्वन्ज-इत्येतेषां सकारस्य मूर्धन्य आदेशो भवति। परिषेवते, निषेवते, विषेवते, पर्यषेवत, न्यषेवत, व्यषेवत। परिषिषेविषते निषिषेविषिते। विषिषेविषते। सित-परिषितः, विषितः, निषितः। सय-परिषयः, निषयः, विषयः। सिव्-परिषीव्यति, निषीव्यति, विषीव्यति। पर्यषीव्यत्, न्यषीव्यत्, व्यषीव्यत्। पर्यसीव्यत्, न्यसीव्यत्, व्यसीव्यत्। सह-परिषहते, निषहते, विषहते। पर्यषहत, न्यषहत, व्यषहत। पर्यसहत। न्यसहत। व्यसहत। सुट्-परिष्करोति। पर्यष्करोत्। पर्यस्करोत्। स्तु-परिष्टौति, निष्टौति विष्टौति। पर्यष्टौत्, न्यष्टौत्, व्यष्टौत्। पर्यस्तौत्, न्यस्तौत्, व्यस्तौत्। ष्वञ्ज-'दन्शस-ञ्जस्वञ्जाम्' (6.4.25) इति नलोपः। परिष्वजते, विष्व-जते, निष्वजते। पर्यष्वजत, पर्यस्वजत। पूर्वेणैव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात्।

अर्थ—परि, नि तथा वि—इन उपसर्गों से उत्तर सेव्, सित्, सय्, सिव्, सह्, सुट्, स्तु तथा स्वन्ज्—इनके सकार को मूर्धन्य आदेश होता है।

उदा० (क) सेव् धातोः—

(1) परिषेवते
परि सेव् शप् त—टित आत्मनेपदानां०,
परि षेव् अ ते—मूर्धन्य आदेश। 'सात्पदाद्यो०' से निषेध प्राप्त था।

(2) निषेवते
नि सेव् अ त—मूर्धन्य आदेश।

(3) विषेवते
वि सेव् अ त—पूर्ववत्।

(4) पर्यषेवत
परि अ सेव् अ त—मूर्धन्य आदेश।

(5) न्यषेवत
नि सेव् अ त—लङ्, मूर्धन्य आदेश।

(6) व्यषेवत
वि सेव् अ त—लङ्।

(7) परिषिषेविषते
सेव् सन्—इट्, द्वित्व,
सेव् सेव् इ स—हलादिः शेषः,
सि सेविष—ह्रस्वः, आदेशप्रत्यययोः, धातुसंज्ञा,
सि सेविष शप् त—पूर्ववत् सनः, शप्, अतो गुणे,
परिषिषेविषते—मूर्धन्य आदेश।

(8) निषिषेविषते

1. न्यास० 8.3.69

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पूर्ववत् सन् आदि।

(9) विषिषेविषते

पूर्ववत् सन्, अभ्यासकार्य आदि।

(ख) सितस्य—

(10) परिषितः

षिञ् → सि—धात्वादेः षः सः, हलन्त्यम्,

सि क्त—लशक्वतद्धिते,

परि सित—सात्पदा० से मूर्धन्य आदेश-निषेध, प्रकृत सूत्र के द्वारा मूर्धन्य आदेश हुआ,

परिषित—सु।

(11) निषितः (पूर्ववत्)।

(12) विषितः (पूर्ववत्)।

(ग) सयस्य—

षु → सु अच्—'एरच्' से अच्,

(13) परिषयः

परि सय—मूर्धन्य आदेश।

(14) निषयः (पूर्ववत्)।

(15) विषयः (पूर्ववत्)।

(घ) सिव् धातोः—

(16) परिषीव्यति

षिवु → सिव्—धात्वादेः षः सः, उपदेशेऽजनु०,

परि सिव् श्यन् तिप्—दिवादिभ्यः श्यन्, अनुबन्धलोप,

परि सिव् य ति—मूर्धन्य आदेश,

परि षीव् य ति—दीर्घ आदेश। हलि च।

(17) निषीव्यति

नि सिव् ति—पूर्ववत्।

(18) विषीव्यति

पूर्ववत् मूर्धन्य आदेश।

(19) पर्यषीव्यत्

सिव् श्यन् त्—'इतश्च' से इकारलोप,

परि अ षीव् य त्—दीर्घत्व, मूर्धन्य आदेश, यण्।

(20) न्यषीव्यत्

नि सिव् ति—लङ्, पूर्ववत्।

(21) व्यषीव्यत्

पूर्ववत् मूर्धन्य आदेश।

(22) पर्यसीव्यत्

परि अ सिव् श्यन् त्—लङ्, सभी कार्य पूर्ववत्, पक्ष में मूर्धन्य आदेश नहीं हुआ।

(23) न्यसीव्यत्

पूर्ववत् मूर्धन्य अभाव।

(24) व्यसीव्यत् (पूर्ववत्)।

(ङ) सह् धातोः—

(25) परिषहते

षह → सह्—धात्वादेः षः सः, उपदेशेऽजनु०,

परि सह् शप् त—लट्, अनुबन्धलोप,

परि षह ते—टित आत्मनेपदानां०, मूर्धन्य आदेश।

(26) निषहते

पूर्ववत् मूर्धन्य आदेश।

(27) विषहते (पूर्ववत्)।

(28) पर्यषहत

सह् शप् त—लङ्, अनुबन्धलोप,

परि अट् षहत—मूर्धन्य आदेश, अट्।

(29) न्यषहत (पूर्ववत्)।

(30) व्यषहत

वि सह् अ त—पूर्ववत्।

(च) सुट् आगमस्य—

(31) परिष्करोति

परि कृ ति—'तनादिकृञ्भ्य उः' से 'उ',

परि स् कर् उ ति—धातु को गुण, 'सम्पर्युपे०' से 'सुट्', सुट् कात्पूर्वः, सुट् के अनादेश होने से मूर्धन्य आदेश प्राप्त नहीं था,

परिष् करोति—उकार को गुण, मूर्धन्य आदेश।

(32) पर्यष्करोत्

परि कृ त्—लङ्, इतश्च, शेष पूर्ववत्,

परि अष् करोत्—मूर्धन्य आदेश।

(छ) स्तुधातोः—

(33) परिष्टौति

परि स्तु तिप्—शप्, शप् का लुक्, वृद्धि,

परि स्तौ ति—मूर्धन्य आदेश,

परि ष् टौ ति—ष्टुना ष्टुः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(34) निष्टौति
नि स्तु ति—पूर्ववत्।

(35) विष्टौति
वि स्तु ति—पूर्ववत्।

(36) पर्यष्टौत्
परि स्तु त्—लङ्, इतश्च, शेष पूर्ववत्,
परि अ स्तौ त्—मूर्धन्य आदेश।

(37) न्यष्टौत्
पूर्ववत् सभी कार्य।

(38) व्यष्टौत्
पूर्ववत् सभी कार्य।

(39) पर्यस्तौत्
परि अ स्तौ त्—इस दशा में 'सिवादीनां०' से पाक्षिक मूर्धन्य आदेश।

(40) न्यस्तौत्
नि स्तु त्—पूर्ववत्।

(41) व्यस्तौत्
सभी कार्य पूर्ववत्।

(ज) ष्वन्ज् धातोः—

(42) परिष्वजते
परि स्वन्ज् अ त—'दन्शसन्जस्वन्जाम्' से नकारलोप,
परि स्वजते—टित आत्मनेपदा०,
परिष्वजते—मूर्धन्य आदेश।

(43) निष्वजते
नि श्वन्ज् अ त—पूर्ववत्।

(44) विष्वजते
पूर्ववत् मूर्धन्य आदेश।

(45) पर्यष्वजत
स्वज् अ त—लङ्,
परि अ ष्वज् अ त—मूर्धन्य आदेश।

(46) पर्यस्वजत
परि अ स्वज् अ त—अट् का व्यवधान होने पर पक्ष में मूर्धन्य आदेश नहीं हुआ।

पूर्वेणैव०—पूर्व सूत्र के द्वारा यहाँ मूर्धन्य आदेश सिद्ध ही था। अतः स्तु तथा स्वन्ज् का ग्रहण उत्तरशास्त्र के लिए है; ताकि अट् का व्यवधान होने पर विकल्प हो जाय।

(3867) सिवादीनां वाड्व्यवायेऽपि *71* (2359)

अनन्तरसूत्रे 'सिवुसहसुट्स्तुस्वञ्जाम्' (8.3.70) इति सिवादयः। सिवादीनामड्व्यवायेऽपि परिनिविभ्य उत्तरस्य सकारस्य वा मूर्धन्यो भवति। तथा चैवोदाहृतम्।

अर्थ—पूर्व सूत्रपठित 'सिवुसहसुट्स्तुस्वञ्जाम्' पद के द्वारा सिवादि का ग्रहण होता है। परि, नि तथा वि से उत्तर सिव् आदि के सकार को अट् का व्यवधान होने पर भी विकल्प से मूर्धन्य आदेश होता है।

उदाहरण पिछले सूत्र पर दिये गये हैं।

(3868) अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु *72* (2349)

अनु, वि, परि, अभि, नि–इत्येतेभ्य उत्तरस्य स्यन्दतेरप्राणिषु सकारस्य वा मूर्धन्यादेशो भवति। अनुष्यन्दते, विष्यन्दते, परिष्यन्दते, अभिष्यन्दते तैलम्। निष्यन्दते। अनुस्यन्दते, विस्यन्दते, परिस्यन्दते, अभिस्यन्दते, निस्यन्दते। अप्राणिष्विति किम्? अनुस्यन्दते मत्स्य उदके। प्राण्यप्राणिविषयस्यापि स्यन्दतेरयं विकल्पो भवति–अनुष्यन्देते मत्स्योदके, अनुस्यन्देते। 'अप्राणिषु' इति पर्युदासोऽयम्, न प्रसज्यप्रतिषेधः।

अर्थ—यदि प्राणी अर्थ गम्यमान न हो तो अन, वि, परि, अभि तथा नि—इनसे उत्तर स्यन्द् धातु के सकार के स्थान पर विकल्प से मूर्धन्य आदेश होता है।

उदा० (1) अनुष्यन्दते
अनु स्यन्द् अ त—'आदेशप्रत्यययोः' की प्रवृत्ति न होने से प्रकृत सूत्र से मूर्धन्य आदेश।

(2) विष्यन्दते (पूर्ववत्)।

(3) परिष्यन्दते
मूर्धन्य आदेश।

(4) अभिष्यन्दते
मूर्धन्य आदेश।

(5) निष्यन्दते (पूर्ववत्)।

(6) अनुस्यन्दते
पक्ष में मूर्धन्य अभाव।

(7) विस्यन्दते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पक्ष में मूर्धन्य अभाव।

(8) परिस्यन्दते (पूर्ववत्)।

(9) अभिस्यन्दते (पूर्ववत्)।

(10) निस्यन्दते (पूर्ववत्)।

अप्राणि०—प्राणी अर्थ गम्यमान हो तो मूर्धन्य आदेश नहीं होता है। यथा—

(11) अनुस्यन्दते मत्स्य उदके
मूर्धन्य आदेश नहीं हुआ।

प्राणी तथा प्राणीतर अर्थ गम्यमान रहते यह विकल्प होता है।

अनुष्यन्देते मत्स्योदके।
अनुस्यन्देते मत्स्योदके।

अप्राणि०—'अप्राणिषु' पद में पर्युदास प्रतिषेध है। प्रसज्य प्रतिषेध नहीं है।

(3869) वेः स्कन्देरनिष्ठायाम् *73* (2398)

वेरुपसर्गादुत्तरस्य स्कन्देः सकारस्य मूर्धन्यो वा भवति अनिष्ठायाम्। विष्कन्ता, विस्कन्ता। विष्कन्तुम्, विस्कन्तुम्। विष्कन्तव्यम्, विस्कन्तव्यम्। अनिष्ठायामिति किम्? विस्कन्नः।

अर्थ—'वि' उपसर्ग से उत्तर स्कन्द् धातु के सकार को मूर्धन्य आदेश विकल्प से होता है, परन्तु निष्ठा प्रत्यय में नहीं होता है।

उदा० (1) विष्कन्ता
वि स्कन्द् तृच्—खरि च, झरो झरि सवर्णे,
वि ष्कन्ता—मूर्धन्य आदेश, सु।

(2) विस्कन्ता
पक्ष में मूर्धन्य नहीं हुआ।

(3) विष्कन्तुम्
वि स्कन्द् तुमुन्—अनुबन्धलोप,
विष् कन्त् तुम्—मूर्धन्य आदेश, सु।

(4) विस्कन्तुम्
पक्ष में मूर्धन्य अभाव।

(5) विष्कन्तव्यम्
वि स्कन्द् तव्यत्—पूर्ववत्, विभक्तिकार्य।

(6) विस्कन्तव्यम्
पक्ष में मूर्धन्य अभाव।

अनिष्ठा०—निष्ठा में मूर्धन्य आदेश नहीं होता है।

(7) विस्कन्नः
वि स्कन्द् क्त—मूर्धन्य आदेश नहीं हुआ।

(3870) परेश्च *74* (2399)

परिशब्दाच्चोत्तरस्य स्कन्देः सकारस्य वा मूर्धन्यो भवति। परिष्कन्ता, परिष्कन्तुम्, परिष्कन्तव्यम्। परिस्कन्ता, परिस्कन्तुम्, परिस्कन्तव्यम्। पृथग्योगकरणसामर्थ्यात् 'अनिष्ठायाम्' इत्येतन्नानुवर्तते-परिष्कण्णः, परिस्कन्नः।

अर्थ—परि शब्द से उत्तर स्कन्द् के सकार को मूर्धन्य आदेश विकल्प से होता है।

उदा० (1) परिष्कन्ता
परि स्कन्द् तृच्—खरि च, झरो झरि सवर्णे,
परिष्कन्तृ सु—मूर्धन्य आदेश।

(2) परिस्कन्ता
पक्ष में मूर्धन्य आदेश अभाव।

(3) परिष्कन्तुम्
परि स्कन्द् तुमुन्—पूर्ववत्।

(4) परिस्कन्तुम्
पक्ष में नहीं हुआ।

(5) परिष्कन्तव्यम्
मूर्धन्य आदेश।

(6) परिस्कन्तव्यम्
पक्ष में मूर्धन्य आदेश नहीं हुआ।

पृथग्०—पृथक् योगकरणसामर्थ्य से 'अनिष्ठायाम्' का अनुवर्त्तन नहीं होता है। यथा—

(7) परिष्कण्णः
परि स्कन्द् क्त—लशक्वतद्धिते,
परि स्कन् न् न—रदाभ्यां निष्ठातो०,
परिष्कन्न सु—मूर्धन्य आदेश, णत्व।

(8) परिस्कन्नः
पक्ष में मूर्धन्य आदेश अभाव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3871) परिस्कन्दः प्राच्यभरतेषु *75* (3026)

'परिस्कन्द' इति मूर्धन्याभावो निपात्यते प्राच्यभरतेषु प्रयोगविषयेषु। पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते। परिस्कन्दः। अन्यत्र परिष्कन्दः। अचि निपातनम्। अथ वा-निष्ठातकारस्य लोपः। भरतग्रहणं प्राच्यविशेषणम्।

अर्थ—प्राच्य भरत लोगों के प्रयोग-विषय में मूर्धन्य अभाव से युक्त 'परिस्कन्द' शब्द निपातनसिद्ध है। पूर्व सूत्र से मूर्धन्य आदेश प्राप्त होने पर उसके अभाव का निपातन कहा है।

उदा० (1) परिस्कन्दः
मूर्धन्य आदेश का अभाव।

(2) परिष्कन्दः
अन्यत्र मूर्धन्य आदेश।

अचि०—यह अच् में निपातन है। अथवा निष्ठा के तकार का लोप है। भरत शब्द का ग्रहण 'प्राच्य' का विशेषण है।

(3872) स्फुरतिस्फुलत्योर्निर्निविभ्यः *76* (2537)

स्फुरितस्फुलत्योः सकारस्य निस्, नि, वि-इत्येतेभ्य उत्तरस्य वा मूर्धन्यादेशो भवति। स्फुरति-निष्फुरति, निस्स्फुरति। निष्फुरति, निस्फुरति। विष्फुरति, विष्फुरति। स्फुलति-निष्फुलति, निस्स्फुलति। निष्फुलति, निस्फुलति। विष्फुलति, विस्फुलति।

अर्थ—निस्, नि तथा वि—इनसे उत्तर स्फुर् तथा स्फुल् धातुओं के सकार के स्थान पर विकल्प से मूर्धन्य आदेश होता है।

उदा० (1) निष्फुरति
निस् स्फुर् श ति—शप् को बाध कर 'तुदादिभ्यः शः' से 'श',
निस् ष्फुरति—लशक्वत०, मूर्धन्य आदेश,
निष् ष्फुरति—ष्टुना ष्टुः।

(2) निस्स्फुरति
पक्ष में मूर्धन्य-अभाव।

(3) निष्फुरति
नि स्फुर् श ति—मूर्धन्य आदेश,
निष्फुर अ ति—लशक्वत०।

(4) निस्फुरति
पक्ष में मूर्धन्य-अभाव।

(5) विष्फुरति
मूर्धन्य आदेश।

(6) विस्फुरति
मूर्धन्य-अभाव।

(7) निष्फुलति
निस् स्फुल् श तिप्—अनुबन्धलोप,
निष् ष्फुलति—मूर्धन्य आदेश, ष्टुना ष्टुः।

(8) निस्स्फुलति
पक्ष में मूर्धन्य नहीं हुआ।

(9) निष्फुलति
मूर्धन्य आदेश।

(10) निस्फुलति
मूर्धन्य-अभाव।

(11) विष्फुलति
मूर्धन्य आदेश।

(12) विस्फुलति
मूर्धन्य-अभाव।

(3873) वेः स्कभ्नातेर्नित्यम् *77* (2556)

वेरुत्तरस्य स्कभ्नातेः सकारस्य नित्यं मूर्धन्यादेशो भवति। विष्कभ्नाति। विष्कम्भिता। विष्कम्भितुम्। विष्कम्भितव्यम्।

अर्थ—'वि' से उत्तर स्कभ् धातु के सकार के स्थान पर मूर्धन्य आदेश नित्य होता है।

उदा० (1) विष्कभ्नाति
वि स्कभ् श्ना तिप्—क्र्यादिभ्यः श्ना, लशक्वतद्धिते, अनुनासिकलोप,
वि ष् क भ् ना ति—मूर्धन्य आदेश।

(2) विष्कम्भिता
वि स्कम्भ् तृच्—मूर्धन्य आदेश।

(3) विष्कम्भितुम् (पूर्ववत्)।

(4) विष्कम्भितव्यम्
वि स्कम्भ् तव्यत्—इट्, पूर्ववत् मूर्धन्य आदेश।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3874) इणः षीध्वंलुङ्लिटां धोऽङ्गात् *78* (2247)

'मूर्धन्य' इति वर्तते। इणन्तादुङ्गादुत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति। च्योषीढ्वम्। प्लोषीढ्वम्। लुङ्-अच्योढ्वम्। अप्लोढ्वम्। लिट्-चकृढ्वे, ववृढ्वे। 'इण्कोः' (8.3.57) इति वर्तमाने पुनरिण्ग्रहणं कवर्गनिवृत्त्यर्थम्। पक्षीध्वम्। यक्षीध्वम्। षीध्वंलुङ्लिटामिति किम्? स्तुध्वे। अस्तुध्वम्। अङ्गादिति किम्? परिवेविषीध्वम्। अर्थवद्ग्रहणादपि सिद्धम्? तत्तु नाश्रितम्।

अर्थ—'मूर्धन्यः' का अनुवर्त्तन है। इण् है अन्त में जिसके, ऐसे अंग से उत्तर षीध्वम्, लुङ् तथा लिट्—इनका जो धकार, उसके स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) च्योषीढ्वम्
च्यु सीयुट् ध्वम्—आशीर्लिङ्, अनुबन्धलोप,
च्यु सीय् ध्वम्—'आर्धधातुकस्येड्०' से प्राप्त इट् आगम का एकाच उपदेशेऽनु० से निषेध,
च्यो षीय् ध्वम्—सार्वधातुकार्धधा० से अंग को गुण,
च्यो षी ढ्वम्—यकारलोप, मूर्धन्य आदेश।

(2) प्लोषीढ्वम्
प्लु ध्वम्—पूर्ववत्।

(3) अच्योढ्वम्
च्यु ध्वम्—लुङ्, च्लि लुङि, च्लेः सिच्,
च्यु स् ध्वम्—अनुबन्धलोप, अंग को गुण,
अ च्यो ध्वम्—अट्, 'धि च' से सकारलोप,
अच्योढ्वम्—मूर्धन्य आदेश।

(4) अप्लोढ्वम् (पूर्ववत्)।

(5) चकृढ्वे
कृ ध्वम्—लिट्, द्वित्व,
चकृ ध्वे—अभ्यासकार्य, टित आत्मने०,
चकृढ्वे—मूर्धन्य आदेश।

(6) ववृढ्वे
वृ ध्वम्—द्वित्व आदि पूर्ववत्।

इण्को०—'इण्कोः' का अनुवर्त्तन सुलभ होने पर भी 'इण्' का ग्रहण कवर्ग की निवृत्ति के लिए है।

(7) पक्षीध्वम्
पच् षीम्—आशीर्लिङ्, सीयुट्,
पच् षीय् ध्वम्—मूर्धन्य,
पक् षी ध्वम्—यकारलोप, चोः कुः, कवर्ग से उत्तर होने के कारण धकार को मूर्धन्य आदेश नहीं हुआ।

(8) यक्षीध्वम्
यज्—पूर्ववत्।

षीध्व०—षीध्वम्, लुङ् तथा लिट्—इनका जो धकार, उसके धकार को मूर्धन्य आदेश होता है।

(9) स्तुध्वे
स्तु ध्वम्—शप्, शप् का लुक्,
स्तुध्वे—टित आत्मनेपदा०, मूर्धन्य नहीं हुआ।

(10) अस्तुध्वम्
स्तु ध्वम्—लङ्, शप् का लुक्,
अस्तु ध्वम्—अट्, मूर्धन्य आदेश नहीं हुआ।

अङ्गा०—अंगसंज्ञक से उत्तर धकार को मूर्धन्य आदेश होता है।

(11) परिवेविषीध्वम्
विष् ध्वम्—लिङ्,
विष् शप् ध्वम्—कर्त्तरि शप्, जुहोत्यादिभ्यः श्लुः,
विष् सीयुट् ध्वम्—'श्लौ' से द्वित्व, सकारलोप,
वि विष् ईय् ध्वम्—हलादिः शेषः, यकारलोप, लोपो व्योर्वलि',
परि वे विष् ई ध्वम्—'णिजां त्रयाणां०' से अभ्यास को गुण,
यहाँ 'षीध्वम्' है, परन्तु यह अंग से उत्तर नहीं है। अतः मूर्धन्य आदेश नहीं होता है।

अर्थव०—'अर्थवत्' इस प्रकार ग्रहण करने से सिद्ध होता है। उसका आश्रय नहीं किया गया है।

(3875) विभाषेटः *79* (2325)

इणः परस्मादिट उत्तरेषां षीध्वंलुङ्लिटां यो धकारस्तस्य मूर्धन्यादेशो भवति विभाषा। लविषीढ्वम्, लविषीध्वम्। पविषीढ्वम्, पविषीध्वम्। लुङ्-अलविढ्वम्, अलविध्वम्। लिट्-लुलुविढ्वे, लुलुविध्वे। इण इत्येव-आसिषीध्वम्। अथेह कथं भवितव्यम्-उपदिदीयिध्वे? केचिदाहुः-इणन्तादङ्गादुत्तरस्य इट आनन्तर्यं युटा व्यवहितमिति न भवितव्यं ढत्वेनेति। अपरेषां दर्शनम्- 'अङ्गात्' (8.3.78) इति निवृत्तम्, 'इणः' इत्यनुवर्त्तते, ततश्च

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यकारादेव इणः परोऽनन्तर इडिति पक्षे भवितव्यं मूर्धन्येन' इति ।

अर्थ—इण् है अन्त में जिसके, उससे उत्तर जो इट्, उससे उत्तर षीध्वम्, लुङ् तथा लिट्—इनके धकार को विकल्प से मूर्धन्य आदेश होता है ।

उदा० (1) लविषीढ्वम्
लू ध्वम्—आशीर्लिङ्,
लू सीयुट् ध्वम्—इट् आगम,
लो इ सीय् ध्वम्—गुण, अनुबन्धलोप,
लविषीय् ध्वम्—मूर्धन्य (षकार),
लविषीढ्वम्—यकारलोप, पाक्षिक मूर्धन्य आदेश ।

(2) लविषीध्वम्
पक्ष में मूर्धन्य-अभाव ।

(3) पविषीढ्वम्
पू ध्वम्—पूर्ववत् सभी कार्य ।

(4) पविषीध्वम्
पक्ष में मूर्धन्य अभाव ।

(5) अलविढ्वम्
लू ध्वम्—लुङ्,
लू सिच् ध्वम्—च्लेः सिच्, अनुबन्धलोप,
लविढ्वम्—धकार को मूर्धन्य आदेश ।

(6) अलविध्वम्
पक्ष में धकार को मूर्धन्य आदेश अभाव ।

(7) लुलुविढ्वे
लू ध्वम्—लिट्, इट्,
लू लू इ ध्वम्—द्वित्व,
लु लू इ ध्वम्—ह्रस्वः,
लु लुव् इ ध्वम्—अचिश्नु धातु० से 'उवङ्',
लु लु विढ्वे—टित आत्मनेपदा०,
लु लु विढ्वे—पाक्षिक मूर्धन्य आदेश ।

(8) लुलुविध्वे
पक्ष में ढकार नहीं हुआ ।

इण०—इणन्त अंग से उत्तर धकार को मूर्धन्य आदेश होता है ।

(9) आसिषीध्वम्
आस् ध्वम्—लिङ्,
आस् इ सीय् ध्वम्—सीयुट्, इट्, अनुबन्धलोप,
आसि षीध्वम्—सकार को मूर्धन्य आदेश, यकारलोप, यहाँ इट् सहित षीध्वम् का धकार है; परन्तु यह इण् अन्त वाले अंग से उत्तर नहीं है । अतः मूर्धन्य आदेश नहीं हुआ ।

अथेह०—'उपदिदीयिध्वे' में धकार को मूर्धन्य आदेश क्यों नहीं होता है ?

(समा०) कुछ विद्वान् कहते हैं कि यहाँ इणन्त से उत्तर इट् का आनन्तर्य युट् आगम के द्वारा व्यवहित है । अतः ढत्व नहीं होना चाहिए ।

अपरे०—दूसरे विद्वान् कहते हैं कि 'अङ्गात्' पद की निवृत्ति हो चुकी है तथा केवल 'इणः' पद का अधिकार है । अतः 'यकार से ही इण् से अनन्तर पर जो इट्' इस प्रकार पक्ष में मूर्धन्य आदेश होना चाहिए ।

(10) उपदिदीयिध्वे
दीङ् लिट्—हलन्त्यम्,
दी ध्वम्—आर्धधातुकस्येड्, एकाच उपदेशे०, कृसृभृ०,
दी युट् इट् ध्वम्—'दीङो' युडचि०' से 'युट्',
दी दी य् इ ध्वम्—अनुबन्धलोप, द्वित्व,
उपदिदीयिध्वे—ह्रस्वः, टित आत्मने० ।

(3876) समासेऽङ्गुलेः सङ्गः *80* (1019)

सङ्गसकारस्याङ्गुलेरुत्तरस्य मूर्धन्य आदेशो भवति समासे । अङ्गुलेः सङ्गः-अङ्गुलिषङ्गः । अङ्गुलिषङ्गा यवागूः । अङ्गुलिषङ्गो गाः सादयति । समास इति किम्? अङ्गुलेः सङ्गं पश्य ।

अर्थ—अंगुलि शब्द से उत्तर संग शब्द के सकार को मूर्धन्य आदेश होता है, समास में ।

उदा० (1) अङ्गुलिषङ्गः
अङ्गुलेः सङ्गः—समास, सुप् लुक्,
अङ्गुलि षङ्ग सु—मूर्धन्य आदेश ।
इसी प्रकार-अङ्गुलिषङ्गा यवागूः ।

समास०—समास में ही सकार को मूर्धन्य आदेश होता है । यथा—
अङ्गुलेः सङ्गं पश्य—यहाँ नहीं हुआ ।

(3877) भीरोः स्थानम् *81* (1020)

स्थानसकारस्य भीरोरुत्तरस्य मूर्धन्यादेशो भवति । भीरुष्ठानम् । समास इत्येव-भीरोः स्थानं पश्य ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—भीरु शब्द से उत्तर 'स्थान' शब्द के सकार को मूर्धन्य आदेश होता है।

उदा० (1) भीरुष्ठानम्
भीरोः स्थानम्—समास,
भीरु ष् थान—मूर्धन्य आदेश,
भी रु ष् ठान सु—ष्टुना ष्टुः।

समास०—समास में मूर्धन्य आदेश होता है। यथा—
भीरोः स्थानम्—मूर्धन्य आदेश नहीं हुआ।

(3878) अग्नेः स्तुत्स्तोमसोमाः *82* (924)

अग्नेरुत्तरस्य स्तुत्, स्तोम, सोम-इत्येतेषां सकारस्य मूर्धन्यादेशो भवति समासे। अग्निष्टुत्। अग्निष्टोमः। अग्नीषोमः। *अग्नेर्दीर्घात्सोमस्येष्यते*। तेनेह न भवति-अग्निसोमौ माणवकौ। तथा च ज्योतिः-अग्निः, सोमः-लताविशेषः-अग्निसोमौ तिष्ठतः। समास इत्येव-अग्ने सोमः।

अर्थ—समास में अग्नि शब्द से उत्तर स्तुत्, स्तोम तथा सोम—इनके सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) अग्निष्टुत्
अग्नि स्तु क्विप्—सर्वापहारलोप, उपपद समास,
अग्नि स्तुत्—'ह्रस्वस्य पिति' से 'तुक्' आगम, सु, सुलुक्,
अग्नि ष् तुत्—मूर्धन्य आदेश, ष्टुना ष्टुः।

(2) अग्निष्टोमः
अग्नि स्तोम—षष्ठी समास,
अग्नि ष् तोम—मूर्धन्य आदेश, ष्टुना ष्टुः, सु।

(3) अग्नीषोमौ[1]
अग्निश्च सोमश्च—चार्थे द्वन्द्वः,
अग्निसोम—'इदग्नेः सोमवरुणयोः' से ईकार,
अग्नीषोम औ—मूर्धन्य आदेश।

अग्ने०—दीर्घ वर्णान्त 'अग्नी' इस शब्द से उत्तर सोम शब्द के सकार को मूर्धन्य आदेश होता है। अतः निम्नलिखित में नहीं होता है—

अग्निसोमौ माणवकौ

यहाँ ईकार नहीं हुआ। अतः मूर्धन्य आदेश भी नहीं होता है।

1. अग्नीषोम इत्येकवद्भावोऽयुक्तः—ईश्वरचन्द्रः (व्याख्याकारः)।

'अग्नि' का अर्थ ज्योति है तथा 'सोम' एक लता का नाम है। यथा—

अग्निसोमौ तिष्ठतः।

समास०—समास में सकार को मूर्धन्य आदेश होता है। यथा—

अग्ने सोमः—यहाँ समास नहीं हुआ। अतः मूर्धन्य आदेश नहीं हुआ।

(3879) ज्योतिरायुषः स्तोम् *83* (1021)

ज्योतिस्, आयुस्-इत्येताभ्यामुत्तरस्य स्तोमसकारस्य मूर्धन्यादेशो भवति समासे। ज्योतिष्टोमः। आयुष्टोमः। (ज्योतिःष्टोमः, आयुःष्टोमः।) 'समासे' इत्येव-ज्योतिः स्तोमं दर्शयति।

अर्थ—समास में ज्योतिस् तथा आयुस् शब्दों से उत्तर स्तोम शब्द के सकार को मूर्धन्य आदेश होता है।

उदा० (1) ज्योतिष्टोमः
ज्योति स्तोमः—षष्ठी समास, मूर्धन्य,
ज्योति स् ष् तोम—ष्टुत्व।

(2) आयुष्टोमः
पूर्ववत् षष्ठी समास, मूर्धन्य आदेश।

समास०—समास में सकार को मूर्धन्य आदेश होता है। यथा—

ज्योतिः स्तोमं दर्शयति—समास नहीं हुआ, अतः मूर्धन्य आदेश नहीं हुआ।

(3880) मातृपितृभ्यां स्वसा *84* (984)

मातृ, पितृ-इत्येताभ्यामुत्तरस्य स्वसृसकारस्य समासे मूर्धन्यादेशो भवति। मातृष्वसा। पितृष्वसा।

अर्थ—समास में मातृ व पितृ शब्दों से उत्तर जो स्वसृ शब्द, उसके सकार को मूर्धन्य आदेश होता है।

उदा० (1) मातृष्वसा
मातुः स्वसा—षष्ठी समास,
मातृ स्वसृ—सुप् लुक्,
मातृष्वसृ सु—मूर्धन्य आदेश।

(2) पितृष्वसा
पूर्ववत् समास, मूर्धन्य आदेश।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3881) मातुःपितुर्भ्यामन्यतरस्याम् *85* (983)

मातुर्, पितुर्-इत्येताभ्यामुत्तरस्य स्वसृशब्दस्यान्यतरस्यां मूर्धन्यादेशो भवति समासे। मातुःष्वसा, मातुःस्वसा। पितुःष्वसा, पितुःस्वसा। मातुःपितुरिति रेफान्तयोरेतद्-ग्रहणम्। एकदेशविकृतस्यानन्यत्वाद् विसर्जनीयान्तात् सकारान्ताच्च षत्वं भवति। समास इत्येव-वाक्ये मा भूत् मातुः स्वसेत्येव नित्यं भवति।

अर्थ—मातुर् तथा पितुर्—इन शब्दों से उत्तर जो स्वसृ शब्द, उसके सकार को मूर्धन्य आदेश विकल्प से होता है, समास में।

उदा० (1) मातुःष्वसा
मातुः स्वसा—समास, 'विभाषा स्वसृपत्योः' से अलुक्,
मातुः स्वसृ—मूर्धन्य आदेश,
मातुःष्वसृ सु—विभक्तिकार्य।

(2) मातुःस्वसा
पक्ष में मूर्धन्य आदेश अभाव।

(3) पितुःष्वसा
पूर्ववत् मूर्धन्य आदेश।

(4) पितुः स्वसा
मूर्धन्य आदेश अभाव।

मातुः—सूत्र में 'मातुः पितुर्' इस प्रकार रेफान्त पदों का ग्रहण है। 'एकदेशविकृतमनन्यवद् भवति' परिभाषा के द्वारा विसर्जनीयान्त व सकारान्त से षत्व होता है।

भाव यह है कि उत्तर पद 'पितुर्' में रेफान्त का ग्रहण होने से उसके साहचर्य से पूर्व पद 'मातुर्' को भी रेफान्त का ग्रहण जानना चाहिए। यदि ऐसा होता है तो रेफ का 'खरवसानयो०' से विसर्जनीय करने पर उसका 'वा शरि' से पक्ष में सकार करने पर विसर्जनीयान्त तथा सकारान्त से उत्तर को मूर्धन्य आदेश प्राप्त नहीं होता है।

इस शंका का समाधान यह है कि 'एकदेशविकृतमनन्यवत्' परिभाषा से मूर्धन्य आदेश हो जाता है। कारण कि यदि रेफान्त (मातुर् पितुर्) पदों का ग्रहण न किया जाता और विसर्जनीयान्त का ग्रहण किया जाता तो सकारान्त पक्ष में मूर्धन्य आदेश प्राप्त न होता। यदि सकारान्त (मातुस्, पितुस्) पदों का ग्रहण किया जाता तो विसर्जनीयान्त पक्ष में मूर्धन्य आदेश न होता। अतः रेफान्त का ग्रहण है।

समास०—समास में सकार को मूर्धन्य आदेश होता है। वाक्य में नहीं होता। यथा—मातुःस्वसा।

(3882) अभिनिसः स्तनः शब्दसंज्ञायाम् *86* (3193)

अभि, निस्-इत्येतस्मादुत्तरस्य स्तनतिसकारस्य मूर्धन्यादेशो भवति अन्यतरस्यां शब्दसंज्ञायां गम्यमानायाम्। अभिनिष्टानो वर्णः। अभिनिस्तानो वर्णः। अभिनिष्टानो विसर्जनीयः। अभिनिस्तानो विसर्जनीयः। शब्दसंज्ञायामिति किम्? अभिनिस्तनति मृदङ्गः। 'समासे' इति अतः प्रभृति निवृत्तम्।

अर्थ—शब्द संज्ञा गम्यमान हो तो अभि तथा निस् शब्दों से उत्तर स्तन् के सकार को मूर्धन्य आदेश विकल्प से होता है।

उदा० (1) अभिनिष्टानो वर्णः
अभिनिस्तन्यतेऽनेन—'अकर्त्तरि च कारके०' से 'घञ्,
अभि निस् तन् अ—प्रादि समास, लशक्वत०, हलन्त्यम्,
अभि निस् तान् अ—अत उपधायाः,
अभिनिष् टान सु—मूर्धन्य आदेश।

इसी प्रकार—अभिनिष्टानो विसर्जनीयः।

(2) अभिनिस्तानो वर्णः
पक्ष में मूर्धन्य आदेश नहीं हुआ।

इसी प्रकार—अभिनिस्तानो विसर्जनीयः।

शब्द०—शब्दसंज्ञा गम्यमान हो तो मूर्धन्य आदेश होता है।

(3) अभिनिस्तनति मृदङ्गः
यहाँ शब्द संज्ञा गम्यमान नहीं है। अतः मूर्धन्य आदेश नहीं हुआ।

समास०—'समासे' का अधिकार यहाँ से लेकर निवृत्त हो जाता है।

(3883) उपसर्गप्रादुर्भ्यामस्तिर्यच्परः *87* (2472)

उपसर्गस्थान्निमित्तात्प्रादुस्शब्दाच्चोत्तरस्य यकारपरस्याच्परस्य चास्तिसकारस्य मूर्धन्यो भवति। अभिषन्ति, निषन्ति, विषन्ति, प्रादुःषन्ति। अभिष्यात्, निष्यात्, विष्यात्, प्रादुःष्यात्। उपसर्गादिति किम्? दधि स्यात्। मधु स्यात्। अस्तीति किम्? अनुसृतम्। विसृतम्। अथासत्यपि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्तिग्रहणे सकारमेव प्रति उपसर्ग आश्रीयते, प्रादुःशब्दस्य च कृभ्वस्तिष्वेव प्रयोग इत्यन्यत्राप्रसङ्गः ? तथाप्येतत् प्रत्युदाहर्तव्यम्-अनुसूते अनुसूः, अनुस्वोऽपत्यम् आनुसेयः । शुभ्रादित्वाड् (4.1.123) ढक्, 'ढे लोपोऽकद्र्वा' (6.4.147) इत्युवर्णलोपः । यच्यर इति किम् ? निस्तः । विस्तः । प्रादुस्तः ।

अर्थ—उपसर्ग में स्थित निमित्त तथा प्रादुस् शब्द से उत्तर यकारपरक तथा अच् परक जो अस् धातु का सकार, उसे मूर्धन्य आदेश होता है।

उदा० (1) अभिषन्ति
अभि अस् झि—शप्, अदिप्रभृतिभ्यः शपः,
अभि अस् अन्ति—झोऽन्तः, 'श्नसोरल्लोपः' से अकारलोप,
अभिसन्ति—मूर्धन्य आदेश।

(2) निषन्ति
पूर्ववत् मूर्धन्य आदेश।

(3) विषन्ति
मूर्धन्य आदेश।

(4) प्रादुःषन्ति (पूर्ववत्)।

(5) अभिष्यात्
अभि अस् तिप्—लिङ्, 'इतश्च' से इकारलोप,
अभि अस् यासुट् त्—अनुबन्धलोप,
अभि स्यास् त्—अकारलोप,
अभि स्यात्—सकारलोप, मूर्धन्य आदेश।

(6) निष्यात् (पूर्ववत्)।

(7) विष्यात्
पूर्ववत् मूर्धन्य आदेश।

(8) प्रादुःष्यात् (पूर्ववत्)।

उपसर्गा०—उपसर्ग में स्थित निमित्त से उत्तर मूर्धन्य आदेश होता है।

(9) दधि स्यात्
'दधि' में इकार मूर्धन्य आदेश का निमित्त है, परन्तु 'दधि' उपसर्ग नहीं है। अतः निमित्त इकार से उत्तर यकारपरक अस् धातु के सकार को मूर्धन्य आदेश नहीं हुआ।

(10) मधु स्यात्
पूर्ववत् मूर्धन्य आदेश नहीं हुआ।

अस्तीति०—अस् धातु के सकार को मूर्धन्य आदेश होता है।

(11) अनुसृतम्
'अन' उपसर्ग है, इसमें उकार निमित्त है, उकार से उत्तर सकार है परन्तु वह 'अस्' धातु का नहीं है। अतः इसे मूर्धन्य आदेश नहीं होता है।

(12) विसृतम्
पूर्ववत् मूर्धन्य आदेश नहीं होता है।

अथास०—अस् धातु का ग्रहण न होने पर भी सकार के प्रति ही उपसर्ग का आश्रय किया जाता है। प्रादुस् शब्द का कृ भू अस्ति—इनमें ही प्रयोग है—यह अन्यत्र प्रसंग है। तदपि यह प्रत्युदाहरण है—

(13) आनुसेयः
अनुसूते—अनु सू क्विप्—अनु सूः,
क्विप् का सर्वापहारलोप, प्रातिपदिक संज्ञा, सु।
अनुस्वोऽपत्यम्—शुभ्रादि गण में पाठ होने से 'ढक्' हुआ,
अनु सू ढक्—एय् आदेश,
आनुसू एय् अ—आदिवृद्धि,
आनुस् एय् अ सु—ढे लोपोऽकद्र्वा।

यच्यर०—यकारपरक तथा अच् परक अस् धातु के सकार को मूर्धन्य आदेश होता है।

(14) निस्तः
नि अस् तस्—शप् का लुक्,
नि स्तस्—अकारलोप, उपसर्ग 'नि' में इकार निमित्त है, इकार से उत्तर अस् धातु का सकार है; परन्तु इससे पर न तो यकार है और न ही अच् है। अतः मूर्धन्य आदेश नहीं होता है।

(15) विस्तः
वि स्तः—पूर्ववत्।

(16) प्रादुस्तः (पूर्ववत्)।

(3884) सुविनिर्दुर्भ्यः सुपिसूतिसमाः *88* (2477)

सु, वि, निर्, दुर्-इत्येतेभ्य उत्तरस्य सुपि, सूति, सम्-इत्येतेषां सकारस्य मूर्धन्यादेशो भवति। 'सुपि' इति स्वपिः कृतसम्प्रसारणो गृह्यते। सुषुप्तः। विषुप्तः। निःषुप्तः। दुःषुप्तः। 'सूति' इति स्वरूपग्रहणम्। सूषूतिः। विषूतिः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

निःषूतिः । दुःषूतिः । सम-सुषमम्, विषमम्, निःषमम्, दुःषमम् ।

सुपेः षत्वं स्वपेर्मा भूद्विसुष्वापेति केन न ।
हलादिशेषान्न सुपिरिष्टं पूर्वं प्रसारणम् ॥

स्थादीनां नियमो नात्र प्राक्सितादुत्तरः सुपिः ।
अनर्थके विषुषुपुः सुपिभूतो द्विरुच्यते ॥
(म० भा०)

'पूर्वत्रासिद्धीयमद्विर्वचने' (पु०प०) इति कृते षत्वे ततो द्विर्वचने ।

अर्थ—सु, वि, निर् तथा दुर्—इन शब्दों से उत्तर सुपि, सूति तथा सम—इनके सकार को मूर्धन्य आदेश होता है ।

उदा० (1) सुषुप्तः
सु स्वप् क्त—लशक्वत०, वचिस्वपियजा० से सम्प्रसारण,
सु सुप् त सु—मूर्धन्य आदेश ।

(2) निःषुप्तः
निर् स्वप् क्त—पूर्ववत्,
निः सुप्त सु—खरवसानयो०, मूर्धन्य आदेश ।

(3) दुःषुप्तः
दुर् स्वप् क्त—पूर्ववत् ।

सूति०—'सूति' यह स्वरूप का ग्रहण है ।

(4) सुषूतिः
सु सूति—मूर्धन्य आदेश, सु ।

(5) विषूतिः (पूर्ववत्) ।
(6) निःषूतिः (पूर्ववत्) ।
(7) दुःषूतिः (पूर्ववत्) ।
(8) सुषमम्
सु सम सु—मूर्धन्य आदेश ।
(9) विषमम् (पूर्ववत्) ।
(10) निःषमम् (पूर्ववत्) ।
(11) दुःषमम् (पूर्ववत्) ।

सुपेः—(शङ्का) स्वप् को सम्प्रसारण करके सुप्—इस प्रकार निर्देश क्यों किया गया है ।

(समा०) 'सुप्' इस प्रकार कृतसम्प्रसारण निर्देश का प्रयोजन यह है कि 'सुप्' के सकार को ही मूर्धन्य आदेश हो, तथा अकृत-सम्प्रसारण स्वप् के सकार को न हो । इस प्रकार सुस्वाप, विस्वाप, सुस्वपन तथा निःस्वपन आदि स्थलों पर मूर्धन्य आदेश नहीं होता है ।

(शंका) यदि ऐसा है तो 'विसुष्वाप'[1] में सम्प्रसारण होने पर भी मूर्धन्य आदेश क्यों नहीं हुआ ।

यहाँ मूर्धन्य आदेश का कोई हेतु नहीं है । अतः नहीं हुआ । परसकार को 'आदेशप्रत्यययोः' से मूर्धन्य आदेश हुआ है ।

हलादि—'सुष्वाप' में 'लिट्यभ्यासस्यो०' से सम्प्रसारण होता है । इससे परकार्य होने से 'हलादिः शेषः' से हलादि शेष करने पर पश्चात् सम्प्रसारण होता है, तथापि 'सुप' रूप नहीं होता है । यहाँ पकार का अभाव रहता है । अतः मूर्धन्य आदेश नहीं होता है ।

पूर्वपक्षवादी ने प्रथम सम्प्रसारण करने पर पश्चात् हलादि शेष से यकार की निवृत्ति की है—इस प्रकार मानते हुए यह कहा है । पकार के बाद में भी निवृत्ति होती है । यह पकार का अभाव होने से 'सुपि' नहीं होता है । अतः ऐसा क्यों कहा गया ? 'एकदेशविकृतमनन्यवत्' परिभाषा से यह 'सुपि' ही है—ऐसा मानना चाहिए । जब परकार्य होने से हलादि शेष कर लेने पर पश्चात् सम्प्रसारण होता है, 'एकदेशविकृतमनन्यवत्' परिभाषा प्रवृत्त नहीं होती है । तब यह सुप् का विकार भी नहीं है । तो फिर क्या है ? यह 'स्वप्' का विकार है ।

इष्टं पूर्वं०—तब हलादि शेष से पूर्व सम्प्रसारण कर लिया जाय । परकार्य (हलादि शेष) को बाध कर पूर्वकार्य (सम्प्रसारण) हो जाता है । अतः हलादि शेष से पूर्व अभ्यास को सम्प्रसारण होना चाहिए ।

स्थादी०—(शंका) 'स्थादिष्वभ्यासेन०' से यह जो नियम है कि स्थादि के अभ्यास को ही षत्व होता है; अन्य के अभ्यास को नहीं । इस नियम से 'विसुष्वाप' यहाँ अभ्यास के सकार को मूर्धन्य आदेश प्राप्त नहीं होता है ।

(समा०) स्थादियों का नियम यहाँ प्रवृत्त नहीं होता है । 'विसुष्वाप' में अभ्यास के सकार को मूर्धन्य आदेश कैसे नहीं होता है ।

प्राक्सिता०—'स्थादिष्वभ्यासेन०' इस लक्षण में 'प्राक्

1. स्वप् लिट्—स्वप् णल्—स्वाप् अ (अनुबन्धलोप, अत उपधायाः),
स्वाप् स्वाप् अ (द्वित्व)—सु स्वाप् अ (लिट्यभ्यासस्यो०),
विसुष्वाप—इस प्रकार यहाँ सम्प्रसारण हुआ है ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सितात्' यह वर्त्तमान है। अतः 'सेवसित' यहाँ सितकथन से पूर्व व्यवस्थित जो षु आदि; उनमें यह नियम होता है। अतः उनके ही अभ्यास के षत्व को व्यावृत्त करता है; अन्यों के अभ्यास के षत्व को नहीं।

उत्तरः—(शंका) 'सुपि' भी सित से पूर्व व्यवस्थित है। अतः यहाँ भी नियम प्रवृत्त होगा ? 'सुपि' का पाठ सित शब्द से उत्तर है; अतः वहाँ इस नियम की प्रवृत्ति कैसे होगी ?

अनर्थके—(शंका) 'अर्थवद्ग्रहणे नानर्थकस्य' परिभाषा से 'सुपि' इस अर्थवान् का ग्रहण करने से यहाँ उसके अनर्थक होने से षत्व नहीं होगा। कारण कि, 'सुपि' यहाँ अर्थवान् नहीं है।

(समा०) यदि अर्थवान् 'सुपि' के ग्रहण से 'विसुष्वाप' में षत्व नहीं होता है तो ऐसा होने पर 'विषुषुपुः' यहाँ पर षत्व नहीं होगा। यहाँ भी अनर्थक होने से षत्व नहीं होना चाहिए।

सुपि०—स्वप् से लिट् स्थानिक 'झि' हुआ। उसे 'उस्' आदेश, 'असंयोगाल्लिट्०' से किद्वत्, द्वित्व तथा 'वचिस्वपि-यजा०' से सम्प्रसारण तथा इससे षत्व होकर 'विषुप् उस्' इस दशा में आन्तरतम्य से 'षुप्' का द्वित्व होता है। इस प्रकार षुप् भूत के द्विर्वचन होने पर 'विषुषुपः' यहाँ अभ्यास का षत्व सिद्ध होता है। परन्तु 'विसुष्वाप' यहाँ षुपिभूत का द्वित्व नहीं है। अतः षत्व नहीं होता है।

पूर्वत्रा०—(शंका) द्वित्व करने में षत्व असिद्ध है। तब 'षुपि-भूतो द्विरुच्यते' यह कैसे कहा जाता है ?

(समा०) 'पूर्वत्रासिद्धीयमद्विर्वचने' से षत्व करने पर पश्चात् द्विर्वचन होता है।

(3885) निनदीभ्यां स्नातेः कौशले *89* (3082)

नि, नदी–इत्येताभ्यामुत्तरस्य स्नातिसकारस्य मूर्धन्यादेशो भवति कौशले गम्यमाने। निष्णातः कटकरणे। निष्णातो रज्जुवर्तने। नद्यां स्नातीति नदीष्णः। 'सुपि स्थः' (3.2.4) इत्यत्र 'सुपि' इति योगविभागात्कप्रत्ययः। कौशलं इति किम् ? निस्नातः। नद्यां स्नातो नदीस्नात इति।

अर्थ—'कौशल' अर्थ गम्यमान रहते नि, नदी—इनसे उत्तर स्ना के सकार को मूर्धन्य आदेश होता है।

उदा० (1) निष्णातः

नि स्ना क्त—लशक्वतद्धि०,

निष् ना त सु—षत्व, णत्व।

(2) नदीष्णः

नद्यां स्नाति—'सप्तमी' से समास, 'सुपि स्थः' यहाँ 'सुपि' इस प्रकार योगविभाग से 'क' प्रत्यय,

नदी स्ना क—लशक्वतद्धिते, 'आतो लोप इटि च' से आकार- लोप,

नदी स्न् अ—षत्व, णत्व, सु।

कौशल०—कौशल अर्थ गम्यमान हो तो मूर्धन्य आदेश होता है।

(3) निस्नातः

मूर्धन्य नहीं हुआ।

इसी प्रकार 'नदीस्नातः' में भी नहीं हुआ।

(3886) सूत्रं प्रतिष्णात् *90* (3083)

'प्रतिष्णातम्' इति निपात्यते सूत्रं चेद्भवति। प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। प्रतिस्नातमित्येवान्यत्र।

अर्थ—यदि सूत्र अर्थ हो तो 'प्रतिष्णात' शब्द निपातनसिद्ध है।

उदा० (1) प्रतिष्णातम्

प्रति स्ना क्त—षत्व का निषेध होने पर षत्व हुआ।

प्रति०—अन्यत्र 'प्रतिस्नातम्' होगा।

(3887) कपिष्ठलो गोत्रे *91* (3084)

'कपिष्ठलः' इति निपात्यते गोत्रविषये। कपिष्ठलो नाम यस्य स कापिष्ठलिः पुत्रः। गोत्र इति किम् ? कपेः स्थलं कपिस्थलम्।

अर्थ—गोत्र के विषय में 'कपिष्ठल' निपातनसिद्ध है।

उदा० (1) कपि स्थल—निपातन से षत्व,

कपिष्ठल—ष्टुना ष्टुः।

कपिष्ठल इ → कापिष्ठलिः पुत्रः।

गोत्र०—गोत्र का विषय हो तो सकार को निपातन से मूर्धन्य आदेश होता है।

(2) कपिस्थलम्

कपेः स्थलम्—मूर्धन्य आदेश नहीं हुआ।

(3888) प्रष्ठोऽग्रगामिनि *92* (2917)

'प्रष्ठः' इति निपात्यते अग्रगामिन्यभिधेये। प्रतिष्ठत इति प्रष्ठोऽश्वः। अग्रतो गच्छतीत्यर्थः। अग्रगामिनीति किम् ? प्रस्थे हिमवतः पुण्ये। प्रस्थो व्रीहीणाम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—अग्रग्रामी अर्थ में 'प्रष्ठ' शब्द निपातनसिद्ध है।

उदा० (1) प्रष्ठः
प्र स्था क—सुपि स्थः, लशक्वत०,
प्र स्थ् अ सु—निपातन से सकार को मूर्धन्य आदेश तथा 'ष्टुना ष्टुः' से ठकार।

अग्र०—अग्रगामी अर्थ में 'प्रष्ठ' शब्द होता है।

(2) प्रस्थः
अन्यत्र मूर्धन्य आदेश नहीं होता है।

(3889) वृक्षासनयोर्विष्टरः *93* (3233)

'विष्टरः' इति निपात्यते वृक्षे आसने च वाच्ये। विपूर्वस्य स्तृणातेः षत्वं निपात्यते। विष्टरो वृक्षः। विष्टरमासनम्। वृक्षासनयोरिति किम्? औलपिवाक्यस्य विस्तरः।

अर्थ—वृक्ष तथा आसन—इन अर्थों में 'विष्टर' शब्द निपातित है।

उदा० (1) विष्टरो वृक्षः
वि स्तृ अप्—ऋदोरप्,
वि स्तर् अ—गुण तथा षत्व निपातन से,
विष् टर् अ सु—ष्टुना ष्टुः।
इसी प्रकार—विष्टरम् आसनम्।

वृक्षा०—वृक्ष तथा आसन अर्थों में 'विष्टर' शब्द निपातित होता है।

(2) विस्तरः
अन्यत्र षत्व नहीं हुआ।

(3890) छन्दोनाम्नि च *94* (3206)

'विष्टारः' इति निपात्यते। विपूर्वात् 'स्तृ'-इत्येतस्माद्धातोः 'छान्दोनाम्नि च' इत्येवं विहितो घञ् इति 'विष्टरः' इत्यपि प्रकृते 'विष्टार' इति विज्ञायते। विष्टारपङ्क्तिः छन्दः। विष्टारो बृहतीछन्दः। छन्दोनाम्नीति किम्? पटस्य विस्तारः।

अर्थ—'विष्टार' का निपातन किया जाता है। छन्दोनाम में विहित विष्टर के स्थान पर विष्टार जानना चाहिए।

उदा० (1) विष्टारपङ्क्तिः छन्दः।

(2) विष्टारो बृहती छन्दः।

छन्दो०—छन्दोनाम के विषय में यह निपातन होता है।

(3) (पटस्य) विस्तारः
यहाँ मूर्धन्य आदेश नहीं हुआ।

(3891) गवियुधिभ्यां स्थिरः *95* (967)

गवियुधिभ्यामुत्तरस्य स्थिरसकारस्य मूर्धन्यादेशो भवति। गविष्ठिरः। युधिष्ठिरः। गोशब्दादहलन्तादपि एतस्मादेव निपातनात्सप्तम्या अलुग्भवति।

अर्थ—गवि तथा युधि से उत्तर स्थिर शब्द के सकार को मूर्धन्य आदेश होता है।

उदा० (1) गविष्ठिरः
गवि स्थिरः—समास, 'हलदन्तात्०' से अलुक् न होकर निपातन से होता है,
गवि स्थिर—मूर्धन्य आदेश, ष्टुना ष्टुः।

(2) युधिष्ठिरः
युधि स्थिर—पूर्ववत्।

गो०—'गो' शब्द से अहलन्त से भी इस निपातन से सप्तमी का अलुक् होता है।

(3892) विकुशमिपरिभ्यः स्थलम् *96* (3085)

वि, कु, शमि, परि-इत्येतेभ्य उत्तरस्य स्थलसकारस्य मूर्धन्यादेशो भवति। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्।

अर्थ—वि, कु, शमि तथा परि—इनसे उत्तर स्थल शब्द के सकार के स्थान पर मूर्धन्य आदेश होता है।

उदा० (1) विष्ठलम्
वि स्थल—मूर्धन्य आदेश, ष्टुना ष्टुः, सु।
(2) कुष्ठलम् (पूर्ववत्)।
(3) शमिष्ठलम् (पूर्ववत्)।
(4) परिष्ठलम् (पूर्ववत्)।

(3893) अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्ख्वङ्गु-मञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः *97* (2918)

अम्ब, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कु, शेकु, शङ्कु, अङ्गु, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि-इत्येतेभ्य उत्तरस्य स्थशब्दसकारस्य मूर्धन्यादेशो भवति।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अम्बष्ठः । आम्बष्ठः । गोष्ठः । भूमिष्ठः । सव्येष्ठः । अपष्ठः । द्विष्ठः । त्रिष्ठः । कुष्ठः । शेकुष्ठः । शङ्कुष्ठः । अङ्गुष्ठः । मञ्जिष्ठः । पुञ्जिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः । *स्थास्थिन्स्थूणामिति वक्तव्यम्* । सव्येष्ठाः । परमेष्ठी । सव्येष्ठृसारथिः ।

अर्थ—अम्ब, आम्ब, गो, भूमि, सव्य, अप, द्वि, त्रि, कु, शेकु, शंकु, अंगु, मंजि, पुंजि, परमे, बर्हिस्, दिवि तथा अग्नि—इन शब्दों से उत्तर 'स्थ' शब्द के सकार को मूर्धन्य आदेश होता है।

उदा० (1) अम्बष्ठः
अम्बा स्थ—समास,
अम्ब स्थ—'ड्यापो सञ्ज्ञाच्छन्द०' से ह्रस्व आदेश,
अम्बष्ठ सु—मूर्धन्य आदेश, ष्टुना ष्टुः।

(2) आम्बष्ठः.
पूर्ववत् मूर्धन्य आदेश।

(3) गोष्ठः
मूर्धन्य आदेश, ष्टुत्व।

(4) भूमिष्ठः (पूर्ववत्)।

(5) सव्येष्ठः
सव्ये तिष्ठति—'क' प्रत्यय,
सव्ये स्थ क—अलुक्, शेष पूर्ववत्।

(6) अपष्ठः
अप स्था क—पूर्ववत्,
अपष्ठ सु—मूर्धन्य आदेश।

(7) द्विष्ठः (पूर्ववत्)।

(8) त्रिष्ठः
मूर्धन्य आदेश।

(9) कुष्ठः
कु स्था क—पूर्ववत्।

(10) शेकुष्ठः (पूर्ववत्)।

(11) शङ्कुष्ठः
मूर्धन्य आदेश।

(12) अङ्गुष्ठः (पूर्ववत्)।

(13) मञ्जिष्ठः (पूर्ववत्)।

(14) पुञ्जिष्ठः (पूर्ववत्)।

(15) परमेष्ठः
परमे स्था क—लशक्वतद्धिते,
परमे ष्ठ सु—पूर्ववत्।

(16) बर्हिष्ठः
बर्हिस् स्था क—पूर्ववत् 'क' प्रत्यय,
बर्हि ष् ठ सु—मूर्धन्य आदेश।

(17) दिविष्ठः
दिवि स्था क—अलुक्,
दिवि ष्ठः सु—मूर्धन्य आदेश।

(18) अग्निष्ठः
अग्नि स्था क—पूर्ववत्।

स्था०—स्था, स्थिन् तथा स्थृ—इनको मूर्धन्य आदेश होता है।

(19) सव्येष्ठाः
सव्ये तिष्ठति—'दिवेर्ङ्डः' के अनुवर्त्तमान रहते 'नयतेर्डिच्च' से डित् तथा 'सव्ये स्थश्छन्दसि' से 'ऋ' हुआ,
सव्ये स्था ऋ—'तत्पुरुषे' से अलुक्,
सव्ये स्थृ—डित् होने से टि का लोप, मूर्धन्य आदेश,
सव्येष्ठृ सु—ष्टुना ष्टुः, 'ऋदुशनस्पुरु०' से 'आनङ्' आदेश, 'सर्वनामस्थाने चा०' से दीर्घ,
सव्येष्ठान् स्—विसर्जनीय।

(20) परमेष्ठीः
परमे स्था इनि—गमेरिनि, परमे स्थः किच्च,
परमे स्थिन्—कित् होने से आलोप,
परमेष्ठिन् सु—मूर्धन्य आदेश, ष्टुना ष्टुः, प्रातिपदिक संज्ञा,
परमेष्ठीन्—'सौ च' से दीर्घ, हल्ङ्याब्भ्यो०, न लोपः०।

(21) सव्येष्ठृसारथिः
सव्येष्ठृ—पूर्ववत्,
सव्येष्ठृसारथि सु—कर्मधारय।

(3894) सुषामादिषु च *98* (1022)

सुषामादिषु शब्देषु सकारस्य मूर्धन्यादेशो भवति। शोभनं साम यस्यासौ सुषामा ब्राह्मणः। दुष्षामा, निष्षामा। निष्षेधः। दुष्षेधः। सुशब्दस्य कर्मप्रवचनीयसंज्ञकत्वान्निर्दुशब्दयोश्च क्रियान्तरविषयत्वादनुपसर्गत्वे सति पाठोऽयम्। 'सेधतेर्गतौ' (8.3.193) इति वा प्रतिषेधबाधनार्थः। सुषन्धिः। दुःषन्धिः। निःषन्धिः। सुष्ठु। दुष्ठु। तिष्ठतेरुणादिष्वेतौ व्युत्पाद्येते। *गौरिषक्थः संज्ञायाम्*

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(ग०सू० 179)। 'ड्यापोः संज्ञाछन्दसोर्बहुलम्' (6.3.63) इति पूर्वपदस्य ह्रस्वत्वम्। प्रतिष्णिका। प्रतिष्णा-शब्दादयं कन्प्रत्ययः। जलाषाहम्। नौषेचनम्। दुन्दु-भिषेवणम्। । *एति संज्ञायामगात्* (ग०सू० 180)। एकारपरस्य सकारस्य मूर्धन्यादेशो भवति इण्कोरुत्तर-स्यागकारात्परस्य संज्ञायां विषये। हरिषेणः। वारिषेणः। जानुषेणी। एतीति किम्? हरिसक्थम्। संज्ञायामिति किम्? पृथ्वी सेना यस्य स पृथुसेन राजा। अगादिति किम्? विष्वक्सेनः। 'इण्कोः' इत्येव-सर्वसेनः।

अर्थ—'सुषाम' आदि शब्दों में सकार को मूर्धन्य आदेश होता है।

उदा० (1) सुषामा
शोभनं साम यस्य—बहुव्रीहि,
सु सामन्—मूर्धन्य आदेश,
सुषामन् सु—विभक्तिकार्य।

(2) दुष्षामा
दुस् सामन्—समास,
दुर् सामन्—ससजुषोः०,
दुः सामन्—खरवसानयोर्वि०,
दुस् सामन्—'वा शरि' से पाक्षिक सकार, सकारपक्ष में,
दुस् षामन्—मूर्धन्य आदेश,
दुष् षामन् सु—ष्टुना ष्टुः, विभक्तिकार्य।

(3) निष्षामा
पूर्ववत् सभी कार्य।

(4) निष्षेधः
निस् सेध—मूर्धन्य आदेश,
निष् षेध सु—ष्टुत्व।

(5) दुष्षेधः (पूर्ववत्)।

सुशब्द०—(शंका) 'सुषेध' आदि तीन शब्दों को 'उपसर्गात्०' से मूर्धन्य आदेश सिद्ध था। तब यहाँ इनका पाठ व्यर्थ है।

(समा०) सु शब्द की कर्मप्रवचनीय संज्ञा है। निस् तथा दुस् शब्दों के क्रियान्तर में विषय होने से उपसर्ग संज्ञा न होने से यह पाठ किया गया है। अथवा इनके पाठ का दूसरा प्रयोजन 'सेधतेर्गतौ' से प्रतिषेध का बाध करना है।

(6) सुषन्धिः
सन्धीयते इति—'उपसर्गे-घोः किः' से 'कि',
सम् धा कि—लशक्वतद्धिते, आकारलोप,
सु सन्धि—मूर्धन्य आदेश, सु।

(7) दुःषन्धिः (पूर्ववत्)।

(8) निषन्धिः
निसन्धि—पूर्ववत्।

(9) सुष्ठुः
सु स्थु—औणादिक प्रत्यय, मृगय्वादयश्च,
सुष्ठु—मूर्धन्य आदेश, ष्टुत्व।

(10) दुष्ठु (पूर्ववत्)।

गौरिषक्थ०—संज्ञा में 'गौरिषक्थ' में मूर्धन्य आदेश होता है। 'ड्यापो सञ्ज्ञा०' से पूर्व पद को ह्रस्वादेश होता है।

(11) गौरिषक्थः
गौर्याः सक्थि—षष्ठी समास,
गौरी सक्थि—'अच्प्रत्यन्नव- पूर्वात्' से समासान्त 'अच्',
गौरि सक्थ् अ—ह्रस्वादेश, प्रातिपदिक संज्ञा,
गौरि षक्थ सु—मूर्धन्य आदेश।
गौर्या इव सक्थि यस्य—बहुव्रीहि समास,
गौरी सक्थि षच्—'बहुव्रीहौ सक्थ्यक्ष्णोः' से समासान्त,
गौरी सक्थि अ—षः प्रत्ययस्य, हलन्त्यम्,
गौरि सक्थ् अ—इकारलोप, ह्रस्वादेश, शेष पूर्ववत्।

(12) प्रतिष्णिका
प्रतिष्णाति—आतश्चोपसर्गे,
प्रति स्ना क—लशक्वत०,
प्रतिष्ण् अ—आकारलोप, मूर्धन्य आदेश, णत्व,
प्रतिष्ण टाप्—स्त्रियाम्, अजाद्यतष्टाप्, अनुबन्धलोप,
प्रतिष्णा कन्—सञ्ज्ञायां कन्,
प्रतिष्ण क—'केऽणः' से ह्रस्वादेश,
प्रतिष्णिका सु—टाप्, प्रत्ययस्थात् कात्०, सुलोप।

(13) जलाषाहम्
जल सह्—पूर्व पद को दीर्घ आदेश,
जल साह्—मूर्धन्य आदेश,
जलाषाहम्—रूप बना।

(14) नौषेचनम्
नौ सेचन—षष्ठी समास,
नौषेचन सु—मूर्धन्य आदेश।

(15) दुन्दुभिषेवणम्
दुन्दुभिसेवन—मूर्धन्य आदेश।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एति०—इण् तथा कवर्ग से उत्तर तथा एकारपरक सकार को मूर्धन्य आदेश होता है, संज्ञा के विषय में; परन्तु गकार से पर सकार को नहीं होता है।

(16) हरिषेणः

हरयः सेना अस्य—बहुव्रीहि समास,

हरि सेना—उपसर्जनलक्षण ह्रस्वादेश,

हरि सेन—सकार इण् वर्ण (इकार) से पर है, सकार से पर एकार है, संज्ञा का विषय है,

हरिषेण सु—मूर्धन्य आदेश, णत्व।

(17) वारिषेणः

वारिसेना—सभी कार्य पूर्ववत्।

(18) जानुषेणी (पूर्ववत्)।

एतीति०—**एकार** है परे जिसके, ऐसे सकार को मूर्धन्य आदेश होता है।

(19) हरिसक्थम्

इण् वर्ण (इकार) से उत्तर सकार है। संज्ञा का विषय है; परन्तु सकार से उत्तर एकार नहीं है। मूर्धन्य आदेश नहीं हुआ।

सञ्ज्ञाया०—**संज्ञा** के विषय में सकार को मूर्धन्य आदेश होता है।

(20) पृथुसेनो राजा

पृथ्वी सेना यस्य सः—समास,

पृथुसेना—'स्त्रियाः' से पुंवद्भाव,

पृथुसेन सु—सकार से परे एकार है, इण् से उत्तर सकार है, परन्तु संज्ञा का विषय न होने से मूर्धन्य आदेश नहीं हुआ।

अगा०—**गकार** से उत्तर सकार को मूर्धन्य आदेश नहीं होता है।

(21) विष्वक्सेनः

विष्वगञ्चतीति—'ऋत्विग्०' से 'क्विन्',

विष्वञ् क्विन्—सर्वापहार लोप,

विष्वच्—'अनिदिताम्०' से नकारलोप,

विष्वच् ई—'उगितश्च' से 'ङीप्', अनुबन्धलोप,

विषुच् ई—'अचः' से अकारलोप,

विषूची—'चौ' से दीर्घ,

विषूचो सेनाऽस्य—बहुव्रीहि,

विष्वच् सेन—ह्रस्वादेश, 'स्त्रियाः' से पुंवद्भाव,

विष्वक्सेन सु—'क्विन् प्रत्ययस्य कुः' से कुत्व, संज्ञा का विषय है, सकार से परे एकार है; परन्तु ककार से उत्तर होने के कारण सकार को मूर्धन्य आदेश नहीं हुआ।

इण्को०—**इण्** तथा **कवर्ग** से उत्तर सकार को मूर्धन्य आदेश होता है।

(22) सर्वसेनः

सकार से उत्तर एकार है, संज्ञा का विषय है; परन्तु सकार इण् व कवर्ग से उत्तर नहीं है। मूर्धन्य आदेश नहीं हुआ।

(3895) नक्षत्राद्वा *99* (1024)

नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगकारादि, मूर्धन्यो भवति। रोहिणीषेणः, रोहिणीसेनः। भरणीषेणः, भरणीसेनः। अगकारादित्येव–शतभिषक्सेनः। अविहितलक्षणो मूर्धन्यः सुषामादिषु द्रष्टव्यः।

अर्थ—नक्षत्रवाची शब्द से उत्तर जो सकार, उसे मूर्धन्य आदेश विकल्प से होता है, यदि उससे परे एकार हो तथा संज्ञा का विषय हो।

उदा० (1) रोहिणीषेणः

रोहिणी एक नक्षत्र का नाम है। इससे उत्तर सकार को मूर्धन्य आदेश हुआ। णत्व हुआ।

(2) रोहिणीसेनः

पक्ष में नहीं हुआ।

(3) भरणीषेणः

मूर्धन्य आदेश पक्ष।

(4) भरणीसेनः

आदेश अभाव पक्ष।

अगका०—**गकार** से उत्तर सकार को मूर्धन्य आदेश नहीं होता है।

(5) शतभिषक्सेनः

गकार से उत्तर सकार है। मूर्धन्य आदेश नहीं हुआ।

अविहि०—जहाँ किसी लक्षण के द्वारा मूर्धन्य आदेश का विधान नहीं किया गया है, परन्तु वह प्राप्त होता है तो उसे सुषामादि में जानना चाहिए।

(3896) ह्रस्वात्तादौ तद्धिते *100* (1325)

ह्रस्वादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति तादौ तद्धिते परतः। तरप्, तमप्, तय, त्व, तल्, तस्, त्यप्–एतानि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रयोजयन्ति। तरप्-सर्पिष्टरम्, यजुष्टरम्। तमप्-सर्पिष्टमम्, यजुष्टमम्। तय-चतुष्टये ब्राह्मणानां निकेताः। त्व-सर्पिष्ट्वम्, यजुष्ट्वम्। तल्-सर्पिष्टा, यजुष्टा। तस्-सर्पिष्टः, यजुष्टः। त्यप्-'आविष्ट्यो वर्द्धते' (ऋ० 1.95.5)। ह्रस्वादिति किम्? गीस्तरा, धूस्तरा। तादाविति किम्? सर्पिस्साद्भवति। प्रत्ययसकारस्य 'सात्पदाद्योः' (8.3.109) इति सत्यपि प्रतिषेधे प्रकृतिसकारस्य स्यात्। तद्धित इति किम्? सर्पिस्तरति। *तिङन्तस्य प्रतिषेधो वक्तव्यः*। भिन्द्युस्तराम्। छिन्द्युस्तराम्।

अर्थ—तकारादि तद्धित प्रत्यय के परे रहते ह्रस्व वर्ण से उत्तर सकार को मूर्धन्य आदेश होता है।

तरप्, तमप्, तय, त्व, तल्, तस् तथा त्यप्—ये तकारादि तद्धित प्रत्यय हैं।

उदा० (1) सर्पिष्टरम्
सर्पिस् तरप्—'द्विवचनविभज्योप०' से 'तरप्',
सर्पिर् तर—हलन्त्यम्, ससजुषो०,
सर्पिः तर—खरवसानयो०,
सर्पिस् तर—विसर्जनीयस्य सः,
सर्पिष् टर सु—मूर्धन्य आदेश, ष्टुत्व।

(2) यजुष्टरम्
यजुस् तरप्—पूर्ववत्।

(3) सर्पिष्टमम्
सर्पिस् तमप्—'अतिशायने०' से 'तमप्', शेष कार्य पूर्ववत्।

(4) यजुष्टमम्
यजुस् तमप्—पूर्ववत्।

(5) चतुष्टयम्
चतुर् तय—सङ्ख्याया अवयवे तयप्,
चतुःतय—विसर्जनीय,
चतुस् तय—सकार,
चतुष् टय सु—मूर्धन्य आदेश, ष्टुत्व।

(6) सर्पिष्ट्वम्
सर्पिस् त्व—तस्य भावस्त्वतलौ, शेष पूर्ववत्।

(7) यजुष्ट्वम् (पूर्ववत्)।

(8) सर्पिष्टा
सर्पिस् तल्—तस्य भावस्त्वतलौ,
सर्पिष् त टाप् सु—मूर्धन्य आदेश, ष्टुत्व, टाप्, सवर्णदीर्घ।

(9) यजुष्टा
यजुस् तल्—पूर्ववत्।

(10) सर्पिष्टः
सर्पिस् तस्—अपादाने चाहीय०,
सर्पिष् टस्—पूर्ववत्।

(11) यजुष्टः
यजुस् तस्—पूर्ववत्।

(12) आविष्ट्यः
आविस् त्यप्—अव्ययात् त्यप्, हलन्त्यम्,
आविष् ट्य सु—सभी कार्य पूर्ववत्।

ह्रस्वात्०—**ह्रस्व वर्ण** से उत्तर सकार को मूर्धन्य आदेश होता है।

(13) गीस्तरा
गिर् तरप्—हलन्त्यम्,
गीर् तर—दीर्घ,
गीस्तर टाप् सु—दीर्घ वर्ण से उत्तर सकार है। मूर्धन्य आदेश नहीं हुआ।

(14) धूस्तरा
धुर् तरप्—पूर्ववत्,
धूस् तर टाप्—मूर्धन्य आदेश नहीं हुआ।

तादौ०—**तकारादि** तद्धित परे रहते सकार को मूर्धन्य आदेश होता है।

(15) सर्पिस्साद् भवति
प्रत्यय सकार का 'सात्पदाद्योः' से निषेध होने पर भी प्रकृति सकार को होता है।

तद्धिते०—तकारादि **तद्धित** के परे रहते सकार को मूर्धन्य आदेश होता है।

(16) सर्पिस्तरति
सर्पिस् तरति—तकारादि परे है, परन्तु तद्धितसंज्ञक न होने से सकार को मूर्धन्य आदेश नहीं हुआ।

तिङन्त०—तिङन्त सकार को मूर्धन्य आदेश नहीं होता है।

(17) भिन्द्युस्तराम्
भिद् लिङ्—लिङ्,
भिद् यासुट् झि—यासुट् परस्मैपदे०, झेर्जुस्
भि श्नम् द् यासुट् जुस्—अनुबन्धलोप,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भिन द् यास् उस्—'श्नसोरल्लोपः' से अकारलोप,
भिन् द् या उस्—'लिङः सलोपो०' से पररूप, 'तिङश्च' से 'तरप्' तथा 'किमेत्तिङव्यय०' से 'आमु', मूर्धन्य आदेश नहीं हुआ।

(18) छिन्द्युस्तराम्
पूर्ववत् आदेश अभाव।

(3897) निसस्तपतावनासेवने *101* (2403)

निसः सकारस्य मूर्धन्यादेशो भवति तपतौ परतोऽनासेवनेऽर्थे। आसेवनम् = पुनः पुनः करणम्। निष्टपति सुवर्णम्। सकृदग्निं स्पर्शयतीत्यर्थः। अनासेवन इति किम्? निस्तपति सुवर्णं सुवर्णकारः। पुनः पुनरग्निं स्पर्शयतीत्यर्थः। 'निष्टप्तं रक्षः, निष्टप्ता अरातय' (वा० सं० 1.7) इत्यत्र सदप्यासेवनं न विवक्ष्यते। छान्दसो वा वर्णविकारः।

अर्थ—अनासेवन अर्थ में वर्त्तमान निस् के सकार को मूर्धन्य आदेश होता है, तप् धातु के परे रहते।

पुनः पुनः करना 'आसेवन' कहलाता है।

उदा० (1) निष्टपति सुवर्णम्
निस् तपति—सकार को मूर्धन्य आदेश हुआ, ष्टुत्व हुआ।

आसेवने०—आसेवन अर्थ में मूर्धन्य आदेश नहीं होता है।

(2) निस्तपति सुवर्णं स्वर्णकारः
मूर्धन्य आदेश नहीं हुआ।

(3) निष्टप्तं रक्षः। (4) निष्टप्ता अरातयः।
यहाँ आसेवन अर्थ है, परन्तु विवक्षित नहीं है। अथवा छान्दस वर्णविकार जानना चाहिए।

(3898) युष्मत्तत्ततक्षुःष्वन्तःपादम् *102* (3640)

युष्मत्, तत्, ततक्षुस्–इत्येतेषु तकारादिषु परतः सकारस्य मूर्धन्यादेशो भवति स चेत् सकारोऽन्तःपादं भवति। युष्मदादेशः–त्वम्, त्वाम्, ते, तव। त्वम्–अग्निष्ट्वं नामासीत्। त्वा–अग्निष्ट्वा वर्धयामसि। ते–'अग्निष्टे (आप०गृ० 4.10.17) विश्वमानय'। तव–'अ॒प्स्व॑ग्ने सधि॒ष्टव॒' (ऋ० 8.43.9)। तत्–'अ॒ग्निष्ट-द्विश्व॒मापृणाति' (ऋ० 10.2.4)। ततक्षुस्–'द्यावा॑पृथि॒वी निं॑ष्टतक्षुः' (ऋ० 10.31.7)। अन्तः पादमिति किम्? यन्मं आत्मं॑नो मि॒न्दाभूं॑दु॒ग्निस्तत्पुन॒राहा॑र्जातवेदा॒ विचर्षणिः (तै०सं० 3.2.5.4)।

अर्थ—तकारादि युष्मत्, तत् तथा ततक्षुस् के परे रहते सकार के स्थान पर मूर्धन्य आदेश होता है, यदि वह सकार पाद के मध्य में वर्त्तमान हो। युष्मद् के स्थान पर तकारादि आदेश ये हैं—त्वम्, त्वाम्, ते, तव।

उदा० (1) अग्निष्ट्वम्
अग्नि स् त्वम्—रु, विसर्जनीय, पुनः सकार,
अग्निष् ट्वम्—मूर्धन्य आदेश, ष्टुना ष्टुः।

(2) अग्निष्ट्वा (पूर्ववत्)।

(3) अग्निष्टे
अग्नि स् ते—पूर्ववत्।

(4) सधिष्टव
सधिस् तव—पूर्ववत्।

(5) अग्निष्टत्
अग्नि स् तत्—पूर्ववत्।

(6) निष्टतक्षुः
निस् ततक्षुस्—मूर्धन्य आदेश।

अन्तःपा०—पादमध्य सकार को मूर्धन्य आदेश होता है।

(7) अग्निस्तत्
यहाँ नहीं हुआ।

(3899) यजुष्येकेषाम् *103* (3641)

यजुषि विषये युष्मत्तत्ततक्षुःषु परत एकेषामाचार्याणां मतेन सकारस्य मूर्धन्यादेशो भवति। अर्चिभिष्ट्वम्, अर्चिभिस्त्वम्। 'अ॒ग्निष्टेऽग्रम्, अग्निस्तेऽग्रं॑म्' (तै० 3.5.6.2)। अ॒ग्निष्टत् (तै० 1.1.14.5), 'अ॒ग्निस्तत्' (तै०3.2.5.4)। अर्चिर्भिष्टतक्षुः। अर्चिर्भिस्ततक्षुः।

अर्थ—यजुर्मन्त्र के विषय में तकारादि युष्मत्, तत् तथा ततक्षुस् के परे रहते सकार के स्थान पर कुछ आचार्यों के मत में मूर्धन्य आदेश होता है।

उदा० (1) अर्चिभिष्ट्वम्
मूर्धन्य आदेश।
(2) अर्चिभिस्त्वम्
आदेश अभाव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3) अग्निष्टे
आदेश पक्ष।

(4) अग्निस्ते
आदेश अभाव।

(5) अग्निष्टत्
आदेश हुआ।

(6) अग्निस्तत्
आदेश अभाव।

(7) अर्चिभिष्टतक्षुः
आदेश हुआ।

(8) अर्चिभिस्ततक्षुः
पक्ष में आदेश नहीं हुआ है।

(3900) स्तुतस्तोमयोश्छन्दसि *104* (3642)

'एकेषाम्' इति वर्तते। स्तुत, स्तोम-इत्येतयोः सकारस्य छन्दसि विषये मूर्धन्यादेशो भवति एकेषामाचार्याणां मतेन। त्रिभिष्टुतस्य, त्रिभिस्तुतस्य। गोष्टोमं (तै०सं० 7.4.11.1)। षोडशिनम्, गोस्तोमं षोडशिनम् (आप० श्रौ० 23.12.18)। 'पूर्वपदात्' इत्येव सिद्धे प्रपञ्चार्थमिदम्।

अर्थ—'एकेषाम्' का अनुवर्त्तन है। स्तुत तथा स्तोम के परे रहते सकार के स्थान पर मूर्धन्य आदेश होता है कुछ आचार्यों के मत में तथा वेद के विषय में।

उदा० (1) त्रिभिष्टुतस्य
त्रिभिस् स्तुतस्य—मूर्धन्य आदेश, ष्टुत्व।

(2) त्रिभिस्तुतस्य
पक्ष में आदेश नहीं हुआ।

(3) गोष्टोमम्
मूर्धन्य आदेश।

(4) गोस्तोमम्
मूर्धन्य-अभाव।

पूर्वप०—'पूर्वपदात्०' से मूर्धन्य आदेश सिद्ध ही है। तब प्रपञ्च के लिए यह विधान है।

(3901) पूर्वपदात् *105* (3643)

'छन्दसि' इति वर्त्तते, 'एकेषाम्' इति च। पूर्वपदस्थान्नि-मित्तादुत्तरस्य सकारस्य मूर्धन्यादेशो भवति छन्दसि विषये एकेषामाचार्याणां मतेन। 'द्विष्ठन्थिः' (मै० 3.8.2) द्विसन्धिः। 'त्रिषन्धिः' (मै० 3.8.2), त्रिसन्धिः। मधुष्ठानम्, मधुस्थानम्। 'द्विषाहस्रं चिन्वीत' (तै० 5.6.8.2) द्विसाहस्रं चिन्वीत। असमासेऽपि यत्पूर्वपदं तदपीह गृह्यते। 'त्रिः षमृद्धत्वाय' (ऐ०ब्रा० 2.16), त्रिः समृद्धत्वाय।

अर्थ—छन्दसि, एकेषाम्—इनका अनुवर्त्तन है। वेद के विषय में कुछ आचार्यों के मत में पूर्व पद में स्थित निमित्त से उत्तर सकार को मूर्धन्य आदेश होता है।

उदा० (1) द्विषन्धिः
द्वि सन्धि—बहुव्रीहि अथवा षष्ठी समास,
द्विषन्धि सु—मूर्धन्य आदेश।

(2) द्विसन्धिः
पक्ष में मूर्धन्य-अभाव।

(3) त्रिषन्धि
पूर्ववत् मूर्धन्य-आदेश।

(4) त्रिसन्धिः
मूर्धन्य आदेश अभाव।

(5) मधुष्ठानम्।
मधु स्थान—मूर्धन्य आदेश, ष्टुत्व।

(6) मधु स्थानम्।
मूर्धन्य आदेश अभाव।

(7) द्विषाहस्रम्
द्वयोः सहस्रयोर्भवति—तद्धितार्थ समास,
द्विसहस्र अण्—तत्र भवः,
द्विसाहस्र अ—'सङ्ख्यायाः संवत्स०' से उत्तरपदवृद्धि,
द्विषाहस्र सु—मूर्धन्य आदेश।

(8) द्विसाहस्रम्
पक्ष में मूर्धन्य आदेश अभाव।

असमा०—असमास की दशा में जो पूर्व पद, उसका भी यहाँ ग्रहण होता है।

(9) त्रिःषमृद्धत्वाय
मूर्धन्य आदेश।

(10) त्रिःसमृद्धत्वाय
मूर्धन्य आदेश अभाव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3902) सुञः *106* (3644)

'सुञ्' इति निपात इह गृह्यते, तस्य पूर्वपदस्थान्निमित्तादुत्तरस्य मूर्धन्यादेशो भवति छन्दसि विषये। 'अभी षुणः संखीनाम्' (ऋ० 4.31.3)। 'उर्ध्व ऊ षु णः ऊतये' (ऋ० 1.36.13)। ('इकः सुञि' (ऋ० 6.3.134) इति दीर्घः। 'नश्च धातुस्थोरुषुभ्यः' (ऋ० 8.4.27) इति णत्वम्।)

अर्थ—यहाँ 'सुञ्' निपात का ग्रहण किया जाता है। पूर्व पद में स्थित निमित्त से उत्तर सुञ् के सकार को मूर्धन्य आदेश होता है, वेद के विषय में।

उदा० (1) अभीषुणः

अभी सु नः—मूर्धन्य आदेश। 'इकः सुञि' से दीर्घ आदेश, 'नश्च धातुस्थो०' से णत्व।

(2) ऊर्ध्व ऊषुणः

मूर्धन्य आदेश। पूर्ववत्।

(3903) सनोतेरनः *107* (3645)

सनोतेरनकारान्तस्य सकारस्य मूर्धन्यादेशो भवति। 'गोषा' (ऋ० 9.2.10)। 'नृषा' (ऋ० 9.2.10)। अन इति किम्? 'गोसनिं वाचंमुदेयम्' (अथ० 3.20.10)। 'पूर्वपदात्' इत्येव सिद्धे नियमार्थमिदम्। अत्र केचित् सवनादिपाठाद् गोसनिर्नियमस्य फलं न भवतीति सिसानयिषतीति प्रत्युदाहरन्ति। सिसनिषतेरप्रत्ययः, सिसनीरित्यपरे।

अर्थ—अनकारान्त सन् धातु के सकार को मूर्धन्य आदेश होता है।

उदा० (1) गोषाः

गां सनोति—इस अर्थ में

गो षण् विट्—धात्वादेः षः सः, 'जनसनखन०' से 'विट्', 'विट्' का सर्वापहारलोप,

गो स आ सु—'विड्वनोरनु०' से आत्त्व, मूर्धन्य आदेश।

(2) नृषाः

नृ सन् विट्—सभी कार्य पूर्ववत्।

अन इति०—अनकारान्त सन् के सकार को मूर्धन्य आदेश होता है।

(3) गोसनिम्

गो सन् इन्—'छन्दसि वनसन०' से 'इन्' हुआ,

गो सनि अम्—प्रातिपदिक संज्ञा, नकारान्त होने से सकार को मूर्धन्य आदेश नहीं हुआ, द्वितीया एकवचन।

पूर्वपदा०—'पूर्वपदात्' से यह सिद्ध था। तब नियमार्थ विधान किया गया है। यहाँ कुछ विद्वान् सवनादि पाठ से 'गोसनि' यह नियम का फल नहीं होता है—ऐसा मानते हैं। अतः वे 'सिसानयिषति' प्रत्युदाहरण देते हैं।

(4) सिसानयिषति

सन् णिच्—अत उपधायाः,

सानि सन्—धातोः कर्मणः समा०,

सानि इ स—इट्, अंग को गुण,

सानयि स—अय् आदेश, 'सन्यङोः' से द्वित्व,

स सान यि स—हलादिः शेषः, ह्रस्वः,

सि सानयिष—सन्यतः, आदेशप्रत्यययोः, धातुसंज्ञा,

सि सानयिष शप् तिप्—अतो गुणे।

यदि यह नियमार्थ न कहा होता तो 'स्तौतिण्यो०' से यहाँ षत्व हो जाता।

(5) सिसनीः

सन् सन्—इट्, द्वित्व,

सन् इ स—पूर्वोऽभ्यासः,

स सनिस—हलादिः शेषः,

सि सनिष—सन्यतः आदेशप्रत्यययोः, धातुसंज्ञा,

सि सनिष क्विप्—सर्वापहारलोप,

सिसनिष्—'अतो लोपः' से अकारलोप,

सिसनि रु—'आदेशप्रत्यययोः' के असिद्ध होने से षकार को 'ससजुषोः०' से रुत्व,

सिसनीर्—'वोरुपधाया दीर्घ०' से दीर्घ आदेश, विसर्जनीय। षत्वभूत सन् के अभाव से 'स्तौतिण्यो०' नियम प्रवृत्त नहीं होता है। यहाँ यदि यह नहीं कहा जाता तो 'आदेशप्रत्यययोः' से मूर्धन्य होने लगता। ऐसा होने पर 'आदेशप्रत्यययोः' की प्रवृत्ति नहीं होती है।

(3904) सहेः पृतनर्ताभ्यां च *108* (3646)

पृतना, ऋत-इत्येताभ्यामुत्तरस्य सहिसकारस्य मूर्धन्यादेशो भवति। 'पृतनाषाहम्' (ऋ० 6.72.5) ऋताषाहम्। केचिद् 'सहेः' इति योगविभागं कुर्वन्ति-'ऋतीषह'(ऋ० 6.14.4)मित्यत्रापि यथा स्यात्। ऋतिशब्दस्य पूर्वपदस्य संहितायामेतद्दीर्घत्वं षत्वं च। अवग्रहे तु

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ऋतिसहमित्येव भवति। चकारोऽनुक्तसमुच्चयार्थः। तेन 'ऋतीषहमिति' सिद्धम्।

अर्थ—पृतना तथा ऋत—इनसे उत्तर 'सहि' के सकार को मूर्धन्य आदेश होता है।

उदा० (1) पृतनाषाहम्
पृतना सह् ण्वि—छन्दसि सहः,
पृतना साह्—अत उपधायाः, 'ण्वि' का सर्वापहारलोप, मूर्धन्य आदेश हुआ।

(2) ऋतीषाहम्
ऋति सह् ण्वि—'अन्येषामपि दृश्यते' से दीर्घ, शेष पूर्ववत्।

केचिद्०—कुछ विद्वान् 'सहेः' इस प्रकार योगविभाग करते हैं; ताकि निम्नलिखित में मूर्धन्य आदेश हो जाय। पूर्व पद 'ऋति' शब्द को संहिता में दीर्घ आदेश तथा षत्व होता है।

(3) ऋतीषहम्
ऋति सह्—'कृत्यल्युटो०' से 'क्विप्',
ऋति सह् क्विप्—प्रत्यय का सर्वापहारलोप,
ऋती सह्—'नहिवृतिवृषिव्यधि०' से दीर्घ आदेश,
ऋतीषह्—मूर्धन्य आदेश, प्रातिपदिक संज्ञा।

अवग्रहे०—अवग्रह में 'ऋतिसहम्' ही होता है। अनुक्त समुच्चय के लिए चकार का ग्रहण है। तब 'ऋतीषहम्' सिद्ध होता है।

(3905) न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम् *109* (3168)

रेफपरस्य सकारस्य सृपि, सृजि, स्पृशि, सवनादीनां च मूर्धन्यो न भवति। रपर-'विस्रंसिकायाः कांण्डं जुहोति' (मै०सं० 2.6.1)। 'विस्रब्धः कथयति'। सृपि-'पुरा क्रूरस्य विसृपंः' (वा०सं० 1.28)। सृजि-वाचो विसर्जनात्। स्पृशि-'दिंविस्पृशंम्' (ऋ० 1.142.8)। स्पृहि-निस्पृहं कथयति। सवनादीनाम्-सवने सवने। सूते सूते। सामेसामे। सवनमुखे सवनमुखे। किं स्वतीति किंसंकिंसम्। अनुसवनमनुसवनम्। 'गोसनिं' (अथ० 3.20.10)। गोसनिम्। अश्वसनिमश्वसनिम्। पूर्वपदादिति प्राप्तेः प्रतिषेधः। अश्वसनिग्रहणमनिणोऽपि षत्वमस्तीति ज्ञापनार्थम्। तेन जलाषाहम्, अश्वषाहमित्येतत्सिद्धं भवति। क्वचिदेवं गणपाठः-सवनेसवने। अनुसवनेऽनुसवने। संज्ञायां बृहस्पतिसवः। शकुनिसवनम्। सोमेसोमे। सूतेसूते। संवत्सरेसंवत्सरे। किंसंकिंसम्। बिसंबिसम्। मुसलंमुसलम्। गोसनिमश्वसनिम्। सवनादिः।

अर्थ—रेफ परक सकार तथा सृप्, सृज्, स्पृश्, स्पृह् व सवनादि के सकार के स्थान पर मूर्धन्य आदेश नहीं होता है।

उदा० (क) रपरस्य—
(1) विस्रंसिकायाः
विस्रंस् ण्वुल्—'रोगाख्यायां०', चुटू, हलन्त्यम्,
विस्रंसक—युवोरनाकौ, प्रातिपदिक संज्ञा, सकार को मूर्धन्य आदेश नहीं हुआ,
विस्रंसक टाप्—अजाद्यतष्टाप्, प्रत्ययस्थात्०,
वि स्रंसिका ङस्—प्रातिपदिक संज्ञा, विभक्तिकार्य।

(2) विस्रब्धः
वि स्रन्भ् क्त—लशक्वत०,
वि स्रभ् त—'अनिदिताम्०' से नकारलोप,
वि स्रभ् ध—'झषस्तथो०' से धकार,
वि स्र ब् ध सु—'झलां जश् झशि' से जश्त्व, मूर्धन्य निषेध।

(ख) अन्येषां सकारस्य—
(3) विसृपः
वि सृप् कसुन्—सृपितृदोः कसुन्,
वि सृप् अस्—अनुबन्धलोप, मूर्धन्य आदेश नहीं हुआ।

(4) विसर्जनात्
वि सृज् ल्युट्—लशक्वत०, हलन्त्यम्,
वि सर्ज् अन—युवोरनाकौ, गुण, मूर्धन्य आदेश निषेध,
विसर्जन ङसि—प्रातिपदिक संज्ञा।

(5) दिविस्पृशम्
दिवि स्पृश् क्विन्—स्पृशोऽनुदके०, 'तत्पुरुषे कृति०' से अलुक्,
दिविस्पृश्—सर्वापहार लोप, प्रातिपदिक संज्ञा, विभक्तिकार्य।

(6) निस्पृहम्
नि स्पृह् अच्—'एरच्' से 'अच्' प्रत्यय, णिलोप,
नि स्पृह अम्—मूर्धन्य आदेश का अभाव, विभक्तिकार्य।

(7) सवने सवने
सु ल्युट्—गुण,
सवन ङि—वीप्सा अर्थ में द्वित्व।

(8) सूते सूते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षू → सू—धात्वादेः षः सः,
सू क्त ङि—पूर्ववत्, वीप्सा अर्थ में द्वित्व।

(9) सामे सामे
(10) सवनमुखे सवनमुखे
(11) किंसं किंसम्
(12) अनुसवनमनुसवनम्
(13) गोसनिं गोसनिम्
(14) अश्वसनिमश्वसनिम्

पूर्वपदा०—'पूर्वपदात्०' से मूर्धन्य आदेश प्राप्त था। उसका निषेध हुआ।

अश्वसनि०—'अश्वसनि' के ग्रहण से ज्ञापित होता है कि इण् भिन्न को भी मूर्धन्य आदेश होता है। तब जलाषाहम् तथा अश्वषाहम्—ये रूप भी सिद्ध होते हैं।

(3906) सात्पदाद्योः *110* (2123)

'सात्' इत्येतस्य, पदादेश्च मूर्धन्यादेशो न भवति। 'विभाषा सातिकात्स्न्यें' (5.4.52)। प्रत्ययसकारत्वात् प्राप्तिः, पदादेश्चादेशसकारत्वात्। सात्–अग्निसात्, दधिसात्, मधुसात्। पदादेः–दधि सिञ्चति। मधु सिञ्चति।

अर्थ—'सात्' तथा 'पदादि' के सकार को मूर्धन्य आदेश नहीं होता है। 'विभाषा सातिकात्स्न्यें' से 'सात्' प्रत्यय होता है। प्रत्यय का सकार होने से मूर्धन्य आदेश की प्राप्ति थी तथा पदादि सकार को आदेश का सकार होने से मूर्धन्य आदेश प्राप्त था।

उदा० (क) सात्—
(1) अग्निसात्
मूर्धन्य आदेश नहीं हुआ।
(2) दधिसात् (पूर्ववत्)।
(3) मधुसात् (पूर्ववत्)।

(ख) पदादेः—
(4) दधि सिञ्चति
मूर्धन्य आदेश-निषेध।
(5) मधु सिञ्चति (पूर्ववत्)।

(3907) सिचो यङि *111* (2640)

सिचः सकारस्य यङि परतो मूर्धन्यादेशो न भवति। परिसेसिच्यते। अभिसेसिच्यते। 'उपसर्गात्' (8.3.65) इति या प्राप्तिः सा पदादिलक्षणमेव प्रतिषेधं बाधते, न 'सिचो यङि' इति। तस्मादयं प्रतिषेधः सर्वत्र भवति। यङीति किम्? अभिषिषिक्षति।

अर्थ—यङ् परे रहते सिच् के सकार को मूर्धन्य आदेश नहीं होता है।

उदा० (1) परिसेसिच्यते
सिच् यङ्—धातोरेकाचोः०, हलन्त्यम्,
से सिच् य—'सन्यङोः' से द्वित्व, हलादिः शेषः,
सेसिच्य—गुणो यङ्लुकोः, धातुसंज्ञा, मूर्धन्य आदेश का निषेध,
परिसेसिच्य शप् त—अतो गुणे।

(2) अभिसेसिच्यते
सिच् यङ्—पूर्ववत्।

उपसर्गा०—'उपसर्गात्' से जो प्राप्ति होती है, वह पदादि-लक्षण निषेध का ही बाध करती है। 'सिचो यङि' नहीं। अतः यह निषेध सर्वत्र होता है।

यङीति०—यङ् परे रहते मूर्धन्य आदेश का निषेध होता है।

(3) अभिषिषिक्षति
सिच् सन्—'सन्यङोः' से द्वित्व,
सि सिच् स—हलादि शेष, चोः कुः, आदेशप्रत्यययोः,
सि सिक्ष—धातुसंज्ञा,
अभिषिषिक्ष शप् ति—मूर्धन्य आदेश हो गया।

(3908) सेधतेर्गतौ *112* (2278)

गतौ वर्त्तमानस्य सेधतेः सकारस्य मूर्धन्यादेशो न भवति। अभिसेधयति गाः। परिसेधयति गाः। गताविति किम्? शिष्यमकार्यात् प्रतिषेधयति।

अर्थ—गति अर्थ में वर्त्तमान षिध धातु के सकार को मूर्धन्य आदेश नहीं होता है।

उदा० (1) अभिसेधयति गाः
मूर्धन्य आदेश नहीं हुआ।
(2) परिसेधयति गाः (पूर्ववत्)।

गतावि०—गति अर्थ में वर्त्तमान सिध् के सकार को मूर्धन्य आदेश नहीं होता है।

(3) प्रतिषेधयति
मूर्धन्य आदेश हो गया।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(3909) प्रतिस्तब्धनिस्तब्धौ च *113* (3027)

प्रतिस्तब्ध, निस्तब्ध–इत्येतौ मूर्धन्यप्रतिषेधाय निपात्येते। 'स्तम्भेः' (8.3.67) इति प्राप्तं षत्वं प्रतिषिध्यते। प्रति-स्तब्धः। निस्तब्धः।

अर्थ—प्रतिस्तब्ध तथा निस्तब्ध—इन शब्दों में मूर्धन्य आदेश निषेध का निपातन किया जाता है।

'स्तन्भः' से प्राप्त षत्व का निषेध किया जाता है।

उदा० (1) प्रतिस्तब्धः
प्रति स्तम्भ् क्त—'अनिदिताम्०' से अनुनासिकलोप,
प्रति स्तभ् त—झषस्तथो०,
प्रति स्तब् ध—झलां जश् झशि, सु।

(2) निस्तब्धः
निस् स्तम्भ् क्त—पूर्ववत्।

(3910) सोढः *114* (2358)

सहिरयं सोढ्भूतो गृह्यते, तस्य सकारस्य मूर्धन्यादेशो न भवति। परिसोढः, परिसोढुम्, परिसोढव्यम्। सोढभूत-ग्रहणं किम्? परिषहते।

अर्थ—'सोढ्' रूप को प्राप्त 'सह्' धातु का ग्रहण है। उसके सकार को मूर्धन्य आदेश नहीं होता है।

उदा० (1) परिसोढः
परि सह् क्त—'परिनिविभ्यः' से प्राप्त मूर्धन्य आदेश का निषेध हुआ,
परि सोढ् ध—सहिवहोरो०, हो ढः, झषस्तथो०,
परि सोढ् ढ—ढो ढे लोपः। सु।

(2) परिसोढुम्
परि सह् तुमुन् —अनुबन्धलोप,
परि सोढ् ढुम्—पूर्ववत्, ढो ढे लोपः।

(3) परिसोढव्यम्
परि सह् तव्यत्—पूर्ववत्।

सोढ्०—'सोढ्' इस रूप को प्राप्त सह् धातु के सकार को मूर्धन्य आदेश का निषेध होता है।

(4) परिषहते
परि सह् शप् त—मूर्धन्य आदेश हो गया।

(3911) स्तम्भुसिवुसहां चङि *115* (2580)

स्तम्भु, सिवु, सह–इत्येतेषां चङि परतः सकारस्य मूर्धन्यादेशो न भवति। 'स्तम्भेः' (8.3.77) इति 'परि-निविभ्यः (8.3.70) इति च प्राप्तो मूर्धन्यः प्रतिषिध्यते। स्तम्भु–पर्यतस्तम्भत्, अभ्यतस्तम्भत्। सिवु–पर्यसीषिवत्, न्यसीषिवत्। सह–पर्यसीषहत्, व्यसीषहत्। *स्तम्भुसि-वुसहां चङि उपसर्गादिति वक्तव्यम्*। उपसर्गाद्या प्राप्ति-स्तस्या एव प्रतिषेधो यथा स्यात् अभ्यासाद्या प्राप्तिस्तस्या मा भूदिति। तथा चैवोदाहृतम्।

अर्थ—चङ् परे रहते स्तम्भ्, सिव् तथा सह्—इनके सकार को मूर्धन्य आदेश नहीं होता है।

'स्तम्भेः' से तथा 'परिनिविभ्यः' से प्राप्त मूर्धन्य आदेश का निषेध किया जाता है।

उदा० (क) स्तम्भ् धातोः—
(1) पर्यतस्तम्भत्
स्तम्भ् णिच्—धातुसंज्ञा,
स्तम्भ् इ त्—लुङ्, 'इतश्च' से इकारलोप, च्लि,
स्तम्भ् इ चङ् त्—'णिश्रिद्रुस्रुभ्यः०' से 'चङ्', चुटू, हलन्त्यम्,
स्तम्भ् अ त्—णेरनिटि,
त स्तम्भ् अ त्—'चङि' से द्वित्व, शर्पूर्वाः खयः, 'प्राक्सितादड्०' तथा 'स्थादिष्वभ्यासेऽ' से प्राप्त मूर्धन्य-निषेध,
परि अ तस्तम्भत्—अट्, यण्।

(2) अभ्यतस्तम्भत् (पूर्ववत्)।

(ख) सिव् धातोः—
(3) पर्यसीषिवत्
षिवु → सिव्—धात्वादेः षः सः, उपदेशेऽजनु०,
सिव् णिच्—पुगन्तलघूपधस्य च,
सेव् इ चङ् त्—लुङ्, पूर्ववत् 'चङ्',
सेवि अ त्—णिलोप, णौ चङ्युपधा०,
सि सिव् अ त्—'चङि' से द्वित्व, हलादिः शेषः,
सी सिवत्—सन्वल्लघुनि०, दीर्घो लघोः,
पर्य सीषि वत्—यण्, आदेशप्रत्यययोः।

(4) न्यसीषिवत् (पूर्ववत्)।

(5) पर्यसीषहत्
षह → सह्—आदेशप्रत्यययोः, उपदेशेऽजनु०,
सह् णिच्—अत उपधायाः, धातुसंज्ञा,
साहि—पूर्ववत् लुङ्, चङ्, णिलोप,
साह् अ त्—उपधाह्रस्व, द्वित्व,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स सहत्—हलादिः शेषः,
सि षहत्—सन्वल्लघु०, सन्यतः, आदेशप्रत्यययोः,
असीषहत्—दीर्घो लघोः।

(6) न्यसीषहत् (पूर्ववत्)।

उपसर्ग से उत्तर स्तम्भ्, सिव् तथा सह्—इन धातुओं के सकार को मूर्धन्य आदेश होता है। उपसर्ग से उत्तर जो प्राप्ति होती है, उसका निषेध हो जाय। अभ्यास से उत्तर जो मूर्धन्य आदेश की प्राप्ति है, उसका निषेध न हो।

(3912) सुनोतेः स्यसनोः *116* (2524)

सुनोतेः सकारस्य मूर्धन्यादेशो न भवति स्ये सनि च परतः। अभिसोष्यति। परिसोष्यति। अभ्यसोष्यत्। पर्यसोष्यत्। सनि किमुदाहरणम्? अभिसुसूषति। नैतदस्ति प्रयोजनम्, तत्र 'स्तौतिण्योरेव षण्यभ्यासात्' (8.3.71) इति नियमान्न भविष्यति। इदं तर्हि–अभिसुसूषते? एतदपि नास्ति; 'स्थादिष्वभ्यासेन चाभ्यासस्य' (8.3.64) इति नियमात्। इदं तर्ह्यभिसुसूषतेरप्रत्ययः अभिसुसूरित्युदाहरणमिति? अत्र हि सन्वभूतो न भवतीत्यभ्यासात् प्राप्तिरस्ति। स्यसनोरिति किम्? सुषाव।

अर्थ—स्य तथा सन् के परे रहते 'षु' धातु के सकार को मूर्धन्य आदेश नहीं होता है।

उदा० (1) अभिसोष्यति
सु स्य ति—ल्रट् शेषे च, स्यतासी ल्लुटोः,
अभि सो स्य ति—अंग को गुण, आदेशप्रत्यययोः।

(2) परिसोष्यति (पूर्ववत्)।
(3) अभ्यसोष्यत्
सु स्य त्—ल्रङ्, इतश्च, स्य, गुण,
सो स्यत्—अंग को गुण,
अभि अ सोष्यत्—अट्, आदेशप्रत्यययोः।

(4) पर्यसोष्यत् (पूर्ववत्)।
(5) अभिसुसूषति
सु सन्—'अज्झनगमां०' से दीर्घ,
सु सू स—सन्यङोः, ह्रस्वः,
अभि सुसूष—आदेशप्रत्यययोः, धातुसंज्ञा,
अभि सु सूष शप् ति—अतो गुणे।

नैतद०—यह प्रयोजन नहीं है। यहाँ 'स्तौतिण्योरेव०' नियम से नहीं होगा।

(6) अभिसुसूषते

एतदपि०—यहाँ पर भी मूर्धन्य आदेश नहीं होता है। 'स्थादिष्वभ्यासेन०' की यहाँ प्रवृत्ति होती है। 'अभिसुसूष' से अप्रत्यय करके 'अभिसुसूः' बनता है। परन्तु यहाँ भी सन् षकारभूत नहीं होता है। अतः 'स्तौतिण्योरेव०' की प्रवृत्ति नहीं होती है।

स्यसनो०—स्य तथा सन् के परे रहते ही मूर्धन्य आदेश का निषेध होता है। यथा—

(7) सुषाव
यहाँ मूर्धन्यादेश हो गया है।

(3913) सदिष्वञ्ज्योः परस्य लिटि *117* (2361)

सदि, स्वन्जि-इत्येतयोर्धात्वोर्लिटि परतः सकारस्य परस्य मूर्धन्यो न भवति। अभिषसाद, परिषसाद, निषसाद, विषसाद। परिषस्वजे, परिषस्वजाते, परिषस्वजिरे। अभिषस्वजे। स्वञ्जेः संयोगान्तादपि विभाषा लिटः कित्त्वमिच्छन्तीति पक्षेऽनुषङ्गलोपः।

अर्थ—लिट् परे रहते सद् तथा स्वन्ज् धातुओं के सकार को मूर्धन्य आदेश नहीं होता है।

उदा० (1) अभिषसाद
षद्ल्ऌ → सद्—धात्वादेः षः सः, उपदेशेऽजनु०,
सद् णल्—लिट्, परस्मैपदानां०,
स सद् अ—चुटू, हलन्त्यम्, द्वित्व, हलादिः शेषः,
स साद् अ—अत उपधायाः,
अभि ष साद् अ—मूर्धन्य आदेश नहीं हुआ। 'स्थादिष्वभ्या०' से षत्व प्राप्त था।

(2) परिषसाद (पूर्ववत्)।
(3) निषसाद (पूर्ववत्)।
(4) विषसाद (पूर्ववत्)।
(5) परिषस्वजे
ष्वज → स्वज्—धात्वादेः षः सः, उपदेशेऽजनु०,
स्वज् त—आत्मनेपद, लिटस्तझयोरे०,
स स्वज् ए—द्वित्व, हलादिः शेषः,
परि स स्वज् ए—'उपसर्गात्सुनोति०' से मूर्धन्य आदेश प्राप्त, प्रकृत सूत्र से निषेध,
परिषस्वजे—अभ्यास को मूर्धन्य आदेश।

(6) परिषस्वजाते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स्वज् आताम्—लिट्, शेष कार्य पूर्ववत्,
परिषस्वजाताम्—टित, आत्मनेपदानां०।

(7) परिषस्वजिरे
स्वज् झ—लिट्, लिटस्तझयोरेशिरेच्,
स स्वज् इरे—द्वित्व, हलादिः शेषः।

(8) अभिषस्वजे
'परिषस्वजे' की तरह।

स्वञ्जेः०—('अभिषस्वज् एश्' इत्यादि स्थलों पर 'अनिदिताम्०' से अनुनासिकलोप होता है। 'असंयोगात्०' इस पर संयोग से उत्तर लिट् के कित्त्व का प्रतिषेध होने से अनुनासिक लोप प्राप्त नहीं होता है।)

(समा०) 'इन्धिभवतिभ्याञ्च' में चकार का पाठ अनुक्त समुच्चय के लिए है। अथवा 'विभाषोर्णोः' से 'विभाषा' पद का अनुवर्त्तन होता है। अतः संयोग से उत्तर लिट् को विकल्प से किद्वत् होता है। तब पक्ष में अनुस्वार का लोप होता है।

(3914) निव्यभिभ्योऽड्व्यवाये वा छन्दसि *118* (3647)

नि, वि, अभि-इत्येतेभ्य उपसर्गेभ्य उत्तरस्य सकारस्याड्व्यवाये छन्दसि विषये मूर्धन्यादेशो न भवति वा। न्यषीदत्पिता नः, न्यसीदत्। व्यषीदत्पिता नः, व्यसीदत्। अभ्यषीदत्, अभ्यसीदत्। 'सदिष्वन्ज्योः' इति, तदिह नानुवर्त्तते, सामान्येनैव तद्वचनम्। व्यष्टौत्, व्यस्तौत्; अभ्यस्तौत्-इत्येदपि सिद्धं भवति।

इति श्रीवामनाविरचितायां काशिकायां वृत्तावष्टमाऽध्यायस्य तृतीयः पादः॥

अर्थ—वेद के विषय में नि, वि तथा अभि उपसर्गों से उत्तर सकार को अट् का व्यवधान होने पर भी विकल्प से मूर्धन्य आदेश नहीं होता है।

उदा० (1) न्यषीदत्
षद्लृ → सद्—धात्वादेः षः सः, उपदेशेऽजनु०,
सद् त्—लङ्, 'इतश्च' से इकारलोप, कर्त्तरि शप्, अनुबन्धलोप,
सीद् अ त्—'पाघ्रा०' से 'सीद्' आदेश,
नि अ सीदत्—अट्, 'सदिरप्रतेः' से मूर्धन्य आदेश।

(2) न्यसीदत्
पक्ष में मूर्धन्य आदेश नहीं हुआ।

(3) व्यषीदत्
पूर्ववत् मूर्धन्य आदेश।

(4) व्यसीदत्
आदेश अभाव।

(5) अभ्यषीदत्
मूर्धन्य आदेश।

(6) अभ्यसीदत्
आदेश अभाव।

सदि०—'सदिष्वन्ज्योः' इसका अनुवर्त्तन नहीं है। यह सामान्य वचन है।

(7) व्यष्टौत्
स्तु त्—लङ्, इतश्च,
स्तु त्—कर्त्तरि शप्, अदिप्रभृतिभ्यः शपः,
स्तौत्—'उतो वृद्धिर्लुकि०' से वृद्धि,
वि अ स्तौत्—अट्, मूर्धन्य आदेश, ष्टुना ष्टुः।

(8) व्यस्तौत्
पक्ष में मूर्धन्य आदेश नहीं हुआ।

(9) अभ्यष्टौत्
मूर्धन्य आदेश।

(10) अभ्यस्तौत्
पक्ष में आदेश अभाव।

इति पण्डितेश्वरचन्द्रविरचितायां काशिकायाः सोमलेखाऽऽख्यायां हिन्दीटीकायाम्
अष्टमाऽध्यायस्य तृतीयः पादः समाप्तः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अष्टमाऽध्यायस्य चतुर्थः पादः

(3915) रषाभ्यां नो णः समानपदे *1* (235)

रेफषकाराभ्यामुत्तरस्य नकारस्य णकारादेशो भवति, समानपदस्थौ चेन्निमित्तनिमित्तिनौ भवतः। आस्तीर्णम्, विस्तीर्णम्, अवपूर्णम्। षकारात्-कुष्णाति, पुष्णाति, मुष्णाति। षत्रहणमुत्तरार्थम्; ष्टुत्वेनैव हि सिद्धमेतत्। समानपद इति किम्? अग्निर्नयति। वायुर्नयति। *ऋवर्णाच्चेति वक्तव्यम्*। तिसृणाम्। चतसृणाम्। मातृणाम्। पितृणाम्। रश्रुतिसामान्यनिर्देशाद्वा सिद्धम्। वर्णभक्त्या च व्यवधानेऽपि णत्वं भवतीति क्षुभ्नादिषु (8.4.39) नृनमन-तृप्नोतिग्रहणं ज्ञापकम्। अथ वा-ऋवर्णादपि णत्वं भवतीत्येतदेवानेन ज्ञाप्यते।

अर्थ—रेफ तथा षकार से उत्तर नकार के स्थान पर णकार होता है, यदि निमित्त तथा निमित्ती दोनों एक ही पद में विद्यमान हों।

उदा० (क) रेफात्—

(1) आस्तीर्णम्

आ स्तृ क्त—लशक्वतद्धि०,

'न' इति वर्तते। नशेः षकारान्तस्य णकारादेशो न भवति। प्रनष्टः, परिनष्टः। षान्तस्येति किम्? प्रणश्यति, परिणश्यति। अन्तग्रहणं षान्तभूतपूर्वमात्रस्यापि यथा स्यात्-प्रनङ्क्ष्यति, परिनङ्क्ष्यति।

अर्थ—'न' का अनुवर्त्तन है। षकारान्त जो नश् धातु, उसके नकार को णकार नहीं होता है।

उदा० (1) प्रनष्टः
नश् क्त—'मस्जिनशोर्झलि' से 'नुम्',
न न् श् त—'अनिदितां हल०' से अनुनासिकलोप,
न श् त—'व्रश्चभ्रस्ज०' से षत्व,
नष् त—ष्टुना ष्टुः,
प्र नष् ट सु—'उपसर्गादसमासे' से प्राप्त णत्व का निषेध।

(2) परिनष्टः (पूर्ववत्)।

षान्त०—षकारान्त नश् के नकार को णकार नहीं होता है।

(3) प्रणश्यति
नश् श्यन् ति—'श्यन्', अनुबन्धलोप,
प्रणश्यति—षकारान्त न होने से निषेध नहीं हुआ।

(4) परिणश्यति (पूर्ववत्)।

अन्त०—'अन्त' का ग्रहण है। अतः भूतपूर्व षान्त को भी निषेध हो जाय।

(5) प्रनङ्क्ष्यति
नश् स्य ति—ऌट् शेषे च, स्यतासी०,
नष् स्य ति—षत्व, नुम्,
न न्क् स्य ति—षढोः कः सि,
नङ् क् ष्य ति—नश्चाऽपदा०, अनुस्वारस्य ययि०, आदेश-प्रत्यययोः,
प्रनङ्क्ष्यति—णत्व का निषेध।

(6) परिनङ्क्ष्यति (पूर्ववत्)।

(3951) पदान्तस्य *37* (198)

पदान्तो यो नकारस्तस्य णकारादेशो न भवति। वृक्षान्, प्लक्षान्, अरीन्, गिरीन्।

अर्थ—पदान्त में जो नकार, उसे णकार नहीं होता है।

उदा० (1) वृक्षान्
वृक्ष शस्—लशक्वतद्धिते,
वृक्ष अस्—अकः सवर्णे दीर्घः, प्रथमयोः पूर्वसवर्णः,
वृक्षास्—तस्माच्छसो०,
वृक्षान्—'अट्कुप्वाङ्नु०' से प्राप्त णत्व का निषेध।

(2) प्लक्षान् (पूर्ववत्)।

(3) अरीन्
अरि शस्—लशक्वत०,
अरीस्—प्रथमयोः पूर्व०, पूर्ववत् णत्व-निषेध।

(4) गिरीन्
गिरि शस्—पूर्ववत्।

(3952) पदव्यवायेऽपि *38* (1057)

पदेन व्यवायः पदव्यवायः पदव्यवधानम्। पदेन व्यवायेऽपि सति निमित्तनिमित्तिनोर्नकारस्य णकारादेशो न भवति। माषकुम्भवापेन। चतुरङ्गयोगेन। प्रावनद्धम्। पर्यवनद्धम्। प्रगान्नयामः। परिगान्नयामः। *पदव्यवायेऽतद्धित इति वक्तव्यम्*। इह मा भूत्-आर्द्रगोमयेण। शुष्कगोमयेण। 'गोश्च पुरीषे' (4.3.145) इति मयट्। स्वादौ पूर्वं पदमिति गोशब्दः पूर्वपदम्, तेन व्यवायः।

अर्थ—पद के द्वारा व्यवधान 'पदव्यवाय' कहलाता है। निमित्त तथा निमित्ती के मध्य पद का व्यवधान होने पर भी नकार को णकार नहीं होता है।

उदा० (1) माषकुम्भवापेन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

माषाणां कुम्भः—माषकुम्भः,
माषकुम्भं वपति—'कर्मण्यण्',
माष कुम्भ वाप् अ—अत उपधायाः, प्रातिपदिक संज्ञा,
माष कुम्भ वाप टा—टाङसिङसामिना०
माषकुम्भवापेन—आद् गुणः, अट्कुप्वाङ्नुम्० से प्राप्त णत्व का निषेध।

(2) चतुरङ्गयोगेन
यहाँ 'कुमति च' से णत्व प्राप्त था।

(3) प्रावनद्धम्
णह् → नह्—णो नः,
नह् क्त—लशक्वत०,
नध् ध—'नहो धः' से हकार को धकार, 'झषस्तथो०' से तकार को धकार,
नद्ध—झलां जश् झशि,
प्र अव नद्ध—गतिसमास, णत्वनिषेध।

(4) पर्यवनद्धम् (पूर्ववत्)।

(5) प्रगान्नयामः
यह छान्दस उदाहरण है। पूर्ववत् णत्व का निषेध।

(6) परिगान्नयामः (पूर्ववत्)।

पदव्य०—अतद्धित में पद का व्यवधान होने पर णत्वनिषेध होता है। अतः निम्नलिखित में निषेध नहीं होता है—

(7) आर्द्रगोमयेण
गोरिदम् → गोमयम्—'गोश्च पुरीषे' से 'मयट्',
आर्द्रं च तद् गोमयम्—कर्मधारय समास,
आर्द्रगोमय टा—'इन' आदेश, णत्व हो गया।

(8) शुष्कगोमयेण
पूर्ववत् णत्व।

(3953) क्षुभ्नादिषु च *39* (792)

'न' इति वर्तते। 'क्षुभ्ना' इत्येवमादिषु शब्देषु नकारस्य णकारादेशो न भवति। क्षुभ्नाति। अजादेशस्य स्थानिवद्भावादिहापि प्रतिषेधो भवति। क्षुभ्नीतः। क्षुभ्नन्ति। नृनमनः। 'पूर्वपदात्संज्ञायाम्' (8.4.3) इति प्राप्तिः। 'छन्दस्यृदवग्रहात्' (8.4.26) इति च प्राप्नोति। नन्दिन्, नन्दन, नगर–एतान्युत्तरपदानि संज्ञायां प्रयोजयन्ति–हरिनन्दी। हरिनन्दनः। गिरिनगरम्। नृतिर्यङि प्रयोजयति–नरीनृत्यते। तृप्नु–तृप्नोति। नर्तन, गहन, नन्दन, निवेश, निवास, अग्नि, अनूप–एतान्युत्तरपदानि प्रयोजयन्ति। परिनर्तनम्, परिगहनमिति, संज्ञायाम्–'पूर्वपदात्संज्ञायाम्' (8.4.3) इति प्राप्नोति। परिनन्दनमित्यत्र 'उपसर्गादसमासेऽपि' (8.4.24) इति प्राप्नोति। शरनिवेशः। शरनिवासः। शराग्निः। दर्भानूपः–इत्येताः संज्ञाः। *आचार्यादणत्वं च* (ग०सू० 182)। आभार्यभोगीनः। आचार्यानी। *इरिकादिभ्यो वनोत्तरपदेभ्यः संज्ञायाम्*। (ग०सू० 183)। इरिका, तिमिर, समीर। कुबेर, हरि, कर्मार–इत्युत्तरपदवनशब्दस्थस्य संज्ञायाम्। क्षुभ्नादिराकृतिगणः। अविहितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः।

अर्थ—'न' का अनुवर्त्तन है। 'क्षुभ्ना' आदि में नकार का णत्व नहीं होता है।

उदा० (1) क्षुभ्नाति
क्षुभ् श्ना ति—'क्र्यादिभ्यः श्ना', 'लशक्वत०', से शकार की इत्संज्ञा,
क्षुभ् ना ति—'अट्कुप्वाङ्नु०' से प्राप्त णत्व का निषेध।

अजादे०—अजादेश के स्थानिवद्भाव होने से यहाँ पर भी निषेध होता है।

(2) क्षुभ्नीतः
क्षुभ् श्ना तस्—ई हल्यघोः,
क्षुभ् नीतस्—णत्वनिषेध।

(3) क्षुभ्नन्ति
क्षुभ् श्ना झि—झोऽन्तः,
क्षुभ् न् अन्ति—'श्नाऽभ्यस्तयोरातः' से आकारलोप,
क्षुभ्नन्ति—णत्व का निषेध।

(4) नृनमनः

पूर्वप०—'पूर्वपदात् सञ्ज्ञायामगः' से णत्व प्राप्त था। 'छन्दस्यृदवग्रहात्' से भी णत्व प्राप्त था। संज्ञा में उत्तर पद में नन्दिन्, नन्दन तथा नगर—ये शब्द प्रयुक्त होते हैं। यथा—

(5) हरिनन्दी
णत्वनिषेध।

(6) हरिनन्दनः (पूर्ववत्)।

(7) गिरिनगरम्
पूर्ववत् णत्वनिषेध।

नृति०—नृत् धातु के यङ् में णत्व नहीं होता है। यथा—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(8) नरीनृत्यते
नृत् यङ्—धातोरेकाचो०,
नृ नृत् य—सन्यङोः, हलादिः शेषः, उरत्, उरण् रपरः, हलादिः शेषः,
न नृत् य—'रीगृदुपधस्य०' से 'रीक्' आगम,
नरी नृत्य—धातुसंज्ञा,
नरीनृत्य शप् त—अतो गुणे।

(9) तृप्नोति
तृप् श्नु ति—'शप्' को बाध कर 'श्नु',
तृप् नु ति—लशक्वतद्धि०,
तृप्नोति—'सार्वधातुकार्धधा०' से 'तृप्नु' को गुण।

नर्तन०—'नर्तन' आदि शब्द उत्तर पद में हो तो णत्वनिषेध होता है। यथा—

(10) परिनर्तनम् (पूर्ववत्)।
(11) परिगहनम्
णत्वनिषेध।

पूर्वप०—'पूर्वपदात् सञ्ज्ञा०' से यहाँ णत्व प्राप्त था। 'परिनन्दन' में 'उपसर्गादसमासेऽपि' से भी प्राप्त था।

(12) शरनिनेशः (पूर्ववत्)।
(13) शरनिवासः
णत्व का निषेध।

(14) शराग्निः
णत्व नहीं हुआ।

(15) दर्भानूपः (पूर्ववत्)।

ये सभी संज्ञा हैं।

आचार्या०—आचार्य शब्द से उत्तर नकार को णकार नहीं होता है।

(16) आचार्यभोगीनः
'आत्मन्विश्वजन०' से 'ख' प्रत्यय, णत्वनिषेध।

(17) आचार्यानी
आचार्य ङीप्—'इन्द्रवरुण०' से 'ङीप्' तथा 'आनुक्' आगम,
आचार्य आन् ई—णत्व का निषेध, सुलुक्।

इरिका०—इरिका आदि शब्दों से उत्तर 'वन' शब्द के नकार को णत्व नहीं होता है।

यह आकृतिगणं है। जिसे णत्व-प्रतिषेध प्राप्त हो तथा उसको णत्व-प्रतिषेध विधान न हो, उसे क्षुभ्नादिगण में जानना चाहिए।

(3954) स्तोः श्चुना श्चुः *40* (111)

सकारतवर्गयोः शकारचवर्गाभ्यां सन्निपाते शकार-चवर्गावादेशौ भवतः। स्तोः श्चुनेति यथासंख्यमत्र नेष्यते। सकारस्य शकारेण, चवर्गेण, द्वाभ्यामपि सन्निपाते शकारो भवति। तवर्गस्यापि च शकारेण, चवर्गेण च सन्निपाते चवर्गो भवति। आदेशे तु यथासंख्यमिष्यते-सकारस्य शकारः, तवर्गस्य च चवर्ग इति। सकारस्य शकारेण सन्निपाते-वृक्षश्शेते। प्लक्षश्शेते। तस्यैव चवर्गेण-वृक्षश्चिनोति, प्लक्षश्चिनोति। वृक्षश्छादयति, प्लक्षश्छा-दयति। तवर्गस्य शकारेण-अग्निचिच्छेते, सोमसुच्छेते। तस्यैव चवर्गेण-अग्निचिच्चिनोति, सोमसुच्चिनोति। अग्निचिच्छादयति, सोमसुच्छादयति। अग्निचिज्जयति, सोमसुज्जयति। अग्निचिज्झकारः, सोमसुज्झकारः। अग्निचिञ्ञकारः, सोमसुञ्ञकारः। मस्जेः-मज्जति। भ्रस्जेः-भृज्जति। व्रश्चेः-वृश्चति। यजेः-यज्ञः। याचेः-याच्ञा। 'शात्' (8.4.44) इति प्रतिषेधो ज्ञापकः-संख्यातानुदेशाभावस्य। 'स्तोः श्चौ' इति सप्तमीनिर्देशो न कृतः; पूर्वेण परेण च श्चुना सन्निपाते श्चुत्वं यथा स्यादिति।

अर्थ—सकार तथा तवर्ग का शकार तथा चवर्ग के साथ योग होने पर शकार तथा चवर्ग आदेश होता है। यहाँ यथासंख्य नहीं होता है। सकार का शकार के साथ तथा चवर्ग के साथ—दोनों के साथ योग होने पर शकार होता है। तवर्ग का भी शकार के साथ तथा चवर्ग के साथ योग होने पर चवर्ग आदेश होता है। आदेश में यथासंख्य होता है। सकार के स्थान पर शकार तथा तवर्ग के स्थान पर चवर्ग।

उदा० (क) सकारस्य शकारेण—
(1) वृक्षश्शेते
वृक्षस् शेते—सकार का शकार के साथ योग,
वृक्षश् शते—आन्तरतम्य से सकार के स्थान पर शकार होता है।

(2) प्लक्षश्शेते
प्लक्षस् शेते—पूर्ववत्।

(ख) सकारस्य चवर्गेण—
(3) वृक्षश्चिनोति
वृक्षस् चिनोति—सकार का चकार के साथ,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वृक्षश् चिनोति—शकार आदेश।

(4) प्लक्षञ्चिनोति
प्लक्षस् चिनोति—पूर्ववत्।

(5) वृक्षश्छादयति
वृक्षस् छादयति—सकार का छकार के साथ,
वृक्षश् छादयति—शकार आदेश।

(6) प्लक्षश्छादयति
प्लक्षस् छादयति—पूर्ववत्।

(ग) तवर्गस्य शकारेण—

(7) अग्निचिच्छेते
अग्निचित् शेते—तकार का शकार के साथ,
अग्निचिच् शेते—तकार के स्थान पर चकार,
अग्निचिच् छेते—'शश्छोऽटि' से शकार को छकार होकर रूप बनता है।

(8) सोमसुच्छेते
सोमसुत् शेते—पूर्ववत्।

(घ) तवर्गस्य चवर्गेण—

(9) अग्निचिच्चिनोति
अग्निचित् चिनोति—तकार का चकार से,
अग्निचिच् चिनोति—चकार आदेश।

(10) सोमसुच्चिनोति
सोमसुत् चिनोति—पूर्ववत्।

(11) अग्निचिच्छादयति
अग्निचित् छादयति—तकार को चकार।

(12) सोमसुच्छादयति
सोमसुत् छादयति—पूर्ववत्।

(13) अग्निचिज्जयति
अग्निचित् जयति—तकार का जकार के साथ,
अग्निचिच् जयति—चकार आदेश,
अग्निचिज् जयति—झलां जशोऽन्ते।

(14) सोमसुज्जयति
सोमसुत् जयति—पूर्ववत्।

(15) अग्निचिज्झकारम्
अग्निचित् झकारम्—तकार का झकार के साथ,
अग्निचिच् झकारम्—तकार को चकार,
अग्निचिज् झकारम्—झलां जशोऽन्ते।

(16) सोमसुज्झकारम् (पूर्ववत्)।

(17) अग्निचिञ्ञकारः
अग्निचित् ञकारः—तकार का ञकार के साथ,
अग्निचिञ् ञकारः—तकार के स्थान पर चवर्ग का पञ्चम वर्ण ञकार।

(18) सोमसुञ्ञकारः (पूर्ववत्)।

(19) मज्जति
मस्ज् तिप्—लट्,
म द् ज् अ तिप्—झलां जश् झशि,
मज्ज् अ ति—स्तोः श्चुना श्चुः, श्चुत्व करने में जश्त्व असिद्ध नहीं होता है।

(20) भृज्जति
भ्रस्ज् अ ति—'ग्रहिज्यावयि०' से सम्प्रसारण,
भृस्ज् अ ति—झलां जश् झशि,
भृ द् ज् अ ति—श्चुत्व।

(21) वृश्चति
व्रश्च श ति—शप् को बाध कर 'तुदादिभ्यः शः' से 'श',
वृश्च् अ ति—सम्प्रसारण, लशक्वतद्धिते,
वृश्च ति—रूप बनता है।

(22) यज्ञः
यज् नङ्—'यजयाच०' से 'नङ्',
यज् ञ—हलन्त्यम्, श्चुत्व, सु।

(23) याच्ञा
याच् नङ्—पूर्ववत्,
याच् ञ—श्चुत्व,
याच् ञ आ—स्त्रीत्व में 'टाप्', अनुबन्धलोप,
याच् ञा सु—सुलोप।

शात्०—'शात्' के द्वारा श्चुत्व का निषेध ज्ञापक है कि यहाँ यथासंख्य नियम प्रवृत्त नहीं होता है।

भाव यह है कि पूर्व में छः वर्ण (स् त् थ् द् ध् न्) हैं तथा पर में भी छः वर्ण (श् च् छ् ज् झ् ञ्) हैं। आदेश भी यह हैं (श् च् छ् ज् झ् ञ्); अतः समसंख्य होने से यथासंख्य नियम लागू होना चाहिए, परन्तु यथासंख्य नियम योग के सम्बन्ध में लागू नहीं होता है। तब यह आवश्यक नहीं है कि सकार शकार का, तकार चकार का तथा आगे भी इसी प्रकार स्थानी व निमित्त का योग हो। वस्तुतः यहाँ स्थानी व निमित्त का योग किसी प्रकार भी हो सकता है अर्थात् सकार का योग श् च् छ् ज् झ् ञ्—

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

इनमें से किसी के साथ हो सकता है। तब श्चुत्व आदेश होगा। भाव है कि शकारादि चाहे सकारादि के आगे आवें, चाहे पीछे आवें—दोनों स्थितियों में सकारादि के स्थान पर 'श्चुत्व' ही होता है। इसी प्रकार योग में यथासंख्य नियम प्रवृत्त नहीं होता है। 'स्तोः' के किसी भी वर्ण का और 'श्चु' के किसी भी वर्ण का किसी भी प्रकार योग हो, तो 'स्तु' को श्चुत्व होता है। यहाँ 'शात्' सूत्र ज्ञापक है। 'शात्' से शकार से पर तवर्ग को श्चुत्व का निषेध कहा गया है। यदि सकारादि से पर शकारादि होने पर ही श्चुत्व मानते हैं तो शकारादि से पर तवर्ग की प्राप्ति नहीं होगी। तब निषेध कैसा ? इस प्रकार 'शात्' सूत्र व्यर्थ होकर ज्ञापित करता है कि स्थानी व निमित्त में पौर्वापर्य निश्चित नहीं है।

ध्यातव्य है कि आदेश के सम्बन्ध में यथासंख्य नियम प्रवृत्त होता है। अतः ये आदेश क्रमशः होते हैं। यथा—सकार के स्थान पर शकार, तकार के स्थान पर चकार, थकार के स्थान पर छकार, दकार के स्थान पर जकार, धकार के स्थान पर झकार तथा नकार के स्थान पर ञकार होता है।

(3955) ष्टुना ष्टुः *41* (113)

'स्तोः' इति वर्त्तते। सकारतवर्गयोः षकारटवर्गाभ्यां सन्निपाते षकारटवर्गावादेशौ भवतः। तत्रापि तथैव संख्यातानुदेशाभावः। षकारेण सकारस्य-वृक्षष्षण्डे, प्लक्षष्षण्डे। तस्यैव टवर्गेण-वृक्षष्टीकते, प्लक्षष्टीकते। वृक्षष्ठकारः, प्लक्षष्ठकारः। तवर्गस्य षकारेण-पेष्टा। पेष्टुम्। पेष्टव्यम्। कृषीष्ट। कृषीष्ठाः। तस्यैव टवर्गेण-अग्निचिट्टीकते। सोमसुट्टीकते। अग्निचिट्ठकारः, सोमसुट्ठकार। अग्निचिड्डीनः, सोमसुड्डीनः। अग्निचिड्ढौकते, सोमसुड्ढौकते। अग्निचिण्णकारः, सोमसुण्णकारः। अत्ट्-अट्टति। अद्ड्-अड्डति।

अर्थ—'स्तोः' का अनुवर्त्तन है। सकार तथा तवर्ग का षकार तथा टवर्ग के साथ योग होने पर षकार तथा टवर्ग आदेश होते हैं। यहाँ पर भी पूर्ववत् यथासंख्य लागू नहीं होता है।

उदा० (क) षकारेण सकारस्य—

(1) वृक्षष्षण्डे
वृक्षस् षण्डे—षकार आदेश।

(2) प्लक्षष्षण्डे (पूर्ववत्)।

(ख) टवर्गेण सकारस्य—

(3) वृक्षष्टीकते
वृक्षस् टीकते—षकार।

(4) प्लक्षष्टीकते (पूर्ववत्)।

(5) वृक्षष्ठकारः
वृक्षस् ठकारः—षकार।

(6) प्लक्षष्ठकारः
प्लक्षस् ठकारः—षकार।

(ग) षकारेण तवर्गस्य—

(7) पेष्टा
पिष् तृच्—आर्धधातुकं शेषः, हलन्त्यम्,
पेष् तृ—'पुगन्तलघूपधस्य च' से गुण,
पेष् टा—टकार आदेश, सु।

(8) पेष्टुम्
पिष् तुमुन्—अनुबन्धलोप,
पेष् टुम्—शेष पूर्ववत्,
पेष्टुम् सु—सुलोप।

(9) पेष्टव्यम्
पिष् तव्यत्—पूर्ववत्।

(10) कृषीष्ट
कृष् त—आशीर्लिङ्,
कृष् सीयुट् त—अनुबन्धलोप,
कृ सीय् सुट् त—सुट् तिथोः,
कृ षी स् त—सलोप, यलोप, आदेशप्रत्यययोः, ष्टुत्व।

(11) कृषीष्ठाः
कृष् थास्—पूर्ववत् सीयुट्, सुट्, अनुबन्धलोप,
कृष् सीयुट् सुट् थास्—सकारलोप, यकारलोप,
कृषीष् ठास्—षत्व, ष्टुत्व।

(घ) तवर्गस्य टवर्गेण—

(12) अग्निचिट् टीकते
अग्निचित् टीकते—तकार का टकार से,
अग्निचिट् टीकते—टकार।

(13) सोमसुट्टीकते (पूर्ववत्)।

(14) अग्निचिट्ठकारः
अग्निचित् ठकारः—टकार।

(15) सोमसुट्ठकारः (पूर्ववत्)।

(16) अग्निचिड्डीनः
अग्निचित् डीनः—ष्टुत्व,
अग्निचिट् डीनः—झलां जशोऽन्ते।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(17) सोमसुड्डीनः (पूर्ववत्)।
(18) अग्निचिद्ढौकते
अग्निचित् ढौकते—तकार का ढकार से,
अग्निचिद् ढौकते—ढकार।

(19) सोमसुद्ढौकते (पूर्ववत्)।
(20) अग्निचिण्णकारः
अग्निचित् णकारः—णकार आदेश।

(21) सोमसुण्णकारः (पूर्ववत्)।
(22) अट्टति
अत् ट् तिप्—ष्टुत्व,
अट्ट् शप् ति—अनुबन्धलोप।

(23) अड्डति
अद्ड् शप् ति—पूर्ववत् ष्टुत्व।

(3956) न पदान्ताट्टोरनाम् *42* (114)

पदान्ताट्टवर्गादुत्तरस्य स्तोः ष्टुत्वं न भवति 'नाम्' इत्येतद्वर्जयित्वा। श्वलिट्साये। मधुलिट् तरति। पदान्तादिति किम्? 'ईड स्तुतौ' (धा०पा० 1020)-ईट्टे। टोरिति किम्? सर्पिष्टमम्। अनामिति किम्? षण्णाम्। अत्यल्पमिदमुच्यते। *अनाम्नवतिनगरीणामिति वक्तव्यम्*। षण्णाम्। षण्णवतिः। षण्णगरी।

अर्थ—पदान्त टवर्ग से उत्तर सकार व तवर्ग के स्थान पर ष्टुत्व नहीं होता है, परन्तु 'नाम्' को यह निषेध नहीं होता है।

उदा० (1) श्वलिट्साये
श्वलिट् साये—पदान्त में टकार है, इससे पर सकार है,
श्वलिट् साये—'ष्टुना ष्टुः' से प्राप्त ष्टुत्व का निषेध।

(2) मधुलिट् तरति
मधुलिट् तरति—पदान्त में टकार वर्त्तमान है, उससे पर तकार है,
मधुलिट् तरति—ष्टुत्व नहीं हुआ।

पदान्ता०—पदान्त में टवर्ग से उत्तर सकार व तवर्ग को ष्टुत्व नहीं होता है।

(3) ईट्टे
ईड् त—'खरि च' से टकार, टकार पदान्त में नहीं है, अतः ष्टुत्व का निषेध नहीं हुआ।

टोरिति०—पदान्त में टवर्ग से उत्तर सकार व तवर्ग को ष्टुत्व नहीं होता है।

(4) सर्पिष्टमम्
सर्पिस् तमप्—'अतिशायने तमप्',
सर्पिष् तम—'ह्रस्वात् तादौ०' से मूर्धन्य, ष्टुत्व हुआ।

अनामि०—नाम् को निषेध नहीं होता है।

(5) षण्णाम्
षष् नाम्—'षट्चतुर्भ्यश्च' से 'नुट्', 'झलां जशोऽन्ते' से डकार, ष्टुत्व,
षड् नाम्—'यरोऽनुनासिकेऽनु०' से डकार को णकार।

अत्यल्प०—यह थोड़ा कहा गया है। नाम्, नवति तथा नगरी को यह निषेध नहीं होता है।

(6) षण्णाम् (पूर्ववत्)।

(7) षण्णवतिः
षडधिका नवतिः—शाकपार्थिवादि समास,
षष् नवति—झलां जशोऽन्ते, यरोऽनुनासिके०,
षण् णवति सु—ष्टुत्व।

(8) षण्णगरी
षण्णां नगराणां समाहारः—समास,
षष् नगर ङीप्—द्विगोः, ष्टुत्व।

(3957) तोः षि *43* (115)

'न' इति वर्तते। तवर्गस्य षकारे यदुक्तं तन्न भवति। अग्निचित्षण्डे। भवान्षण्डे। महान्षण्डे।

अर्थ—'न' का अनुवर्त्तन है। षकार परे रहते तवर्ग के स्थान पर ष्टुत्व नहीं होता है।

उदा० (1) अग्निचित् षण्डे
अग्निचित् षण्डे—'अग्नौ चेः' से 'क्विप्' होता है, ष्टुत्वनिषेध।

(2) सोमसुत् षण्डे[1] (पूर्ववत्)।
(3) भवान् षण्डे
ष्टुत्व-निषेध।

(4) महान् षण्डे (पूर्ववत्)।

(3958) शात् *44* (112)

'तोः' इति वर्तते। शकारादुत्तरस्य तवर्गस्य यदुक्तं तन्न भवति। प्रश्नः। विश्नः।

1. यह उदाहरण न्यास में प्रदर्शित है।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—'तोः' का अनुवर्त्तन है। शकार से उत्तर तवर्ग के स्थान पर श्चुत्व नहीं होता है।

उदा० (1) प्रश्नः
प्रच्छ् नङ्—'यजयाच०' से 'नङ्', हलन्त्यम्,
प्रश् न—च्छ्वोः शूडनु०,
प्रश्न सु—'स्तोः श्चुना श्चुः' से प्राप्त श्चुत्व का निषेध।

(2) विश्नः
विच्छ् नङ्—सभी कार्य पूर्ववत्।

(3959) यरोऽनुनासिकेऽनुनासिको वा *45* (116)

पदान्तग्रहणमनुवर्तते। यरः पदान्तस्यानुनासिके परतो वाऽनुनासिकादेशो भवति। वाङ्नयति, वाग्नयति। श्वलिण्नयति, श्वलिङ्नयति। अग्निचिन्नयति, अग्निचिद् नयति। त्रिष्टुम्नयति, त्रिष्टुब्नयति। 'पदान्तस्य' इत्येव–वेद्मि। क्षुभ्नाति। *यरोऽनुनासिके प्रत्यये भाषायां नित्यवचनं कर्तव्यम्*। वाङ्मयम्। त्वङ्मयम्। व्यवस्थितविभाषाविज्ञानात् सिद्धम्।

अर्थ—'पदान्त' के ग्रहण का अधिकार है। पदान्त यर् के स्थान पर अनुनासिक आदेश विकल्प से होता है, अनुनासिक परे रहते।

उदा० (1) वाग् नयति
वाच् नयति—'झलां जशोऽन्ते' से जश्त्व,
वाज् नयति—'चोः कुः' से कुत्व,
वाग् नयति—अनुनासिक अभाव।

(2) वाङ् नयति
वाग् नयति—अनुनासिक ङकार हुआ।

(3) श्वलिङ् नयति
जश्त्व, अनुनासिक अभाव।

(4) श्वलिण्नयति
अनुनासिक आदेश।

(5) अग्निचिद् नयति
अग्निचित् नयति—जश्त्व,
अग्निचिद् नयति—अनुनासिक अभाव।

(6) अग्निचिन्नयति
अनुनासिक आदेश।

(7) त्रिष्टुब् नयति
जश्त्व, अनुनासिक अभाव।

(8) त्रिष्टुम् नयति
अनुनासिक।

पदान्त०—पदान्त यर् के स्थान पर ही अनुनासिक होता है।

(9) वेद्मि
विद् मिप्—लट्, पुगन्तलघूप०,
वेद् मि—यर् पदान्त में नहीं है, अतः अनुनासिक नहीं हुआ।

(10) क्षुभ्नाति
क्षुभ् श्ना ति—'क्र्यादिभ्यः श्ना' से 'श्ना',
क्षुभ् ना ति—लशक्वत०।

यरोऽनु०—लोक में अनुनासिक प्रत्यय के परे रहते 'यर्' के स्थान पर नित्य अनुनासिक होता है।

(11) वाङ्मयम्
वाच् मयट्—'नित्यं वृद्धशरादिभ्यः' से 'मयट्',
वाङ्मय सु—कुत्व, अनुनासिक।

(12) त्वङ्मयम्
त्वच् मयट्—'मयड्वैतयोः',
त्वङ् मय सु—कुत्व, अनुनासिक।

(13) वाङ्मात्रम् (पूर्ववत्)।

(14) कियन्मात्रम् (पूर्ववत्)।

व्यवस्थि०—यह सब व्यवस्थित विभाषा मानकर सिद्ध हो जाता है।

(3960) अचो रहाभ्यां द्वे *46* (59)

'यरः' इति वर्तते। अच उत्तरौ यौ रेफहकारौ ताभ्यामुत्तरस्य यरो द्वे (वा) भवतः। अर्क्कः। मर्क्कः। ब्रह्म्मा। अपह्नुते। अच इति किम्? किन् ह्नुते। किम् ह्नालयति।

अर्थ—'यरः' का अनुवर्त्तन है। अच् वर्ण से उत्तर जो रेफ तथा हकार, उनसे उत्तर यर् वर्ण को द्वित्व होता है।

उदा० (1) अर्क्कः
अर्क—अच् (अकार) से उत्तर रेफ है, उससे उत्तर यर् वर्ण (ककार) है,
अर् क् क सु—ककार को द्वित्व।

(2) मर्क्कः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मर्क सु—पूर्ववत्।

(3) ब्रह्म्मा

ब्रह्मा—अच् वर्ण (अकार) से उत्तर हकार है, उससे उत्तर यर् वर्ण मकार है,

ब्रह्म्मा—मकार को द्वित्व।

(4) उपह्नुते

उपह्नुते—अच् (अकार) से उत्तर हकार, हकार से उत्तर यर् वर्ण (नकार) को द्वित्व होता है।

यर०—अच् वर्ण से उत्तर रेफ व हकार से उत्तर यर् को द्वित्व होता है।

ह्नुते—यहाँ हकार से उत्तर यर् को द्वित्व नहीं हुआ। कारण कि हकार अच् से उत्तर नहीं है।

इसी प्रकार—किम् ह्नलयति में हकार से उत्तर मकार को द्वित्व नहीं हुआ।

(3961) अनचि च *47* (48)

'अचः' इति वर्तते, 'यरः' इति च। अनच्यरस्य अच उत्तरस्य यरो द्वे वा भवतोऽनचि परतः। दद्ध्यत्र। मद्ध्वत्र। अच इत्येव-स्मितम्। ध्मातम्। *यणो मयो द्वे भवत इति वक्तव्यम्*। केचिदत्र 'यणः' इति पञ्चमी, 'मयः' इति षष्ठीति व्याचक्षते। तेषामुल्क्का, वाल्म्मीक इत्युदाहरणम्। अपरे तु 'यणः' इति षष्ठी, 'मयः' इति पञ्चमीति, तेषां दध्य्यत्र, मध्व्वत्रेत्युदाहरणम्। *शरः खयो द्वे भवत इति वक्तव्यम्*। अत्रापि यदि 'शरः' इति पञ्चमी, 'खयः' इति षष्ठी; तदा स्थाली, स्थातेत्युदाहरणम्। अथ वा-खय उत्तरस्य शरो द्वे भवतः। वत्स्सः, इक्ष्षुः, क्ष्षीरम्, अप्स्सराः। *अवसाने च यरो द्वे भवत इति वक्तव्यम्*। वाक्क्, वाक्। त्वक्क्, त्वक्। षट्ट्, षट्। तत्त्, तत्।

अर्थ—'अचः' तथा 'यरः' का अनुवर्त्तन है। अच् वर्ण से उत्तर यर् वर्ण को विकल्प से द्वित्व होता है, यदि अच् वर्ण परे न हो।

उदा० (1) दद्ध्यत्र

दधि अत्र—इको यणचि,

दध् य् अत्र—अच् अकार से उत्तर यर् धकार को द्वित्व हुआ,

दध् ध्यत्र—झलां जश् झशि,

दद् ध्यत्र—रूप।

(2) मद्ध्वत्र

मधु अत्र—इको यणचि, शेष पूर्ववत्।

अच०—अच् से उत्तर यर् को द्वित्व होता है।

(3) स्मितम्। (4) ध्मातम्।

यहाँ यर् वर्ण से उत्तर नहीं है। अतः द्वित्व नहीं हुआ।

यणो०—यण् वर्ण से उत्तर मय् वर्ण को द्वित्व होता है। कुछ विद्वान् यहाँ 'यणः' में पञ्चमी तथा 'मयः' में षष्ठी मानते हैं। उनके अनुसार निम्नलिखित उदाहरण होते हैं—

(5) उल्क्का

उल्का—यण् वर्ण (लकार) से पर मय् वर्ण (ककार) को द्वित्व हुआ।

(6) वाल्म्मीकः

वाल्मीकः—पूर्ववत्।

अपरे०—अन्य विद्वान् 'यणः' में षष्ठी तथा 'मयः' में पञ्चमी मानते हैं। उनके अनुसार मय् वर्ण से उत्तर यण् वर्ण को द्वित्व होता है। यथा—

(7) दध्य्यत्र

दधि अत्र—इको यणचि,

दध् यत्र—मय् वर्ण (धकार) से पर यण् वर्ण (यकार) को द्वित्व हुआ है।

(8) मध्व्वत्र

पूर्ववत् यण् (वकार) को द्वित्व हुआ।

शरः—शर् वर्ण से उत्तर खय् वर्ण को द्वित्व होता है। यहाँ भी 'शरः' में पञ्चमी तथा 'खयः' में षष्ठी स्वीकार करते हैं।

(9) स्थाली

स्थाली—शर् वर्ण (सकार) से उत्तर खय् वर्ण (थकार) है। अतः थकार को द्वित्व,

स् थ् थाली—'खरि च' से तकार।

(10) स्थाता

स्थाता—पूर्ववत्।

अथवा०—जो विद्वान् 'खयः' में पञ्चमी तथा 'शरः' में षष्ठी मानते हैं। उनके अनुसार खय् वर्ण से उत्तर शर् वर्ण को द्वित्व होता है। यथा—

(11) वत्स्सः

वत्सः—खय् वर्ण (तकार) से उत्तर शर् वर्ण (सकार) को द्वित्व हुआ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(12) इक्ष्णुः

इक्षुः—खय् वर्ण (ककार) से उत्तर शर् वर्ण (षकार) को द्वित्व हुआ है।

(13) क्ष्णोरम्

क्षोरम्—पूर्ववत् षकार को द्वित्व।

(14) अप्स्सराः

अप्सराः—खय् वर्ण (यकार) से उत्तर शर् वर्ण (सकार) को द्वित्व हुआ।

अवसाने०—अवसान में यर् वर्ण को द्वित्व विकल्प से होता है।

(15) वाक्क्

वाच् सु—सुलोप, पदसंज्ञा,
वाक्—चोः कुः, ककार को द्वित्व।

(16) वाक्

पक्ष में द्वित्व नहीं हुआ।

(17) त्वक्क्

द्वित्व पक्ष।

(18) त्वक्

द्वित्व अभाव।

(19) षट्ट्

षट्—द्वित्व।

(20) षट्

द्वित्व नहीं हुआ।

(21) तत्त्

तत्—द्वित्व।

(22) तत्

द्वित्व अभाव।

(3962) नादिन्याक्रोशे पुत्रस्य *48* (55)

आदिनि परत आक्रोशे गम्यमाने पुत्रशब्दस्य न द्वे भवतः। 'अनचि च' इति प्राप्तिः प्रतिषिध्यते। पुत्रादिनी त्वमसि पापे। आक्रोश इति किम्? तत्त्वकथने द्विर्वचनं भवत्येव–पुत्रानत्तीति पुत्रादिनी। शिशुमारी व्याघ्री। *तत्परे चेति वक्तव्यम्*। पुत्रपुत्रादिनी त्वमसि पापे। *वा हतजग्धपर इति वक्तव्यम्*। पुत्रहती, पुत्रहती। पुत्रजग्धी। पुत्रजग्धी। *चयो द्वितीयाः शरि पौष्करसादेः*। चयो द्वितीया भवन्ति शरि परतः पौष्करसादेराचार्यस्य मतेन। तकारस्य थकारः–वथ्सः। ककारस्य खकारः–ख्षीरम्। पकारस्य फकारः– अफ्सराः।

अर्थ—आक्रोश अर्थ गम्यमान हो तो आदिन् शब्द परे रहते पुत्र शब्द को द्वित्व नहीं होता है। 'अनचि च' से प्राप्त द्वित्व का निषेध किया गया है।

उदा० (1) पुत्रादिनी त्वमसि पाये
द्वित्व नहीं हुआ।

आक्रोश०—आक्रोश अर्थ गम्यमान रहते द्वित्व-निषेध होता है। तत्त्वकथन में द्वित्व होता है।

(2) पुत्रादिनी

पुत्रान् अत्ति—यहाँ आक्रोश गम्यमान नहीं है, तत्त्वकथन है। अतः द्वित्व हुआ है।

तत्परे०—पुत्र परे रहते पुत्र शब्द को द्वित्व नहीं होता है।

(3) पुत्रपुत्रादिनी त्वमसि पापे
यहाँ नहीं हुआ।

वा हत०—हत तथा जग्ध शब्दों के परे रहते पुत्र शब्द को विकल्प से द्वित्व होता है।

(4) पुत्रहती
द्वित्व हुआ।

(5) पुत्रहती
पक्ष में द्वित्व नहीं हुआ।

(6) पुत्रजग्धी
द्वित्व हुआ।

(7) पुत्रजग्धी
पक्ष में द्वित्व नहीं हुआ।

चयो०—पौष्करसादि आचार्य के मत में शर् वर्ण परे रहते चय् वर्ण को द्वितीय वर्ण होता है।

(8) वथ्सः

वत्सः—शर् (सकार) परे रहते चय् वर्ण (तकार) को उसी वर्ग का द्वितीय वर्ण (थकार) हुआ।

(9) वत्सः
पक्ष में द्वितीय वर्ण नहीं हुआ।

(10) ख्षीरम्

क्षीरम्—चय् वर्ण (ककार) को पूर्ववत् द्वितीय वर्ण हुआ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(11) क्षीरम्
पक्ष में द्वितीय वर्ण अभाव।

(12) अप्सरा:
पकार को फकार।

(13) अप्सरा:
द्वितीय वर्ण अभाव।

(3963) शरोऽचि *49* (340)

'न' इति वर्तते। शरोऽचि परतो न द्वे भवतः। 'अचो रहाभ्याम्' (8.4.46) इति प्राप्तिः प्रतिषिध्यते। कर्षति। वर्षति। आकर्षः। अक्षदर्शः। अचीति किम्? दश्श्यर्ते।

अर्थ—'न' का अनुवर्त्तन है। अच् परे रहते शर् वर्ण को द्वित्व नहीं होता है।

'अचो रहाभ्यां०' से प्राप्त द्वित्व का निषेध किया जाता है।

उदा० (1) कर्षति
षकार को द्वित्व नहीं हुआ।

(2) वर्षति (पूर्ववत्)।

(3) आकर्षः (पूर्ववत्)।

(4) अक्षदर्शः
शकार को द्वित्व नहीं हुआ।

अची०—अच् परे रहते द्वित्व का निषेध होता है।

(5) दश्श्यर्ते
दर्श्यते—अच् वर्ण (अकार) से पर रेफ से उत्तर शर् वर्ण (शकार) है। इससे पर अच् वर्ण न होने से द्वित्व का निषेध नहीं हुआ।

(3964) त्रिप्रभृतिषु शाकटायनस्य *50* (56)

त्रिप्रभृतिषु वर्णेषु संयुक्तेषु शाकटायनस्याचार्यस्य मतेन द्वित्वं न भवति। इन्द्रः। चन्द्रः। उष्ट्रः। राष्ट्रम्। भ्राष्ट्रम्।

अर्थ—तीन संयुक्त वर्णों को शाकल्य के मत में द्वित्व नहीं होता है।

उदा० (1) इन्द्रः
'अनचि च' से प्राप्त द्वित्व का निषेध।

(2) चन्द्रः
पूर्ववत् निषेध।

(3) उष्ट्रः
द्वित्व नहीं हुआ।

(4) राष्ट्रम् (पूर्ववत्)।

(5) भ्राष्ट्रम्
द्वित्व नहीं हुआ।

(3965) सर्वत्र शाकल्यस्य *51* (57)

शाकल्याचार्यस्य मतेन सर्वत्र द्विर्वचनं न भवति। अर्कः। मर्कः। ब्रह्मा। अपह्नुते।

अर्थ—शाकल्य के मत में सर्वत्र द्वित्व नहीं होता है।

उदा० (1) अर्कः
'अचो रहाभ्यां द्वे' से द्वित्व प्राप्त था।

(2) मर्कः (पूर्ववत्)।

(3) ब्रह्मा
'अचो रहाभ्यां द्वे' से द्वित्व प्राप्त था।

(4) अपह्नुते (पूर्ववत्)।

(3966) दीर्घादाचार्याणाम् *52* (58)

दीर्घादुत्तरस्याचार्याणां मतेन न द्वित्वं भवति। दात्रम्। पात्रम्। मूत्रम्। सूत्रम्।

अर्थ—आचार्य लोगों के मत में दीर्घ वर्ण से उत्तर द्वित्व नहीं होता है।

उदा० (1) दात्रम्
'अनचि च' से द्वित्व प्राप्त था। निषेध हुआ।

(2) पात्रम् (पूर्ववत्)।

(3) मूत्रम्
द्वित्व-निषेध।

(4) सूत्रम् (पूर्ववत्)।

(3967) झलां जश् झशि *53* (52)

झलां स्थाने जशादेशो भवति झशि परतः। लब्धा, लब्धुम्, लब्धव्यम्। दोग्धा, दोग्धुम्, दोग्धव्यम्। बोद्धा, बोद्धुम्, बोद्धव्यम्। झशीति किम्? दत्तः। दत्थः। दध्मः।

अर्थ—झल् वर्ण के स्थान पर जश् वर्ण होता है, झश् वर्ण परे रहते।

उदा० (1) लब्धा
लभ् तृच्—झषस्तथो०,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

लभ् धृ—झलां जश् झशि,
लब् धृ सु—सु।

(2) लब्धुम्
लभ् तुमुन्—अनुबन्धलोप,
लभ् धुम्—तकार को धकार,
लब् धुम्—जश्त्व,
लब् धुम्—सुलोप।

(3) लब्धव्यम्
लभ् तव्यत्—हलन्त्यम्,
लभ् धव्य—झषस्तथो०,
लब् धव्य—झलां जस् झशि,
लब् धव्य सु—अतोऽम्।

(4) दोग्धा
दुह् तृ—दाऽऽदेर्धातोर्घः,
दुघ् तृ—झषस्तथो०,
दुघ् धृ—झलां जश् झशि,
दोग्धृ सु—पुगन्तलघूप०।

(5) दोग्धुम्
दुह् तुमुन्—अनुबन्धलोप,
दोघ् तुम्—लघूपधगुण, घकार,
दोग् धुम् सु—धकार, जश्त्व।

(6) दोग्धव्यम्
दुह् तव्यत्—हलन्त्यम्, लघूपधगुण,
दोघ् तव्य—घकार,
दोग् धव्य सु—धकार, जश्त्व।

(7) बोद्धा
बुध् तृ—झषस्तथो०,
बुध् धृ—लघूपधगुण,
बोद् धृ सु—जश्त्व।

(8) बोद्धुम्
बुध् तुमुन्—लघूपधगुण,
बोध् तुम्—झषस्तथो०,
बोध् धुम्—झलां जश् झशि,
बाद् धुम् सु—सु।

(9) बोद्धव्यम्
बुध् तव्यत्—हलन्त्यम्, लघूपधगुण,
बोध् धव्य—झषस्तथो०,
बोद् धव्य सु—झलां जश् झशि।

झशीति०—झश् वर्ण परे रहते जश् आदेश होता है।

(10) दत्तः
दा तस्—शप्, श्लुत्व,
दा दा तस्—'श्लौ' से द्वित्व, ह्रस्वः,
द द् तस्—श्नाऽभ्यस्तयो०, खरि च।

(11) दत्थः
दा थस्—पूर्ववत् श्लुत्व,
द दा थस्—द्वित्व, आकारलोप,
द द् थस्—खरि च।

(12) दध्मः
दा धा मस्—श्लुत्व,
द धा मस्—द्वित्व, ह्रस्वः, अभ्यासे चर्च,
द ध् मस्—आकारलोप।

(3968) अभ्यासे चर्च *54* (2182)

अभ्यासे वर्त्तमानानां झलां चरादेशो भवति, चकाराज्जश्च। चिखनिषति। चिच्छित्सति। टिठकारयिषति। तिष्ठासति। पिफकारयिषति। बुभूषति। जिघत्सति। डुढौकिषते। *प्रकृतिचरां प्रकृतिचरो भवन्ति*। चिचीषति। टिटीकिषते। तितनिषति। *प्रकृतिजशां प्रकृतिजशो भवन्ति*। जिजनिषते। बुबुधे। ददौ। डिड्ये।

अर्थ—अभ्यास में वर्त्तमान झल् वर्ण के स्थान पर चर् वर्ण तथा जश् वर्ण होता है।

उदा० (1) चिखनिषति
खन् सन्—सन्, इट्, 'सन्यङोः' से द्वित्व,
ख खन् इट् स—पूर्वोऽभ्यासः, हलादिः शेष; अभ्यासे चर्च से चकार,
चिखनिष—सन्यतः, आदेशप्रत्यययोः, धातुसंज्ञा,
चिखनिष शप् तिप्—पूर्ववत् सनः, अतो गुणे।

(2) चिच्छित्सति
छिद् सन्—सन्यङोः, पूर्वोऽभ्यासः
छि छिद् स—हलादिः शेषः, अभ्यासे चर्च,
चि त् छि त् स—'छे च' से 'तुक्', 'खरि च' से तकार,
चिच् छित्स शप् तिप्—स्तोः श्चुना श्चुः, धातुसंज्ञा, अतो गुणे।

(3) जिझकारयिषति (न्यासे प्रदर्शितः)

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

झकारम् आचष्टे—'तत्करोति तदाचष्टे' से 'णिच्',
झकार इ—इष्ठवत्, टिलोप,
झकारि सन्—धातुसंज्ञा, इट्,
झकारयिष—गुण, अय्, आदेशप्रत्यययोः,
जझकारयिष—अभ्यासे चर्च, धातु संज्ञा,
जिझकारयिष—सन्यतः, धातुसंज्ञा,
जिझकारयिष शप् तिप्—अतो गुणे।

(4) टिठकारयिषति
ठकारम् आचष्टे—'तत्करोति तदाचष्टे' से 'णिच्',
ठकार इ—इष्ठवद्भाव, टिलोप,
ठकारि स—धातुसंज्ञा, सन्,
ठकारय् इस—इट्, सार्वधातुकार्धधा० से गुण, अय्, आदेश-प्रत्यययोः,
ट ठकार यिष—सन्यङोः, हलादिः शेषः, अभ्यासे चर्च,
टिठकारयिष ति—सन्यतः, धातुसंज्ञा, अतो गुणे।

(5) तिष्ठासति
ष्ठा → स्था—धात्वादेः षः सः, ठकार को थकार,
स्था स्था स—सन्, द्वित्व, पूर्वोऽभ्यासः,
थ स्था स—हलादिः शेषः, शर्पूर्वाः खयः, ह्रस्वः, अभ्यासे चर्च,
ति स्था स—सन्यतः, आदेशप्रत्यययोः, ष्टुना ष्टुः,
तिष्ठा स शप् ति—धातुसंज्ञा, अतो गुणे।

(6) पिफकारयिषति
फकारम् आचष्टे—'तत्करोति तदाचष्टे' से 'णिच्',
फकारयि स—'ठकारयि स' की तरह सभी कार्य, द्वित्व,
पफकारयिस—अभ्यासे चर्च, आदेशप्रत्यययोः,
पिफकारयिष—सन्यतः, धातुसंज्ञा,
पिफकारयिष शप् ति—अतो गुणे।

(7) बुभूषति
भू सन्—सन्यङोः, पूर्वोऽभ्यासः,
भु भू स—ह्रस्वः, अभ्यासे चर्च,
बुभूष—आदेशप्रत्यययोः, धातुसंज्ञा,
बुभूष शप् ति—पूर्ववत् सनः,
बुभूषति—अतो गुणे।

(8) जिघत्सति
अद् सन्—'लुङ् सनोर्घस्लृ' से 'घस्' आदेश,
घस् स—'सन्यङोः' से द्वित्व,
घ घस् स—द्वित्व, हलादिः शेषः,
जिघस् स—अभ्यासे चर्च, सन्यतः, 'सः स्यार्ध०' से तकार, धातुसंज्ञा,
जिघत् स शप् तिप्—अतो गुणे।

(9) डुढौकिषते
ढौक् इ सन्—इट्, 'सन्यङोः' से द्वित्व,
ढु ढौक् इ स—अभ्याससंज्ञा, ह्रस्वः,
डु ढौकिष—अभ्यासे चर्च, आदेशप्रत्यययोः, धातुसंज्ञा,
डु ढौकिष शप् त—पूर्ववत् सनः, अतो गुणे।

प्रकृति०—प्रकृति चर् के स्थान पर प्रकृति चर् होते हैं। यथा—

(10) चिचीषति
चि सन्—'अज्झनगमां०' से दीर्घ,
ची ची स—द्वित्व, पूर्वोऽभ्यासः,
चिचीष—ह्रस्वः, आदेशप्रत्यययोः, धातुसंज्ञा,
चि चीष शप् तिप्—अतो गुणे।

(11) टिटीकिषते
टीक् इट् सन्—पूर्ववत् द्वित्वादि,
टिटीकिष—ह्रस्वः, षत्व, लकारकार्य।

(12) तितनिषति
तन् इट् सन्—द्वित्वादि,
त तन् इ ष—हलादिः शेषः, आदेशप्रत्यययोः,
तितनिष—सन्यतः, लकारकार्य।

(13) तितीर्षति
तॄ सन्—सन्,
तिर् स—ऋत इद्धातोः, उरण् रपरः,
तीर् स—'हलि च' से दीर्घ, सन्यङोः,
ति तीर् स—ह्रस्वः, आदेशप्रत्यययोः, धातुसंज्ञा,
ति तीर्ष शप् ति—अतो गुणे।

प्रकृति०—प्रकृति जश् के स्थान पर प्रकृति जश् होता है। यथा—

(14) जिजनिषते
जन् इट् सन्—इट्, 'सन्यङोः' से द्वित्व,
जिजनिष—हलादिः शेषः, सन्यतः, षत्व,
जिजनिष शप् त—अतो गुणे।

(15) बुबुधे
बुध् त—लिटस्तझयो०,
बुध् एश्—सन्यङोः, पूर्वोऽभ्यासः,

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बु बुध् ए—हलादिः शेषः।

(16) ददौ
दा णल्—लिट्, णल् आदेश,
दा औ—आत औ णलः,
दा दा औ—द्वित्व,
द दा औ—ह्रस्वः, वृद्धिरेचि।

(17) डिड्ये
डी त—पूर्ववत् 'एश्', द्वित्व,
डि डी ए—ह्रस्वः, यण्।

(3969) **खरि च *55* (121)**

खरि च परतो झलां चरादेशो भवति। जश्ग्रहणं नानुवर्तते; पूर्वसूत्रे चानुकृष्टत्वात्। भेत्ता, भेत्तुम्, भेत्तव्यम्। युयुत्सते। आरिप्सते। आलिप्सते।

अर्थ—झल् वर्ण के स्थान पर चर् वर्ण होता है, खर् वर्ण परे रहते। झल् का अनुवर्त्तन नहीं है, पूर्व सूत्र में अनुवृत्त होने से।

उदा० (1) भेत्ता
भिद् तृच्—हलन्त्यम्, आर्धधातुकं शेषः,
भेद् तृ—पुगन्तलघूपधस्य च,
भेत् तृ सु—चर् (तकार)।

(2) भेत्तुम्
भिद् तुमुन्—अनुबन्धलोप,
भेत् तुम् सु—चर्त्व, सु।

(3) भेत्तव्यम्
भिद् तव्यत्—लघूपधगुण, चर्त्व, सु।

(4) युयुत्सते
युध् सन्—चर्त्व,
युत्स—द्वित्व, हलादिः शेषः,
यु युत्स—धातुसंज्ञा, पूर्ववत् सनः,
यु युत्स शप् त—अतो गुणे, टित आत्मनेपदा०।

(5) आरिप्सते
रभ् सन्—'सनि मीमा०' से 'इस्',
रिस् भ् स—'स्कोः संयोगा०' से सकारलोप,
रिप् स—खरि च, धातुसंज्ञा,
आ रिप्स शप् त—लकारकार्य।

(6) आलिप्सते
लभ् सन्—पूर्ववत् सभी कार्य।

(3970) **वाऽवसाने *56* (206)**

'झलाम्', 'चर्' इति वर्तते। अवसाने वर्त्तमानानां झलां वा चरादेशो भवति। वाक्, वाग्। त्वक्, त्वग्। श्वलिट्, श्वलिड्। त्रिष्टुप्, त्रिष्टुब्।

अर्थ—झलाम्, चर्—इनका अनुवर्त्तन है। अवसान में वर्त्तमान झल् वर्ण के स्थान पर चर् आदेश विकल्प से होता है।

उदा० (1) वाक्
वाच् सु—हल्ङ्याब्भ्यो०,
वाच्—पदसंज्ञा, चोः कुः, झलां जशोऽन्ते,
वाग्—वाऽवसाने।

(2) वाग्
चर्त्व अभाव।

(3) त्वक्
त्वच्—सु, सुलोप, पदसंज्ञा, कुत्व,
त्वग्—जश्त्व, चर्त्व।

(4) त्वग्
त्वग्—इस दशा में पूर्ववत्,
त्वग्—चर्त्व अभाव।

(5) श्वलिट्
श्वलिट्—पूर्ववत् पदसंज्ञा, जश्त्व,
श्वलिड्—चर्त्व।

(6) श्वलिड्
श्वलिड्—पदसंज्ञा, जश्त्व,
श्वलिड्—चर्त्व अभाव पक्ष।

(7) त्रिष्टुप्
चर्त्व पक्ष।

(8) त्रिष्टुब्
चर्त्व अभाव।

(3971) **अणोऽप्रगृह्यस्यानुनासिकः *57* (110)**

अणोऽप्रगृह्यसंज्ञस्यावसाने वर्तमानस्य वाऽनुनासिकादेशो भवति। दधिँ, दधि। मधुँ मधु। कुमारीँ, कुमारी। अण इति किम्। कर्तृ। हर्तृ। अप्रगृह्यस्येति किम्? अग्नी। वायू।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अर्थ—जो प्रगृह्यसंज्ञक नहीं हैं, अवसान में स्थित ऐसे अण् के स्थान पर अनुनासिक आदेश विकल्प से होता है।

उदा० (1) दधिँ
अनुनासिक पक्ष।

(2) दधि
अनुनासिक अभाव पक्ष।

(3) मधुँ
अनुनासिक।

(4) मधु
अनुनासिक अभाव।

(5) कुमारीँ
अनुनासिक पक्ष।

(6) कुमारी
अनुनासिक अभाव।

अण०—अण् को अनुनासिक होता है। यथा—

कर्तृ, हर्तृ–अवसान में ऋकार है। जो अण् वर्ण नहीं है। अतः अनुनासिक नहीं हुआ।

अप्रगृ०—अप्रगृह्य अण् को अनुनासिक होता है। यथा—

अग्नी। वायू—'ईदूदेद् द्विवचनं०' से प्रगृह्यसंज्ञा है। अतः अवसान में वर्त्तमान होने पर भी अनुनासिक नहीं होता है।

(3972) अनुस्वारस्य ययि परसवर्णः *58*

(124)

अनुस्वारस्य ययि परतः परसवर्ण आदेशो भवति। शङ्किता, शङ्कितुम्, शङ्कितव्यम्। उञ्छिता, उञ्छितुम्, उञ्छितव्यम्। कुण्डिता, कुण्डितुम्, कुण्डितव्यम्। नन्दिता, नन्दितुम्, नन्दितव्यम्। कम्पिता, कम्पितुम्, कम्पितव्यम्। इह 'कुर्वन्ति, वृषन्ति'–इत्यत्र णत्वस्यासिद्धत्वात्पूर्वं नकारस्यानुस्वारः क्रियते, तस्यापि परसवर्णेन पुनर्नकार एव भवति, तस्याप्यसिद्धत्वात् पुनर्णत्वं न भवति। एवमनुस्वारीभूतो णत्वमतिक्रामतीति। ययीति किम्? आचिक्रंस्यते।

अर्थ—यय् वर्ण परे रहते अनुस्वार के स्थान पर परसवर्ण आदेश होता है।

उदा० (1) शङ्किता
शकि → शन् क्—इदितो नुम् धातोः,
शंक्—नश्चाऽपदान्त०, परसवर्ण,
शङ्क् तृ—इट्,
शङ्क् इ तृ—सु।

(2) शङ्कितुम्
शङ्क्—पूर्ववत्,
शङ्क् इ तुम्—'सु' होकर रूप बनता है।

(3) शङ्कितव्यम्
शङ्क् इ तव्य सु—पूर्ववत्।

(4) उञ्छिता
उछि → उन् छ्—इदितो नुम् धातोः,
उञ्छ्—नश्चाऽपदा० अनुस्वारस्य०,
उञ्छ् तृच्—इट्,
उञ्छ् इ तृ—सु।

(5) उञ्छितुम्
उञ्छ्—पूर्ववत्,
उञ्छ् इट् तुमुन्—सु।

(6) उञ्छितव्यम्
उञ्छ्—पूर्ववत्,
उञ्छ् इट् तव्यत्—सु।

(7) कुण्डिता
कुडि → कु न् ड्—इदितो नुम्०,
कुण्ड्—अनुस्वार, परसवर्ण,
कुण्ड् तृच्—इट्,
कुण्ड् इ तृ—सु।

(8) कुण्डितुम्
कुण्ड्—पूर्ववत् तुमुन् प्रत्यय, अनुबन्ध लोप, इट् तथा सु।

(9) कुण्डितव्यम्
कुण्ड्—पूर्ववत्,
कुण्ड् इट् तव्यत्—सु।

(10) नन्दिता
टुनदि → नन् द्—आदिर्ञिटुडवः, उपदेशेऽज०, इदितो नुम्०,
नन्द्—अनुस्वार, परसवर्ण,
नन्द् तृ—इट्,
नन्द् इ तृ—सु।

(11) नन्दितुम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नन्द्—पूर्ववत्,
नन्द् इट् तुमुन्—सु।

(12) नन्दितव्यम्
नन्द्—पूर्ववत्,
नन्द् इ तव्यत्—सु।

(13) कम्पिता
कपि → क न् प्—इदितो नुम् धातोः,
कम्प्—नश्चाऽपदा०, अनुस्वारस्य०,
कम्प् इट् तृच्—सु।

(14) कम्पितुम्
कम्प्—पूर्ववत्,
कम्प् इट् तुमुन्—सु।

(15) कम्पितव्यम्
कम्प्—पूर्ववत्,
कम्प् इट् तव्यत्—सु।

इह०—निम्नलिखित स्थलों पर णत्व के असिद्ध होने से पूर्व नकार को अनुस्वार किया जाता है, उसका पुनः परसवर्ण नकार ही होता है। उसके पुनः असिद्ध होने से णकार नहीं होता है। इस प्रकार अनुस्वारभूत णत्व का अतिक्रमण करता है।

(16) कुर्वन्ति
कृ झि—लट्, झोऽन्तः,
कृ उ अन्ति—तनादिकृञ्भ्य उः, गुण, अत उत् सार्व०,
कुर् उ अन्ति—यण्, नश्चाऽपदान्तस्य० से अनुस्वार, पुनः अनुस्वार को परसवर्ण,
कुर्वन्ति—णकार नहीं हुआ।

(17) वृषन्ति
वृष् अ अन्ति—पूर्ववत् अनुस्वार, परसवर्ण।

यथी०—यय् वर्ण परे रहते अनुस्वार को परसवर्ण होता है।

(18) आक्रंस्यते
आ क्रम् त—आङ उद्गमने, लृट् शेषे च, स्यतासी०,
आ क्रम् स्य त—नश्चाऽपदा०,
आक्रंस्यत—अनुस्वार से पर सकार है जो 'यय्' नहीं है। अतः परसवर्ण नहीं हुआ, एत्व।

(19) आचिक्रंसते
आ क्रम्—'आङ उद्गमने' से आत्मनेपद,
आ क्रम् सन्—'सन्यङोः' से द्वित्व,
आ क क्रम् स—हलादिः शेषः,
आ चि क्रम् स—कुहोश्चुः, सन्यतः,
आचिक्रंस—नश्चाऽपदान्त०, अनुस्वार से पर यय् न होने से परसवर्ण नहीं हुआ, धातुसंज्ञा,
आचिक्रंसते—पूर्ववत् सनः, शप्।

(3973) वा पदान्तस्य *59* (125)

पदान्तस्यानुस्वारस्य ययि परतो वा परसवर्णादेशो भवति। तङ्कथञ्चित्रपक्षण्डयमानन्नभःस्थम्पुरुषोऽवधीत्, तं कथं चित्रपक्षं डयमानं नभःस्थं पुरुषोऽवधीत्।

अर्थ—यय् वर्ण परे रहते पदान्त में अनुस्वार को विकल्प से परसवर्ण होता है।

उदा० (1) तङ्कथञ्चित्रदपक्षण्डयमानन्नभःस्थम्पुरुषोऽवधीत्
तम् कथम् चित्रपक्षम् डयमानम् नभस्थम्—सर्वत्र पदान्त में मकार है, 'मोऽनुस्वारः' से सर्वत्र अनुस्वार,
तं कथं चित्रपक्षं डयमानं नभस्थं—'वा पदान्तस्य' से सर्वत्र परसवर्ण,
तङ्कथञ्चित्रपक्षण्डयमान्नभस्थम्पुरुषः।

(2) तं कथं चित्रपक्षं डयमानं नभस्थं पुरुषः
पक्ष में परसवर्ण नहीं हुआ।

(3974) तोर्लि *60* (117)

तवर्गस्य लकारे परतः परसवर्णादेशो भवति। अग्निचिल्लुनाति। सोमसुल्लुनाति। भवाँल्लुनाति। महाँल्लुनाति।

अर्थ—लकार परे रहते तवर्ग के स्थान पर परसवर्ण आदेश होता है।

उदा० (1) अग्निचिल्लुनाति
अग्निचित् लुनाति—परसवर्ण लकार।

(2) सोमसुल्लुनाति (पूर्ववत्)।

(3) भवाल्ँ लुनाति
भवान् लुनाति—नकार के स्थान पर 'ल्ँ' परसवर्ण होता है।

(4) महाल्ँ लुनाति
महान् लुनाति—पूर्ववत्।

(3975) उदः स्थास्तम्भोः पूर्वस्य *61* (118)

'सवर्णः' इति वर्तते। उद उत्तरयोः स्था, स्तम्भ-इत्ये-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तयोः पूर्वसवर्णादेशो भवति। उत्थाता उत्थातुम्, उत्थातव्यम्। स्तम्भेः खल्वपि-उत्तम्भिता, उत्तम्भितुम्, उत्तम्भितव्यम्। स्थास्तम्भोरिति किम्? उत्स्नाता।* उत्पूर्वस्य स्कन्देश्छन्दस्युपसंख्यानम्*। अग्ने दूरमुत्कन्दः। *रोगे चेति वक्तव्यम्*। उत्कन्दको नाम रोगः। कन्दतेर्वा धात्वन्तरस्यैतद्रूपम्।

अर्थ—'सवर्णः' का अनुवर्त्तन है। उद् से उत्तर स्था तथा स्तम्भ्—इनके परे रहते पूर्वसवर्ण आदेश होता है।

उदा० (1) उत्थाता
उद् स्था तृ—आदेः परस्य,
उद् थ् थातृ—खरि च,
उद् त् थातृ—खरि च,
उत् त् थातृ—'अनचि च' से पूर्व तकार को द्वित्व,
उत् त् त् थातृ—'झरो झरि सवर्णे' से लोप,
उत् त् थातृ—सु।

(2) उत्त्थाता
उत् त् त् थातृ—पूर्ववत्,
उत् त्थातृ सु—झरो झरि० से लोप अभाव पक्ष में।

(3) उत्थाता
उत् त् थातृ—इस दशा में,
उत्थातृ—'अनचि च' से द्वित्व अभाव पक्ष में 'झरो झरि०' से लोप,
उत्थातृ—सु।

(4) उत्थातुम्
'तुमुन्' में पूर्ववत्।

(5) उत्थातव्यम्
'तव्यत्' में पूर्ववत्।

(6) उत्तम्भिता
उद् स्तम्भ् तृ—पूर्ववत् थकार, चर्त्व,
उत् त् तम्भ् तृ—'झरो झरि०' से लोप,
उत्तम्भ् इ तृ—सु।

(7) उत्तम्भितुम्
'तुमुन्' में पूर्ववत् पूर्वसवर्ण।

(8) उत्तम्भितव्यम्
'तव्यत्' में।

स्था०—स्था तथा स्तम्भ् को पूर्वसवर्ण होता है।

(9) उत्स्नाता
उद् स्ना तृ—पूर्वसवर्ण नहीं हुआ, खरि च,
उत् स्ना तृ—सु।

उत्पू०—वेद के विषय में उद् पूर्वक स्कन्द् धातु को पूर्वसवर्ण होता है।

(10) उत्कन्द
उद् स्कन्द् सिप्—लोट्,
उद् स्कन्द् अ हि—सेर्ह्यपिच्च,
उद् स्कन्द—अतोः हेः,
उत् कन्द—पूर्वसवर्ण।

रोगे०—रोग अर्थ में स्कन्द् धातु को पूर्वसवर्ण होता है।

(11) उत्कन्दको रोगः
कन्दते०—'कन्द्' धातु से भी यह सिद्ध होता है।

(3976) झयो होऽन्यतरस्याम् *62* (119)

झय उत्तरस्य हकारस्य पूर्वसवर्णादेशो भवति अन्यतरस्याम्। वाग्घसति, वाग् हसति। श्वलिड् ढसति, श्वलिड् हसति। अग्निचिद्धसति, अग्निचिद् हसति। सोमसुद्धसति। सोमसुद् हसति। त्रिष्टुब्भसति, त्रिष्टुब् हसति। झय इति किम्? प्राङ् हसति। भवान्हसति।

अर्थ—झय् वर्ण से उत्तर हकार के स्थान पर पूर्वसवर्ण विकल्प से होता है।

उदा० (1) वाग्घसति
वाच् हसति—चोः कुः,
वाक् हसति—पूर्वसवर्ण घकार,
वाक् घसति—झलां जश् झशि।

(2) वाग् हसति
पूर्वसवर्ण अभाव पक्ष। जश्त्व।

(3) श्वलिड् ढसति
श्वलिड् हसति—पूर्वसवर्ण, ढकार,
श्वलिड् ढसति—जश्त्व।

(4) श्वलिड् हसति
पूर्वसवर्ण अभाव।

(5) अग्निचिद् धसति
अग्निचित् हसति—पूर्वसवर्ण धकार,
अग्निचिद् धसति—जश्त्व।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(6) अग्निचिद् हसति
पूर्वसवर्ण अभाव।

(7) सोमसुद् धसति
सोमसुत् हसति—पूर्वसवर्ण, जश्त्व।

(8) सोमसुद् हसति
पूर्वसवर्ण अभाव।

(9) त्रिष्टुब् भसति
त्रिष्टुप् हसति—पूर्वसवर्ण।

(10) त्रिष्टुब् हसति
पूर्वसवर्ण अभाव।

झय०—झय् वर्ण से उत्तर हकार को पूर्वसवर्ण होता है।

(11) प्राङ् हसति
हकार ङकार से उत्तर है, जो झय् वर्ण नहीं है। पूर्वसवर्ण नहीं हुआ।

(12) भवान् हसति (पूर्ववत्)।

(3977) शश्छोऽटि *63* (120)

'झयः' इति वर्त्तते, 'अन्यतरस्याम्' इति च। झय उत्तरस्य शकारस्य अटि परतश्छकारादेशो भवति अन्यतरस्याम्। वाक्छेते, वाक् शेते। अग्निचिच्छेते, अग्निचित् शेते। सोमसुच्छेते, सोमसुत् शेते। श्वलिट्छेते श्वलिट् शेते। त्रिष्टुप्छेते, त्रिष्टुप् शेते। *छत्वममीति वक्तव्यम्*। किं प्रयोजनम्? तच्छ्लोकेन, तच्छ्मश्रुणा-इत्येवमर्थम्।

अर्थ—झयः, अन्यतरस्याम्—इनका अनुवर्त्तन है। झय् वर्ण से उत्तर शकार के स्थान पर छकार आदेश विकल्प से होता है, अट् परे रहते।

उदा० (1) वाक् छेते
वाच् शेते—चोः कुः,
वाक् छेते—झय् वर्ण (ककार) से उत्तर शकार को छकार हुआ, अट् वर्ण (एकार) के परे रहते।

(2) वाक् शेते
पक्ष में छकार नहीं हुआ।

(3) अग्निचिच्छेते
अग्निचित् शेते—झय् (तकार) से पर शकार है, अट् (एकार) परे है, शकार को छकार,
अग्निचित् छेते—स्तोः श्चुना श्चुः,
अग्निचिच् छेते—रूप बना।

(4) अग्निचित् शेते
पक्ष में छकार नहीं हुआ।

(5) सोमसुच् छेते
छकार, श्चुत्व।

(6) सोमसुत् शेते
छकार अभाव।

(7) श्वलिट् छेते
श्वलिट् शेते—झय् वर्ण (टकार) से उत्तर शकार को छकार हुआ, अट् वर्ण (एकार) परे रहते।

(8) श्वलिट् शेते
पक्ष में छत्व अभाव।

(9) त्रिष्टुप् छेते
त्रिष्टुप् शेते—झय् (यकार) से उत्तर शकार है, इससे पर अट् वर्ण (एकार) है, छकार हुआ।

(10) त्रिष्टुप् शेते
पक्ष में छत्व अभाव।

छत्वम०—अम् परे रहते छकार होता है। इसका क्या प्रयोजन है?

(समा०) निम्नलिखित में भी छत्व होता है—

(11) तच्छ्लोकेन
तत् श्लोकेन—झय् वर्ण (तकार) से उत्तर शकार है, शकार से पर लकार है, जो अट् वर्ण नहीं है, छत्व प्राप्त नहीं हुआ, प्रकृत वार्त्तिक से छत्व हुआ। श्चुत्व।

(12) तच्छ्मश्रुणा
तत् श्मश्रुणा—पूर्ववत् शकार को छकार,
तत् छ्मश्रुणा—श्चुत्व।

(3978) हलो यमां यमि लोपः *64* (60)

'अन्तरस्याम्' इति वर्तते। हल उत्तरेषां यमां यमि परतो लोपो भवति अन्यतरस्याम्। शय्या इत्यत्र द्वौ यकारौ, क्रमजस्तृतीयः; तत्र मध्यमस्य वा लोपो भवति-शय्या, शय्या। अदितेरपत्यमादित्य इत्यत्र तकारात्पर एको यकारः, 'यणो मय' इति क्रमजो द्वितीयः, तत्र मध्यमस्य वा लोपो भवति। आदित्यः, आदित्यः। आदित्यो देवता

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अस्य स्थालीपाकस्येति आदित्य्यः, आदित्य इति। अत्रापि द्वौ यकारौ; क्रमजस्तृतीयः; तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। हल इति किम्? आत्रम्। यमामिति किम्? अग्निः। अर्घ्यम्। यमीति किम्? शार्ङ्गम्।

अर्थ—'अन्यतरस्याम्' का अनुवर्त्तन है। हल् वर्ण से उत्तर यम् वर्ण का लोप विकल्प से होता है, यम् वर्ण परे रहते।

'शय्य्या' शब्द में दो यकार हैं, तृतीय क्रमज यकार है। यहाँ मध्यम यकार का पाक्षिक लोप होता है।

उदा० (1) शय्य्या

शी क्यप्—सञ्ज्ञायां समजः, लशक्वत०, हलन्त्यम्,

शयङ् य—अयङ् यि०,

शय् य—अनुबन्धलोप,

शय् य् य—'अनचि च' से यकार को द्वित्व,

शय्य् य टाप् सु—अनुबन्धलोप।

(2) शय्या

शय् य् य—इस दशा में 'हलो यमां यमि लोपः' से मध्यम यकार का लोप।

अदिते०—'आदित्य' में तकार से पर एक यकार है, 'यणो मयः०' से क्रमज द्वितीय यकार हुआ। (प्रकृत सूत्र से) मध्यम का पाक्षिक लोप हुआ।

(3) आदित्य:

अदितेरपत्यम्—'दित्यदित्यादि०' से 'ण्य',

अदिति ण्य—चुटू,

आदित् य—आदिवृद्धि, इकारलोप,

आदित् य्य—'यणो मयः०' से यकार को द्वित्व,

आदित् य सु—प्रकृत सूत्र से लोप।

(4) आदित्य्य:

लोप अभाव पक्ष।

अत्रापि०—यहाँ भी दो यकार हैं। मध्यम का अथवा मध्यम दो यकारों का लोप होता है।

हल० हल् से पर यम् का लोप होता है।

(5) आत्रम्

'अत्राण्णः' से निपातन,

आत्र—यम् (नकार) से पर यम् (नकार) है, परन्तु प्रथम यम् हल् से उत्तर नहीं है। अतः लोप नहीं हुआ,

आत्र—सु।

यमा०—हल् से उत्तर यम् वर्ण का लोप होता है।

(6) अग्नि:

गकार से परे यम् (नकार) है, परन्तु गकार यम् नहीं है। अतः गकार का लोप नहीं होता है।

(7) अर्घ्यम्

'पादार्घाभ्यां च' से तादर्थ्य में 'यत्' हुआ है। हल् वर्ण (रेफ) से उत्तर घकार है, इससे उत्तर यम् (यकार) है; परन्तु घकार यम् नहीं है। अतः इसका लोप नहीं होता है।

यमीति०—हल् से उत्तर यम् का लोप होता है, यम् परे रहते।

(8) शार्ङ्गम्

शृङ्गस्य विकारः—'अण्' होता है।

शार् ङ् ग्म्—हल् वर्ण (रेफ) से उत्तर यम् (ङकार) है, उससे परे गकार है, जो यम् नहीं है। अतः ङकार का लोप नहीं होता है।

(3979) झरो झरि सवर्णे *65* (71)

'हलः' इति वर्तते, 'अन्यतरस्याम्' इति च। हल उत्तरस्य झरो झरि सवर्णे परतो लोपो भवति अन्यतरस्याम्। प्रत्तम्, अवत्तमित्यत्र त्रयस्तकाराः, क्रमजश्चतुर्थः; तत्र मध्यमस्य मध्यमयोर्वा लोपो भवति। मरुत्त इत्यत्र चत्वारस्तकाराः, क्रमजः पञ्चमः; तत्र मध्यमस्य मध्यमयोर्मध्यमानां वा लोपो भवति। मरुच्छब्दस्य हि उपसंख्यानसामर्थ्याद् 'अच उपसर्गात्तः' (7.4.47) इति तत्वं भवति। झर इति किम्? शार्ङ्गम्। झरीति किम्? प्रियपञ्चा। अल्लोपस्य च 'पूर्वत्रासिद्धे न स्थानिवत्' (पु०वृ० 112) इति स्थानिवद्भावप्रतिषेधादत्र चकारस्य अकारे लोपः स्यात्। सवर्ण इति किम्? तर्प्ता, तर्प्तुम्, तर्प्तव्यम्। सवर्णग्रहणसामर्थ्यादिह सङ्घातानुदेशो न भवति, सवर्णमात्रे लोपो विज्ञायते। तेन शिण्ढि, पिण्ढि इति ढकारे डकारस्य लोपो भवति।

अर्थ—हलः, अन्यतरस्याम्—इनका अनुवर्त्तन है। हल् वर्ण से उत्तर झर् वर्ण का लोप विकल्प से होता है, झर् सवर्ण परे रहते।

प्रत्तम्, अवत्तम्—इनमें तीन तकार हैं। क्रमज चतुर्थ तकार है। तब मध्यम तकार का अथवा मध्यम दो तकारों का लोप होता है।

'मरुत्तः' यहाँ चार तकार हैं। क्रमज पञ्चम तकार है। यहाँ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मध्यम तकार का अथवा दो मध्यम तकारों का अथवा मध्यम तकारों का लोप होता है। मरुत् शब्द को उपसंख्यानसामर्थ्य से 'अच उपसर्गात्तः' से तत्व होता है।

झर०—झर् वर्ण का लोप होता है।

उदा० (1) शार्ङ्गम्

हल् वर्ण (रेफ) से उत्तर डकार है, जो झर् नहीं है। अतः झर् वर्ण गकार के परे रहते डकार का लोप नहीं हुआ।

झरीति०—झर् परे रहते झर् वर्ण का लोप होता है।

(2) प्रियपञ्चा

प्रियः पञ्चाऽस्य—'अल्लोपोऽनः' से अकारलोप,

प्रियपञ्चन्—स्तोः श्चुना श्चुः,

प्रियपञ्च् ञ् टा—तृतीया एकवचन, चुटू, यहाँ हल् (ञकार) से पर झर् (चकार) का लोप नहीं होता है, कारण कि चकार से पर ञकार है, जो झर् वर्ण नहीं है।

अल्लोप०—'पूर्वत्राऽसिद्ध के विषय में स्थानिवत्' नहीं होता है। इससे अकारलोप के स्थानिवद्भाव का निषेध होने से यहाँ ञकार परे रहते चकार का लोप होता है।

सवर्ण०—सवर्ण झर् के परे रहते झर् का लोप होता है।

(3) तर्प्ता

तर् प् ता—हल् (रेफ) से उत्तर झर् (पकार) है, इससे पर झर् (तकार) है परन्तु यकार तथा तकार सवर्ण नहीं है। अतः झर् (यकार) का लोप नहीं हुआ।

(4) तर्प्तुम्

पूर्ववत् यकार का लोप नहीं हुआ।

(5) तर्प्तव्यम् (पूर्ववत्)।

सवर्ण०—सवर्णग्रहणसामर्थ्य से यहाँ यथासंख्य नियम प्रवृत्त नहीं होता है। सवर्णमात्र के परे रहते लोप जानना चाहिए। तब निम्नलिखित में ढकार के परे रहते डकार का लोप होता है।

(6) शिण्ढि

शिष् सिप्—लोट्, हलन्त्यम्,

शि श्नम् ष् सि—'शप्' को बाध कर 'श्नम्', लशक्वतद्धिते,

शि न ष् हि—सेर्ह्यपिच्च,

शि न् ष् हि—श्नसोरल्लोपः,

शि न् ष् धि—हुझल्भ्यो हेर्धिः,

शि न् ड् धि—'झलां जश् झशि' से डकार,

शिण्ड् धि—'अनुस्वारस्य ययि०' से परसवर्ण,

शिण्ड् ढि—'ष्टुना ष्टुः' से ढकार,

शिण्ढि—प्रकृत सूत्र से डकार का लोप।

(7) पिण्ढि

पिष् सिप्—सभी कार्य पूर्ववत्।

(3980) उदात्तादनुदात्तस्य स्वरितः *66* (3660)

उदात्तादुत्तरस्यानुदात्तस्य स्वरितादेशो भवति। गार्ग्यः। वात्स्यः। पचंति। पठंति। अस्य स्वरितस्यासिद्धत्वाद् 'अनुदात्तं पदमेकवर्जम्' (6.1.158) इत्येतन्न प्रवर्त्तते। तेनोदात्तस्वरितावुभावपि श्रूयेते।

अर्थ—उदात्त से उत्तर अनुदात्त को स्वरित आदेश होता है।

उदा० (1) गार्ग्यः

गर्ग यञ्—गर्गादिभ्यो यञ्,

गार्ग् य—तद्धितेष्वचामादेः, अकारलोप,

गार्ग्य—'ञ्नित्यादे०' से आदि उदात्त, 'अनुदात्तं पदमेकवर्जम्' से शेष अनुदात्त, उसे स्वरित,

गार्ग्यः—सु।

(2) वात्स्यः

वत्स यञ्—पूर्ववत्।

(3) पचंति

पच् तिप्—लट्,

पच् शप् तिप्—कर्त्तरि शप्, अनुबन्धलोप,

पचंति—पच् में अकार धातुस्वर से उदात्त है, 'शप्' का अकार तथा 'तिप्' का इकार 'अनुदात्तौ सुप् पितौ' से अनुदात्त है, चकारोत्तरवर्त्ती अकार स्वरित हुआ।

(4) पठंति (पूर्ववत्)।

अस्य०—इस स्वरित के असिद्ध होने से 'अनुदात्तं पदमेकवर्जम्' यह प्रवृत्त नहीं होता है। तब उदात्त व स्वरित दोनों का श्रवण होता है।

(3981) नोदात्तस्वरितोदयमगार्ग्यकाश्यप-गालवानाम् *67* (3661)

उदात्तोदयस्य स्वरितोदयस्य चानुदात्तस्य स्वरितो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते, अगार्ग्यकाश्यप-गालवानां मतेन। उदात्त उदयो यस्मात्स उदात्तोदयः। उदात्तपर इत्यर्थः। एवं स्वरितोदयः। उदात्तोदयस्तावत्-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गार्ग्यस्तत्रं । वात्स्यस्तत्रं । तत्रशब्द आद्युदात्तः, तस्मिन्नुदात्ते परतो गार्ग्यशब्दः स्वरितो न भवति । स्वरितोदयः–गार्ग्यः क्वं । वात्स्यः क्वं । क्वशब्दः स्वरितः, तस्मिन्परतोऽनुदात्तः स्वरितो न भवति । अगार्ग्यकाश्यपगालवानामिति किम् ? गार्ग्यस्तत्रं । गार्ग्यः क्वं । तेषां हि मतेन स्वरितो भवत्येव । 'उदात्तस्वरितपरस्य' इति वक्तव्ये उदयग्रहणं मङ्गलार्थम् । अनेकाचार्यसङ्कीर्तनं पूजार्थम् ।

अर्थ—उदात्तोदय का तथा स्वरितोदय का अनुदात्त का स्वरित नहीं होता है । पूर्व सूत्र के द्वारा प्राप्त (स्वरित स्वर) का निषेध किया जा रहा है । गार्ग्य, काश्यप तथा गालव के मत में नहीं होता है ।

उदात्त उदयो यस्मात्—उदात्तोदयः । इसी प्रकार—स्वरितोदय ।

उदा० (1) गार्ग्यस्तत्रं

'तत्र' शब्द त्रल् प्रत्ययान्त है ।

(2) वात्स्यस्तत्रं (पूर्ववत्) ।

तत्र०—'तत्र' शब्द आद्युदात्त है । इस उदात्त के परे रहते 'गार्ग्य' शब्द को स्वरित नहीं होता है ।

(3) गार्ग्यः क्वं ।

(4) वात्स्यः क्वं ।

क्व०—क्व शब्द स्वरित होता है । इसके परे रहते अनुदात्त को स्वरित नहीं होता है ।

अगार्ग्य०—गार्ग्य, गालव तथा काश्यप के मत में यह निषेध नहीं होता है । गार्ग्यस्तत्र । गार्ग्यः क्व । इनके मत में स्वरित होता ही है । 'उदात्तस्वरितपरस्य' यह कहना चाहिए था । 'उदय' शब्द का ग्रहण मंगलार्थ है । अनेक आचार्यों के नाम का उल्लेख सत्कार के लिए है ।

(3982) अ अ इति *68* (11)

एकोऽत्र विवृतः, अपरः संवृतः, तत्र विवृतस्य संवृतः क्रियते । अकारो विवृतः संवृतो भवति । वृक्षः । प्लक्षः । इह शास्त्रे कार्यार्थमकारो विवृतः प्रतिज्ञातः, तस्य तथाभूतस्यैव प्रयोगो मा भूदिति संवृतप्रत्यापत्तिरियं क्रियते । दीर्घप्लुतयोश्चानेन विवृतेनाकारेण ग्रहणं नेष्यते । तेन तयोः संवृतो न भवति । संवृतेन च सर्वगुणस्य मात्रिकस्य ग्रहणमिष्यते । तेन सर्वगुण प्रत्यापद्यते ।

इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था ।
व्युत्पन्नरूपसिद्धिर्वृत्तिरियं काशिका नाम ॥

इति श्रीवामनविरचितायां काशिकायां वृत्तावष्टमाध्यायस्य चतुर्थः पादः ॥
॥ समाप्तश्चायमध्यायो ग्रन्थश्च ॥

अर्थ—एक अकार यहाँ विवृत है, दूसरा संवृत । यहाँ विवृत (अकार) के स्थान पर संवृत किया जाता है । विवृत अकार संवृत होता है ।

उदा० (1) वृक्षः (2) प्लक्षः ।

इस शास्त्र में कार्य के लिए अकार विवृत रूप में उपदिष्ट है । उसका उस रूप में प्रयोग न हो—इसलिए संवृत की प्रत्यापत्ति की जाती है ।

इस विवृत अकार के द्वारा दीर्घ तथा प्लुत का ग्रहण नहीं होता । अतः उनको संवृत्त नहीं होता है ।

संवृत्त के द्वारा सर्वगुणमात्रिक का ग्रहण होता है । तब सर्वगुण की प्रत्यापत्ति की जाती है ।

शून्यं (0) शास्त्रवियन्नेत्रप्रमितेऽब्दे (6 0 2) तु वैक्रमे ।
माघे शुक्ले तृतीयायां व्याख्येयं पूर्णतामगात् ॥
अध्येतॄणां तु तोषाय मोदाय शेमुषीजुषाम् ।
स्वान्तःसुखाय मेऽस्त्विति हार्दोऽयं मे मनोरथः ॥

इति हरियाणाप्रदेशीयभिवानीमण्डलान्तर्गतभिवानीनाम्नि लघुकाशीत्याऽऽख्यया विख्याते दिव्यधाम्नि नगरे राजकीयस्नातकोत्तरमहाविद्यालयीयसंस्कृतविभागाऽध्यक्ष-पण्डितेश्वरचन्द्रविरचितायामष्टाध्यायीव्याख्याभूतकाशिकावृत्तेः सोमलेखाऽऽख्यहिन्दीटीकायामष्टमाध्यायस्य चतुर्थः पादः ॥

॥ समाप्तश्चायमष्टमोऽध्यायः ॥

॥ समाप्तश्चाऽयं ग्रन्थस्तद्धिन्दीव्याख्याऽपि पूर्णतामगाच्छ्रीविश्वनाथप्रसादतः ॥

॥ इति शम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(क) काशिकास्थसूत्राणामकाराद्यनुक्रमेणाऽनुक्रमणी

(अत्र वामतः अध्यायपादसूत्रसंख्या निर्दिष्टाऽस्ति)

अ		अङ्गानि मैरेये	6.2.70	अजिनान्तस्योत्तर	5.3.82	अतः कृकमि०	8.3.46
अंशंहारी	5.2.69	अङ्गात्प्रातिलोम्ये	8.1.33	अजिन्रज्योश्च	7.3.60	अतश्च	4.1.177
अ अ	8.4.68	अङ्गुलेर्दारुणि	5.4.114	अजेर्व्यघञपोः	2.4.53	अतिग्रहाव्यथन०	5.4.46
अकः सवर्णे दीर्घः	6.1.101	अङ्गुल्यादि०	5.3.108	अज्झनगमां सनि	6.4.16	अतिथेर्ञ्यः	5.4.26
अकथितं च	1.4.51	अच	4.3.31	अज्ञाते	5.3.73	अतिरतिक्रमणे च	1.4.95
अकर्तरि च०	3.3.19	अच उपसर्गात्तः	7.4.47	अञ्चेः पूजायाम्	7.2.53	अतिशायने	5.3.55
अकर्तर्यृणे पञ्चमी	2.3.24	अचः	6.4.138	अञ्चेर्लुक्	5.3.30	अतेः शुनः	5.4.96
अकर्मकाच्च	1.3.26	अचः कर्तृयकि	6.1.195	अञ्चेश्छन्दस्य०	6.1.170	अतेरकृत्पदे	6.2.191
अकर्मकाच्च	1.3.35	अचः कर्मकर्तरि	3.1.62	अञ्चोऽनपादाने	8.2.48	अतो गुणे	6.1.97
अकर्मकाच्च	1.3.45	अचः परस्मिन्०	1.1.57	अञ्जेः सिचि	7.2.71	अतो दीर्घो यञि	7.3.101
अकर्मधारये	6.2.130	अचतुरविचतुर०	5.4.77	अञ्नासिकायाः	5.4.118	अतो भिस ऐस्	7.1.9
अकृच्छ्रे प्रियसुख०	8.1.13	अचश्च	1.2.28	अट्कुप्वाङ्०	8.4.2	अतोऽम्	7.1.24
अकृत्सार्वधातु०	7.4.25	अचस्तास्वत्थल्य	7.2.61	अडभ्यासव्यवाये	6.1.136	अतो येयः	7.2.80
अके जीविकार्थे	6.2.73	अचित्तहस्तिधेनो०	4.2.47	अड् गार्ग्य०	7.3.99	अतो रोरप्लुताद०	6.1.113
अकेनोर्भविष्य०	2.3.70	अचित्तादेदेश०	4.3.96	अणञौ च	4.3.33	अतो र्लान्तस्य	7.2.2
अक्षशलाका०	2.1.10	अचिर ऋतः	7.2.102	अणावकर्म०	1.3.88	अतो लोपः	6.4.48
अक्षेषु ग्लहः	3.3.70	अचि विभाषा	8.2.21	अणिञोरनार्ष०	4.1.78	अतो हलादेर्लघोः	7.2.7
अक्षोऽन्यतरस्याम्	3.1.75	अचि शीर्षः	6.1.62	अणि नियुक्ते	6.2.75	अतो हेः	6.4.105
अक्ष्णोऽदर्शनात्	5.4.76	अचि श्नुधातु०	6.4.77	अणिनुणः	5.4.15	अत्यन्तसंयोगे च	2.1.29
अगारान्ताट्ठन्	4.4.70	अचो ञ्णिति	7.2.115	अणुदित्सवर्णस्य०	1.1.69	अत्र लोपोऽभ्यास०	7.4.58
अगारैकदेशे	3.3.79	अचोऽन्त्यादि टि	1.1.64	अणृगयनादिभ्यः	4.3.73	अत्रानुनासिकः	8.3.2
अग्नीत्प्रेषणे	8.2.92	अचो यत्	3.1.97	अणो द्व्यचः	4.1.156	अत्रिभृगुकुत्स०	2.4.65
अग्नेः स्तुत्स्तोम	8.3.82	अचो रहाभ्यां द्वे	8.4.46	अणोऽप्रगृह्य०	8.4.57	अत्वसन्तस्य	6.4.14
अग्नेर्ढक्	4.2.33	अच्कावशक्तौ	6.2.157	अण्कर्मणि च	3.3.12	अत्सृदृत्वरप्रथ०	7.4.95
अग्नौ चेः	3.2.91	अच्च घेः	7.3.119	अण्कुटिलिकायाः	4.4.18	अदः सर्वेषाम्	7.3.100
अग्नौ परि०	3.1.131	अच्छ गत्यर्थवदेषु	1.4.69	अण्च	5.2.103	अदभ्यस्तात्	7.1.4
अग्राख्यायामुरसः	5.4.93	अच्छत्यन्वव०	5.4.75	अण्महिष्यादिभ्यः	4.4.48	अदर्शनं लोपः	1.1.60
अग्राद्यत्	4.4.116	अजर्यं सङ्गतम्	3.1.105	अत आदेः	7.4.70	अदस औ सु०	7.2.107
अग्रान्तशुद्ध०	5.4.145	अजादीगुण०	5.3.58	अत इञ्	4.1.95	अदसो मात्	1.1.12
अङितश्च	6.4.104	अजादेर्द्वितीयस्य	6.1.2	अत इनिठनौ	5.2.115	अदसोऽसेर्दादु०	8.2.80
